॥श्रीगणेशायनमः॥ ॥वृत्तौभाष्येतथाधातुनामपारायणादिषु॥विप्रकीर्णस्यतंत्रस्यक्रियतेसारसंग्रहः॥१॥इष्टुपसंख्यानवतीशुद्धगणाविवृत्तगूढसूत्रार्था॥व्युत्पन्नरूपसिद्धिर्वृत्तिरियंकाशिकानाम॥२॥व्याकरणस्यशरीरंपरिनिष्ठितशास्त्रकार्यमेतावत्॥शिष्टःपरिकरबंधःक्रियतेस्यग्रंथकारेण॥३॥अथशब्दानुशासनंकेषांशब्दानांवैदिकानांच कथमनुशासनंप्रकृत्यादिविभागकल्पनतयासामान्यविशेषवत्तालक्षणेन॥अथकिमर्थोवर्णानामुपदेशः प्रत्याहारार्थः प्रत्याहारोलाघवेनशास्त्रप्रवृत्त्यर्थः॥अइउण्॥अइउइत्यनेनक्रमेणवर्णानुपदिश्यांते णकारमितंकरोति प्रत्याहारार्थंतस्यग्रहणंभवत्येकेनइकारेण परउत्पकारेण स्वप्नवर्णप्रयोगेसंवृतम् दीर्घप्लुतयोस्तुविवृतत्वं तेषांसावर्ण्यप्रसिध्यर्थमकारइहशास्त्रेविवृतःप्रतिज्ञायते तस्यप्रयोगार्थं अअइतिशास्त्रांतेप्रत्यापत्तिःकरिष्यते॥१॥ ऋलृक् ऋलृइत्येतौवर्णावुपदिश्यपूर्वांश्चांतेककारमितंकरोति प्रत्याहारार्थं तस्यचग्रहणांत्रिभिःअकःसवर्णेदीर्घइत्यकारेण इकोगुणवृद्धीइतिकारेण उगितश्चेत्युकारेण अकारादयोवर्णाःप्रचुरप्रयोगविषयास्तेषांसुत्तानमुपदेशेप्रयोजनं लृकारस्तुक्लृपिस्थएवप्रयोगोप्रयुज्यते क्लृपेश्चपूर्वत्रासिद्धमितिलत्वप्रसिद्धंतत्रऋकारएवाकार्याणिभविष्यंतीइतिकिमर्थंलृकारउपदिश्यते लत्वविधानाद्यानिपराणिअकार्याणितानिलृकारेयथास्युरितिकानिपुनस्तानि प्लुतःस्वरितौद्विर्वचनंच क्लृप्तशिष प्लुतः क्लृप्तवानिति पद्माशक्तिजमसाधुशब्दरूपंतदनुकरणस्यापिसाधुत्वमिष्यते तत्स्यस्यापिलृकारस्याकार्यप्रतिपत्यर्थमुपदेशःक्रियते ऋतकइतिप्रयोक्तव्येशक्तिवैकल्यात्कुमार्याऌतकइतिप्रयुक्तं [illegible]

तस्यग्रहणंभवत्येकारेण॥३॥एङिपररूपम् एऊपरात्वादतीसाहो॥ऐऔच॥एऔइत्येतौवर्णावुपदिश्य पूर्वांश्चांतेचकारमितंकरोतिप्रत्याहारार्थंतस्यग्रहणंभवतिचतुर्भिःअचःपरस्मिन्पूर्वविधावित्यकारेण॥इचएकाचोम्प्रत्ययवच्चेतिकारेण एचोयवायावइत्येकारेण॥वृद्धिरादैजित्यैकारेण॥प्रत्याहारेनुबंधानाकथमज्ग्रहणेषुन आचारादप्रधानत्वाल्लोपश्चबलवत्तरः वर्णेषुएवर्णैकदेशावर्णांतरसमानास्तत्तयस्तेषुतत्कार्यंनभवतितच्छायानुकारिणोहितेनपुनस्तएवपृथक्प्रयत्ननिर्वर्त्याहिवर्णमिच्छन्त्याचार्याःनुद्धिधिअदेशविनामेषुतुऋकारेप्रतिविधातव्यं नुद्धिौ ऋकारग्रहणं आन्धतुः लादेशेऋकारग्रहणंप्रक्लृप्तःविनामेषुत्सकारग्रहणंकर्त्तव्यं॥४॥हयवरट्॥हयवरइत्येतान्वर्णानुपदिश्यपूर्वांश्चांतेटकारमितंकरोति प्रत्याहारार्थंतस्यग्रहणंभवत्येकेनशःछोटीत्यकारेण अथरेफौयकारात्परउपदिश्यते तस्य यरग्रहणेन घपग्रहणेनचग्रहणेसतिस्वर्नयतिप्रातर्नयतीत्यत्रयरोनुनासिकेनुनासिकोवेत्यनुनासिकःप्राप्नोति मद्रह्रदोभद्रह्रदइत्यत्रअचोरहाभ्यांद्वेइतिद्विर्वचनंप्राप्नोतिकुण्डंरथेन वनंरथेन इत्यत्रानुस्वारस्ययथीपरसवर्णइतिपरसवर्णःप्राप्नोतिनैषदोषःआलतौपदार्थेसमुदायेसकल्लक्ष्येलक्षणंप्रवर्ततेइत्येतस्मिन्दर्शनेपरोनुनासिकेनुनासिकोवेत्यंतरमोभवतीत्येवमेतत्प्रवर्तते तदनेउगकारादीनांउकारादयोयथास्वस्थानतोगुणतश्चांतरमास्तेसर्वेविहिताघेनुनस्थानतोनापिगुणश्चांतरतमास्तेसर्वेनिवर्तिताःइतिस्थानमाशंतमोरेफस्याणकारोनभवतिद्विर्वचनेपिरेफस्ययरंतत्भावेसतियत्कार्यंप्राप्तंतस्यासाच्छिष्टेनानिमित्तभावेनबाध्यतइतिनद्विरुच्यतेरेफः॥अनुस्वारस्ययपिपरसवर्णइत्येतदनुस्वारांतरतमंसस्थदेवपरसवर्णंविदधाति।नचरेफस्यानुस्वारांतरतमःसवर्णोस्तीतिनभविष्यतिकुण्डंरथेनेत्यत्र अयंमध्येविसर्जनीयजिह्वामूलीयोपध्मानियानामुपदेशःकर्तव्यःकिंप्रयोजनंउरःकेणउरःपेण उरस्केणउर

ध्येणेत्यत्रा ऋ वायेपीतिणत्वं यथास्यादिति ॥ ५ ॥ लण् ॥ ल इत्येकं वर्णमुपदिश्य पूर्वांश्चांतेणकारमितं करोति प्रत्या
हारार्थं तस्य ग्रहणं भवति त्रिभिः अनुदित्सवर्णस्य चाप्रत्यय इत्यकारेण इकोयणचीति कारेण इको परावीतिणकारेण इण्ग्रहणानि
सवर्णेपि तेनणकारेण अणू ग्रहणानि पूर्वेण अणुदित्सवर्णस्य चाप्रत्यय इत्येतदेक मनेन । अथ किमर्थमिद्ग्रहण मेवं न्ताक्षिपते ने
वंशक्यं अंतस्थानामपिहि सवर्णानां ग्रहणमिष्यते । सय्यं तासंवत्सरः तल्लोकं यल्लोकमिति अशनुस्वारस्यानुनासिके ययिपरसव
र्णे कृते तस्य परग्रहणेन ग्रहणाद्विर्वचनं यथास्यादिति । हकारादिष्वकार उच्चारणार्थः । नानुबंधः । लकारे त्वनु नासिक इत्येतान्व
र्णानुपदिश्य पूर्वांश्चांतेसंज्ञिकः प्रतिज्ञायते । तेन उरण्परइति प्रत्याहारग्रहणं भवति ॥ ६ ॥ ञमङणनम् ॥ ञमङणन इत्येता
न्वर्णानुपदिश्य पूर्वांश्चांते मकारमितं करोति प्रत्याहारार्थं तस्य ग्रहणं भवति त्रिभिः पुमः खय्यम्परे इत्यकारेण हलो यमां यमि लोपः
इति यकारेण ङमो ह्रस्वादचि ङमुण्नित्यमिति ङकारेण अमंताड्डइति अकारेण पिग्रहणमस्य दृश्यते केचित् सर्वाण्येतानि
प्रत्याहारग्रहणानि अकारेण भवन्तीति मकारानुबंधमप्याचक्षते तथा सति ङमो ह्रस्वादचि ङमुण्नित्यमिसागमिनोर्ङ्णोरभावा
दागमाभावाच्च प्रतिपत्तौ प्रतिपत्तिगौरवं भवति ॥ ७ ॥ झभञ् ॥ झभ इत्येतौ वर्णावुपदिश्य पूर्वांश्चांते ञकारमितं करोति प्रत्याहारार्थं
तस्य ग्रहणं भवत्येकेन । अतो दीर्घो यञीति यकारेण ॥ ८ ॥ घढधष् ॥ घढध इत्येतान्वर्णानुपदिश्य पूर्वांश्चांते षकारमितं करोति
प्रत्याहारार्थं तस्य ग्रहणं भवति द्वाभ्यां । एकाचो बशो भष् झषन्तस्य स्ध्वोरिति झकारभकाराभ्यां ॥ ९ ॥ जबगडदश् ॥ जबगडद इत्येतान्व
र्णानुपदिश्य पूर्वांश्चांते शकारमितं करोति प्रत्याहारार्थं तस्य ग्रहणं भवति षड्भिः । भोभगोअघोअपूर्वस्य योशि यकारेण । हशि चेति ह
कारेण नेड्वशि कृतीति वकारेण । झलां जश् झशि इति जकार झकाराभ्यां एकाचो बशो भष् झषन्तस्य स्ध्वोरिति बकारेण ॥ १० ॥ खफछठ
थचटतव् ॥ खफछठथचटत इत्येतान्वर्णानुपदिश्य शांते वकारमितं करोति प्रत्याहारार्थं तस्य ग्रहणं भवत्येकेन । नश्छव्यप्रशानिति २

छकारेण खफग्रहणमुत्तरार्थं ॥ ११ ॥ कपय् ॥ कप इत्येतौ वर्णावुपदिश्य पूर्वांश्चांते यकारमितं करोति प्रत्याहारार्थं तस्य ग्रहणं
भवति चतुर्भिः अनुस्वारस्य ययि परसवर्ण इति यकारेण मयउञो वो वेति मकारेण झयो होऽन्यतरस्यामिति झकारेण पुमः खय्
य्यम इति खकारेण ॥ १२ ॥ शषसर् ॥ शषस इत्येतान्वर्णानुपदिश्य पूर्वांश्चांते रेफमितं करोति प्रत्याहारार्थं तस्य ग्रहणं भवति पं
चभिः परोनुनासिकेनुनासिको वेति यकारेण झरो झरि सवर्ण इति झकारेण खरि चेति खकारेण अभ्यासे चर्चेति चकारेण
शर्पूर्वाः खय इति शकारेण ॥ १३ ॥ हल् ॥ हलोनंतरा इत्येकं वर्णमुपदिश्य पूर्वांश्चांते लकारमितं करोति प्रत्याहारार्थं तस्य ग्रह
णं भवति षड्भिः । अलोन्त्यात्पूर्व उपधेत्यकारेण हलोनंतराः संयोग इति हकारेण लोपो व्योर्वलीति वकारेण रलो व्युपधादिति
रेफेण झलो झलीति झेन शल इगुपधादिति शेन अथ किमर्थमुपदिष्टो पि हकारः पुनरुपदिश्यते त्ववसंज्ञ विधयो यथास्यु
रिति स्निहित्वा स्नेहित्वा इल आलो व्युपधाद्धलादेः संश्चेति कित्वं वा यथास्यात् लिहेरलिक्षदिति शल इगुपधादनिटः क्स इ
ति क्सो यथास्यात् रुदिहि स्वपिहीति वलादिलक्षण इट् यथास्यात् झलग्रहणेषु च हकारस्य ग्रहणं यथास्यात् अदाग्धांय
पिवं घवरडउत्पत्र तर्हि किमर्थमुपदिश्यते अर्हणेषु हशि चेति च हकारस्य ग्रहणं यथास्यादिति महाँहि सः देवो हसति दीर्घा
दरि समानपादे अननुनस्वरः ब्राह्मणो हसति हशि च सुत्वं यथास्यात् एकस्मान्ङ-ञ-णवगः द्वाभ्यां षत्वि भ्याग्रहणमास्थु
र्ययौ च यौ चतुर्भ्योरिः पंचभ्य शलो षड्भ्याः ॥ १४ ॥ वृद्धिरादैच् ॥ वृद्धिशब्दः संज्ञात्वेन विधीयते प्रत्येकमादैचां वर्णानां सामा
न्येन तद्भावितानामतद्भावितानां च तपरकरणमैजर्थं तादपि परस्तपर इति खट्वैलकादिषु त्रिमात्र चतुर्मात्र प्रसंगनिवृत्त्यर्थं अ
श्वलायनः ऐतिकायनः औपगवः औपमन्यवः शालीयः मालीयः वृद्धिप्रदेशाः सिचि वृद्धिः परस्मैपदेषु मृजेर्वृद्धिः वृ
द्धिर्यस्याचामादिस्तद्वृद्धमित्येवमादयः ॥ १ ॥ अदेङ्गुणः ॥ गुणशब्दः संज्ञात्वेन विधीयते प्रत्येकमदेङां वर्णानां सामान्येन तद्भा

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

का॰ प्र॰
३

पितातङ्आचितानांचतपरकरणंसवर्थिं तरिताचेता स्तोतापचति पठति गुणप्रदेशाः मिदेर्गुणः गुणोधश्रुभ्रः गुंगोपृक्ते
इत्येवमादयः ॥२॥ इकोगुणवृद्धी परिभाषेयंस्थानिनियमार्था। वृद्धिगुणौस्वसंज्ञया शिष्यमाणाविकरएवस्थानेभवतइति
वेदितव्यं वक्ष्यति सार्वधातुकार्धधातुकयोरंगस्यगुणइतिसइकएवस्थानेवेदितव्यः। तरति। नयति। भवति। वृद्धिः खल्वा
पि अकार्षीत् अहार्षीत् इकइतिकिं आत्संध्यक्षरव्यंजनानां माभूत् यानं ग्लायति उंभितेति॥ गुणवृद्धिग्रहणंस्वसंज्ञावि
धायेनियमार्थं इग्माभूत् द्यौः पंथाः सः इममिति॥३॥ नधातुलोपआर्धधातुके॥ ॥धात्वेकदेशोधातुस्तस्यलोपोयस्मि
न्नार्धधातुकेतदार्धधातुकंधातुलोपंतत्तयेगुणवृद्धीप्राप्ते तस्तेनभवतः लोलुवः पोपुवः मरीमृजः लोलूयादिभ्योपचंते
भ्यः पचाद्यचियिहितेयङोचिचेति घङ्लुकिकृते तमेवाचमाश्रित्ययेगुणवृद्धीप्राप्तेतयोःप्रतिषेधः धातुग्रहणंकिं लूञ् लविता
रंडसिवर्णल्वयेत्। अनुबंधप्रत्ययलोपे माभूत् रिषेर्हि सार्थस्य विअत्यया तस्योदाहरणम्। रेडिति अर्धधातुकग्रहणंकिं॥
त्रिधावद्धोऽस्यपशोरोरवीति। सार्वधातुके माभूत् इकत्येन अभाजिरागः॥४॥ क्ङिति च॥ निमित्तसमम्येषाङ्क्ङित् निमित्ते
येगुणवृद्धीप्राप्ते तस्तेनभवतः चितः चितवान् स्तुतः स्तुतवान् भिन्नः भिन्नवान् ङिति खल्वपि चिनुतः चिन्वंति मृष्टः मृजंति
गकारोप्यत्र चर्त्वभूतोनिर्दिश्यते ग्लाजिस्थश्चग्स्नुः जिष्णुः। भूष्णुः इकइत्येव। कामयते। लैंगवायः। नः मृजेरजादौ संक्रमेपि
वाभाषावृद्धिरिष्यते। संक्रमोनामगुणवृद्धिप्रतिषेधविषयः परिमृजंति परिमार्जंति। परिमृजतु परिममार्जतुः लघूपधस्याप्यत्र
निषेधः अचिनवं। असुनवमित्यासेलकारस्यसत्यपिङित्वेयानुबंधङित्करणं ज्ञापकं ङितियत्कार्यंलकारेतन्नभवति॥५॥
दीधीवेवीटाम् दीधीवेव्योरिटश्चयेगुणवृद्धीप्राप्ते तस्तेनभवतः। आदीध्यनं। आदीध्यकः। आवेव्यनं। आवेव्यकः। इटः खल्व
पि कणिता। रणिता॥ वृद्धिरियेन संभवति। लघूपधगुणस्यात्र प्रतिषेधः॥६॥ हलोनंतराः संयोगः॥ भिन्नजातीयै
भिरव्यवहिताः [illegible] हलः संयोगसंज्ञाभवंति। समुदायः संज्ञी॥ जातौचेदम्बहुवचनं द्वयोर्बहूनां वासंयोगसंज्ञा
सिद्धा भवति। अग्निरितिगनौ अश्व इति श्वौ कर्ण इति र्णौ इंद्र श्चंद्रो मद्र इति न्द्रराः उष्ट्राग्र [illegible] इतिष्टराः। तिस्रा

२

त्स्न्यः वयति। नसतरयाः। हलइतिकिं। तितउत्छत्रे। संयोगांतस्य लोपइतिलोपः स्यात्॥ अनंतराइतिकिं। पचतिपनसं
स्कोः संयोगाद्योरितिसलोपः स्यात् संयोगप्रदेशाः संयोगांतस्य लोपइत्येवमादयः॥७॥ मुखनासिकावचनोनुनासिकः॥ मुख
सहितानासिकामुखनासिकातयोच्चार्यते योवर्णः सोनुनासिकसंज्ञोभवति। आङोनुनासिकश्छंदसि। अभ्रआँअपः। गभीर
आँउग्रपुत्रे। च्यवन आँ अपः। मुखग्रहणंकिं अनुस्वारस्यैव हिस्यात्। नासिकाग्रहणंकिं। कचटतपानां माभूत्। अनुनासिकप्रदे
शाः। आङोनुनासिकश्छंदसीत्येवमादयः॥८॥ तुल्यास्यप्रयत्नंसवर्णं॥ तुल्यशब्दः सदृशपर्यायः। आस्येभवमास्यं ताल्वादि
स्थानं। प्रयतनं प्रयत्नः स्पृष्टतादिर्वर्णगुणः तुल्यआस्ये प्रयत्नोयस्य वर्णस्यसमानजातीय प्रतिसवर्णसंज्ञोभवति। चत्वारआ
भ्यंतराः प्रयत्नाः सवर्णसंज्ञायामाश्रीयंते। स्पृष्टता ईषत्स्पृष्टता विवृतता संवृतताच। अ अ अ इति त्रयोअकारा उदात्तस्वरि
ताः प्रत्येकेसानुनासिकानिरनुनासिका ह्रस्वदीर्घप्लुतप्रभेदाद्भ्यस्तथाधाभिद्यंते। तथाइवर्णः तथाउवर्णः तथा ऋवर्णः लृवर्ण
स्य दीर्घानिसंति तद्द्वादशप्रभेदमाचक्षते। संध्यक्षराणां ह्रस्वानसंति तान्यपि द्वादशप्रभेदानि। अंतस्था द्विप्रभेदा रेफवर्जितायव
लाः सानुनासिकानिरनुनासिकाश्च रेफोष्मणां सवर्णानिसवर्णानिसंति वर्ग्यो वर्ग्येणसवर्णः ह्रग्डाग्रंखुराग्रं। आस्यग्रहणं
किं। कचटतपानां तुल्यप्रयत्नानां भिन्नस्थानानां माभूत्। किंचस्यात्। तपानतर्त्रुमित्यत्र झरोझरिसवर्णे इति तकारे पकारस्यलो
पः स्यात् प्रयत्नग्रहणंकिं। इचुयशानां तुल्यस्थानानां भिन्नप्रयत्नानां माभूत्। किंचस्यात्। अकश्च्योततीत्यत्र झरोझरिसवर्णे
इतिशकारस्यचकारेलोपः स्यात्। ऋकारलृकारयोः सवर्णसंज्ञावक्तव्या। होतॢकारः होतृकारः उभयोर्ॠकारस्य चांतरतम
सवर्णोदीर्घोनास्तीतिऋकारएवभवति। सवर्णप्रदेशाः अकःसवर्णेदीर्घइत्येवमादयः॥९॥ नाज्झलौ॥ अचहल्च अज्झलौ अज्झलौ
तुल्यास्यप्रयत्नावपिसवर्णसंज्ञौनभवतः। अवर्णहकारौ दण्डहस्त। इवर्णशकारौ दधिशितं। सवर्णदीर्घत्वंनभवति। वैपा
शोमत्स्यः। आनडुहं चर्मेति यस्येतिचलोपोनभवति॥१०॥ ईदूदेद्द्विवचनंप्रगृह्यं॥ इति एतद्इत्येवमंतं द्विवचनं शब्दरूपं
प्रगृह्यसंज्ञंभवति। अग्नी इति। वायू इति। माले इति। पचेते इति। पचेथे इति। ईदूदेदितिकिं। वृक्षावत्र। द्विवचनमितिकिं

कुमार्यत्र। किशोर्यत्र। तपरकरणमसंदेहार्थं। प्रगृह्यप्रदेशाः प्लुतः। प्रगृह्या आचार्येवमादयः। ईदादीनां प्रगृह्यत्वे प्राप्ते
मणीवादीनां प्रतिषेधो वक्तव्यः। मणीवोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम। रोदसी वा दंपती इव जंपती इव।।११।। अदसो मात्।।
अदसः संबंधी यो मकारस्तस्मात्परे ईदूतौ प्रगृह्यसंज्ञौ भवतः। अमी अत्र। अमी आसते। अमू अत्र। अमू आसाते। एकारस्य
नास्त्युदाहरणं। अदस इति किं। शम्यत्र। दाडिम्यत्र। मादिति किं। अमुके।।१२।। शे।। शे इति चैतत्प्रगृह्यसंज्ञं भवति। किमिदं शे इति।
सुपामादेशश्छंदसि। न युष्मे वाजबंधवः। अस्मे इंद्राबृहस्पती इति तत्र तथा पाठात् इष्यत एव। केचित्तु अनुकरणं युष्मे इति
अस्मे इति। त्वे इति। मे इति।।१३।। युष्मे इति। अस्मे इति। त्वे रायः। त्वे इति। मे इति। छांदसमेतदुदाहरणं। अस्मे इंद्राबृहस्पती।
निपात एकाजनाङ्।। एकश्चासावच्च एकाच्। निपात एकाच् आङ्वर्जितः प्रगृह्यसंज्ञो भवति। अ अपेहि। इ इंद्रं पश्य। उ उत्तिष्ठ।
आ एवं मन्यसे। आ एवं किल तत्। निपात इति किं। चकारात्र। एकाजिति किं। प्राग्नेयं वाच्यमीरय। अनाङिति किं। आ उदकां
तात्। ओदकांतात् प्रियं पाथमनुव्रजेत्। ईषदर्थे। क्रियायोगे मर्यादाभिविधौ च यः। एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित्।
।।१४।। ओत्।। निपात इति वर्तते। तस्यौकारेण तदंतविधिः। ओदंतो निपातः प्रगृह्यसंज्ञो भवति। आहो इति। उताहो इति।।
।।१५।। संबुद्धौ शाकल्यस्येतावनार्षे।। ओ इति वर्तते। संबुद्धिनिमित्तो य ओकारः स शाकल्यस्याचार्यस्य मतेन प्रगृह्यसंज्ञो भवति
इतिशब्दे अनार्षे। अवैदिके परतः। वायो इति। वायविति। भानो इति। भानविति। संबुद्धाविति किं। गवित्ययमाह। अत्रानुकार्यानु
करणयोरितिः भायवीति। भानो इति भानविति। संबुद्धाविति। सकृद्धाविति किं। गवित्ययमाह। अत्रानुकार्यानुकरणयोर्भेदस्याविव
क्षितत्वादसत्यर्थवत्त्वे प्रातिपदिकत्वाभावाद्विभक्तिर्नास्ति। इदं शाकल्यग्रहणं विभाषार्थं। इताविति किं। पटो अत्र। अनार्ष इति किं
एता गा ब्रह्मबंधव इत्यब्रवीत्।।१६।। उञः।। शाकल्यस्येताविति वर्तते। उञः प्रगृह्यसंज्ञो भवति विभाषा शाकल्यस्येति विभाषा
र्थ। उ इति। विति।।१७।। ऊँ।। उञ इति वर्तते। उञ इतावनार्षे ऊँ अयमादेशो भवति दीर्घोऽनुनासिकः प्रगृह्यसंज्ञकश्च। शाकल्यग्रह
णं विभाषार्थं इहाप्यनुवर्तते। तेन त्रीणि रूपाणि भवंति। उ इति। विति। ऊँ इति।।१८।। ईदूतौ च सप्तम्यर्थे।। शाकल्यस्येतावनार्षे इति

निवृत्तं। ईदंतमूदंतं च सप्तम्यर्थे वर्त्तमानं प्रगृह्यसंज्ञं भवति। अध्यस्यां मामकी तनू। मामक्यां। मामकी इति। तन्वां तनू इति।
सोमो गौरी अधिश्रितः। ईदूताविति किं। प्रियः सूर्ये प्रियो अग्ना भवाति। अग्निशब्दात्सप्तम्या डादेशः। सप्तमीग्रहणं किं
धीतीति मतीति सुष्टुतीति धीत्या मत्या सुष्टुत्या। अर्थग्रहणं किं। वाप्यश्वो नद्यातिः। तपरकरणमसंदेहार्थं। ईदूतौ सप्तमीत्येव। लु
प्तेऽर्थग्रहणाद्भवेत् पूर्वस्य यत्र सवर्णदीर्घत्वमावः प्रसज्यते। वचनाद्यत्र दीर्घत्वं तत्रापि सरसीयदि। ज्ञापकं स्यात्तदंतत्वे मा वा पूर्वपदस्य
भूत्।।१९।। दाधा घ्वदाप्।। दारूपाश्चत्वारो धातवः। धारूपौ द्वौ घुसंज्ञौ भवतः दाप्दैपौ वर्जयित्वा। डुदाञ् दाने। प्रणिददाति। दाण्
दाने। प्रणिदाता। दो प्रणिद्यति। देङ् प्रणिदयते। डुधाञ्। प्रणिदधाति। धेट्। प्रणिधयति। वत्सो मातरं। अदाप्
इति किं। दाप् लवने। दातं बर्हिः। दैप् शोधने। अवदातं मुखं। घुप्रदेशाः घेर्दिनदपतपद घुमास्थेत्येवमादयः।।२०।। आद्यंतवदेक
स्मिन्।। असहायस्याद्यंतोपदिष्टानि कार्याणि न सिध्यंतीत्ययमतिदेश आरभ्यते सप्तम्यर्थे भवति। आद्याविवांतवदेकस्मिन्नपि का
र्यं भवति। यथा कर्तव्यमित्यत्र प्रत्ययाद्युदात्तत्वं भवति। एवमौपगवमित्यत्रापि यथा स्यात्। वृद्धसंज्ञायां छः स्यादिति भावः। एवं यथा घ्र
स्याभ्यामित्यत्रागंते दीर्घत्वं भवति। एवं भ्यामित्यत्र यथा स्यात्। एकस्मिन्निति किं। सभासन्नयने भवः। साभासन्नयनः। आकारमाश्रि
त्य वृद्धसंज्ञा न भवति।।२१।। तरप्तमपौ घः।। तरप्तमप् इत्येतौ प्रत्ययौ घसंज्ञौ भवतः। कुमारितरा। कुमारितमा। ब्राह्मणीतमा। घप्रदे
शाः रूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्यो नेकाचो ह्रस्व इत्येवमादयः।।२२।। बहुगणवतुडति संख्या।। बहुगणवतुडति इत्येते संख्या सं
ज्ञा भवंति। बहुकृत्वः। बहुधा। बहुशः। बहुकः। गणकृत्वः। गणकः। गणधा। गणशः। तावत्कृत्वः। तावत्कः। तावद्धा। कतिकृत्वः। कतिकः। क
तिधा। कतिशः। बहुगणशब्दयोर्वैपुल्ये संघे च वर्तमानयोरिह ग्रहणं नास्ति। संख्यावाचिनोरेव त्र्यादीनां निवृत्त्यर्थं संख्यासंज्ञा विधीयते
अर्द्धपूर्वपदश्च पूरणप्रत्ययांतः संख्यासंज्ञो भवतीति वक्तव्यं समासकन्विध्यर्थं। अर्द्धपंचमशूर्प्यं। अर्द्धपंचमकं। संख्याप्रदेशाः संख्या
याः क्रियाभ्यावृत्तिगणने कृत्वसुजित्येवमादयः।।२३।। ष्णांता षट्।। स्त्रीलिंगनिर्देशात्संख्येति संबध्यते। षकारांता नकारांता च संख्या षट्
संज्ञा भवति। षकारांता षट्। नकारांता। पंच। नव। दश। अंतग्रहणं किं। औपदेशिकार्थं। तेनेह न भवति शत। शतानि। सहस्राणि। अ

ष्टानां इसश्च नुटभवति। षड्प्रदेशाः षड्नोलुगित्येवमादयः॥२४॥ उतिच उत्यंतावसंख्यायरल्संज्ञाभवति। कतितिष्टति। कतिप
श्य॥२५॥ क्तक्तवतूनिष्ठा॥ क्तश्च क्तवतुश्च क्तक्तवत् प्रसयौनिष्ठासंज्ञौभवतः। कृतः। कृतवान्। ककारः। कित्कार्यार्थः। भुक्तं भुक्तवान्
उकार उगित्कार्यार्थः। निष्ठाप्रदेशाः। श्विदितोनिष्ठायामित्येवमादयः॥२६॥ सर्वादीनिसर्वनामानि॥ ॥सर्वशब्द आदिर्येषां तानिमा
निसर्वादीनि सर्वनामसंज्ञानिभवंति। सर्वः सर्वौ सर्वे सर्वस्मै। सर्वस्मात्। सर्वेषां सर्वके। सर्व विश्व। उभ उभशब्दस्य सर्वनामत्वं प्रयो
जनं सर्वनाम्नस्तृतीयाचेति। उभयः। उभये। उभयेषां। उभयस्मिन्। उतरउतमौ कतरस्मै। इतर। अन्य। अन्यतर। इतरस्मै। अन्यस्मै
अन्यतरस्मै त्वस्मै। त्वशब्दोयमन्यवाची। स्वरभेदात्द्विः पठितः एकोनुदात्तः द्वितीयोनुदात्तः। केचित्तु तकारांतमेकं पठंति। त्व
दितिद्वावपिचानुदात्तावितिस्मरंति। नेमलंमस्मैव सम इगेनजसिविभाषाभवति। नेमे। नेमाइति। समाः। समे। समे। समस्मै। कथय
थासंख्य मनुदेशाः। समानां। समेदेशेयजेतइति। सम स्यसर्वपर्यायस्य सर्वनामसंज्ञेष्यते नसर्वत्रासिमस्मै पूर्वपरावरदक्षिणोत्तराप
राधराणिव्यवस्थायामसंज्ञायां स्वमज्ञातिधनाख्यायां। अंतरंबहिर्योगोपसंख्यानयोः। सद् तद्य इअदस इदम्। एतद्। एकद्वियु
ष्मद्। अस्मद्। भवतु। किम्। सर्वादिः। सर्वनामप्रदेशाः। सर्वनाम्नः स्मै इत्येवमादयः॥२७॥ विभाषादिक्समासे। बहुव्रीहौ। नबहुव्री
हाइति प्रतिषेधंवक्ष्यति। तस्मिन्नित्यप्रतिषेधेप्राप्तेविधायेयमारभ्यते दिशांसमासोदिक्समासः। दिगुपदिष्टेसमासेबहुव्रीहौ सर्वा
दीनिविभाषासर्वनामसंज्ञानिभवंति। उत्तरपूर्वस्यै उत्तरपूर्वायै मादिग्रहणंकिं। नबहुव्रीहावितिप्रतिषेधं वक्ष्यति तत्र नज्ञायते क विभा
षाक्वप्रतिषेधइति। दिक्ग्रहणे पुनः क्रियमाणेज्ञायते। दिगुपदिष्टेसमासाविभाषा। अन्यत्रप्रतिषेधइति समासग्रहणंकिं। समास
एवयोबहुव्रीहि तत्रविभाषा यथास्यात्। बहुव्रीहिवद्भावेन योबहुव्रीहिस्तत्रमाभूत् दक्षिणस्यैदेहि। बहुव्रीहावितिकिं। द्वंद्वेविभाषामा
भूत्। दक्षिणोत्तरपूर्वाणां॥२८॥ नबहुव्रीहौ॥ सर्वनामसंज्ञायां तदंतविधेरभ्युपगमाद्बहुव्रीहेरपिसर्वाद्यंतस्यसंज्ञास्यात् प्रतिषेधआ
रभ्यते। बहुव्रीहौसमासेनसर्वादीनिसर्वनामसंज्ञानिभवंति॥ प्रियविश्वाय। प्रियोभयाय। घन्याय। त्र्यन्याय। इह वनवत्कपित्तक
इत्यकच्माभूत्। बहुव्रीहावितिवर्तमाने पुनर्बहुव्रीहिग्रहणंकिं भूत पूर्वमात्रेपि प्रतिषेधोयथास्यात्। वस्त्रांतरवसनांतराः॥२९॥

तृतीयासमासे॥ तृतीयायाः समासे सर्वादीनि सर्वनामसंज्ञानिभवंति। मासपूर्वायसंवत्सर पूर्वाय। अहपूर्वाय। त्र्यहपूर्वाय। स
मासइतिवर्तमाने पुनः समासग्रहणं तृतीयासमासार्थवाक्येपिप्रतिषेधोयथास्यात्। मासेन पूर्वाय संवत्सरेण पूर्वाय। पूर्वसदृश
समोनार्थइति तृतीयासमासं प्रतिपदं वक्ष्यति तस्यैवग्रहणं न यस्य कस्यचित् तृतीयासमासस्य कर्तृकरणेकृताबहुलमितितत्त्वयका
कृतं मयकाकृतं॥३०॥ द्वंद्वेच॥ द्वंद्वेचसमासे सर्वादीनि सर्वनामसंज्ञानिभवंति। पूर्वापराधराणां। कतरकतमानां॥३१॥ विभाषा
जसि॥ पूर्वेणनित्ये प्रतिषेधे प्राप्ते जसि विभाषा रभ्यते। द्वंद्वसमासे विभाषाजसि सर्वादीनि सर्वनामसंज्ञानिभवंति। कतरकतमे। क
तरकतमाः। जसः कार्यं प्रतिविभाषा। अकच् द्विनभवति। कतरकाकतमकाः॥३२॥ प्रथमचरमतयाल्पार्द्धकतिपयनेमाश्च॥ वि
भाषाजसीत्यनुवर्त्तते द्वंद्वइतिनिवृत्तं॥३३॥ प्रथमचरमतय। अल्प। अर्द्ध। कतिपयनेमा इत्येते विभाषा जसि सर्वनामानि भवंति। प्र
थमे। प्रथमाः। चरमे चरमाः। द्वितये। द्वितयाः। त्रितयाः। अल्पे। अल्पाः। अर्द्धे। अर्द्धाः। कतिपये। कतिपयाः। नेमे। नेमाः। तयः प्रत्यय
परिशिष्टानि। प्रातिपदिकानि। नेमइतिसर्वादिषु पठ्यते। तस्यप्राप्ते विभाषा अन्येषामप्राप्ते। उभयशब्दस्य तयप्रत्ययांतस्यगणे
पाठान्नित्यासंज्ञा। इहापि जसः। कार्यप्रति विभाषा। काकचोर्यथायोगं इति॥३३॥ पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थाया
मसंज्ञायां। पूर्व। पर। अवर। दक्षिण उत्तर। अपर। अधर इत्येतेषांगणेपाठान्नित्येनिप्राप्तायां सर्वनामसंज्ञायां प्राप्तायां जसि विभाषा
रभ्यते। पूर्वादीनि जसि विभाषा सर्वनामसंज्ञानिभवंति। व्यवस्थायामसंज्ञायाम्। स्वाभिधेयापेक्षावधिनियमो व्यवस्था पूर्वे पूर्वाः
परे परा। अवरे अवराः। दक्षिणे दक्षिणाः। उत्तरे उत्तराः। अपरे अपराः। अधरे अधराः। व्यवस्थायामितिकिं। दक्षिणा इमेगाथ
काः प्रवीणा इत्यर्थः। असंज्ञायामितिकिं। उत्तराः कुरवः। सत्यामेव व्यवस्थायामियंतेषां संज्ञा॥ ॥स्वमज्ञातिधनाख्यायां॥ अत्रापि नि
त्यसंज्ञा प्राप्ता जसि विभाषा रभ्यते। स्वं जसि विभाषा रभ्यते। स्वं जसि विभाषा सर्वनामसंज्ञा भवति नचेत्। ज्ञातिधनयोः संज्ञारूपेण
वर्तते। स्वे पुत्राः। पुत्राः। स्वे गावः। स्वगावः। आत्मीया इत्यर्थः। ज्ञातिप्रतिषेध इतिकिं। धूमायंत इवाश्लिष्टाः प्रज्वलंतीव संहताः। उल्मुका
नीव भांतिस्वा ज्ञातयो भरतर्षभ। अधनाख्यायामितिकिं। प्रभूताः स्वान दीयंते प्रभूताः। स्वान भुज्यंते प्रभूतानि धनानीत्यर्थः॥३४॥
अंतरंबहिर्योगोपसंव्यानयोः। अत्रापि पूर्ववन्नित्यासंज्ञा प्राप्ता जसि विभाषा रभ्यते। अंतरमित्येतच्छब्दरूपं जसि विभाषा सर्वना

मसंज्ञंभवति बर्हियोगं इयपसंव्याने चगम्यमाने। अंतरेगृहाः। अंतराग्रहाः। नगरबाह्या श्वांडलादिगृहाउच्यंते। अंतरेशाटकाः। अंतरा
शाटकानउपसंव्यानपरिधानियमुच्यते। नप्रावरणीयइति। बहिर्योगेप संव्यानयोरितिकिं। अनयोग्रामयोरंतरेतापसप्रतिवसति। त
स्मिन्नंतंशितान्युरकानिमध्यप्रदेशपवनोत्तरशब्दः। गणसूत्रस्यचेदं प्रत्युदाहरणं। अपुरीतिचवक्तव्यं। अंतरायांपुरिवसति। वाप्रकरणेति
पस्यङिंस्युपसंख्यानांद्वितीयाय। द्वितीयस्मै। तृतीयाय। तृतीयस्मै॥३६॥ स्वरादिनिपातमव्ययं। स्वरादिनिशिव्दरूपाणिनिपाताश्वा
व्ययसंज्ञानिभवंति। स्वर। अंतर। प्रातर। एतेतोदात्ताः पठ्यते। पुनरायुदात्तः। सनुतर। उच्चैस। शनैस। ऋधक्। सत्ते। युगपत। आरात
पृथक्। एतेपिसतुनरप्रभुतयोदात्ताः। श्वस। दिवस। दिवा। रात्रौ। सायं। चिरं। मनाक। ईषत। योषं। तूष्णीं। बहिस। अपस। निकषा। स
मया। स्वयं। मिथानक्तम। नञ्। हेतौ। इद्धा। अद्धा। सामि। एतेपिदसिस्विमाद्योदात्ताः। यद्यंतेयत धवत मव्ययसंज्ञंभवति। श्राह्मण
वत्। क्षत्रियवत्। समम। सनात। तिरस। आद्युदात्ताः। मनाक्। अतराः। अयमंतोदात्त। कामिथ्या। कातोसुन्। कसुनः। कन्मकारसंध्यक्षरां
तां अव्ययीभावश्च। पुरा। मिथ्या। मिथस। प्रबाहुक। प्रबाहुकं। अप्यहलं। अभीक्ष्णं। साकं। सार्द्धं। नमस। हिरुक। तसिलादिस्तद्धितएधाच्पर्यंतः
शस्तसी। कृत्वसुच। आथ्यालौ। च्व्यर्थाश्च। अमू। आम। स्वरादि। निपातमव्ययं। प्राग्रीश्वराणिपाता। इति। च। वा। ह। अह। एवमित्यादय
अव्ययप्रदेशा। अव्ययर्योसाप्कपइत्येवमादयः। सदृशंत्रिषुलिंगेषुसर्वासुचविभक्तिषु। वचनेषुचसर्वेषुयन्नव्येतितदव्ययं॥३७॥ तद्धि
तश्चासर्वविभक्तिः॥ तद्धितांतः। शब्दो असर्वविभक्तिरव्ययसंज्ञोभवति। यस्मान्नसर्वाविभक्तिरुत्पद्यते। ततः। यत्र। कृशासर्वदा। तद्धितइ
तिकिं। एकं। द्वे। बहवः। असर्वविभक्तिरितिकिं। औपगव। औपगवौ। औपगवाः॥३८॥ कृन्मेजंतः॥ कृद्यो मांतएजंतश्चतदंतंशब्दरूप
मव्ययसंज्ञंभवति। स्वादुंकारंभुङ्क्ते। लवणंकारंभुंक्ते। एजंतः। वक्षेरायः। तावामेषेरथानां। कर्वेदस्सापजीवसे। ज्योक्चसूर्यंदृशे। वक्ष्यइति
येत्कमर्थेसेसेनितिसेप्रत्ययेचे। कुलेवर्षेचबहुलं। रूपं। एषइतिनः सेप्रत्ययेगुणेवबहुरूपंजीवसेइति। जीवेः असेप्रत्ययेरूपं। दृशेइतिदृ
शेः केन्प्रत्ययांतोनिपात्यते। दृशेविख्येचेति। अंतग्रहणमौपदेशिकप्रतिपत्त्यर्थं हिमाकृत। आधयं। चिकीर्षकेकुंभकारेत्यइति॥३९॥ क्त्वा
तोसुन्कसुनः॥ क्त्वातोसुन्कसुनइत्येवमंतंशब्दरूपमव्ययसंज्ञंभवति। क्त्वा। कृत्वा। तोसुन्। पुरासूर्यस्योदेतोराधेयः पुरावत्सानामपाकर्तोः
भावलक्षणेस्थेन कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन्। इतिएणः कृञश्चतोसुन्प्रत्ययः। सृपितृदोः कसुन। पुराक्रूरस्यविसृपोविरप्

६

शिन्। पुराजत्रुभ्यआतृदः॥४०॥ अव्ययीभावश्च॥ अव्ययीभावश्चसमासोव्ययसंज्ञोभवति। किंप्रयोजनं। लुक्मुखस्वरोपचाराः। लुकेउ
पाग्नि। प्रत्यग्निशलभाः पतंति। मुखस्वरः। उपाग्निमुखः। मुखंस्वांगमित्येतरपदांतोदात्तत्वंप्राप्तं। नाव्ययदिक्छब्दगोमहत्स्थूलमुष्टिपृथुवत्से
भ्य। इतिप्रतिषिध्यते तस्मिन्प्रतिषेधेपूर्वपदप्रकृतिस्वरएवभवति। उपचारः। उपपयःकारः। उपपयःकामः विसर्जनीयस्थानिकस्यसकारस्योपचार
इतिसंज्ञा। तत्राव्ययीभावस्याव्ययत्वे। अतः कृकमिकंसकुंसपात्रकुशाकर्णिष्वनव्ययस्येति पर्युदासः सिद्धोभवति सर्वमिदंकाण्डस्वरादावपि
पठ्यते। पुनर्वचनमनित्यत्वज्ञापनार्थं तेनायंकार्यमितियमः सिद्धोभवति। इहच। पुराक्रूरस्यविसृपोविरप्शिन्। इदंत्वाबध्नामि। पुराक्रूरस्य विसृपइति। नलोकाव्य
पनिष्ठेतिषष्ठीनिषेधोनभवति॥४१॥ शिसर्वनामस्थानं॥ शिरित्येतत्सर्वनामस्थानसंज्ञंभवति। जश्शसोःशिः। कुण्डानिपश्य। दधीनि
त्रपूणि। अत्र शि। सर्वनामस्थानप्रदेशाः। सर्वनामस्थानसंज्ञाभवति। सुडनपुंसकस्य। सुडितिपंचवचनानिसर्वनामस्थानसंज्ञानिभवंतिनपुंसका
दन्यानपुंसकेनविधिनप्रतिषेध। तेनजस्शसोःपूर्वैर्गसंज्ञाभवति। राजानौ। राजानः। राजानं। राजानौ। सुडितिकिं। राज्ञःपश्य। अनपुंसकस्ये
तिकिं। सामनी। वेमनी॥४२॥ नवेतिविभाषा॥ नेतिप्रतिषेधः। वेतिविकल्पः। तयोः प्रतिषेधविकल्पयोर्विभाषेतिसंज्ञाभवति। इति
करणेयंनिर्देशार्थविभाषाप्रदेशेषु प्रतिषेधविकल्पा उपतिष्ठंते। तत्रप्रतिषेधेन। समीकृतेविषये पश्चाद्विकल्पः प्रवर्तते। उभयत्रविभाषाः प्र
योजयंति। विभाषाश्वेः। शशाव। शिश्वाय। शुशुवतुः। शिश्वियतुः विभाषाप्रदेशाविभाषाश्वेरित्येवमादयः॥४४॥ इग्यणः संप्रसारणं॥ इग्यो
यणः स्थानेभूतोभावीवातस्य संप्रसारणसंज्ञाभवति। यजिइष्टं। वपिउप्तं। ग्रहिगृहीतं। केचिदुभयथासूत्रमिदंव्याचक्षते। वाक्यार्थःसंज्ञी। वर्ण
श्च। इग्यणइतियोवाक्यार्थः। स्थान्यादेशसंबंधरूपः ससंप्रसारणसंज्ञोभवति। यणस्थानिक इग्वर्णः संप्रसारणं। संप्रसारणसंज्ञोभवति। तत्रविधौ
वाक्यार्थउपतिष्ठते। ष्यङःसंप्रसारणमिति। अनुवृत्ते वर्णः। संप्रसारणाच्चेति। संख्यातानुदेशादित्यभवति। अदुहितरामिति। काश्यानिस्त्रस्थिय
उदितित्परकरणादीर्घोनि। संप्रसारणप्रदेशाःवसोःसंप्रसारणमित्येवमादयः॥४५॥ आद्यंतौटकितौ॥ आदिष्टिद्भवति अतः किद्भवति
षष्ठीनिर्दिष्टस्य। भविता। मुराउोपधिषपतो टकिसहेशाअर्द्धधातुकस्येडलादेः मिमीते जुनविष्णु इत्येवमादयः॥४६॥ मिदचोंत्यात्परः॥ अच
एमीनिर्द्धारणेषष्ठिजातावेकवचनं अचांसन्निविष्टानां अंत्यादचःपरोमिद्भवति। स्थानेयोगाप्रत्ययपरत्वस्यापवाद। रुणद्धि। मुंचति। पयांसि

Dr BHAU DAJI MEMORIAL

मिअदेशा। दधादिष्वस्थानिसेवमादयः। मस्तेरयालूर्वमनुषंगसंयोगादिलोपार्थं नुममिच्छति। मग्नः। मग्नवान्। मंक्ता। मंक्तुं। मंक्तव्यं।।४७।।एच
इग्घ्रस्वादेशे।। एचोह्रस्वादेशे कर्तव्ये इगेव ह्रस्वो भवति। नान्यः। नैअतिरु। रैअतिरि। गोउपगु। नपइति किं। अतिरयः कुः। ह्रस्वादेश इति किं। देवदत्त
देउवदत्त।।४८।।षष्ठीस्थानेयोगा।। परिभाषेयंयोगनियमार्थं इहशास्त्रेया षष्ठीअनियतयोगा श्रूयते सास्थानेयोगैवभवति। नान्ययोगा स्थाने
योगस्थानिमित्तकृतेस्मिति सा प्रतिपत्तव्या। स्थानशब्दश्च प्रसंगवाची। यथा दर्भाणां स्थाने शरैः प्रस्तरितव्यं। दर्भाणां प्रसंग इति गम्यते एवमिहापि अस्तेः
स्थाने भूर्भवति। भविता। भवितुं। भवितव्यं। ब्रुवः प्रसंगे वचिर्भवति। वक्ता। वक्तुं। वक्तव्यं प्रसंगे संबंधस्य निमित्तादि बुधइतिषष्ठी।। बहुव्रीहि
षष्ठ्यर्थः। स्वस्वामिसंबंधसमीपसमूहविकारावयवाद्याः। तत्र यावंतः शब्देसंभवंति तेषु प्राप्तेषु नियमः क्रियते षष्ठी स्थानेयोगा इति अधिकरणे
बहुव्रीहिः। अतएव निपातनात्सप्तम्या अलुक्।।४९।।स्थानेंतरतमः।। स्थाने प्राप्यमाणानां मध्ये सादृश्यतम आदेशो भवति। कुतश्चा
न्तर्यं। स्थानार्थगुणप्रमाणतः। स्थानतः अकः सवर्णे दीर्घः। दंडाग्रं। क्षुराग्रं। कंठ्ययोरकारयोः कंठ्यएवस्थानतो न्तरतमः आकारः। अ
र्थतः। वतंडीयुवतिः। वातंडयुवतिः। पुंवद्भावेनान्तरतमः पुंशब्दो निर्दिश्यते। गुणतः। पाकः। रागः। चजोः कुघिण्ण्यतोरिति चकारस्याल्प
प्राणस्याघोषस्य तादृश एव ककारो भवति। प्रमाणतः। अमुष्मै। अमूभ्यां। अदसोसेर्दादुदोम इति ह्रस्वस्य ह्रस्वो दीर्घस्य दीर्घः। स्थान इति वर्त
माने पुनःस्थानग्रहणं किं। यत्रानेकमांतर्यं संभवति तत्र स्थानतएवांतर्यं बलीयो यथा स्यात्। चेता। स्तोता। प्रमाणतो ऽकारोगुणः प्राप्तः
स्थानत आंतर्यं एकारौकारौ भवतः। तमग्रहणं किं। वाग्घसति। झयोहोन्यतरस्यामिति हकारस्य पूर्वसवर्णे क्रियमाणे सोष्मणः
सोष्मण इति द्वितीयाः प्रसक्ताः। नादवतो नादवंत इति तृतीयाः। तदुभयग्रहणाद्धे सोष्मणो नादवंतश्च ते भवति चतुर्थाः।।५०।।उरण्रपरः
उः स्थाने अण् प्रसज्यमान एव रपरो वेदितव्यः। कर्ता। हर्ता। किरति। गिरति। द्वैमातुरः। उरिति किं। खेयं। गेयं। अणग्रहणं किं। सुधा
तुरपत्यं सौधातकिः।।५१।।अलोंत्यस्य।। षष्ठीति निर्दिष्टस्य यउच्यते आदेशः सोन्त्यस्यालः स्थाने वेदितव्यः। इतिहो एयाः। पंचगोरणिः
दशगोणिः।।५२।।ङिच्च।। ङिच्च य आदेशः सोनेकाल्प्यंत्यस्य स्थाने भवति। आनङृतो द्वंद्वे होतापोतारौ। मातापितरौ। तातङ् ङित्करण
स्य गुणवृद्धिप्रतिषेधार्थत्वात्सर्वादेशो भवति। जीवतात् भवान्। जीवतात् त्वं।।५३।।आदेः परस्य।। परस्यकार्यं शिष्यमाणमादेरलः प्र

त्येतव्यं। यच्च परस्य शिष्यते यत्र पंचमीनिर्देशस्तद्यथा ईदासः। आसीनो यजते। द्व्यंतरुपसर्गेभ्योपईत्। द्वीपं। अंतरीपं। प्रती
पं। समीपं।।५४।।अनेकाल्शित्सर्वस्य।। अनेकाल्प आदेशः शिच्च सर्वस्य षष्ठीनिर्दिष्टस्य स्थाने भवति। अस्तेर्भूः। भविता। भवितुं। भवि
तव्यं। भवितुं। शितखल्वपि। जश्शसोः शिः। कुंडानि तिष्ठंति कुंडानि पश्य।।५५।।स्थानिवदादेशोनल्विधौ।। स्थान्यादेशयोः पृथक्कत्वा
त्स्थान्याश्रयं कार्यमादेशेन प्राप्नोतीत्यतिदेश आरभ्यते। स्थानिमास्तुल्यं वर्तत इति स्थानिवत्स्थानिवदादेशो भवति। स्थान्याश्रयेषु कार्येष्वन
लाश्रयाणि कार्याणि वर्जयित्वा। किमुदाहरणं। धात्वंगकृत्तद्धिताव्ययसुप्तिङ्पदादेशाः प्रयोजनं। धात्वादेशो धातुवद्भवति। अस्तेर्भूः ब्रुवो वचिः
आर्द्धधातुकविषये प्रागेवादेशेषु कृतेषु धातोरिति तव्यदादयो भवति। भविता। भवितुं। वक्ता वक्तुं। अंगादेशोंगवद्भवति। केन। काभ्यां। कैः
किमः कादेशे कृते अंगाश्रया इत्वदीर्घत्वैस्त्वानि भवति। कृदादेशः। प्रकृत्य। प्रहृत्य। ल्यबादेशे कृते ह्रस्वस्य पिति कृति तुगिति तुग्भवति। तद्धिता
देशः। तद्धितवद्भवति। दाधिकं। अद्यतनां। कृत्तद्धितसमासाश्चेति प्रातिपदिकसंज्ञाभवति। अव्ययादेशोव्ययवद्भवति। प्रकृत्य। उपकृत्य
अव्ययादिति सुपोलुग्भवति। सुबादेश सुब्वद्भवति। वृक्षाय। प्लक्षाय। सुपिचेति। तिङादेशस्तिङ्वद्भवति। अकुरुतां। सुप्तिङंतं पदमिति पद
संज्ञा भवति। अव्ययादेशोव्ययवद्भवति। प्रकृत्य उपकृत्य अव्ययादिति सुपो लुग्न भवति। कृदादेशः सुब्वद्भवति।। पदादेशः पदवद्भव
ति। ग्रामोनः। स्वजनपदोनः। स्वंपदस्येति रुत्वं भवति। वाकरणं किं। स्थानी आदेशस्य संज्ञा माविज्ञायीति स्वाश्रयमपि यथा स्यात्। आङोननं
नः। आहत। आवधिष्टेति। आत्मनेपदं तुमयत्रापि भवति। आदेशग्रहणं किं। आनुमानिकस्यादेशस्य स्थानिवद्भावो यथा स्यात्। एवं प
चतु। अनल्विधाविति किं। प्रतिषिद्धादेशान स्थानिवद्भवंति। द्यौः पंथाः सः इति। हल्ङ्याभ्य इति सुलोपो न भवति।।५६।।अचः परस्मिन्पूर्वविधौ
आदेशः स्थानिवदिति वर्तते अच इति स्थानिनिर्देशः परस्मिन्निति निमित्तसप्तमी पूर्वविधाविति विषयसप्तमी। अजादेशः परनिमित्त
कः पूर्वस्यविधौ कर्तव्ये स्थानिवद्भवति। पट्यति। लघयति। अवधीत्। बहुखट्वकः। पटुमाचष्टे इति णिचि टिलोपे कृते तस्य स्थानिवद्भावात्
टुपधाया इति वृद्धिर्न भवति। अवधीदिति। अतोलोपस्य स्थानिवद्भावात् अतोहलादेर्लघोरिति हलंतलक्षणा विभाषा वृद्धिर्न भवति। बहुखट्वकः
आपोन्यतरस्यामिति ह्रस्वस्य स्थानिवद्भावात् ह्रस्वांते सास्य येनेति स्वरो न भवति अच इति किं। प्रश्नः। आक्राष्टं। आगत्य। प्रश्न इति प्रच्छेर्नङ्प्रत्य
ये च्छ्वोः शूडनुनासिके चेति छकारस्य शकारः। परनिमित्तकः तुक्कर्तव्येन स्थानिवद्भवति। अक्राष्टामिति झलोझलीति सिचो लोपः। परनि

मित्तकः। कथं लिङ्भिकल्ये नोपसंख्यानीत् यस्य पकारस्य यणोः क्ङितीति कारे कर्तव्ये न स्थानिवद्भवति। आगसेति वाच्य नीसनुनासिक
लोपः परनिमित्तकः किं कर्तव्ये न स्थानिवद्भवति परस्मिन्निति किं युवजानिः। बेधा अपयः। आदीध्ये। जायायानि ङ् परनिमित्तकः। तेन य
लोपेन स्थानिवद्भवति यं यां अपयइति। परनिमित्तकः। वाइत्यांतलोपः पञ्चमंनभवतिबध्नाति। आदीध्ये इतिदीधीङः। उत्तमपुरुषैकव
चने टरेत्वस्य परनिमित्तकत्वात् यीवर्णयोर्दीधिवेव्योरिति लोपो न भवति। पूर्वविधावितिकिं हेगोः याज्ञवल्क्यः। नैधेयः। हेगोरितिवृ
रजादेशः परनिमित्तकः। संबुद्धिलोपे कर्तव्ये न स्थानिवद्भवति। याज्ञवल्क्य स्थानिष्ठमात्रा इति यञ्झ हलस्तद्धितस्येति यलोपे कर्तव्ये आ
देशो न स्थानिवद्भवति। नैधेयः। अतोलोपः इढिचेसाकारलोपः इतश्चानिञ इति यञ्जलक्षणे प्रसयविधौ न स्थानिवद्भवति। ५७। नपदा
न्तद्विर्वचनवरेयलोप स्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु। इति प्रसक्तः स्थानिवद्भावः एतेषु विधिषु प्रतिषिध्यते। पदान्त। पदान्तविधिं प्र
त्यादेशो न स्थानिवद्भवति। कौस्तः। यौस्तः। तानिसंति। यानिसंति। श्नसोरल्लोपः श्निसा यधातुकेइति परनिमित्तकः। सप्रये विधावादेशे
च कर्तव्ये स्थानिवत्स्यात्। अस्मान्नघना भवति। द्विर्वचनविधिं प्रति न स्थानिवत् दध्यत्र मध्वत्र यणादेशः परनिमित्तकस्तस्य स्था
निवत्त्वात् न चिवेतिधकारस्य द्विर्वचनं स्यात्। अस्मात्स्वचनाद्भवति। वेरयोजादेशः। सयपविधिप्रति न स्थानिवत् यलोपः स्यादस्माद्वचनान्न
न भवति। यलोपविधिं प्रति न स्थानिवद्भवति। कंडूतिः। कण्डूयतेः क्तिनि कृते अतोलोपः परनिमित्तकः लोपो व्योर्वलीति यलोपे कर्तव्ये स्थानिव
त्स्यादस्माद्वचनान्न भवति। स्वरविधिं प्रति न स्थानिवद्भवति। चिकीर्षकः जिहीर्षकः एवुल्यां चिकीर्षतेः अतोलोपः परनिमित्तकः। लिति
प्रत्ययात्पूर्वमपिउदात्तस्वरे कर्तव्ये न स्थानिवद्भवति इकारे स्वरः। सवर्ण। सवर्णविधिं प्रति न स्थानिवत्। शिण्ढि पिण्ढि। पिषेश्च लोपे न श्न
पुरुषैकवचने रुधादिभ्यः श्नम् हित्वा धित्वे ष्टुत्वे जश्त्वे श्नसोरल्लोपः क्ङितिसार्वधातुके परनिमित्तकः। अनुस्वारस्य यपि परसवर्णे कर्तव्ये न स्था
निवद्भवति। ततो द्रष्टव्यः। तिङ्कारलोपः। अनुस्वार। अनुस्वारस्य। अनुस्वारविधिं प्रति न स्थानिवत्। शिंषंति। पिंषंति। नश्चापदान्तस्य झ
ल्यनुस्वारे कर्तव्ये श्नसोरल्लोपो न स्थानिवद्भवति। दीर्घः दीर्घविधिं प्रति न स्थानिवद्भवति। प्रतिदीव्ना प्रतिदीव्ने प्रश्वनेषु तृतीयैकवचनेषु अ
ल्लोपेन इत्यकारलोपः। परनिमित्तकस्तस्य स्थानिवद्भावात् हलि च इत्युपधायादीर्घत्वं न स्यात् न भ्रस्य कारोहल्यप्रत्ययस्मात् वचनाद्भवति।
जश्विधिं प्रति न स्थानिवत्। संग्धिश्च मे सपीतिश्च मे। बप्सन्ति घासः। अदेः क्तिनि बहुलं छन्दसीति घस्लादेशः। घसिभसोर्हलि चेति क्ङितः धा ८

लोपः। झलो झलीति सकारलोपः झषस्तथोर्धोऽध इति धत्वं उपधालोपस्य स्थानिवत्त्वात् झलां जश् झशि इति घकारस्य जश्त्वं न स्यात्। अस्माद्वच
नाद्भवति। समानाग्धिः समानस्य सभानस्य सभावः। बब्धां निति। भसेर्लोटि द्विर्वचनेन ततस्तस्तामिति शपः श्लुः। द्विर्वचनमभ्यासकार्यं घसिभसो
र्हलि चेत्युपधालोपः। झलो झलीति सकारलोपः झषस्तथोर्धोऽध इति धत्वं। उपधालोपस्य स्थानिवत्त्वात् झलां जश् झशीति सकारस्य जश्त्वं न
स्यादस्माद्वचनाद्भवति। चर। चर्विधिं प्रति न स्थानिवत्। जक्षतुः। जक्षुः। अक्षन्नमीमदन्त पितरः। लिटि द्विर्वचन बहुवचनयोः। अदेर्घस्लादेशः
गमहनजनखनघसां लोपः क्ङित्यनङि इत्युपधालोपः। द्विर्वचनमभ्यासकार्यं तस्योपधालोपस्य स्थानिवत्त्वात् खरि चेति घकारस्य चर्त्वं न स्यात्। अस्माद्व
चनाद्भवति। शासिवसिघसीनां चेत्यनेन षत्वं। अक्षन्निति अदेर्लुङि बहुवचने घस्लादेशः मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेरिति च्लेर्लुक्। गमहनजनखनघ
सां लोप इत्युपधालोपः। तस्य स्थानिवत्त्वात् खरि चेति घकारस्य चर्त्वं न स्यादस्माद्वचनाद्भवति। स्वरदीर्घयलोपेषु लोपाजादेश एव न स्थानिवद्भवति
अन्यस्तु स्थानिवदेव तेन वृक्षस्य किर्योः। गिर्योः। वाय्वोरिति स्थानिवत्त्वात्स्वरदीर्घयलोपान भवन्ति। ५८। द्विर्वचनेऽचि। द्विर्वचननिमि
त्तेऽचि अजादेशः स्थानिवद्भवति द्विर्वचन एव कर्तव्ये। रूपातिदेशश्चायं नियतकालः। कृते द्विर्वचने पुनरादेशरूपमेवावतिष्ठते। आलोपः
पपतुः पपुः। आतोलोप इटि च इत्याकारलोपे कृते तस्य स्थानिवद्भावात् द्वावेकाच इति द्विर्वचनं भवति। उपधालोपः। जग्मतुः। जग्मुः। गम
हनजनखनघसामित्युपधालोपे कृते अकृतत्वाद्द्विर्वचनं स्यात् अस्माद्वचनाद्भवति। णिलोपः। आटिटत्। अटतेर्णिच् लुङि च्लेः चङ् णिलोपे च कृते
तस्य स्थानिवत्त्वाद् अजादेर्द्वितीयस्येति टिशब्दस्य द्विर्वचनं भवति। यण्। चक्रतुः चक्रुः। करोतेरतुसि उसि च यणादेशे कृते अनच्कत्वात् द्विर्वचनं न स्याद
स्थानिवद्भावाद्भवति। अयवायावादेशाः। निनय। लुलव। निनाय। लुलाव। नयतेर्लुनातेश्च णलि गुणवृद्धी आयावौ अयवायावादे
शास्तेषां स्थानिवत्त्वात् नै लौ इति द्विर्वचनं भवति। द्विर्वचननिमित्ते इति किं। जग्लौ म्लौ। ग्लायतेर्म्लायतेश्च णलि आकारस्य औत्वं कृते वृद्धिरे
चीति वृद्धिर्न भवति। द्विर्वचननिमित्ते इति किं। दुद्युषति। ऊठि यणादेशो न स्थानिवद्भवति। अचीति किं। जेघ्रीयते। देध्मीयते ई घ्राध्मोर्यङि ध्मायतेश्चे
ति ईकारादेशस्तस्य स्थानिवत्त्वादाकारस्य द्विर्वचनं स्याद्यङन्तस्य। ५९। अदर्शनं लोपः। अदर्शनमश्रवणमनुच्चारणमनुपलब्धि
न रभावो विनाश इत्यर्थान्तरं। एतैः शब्दैर्योऽर्थोऽभिधीयते तस्य लोप इत्ययं संज्ञा भवति प्रसक्तस्य दर्शनं लोपसंज्ञं भवति। गोधायाः

इकुगोधेरः। पचेरन्। जीवेरदानुः। स्रिवः। आस्रेमाणं। यकारवकारवकारयोरदर्शनं उदाहरणं। अपरस्य चानुबंधादेः प्रसक
स्य। लोपप्रदेशाः लोपो व्योर्वलि लिंपेयमादयः। ६०। प्रत्ययस्य लुक्श्लुलुपः। अदर्शनमितिवर्तते प्रत्ययादर्शनस्य लुक्श्लुलुप इत्येताः संज्ञा भवं
ति। अनेकसंज्ञाविधानाच्च तद्भावितग्रहणानि लुमति श्लुमति लुपमति विज्ञायते। लुक्संज्ञया भावितं प्रत्ययादर्शनं लुक्संज्ञं भवति। श्लुसंज्ञया
भावितं श्लुसंज्ञं भवति। लुप्संज्ञया भावितं लुप्संज्ञं भवति। तेन संज्ञानां संकरो न भविष्यति। विधिप्रदेशेषु च भाविनी संज्ञा विज्ञायते। अति
लुकेति। चरणाः प्रत्ययग्रहणं किं। अगस्तयः। कुंडिनाः। लुक्श्लुलुप्प्रदेशाः। लुक्तद्धितलुकि। जुहोत्यादिभ्यः श्लुः। जनपदे लुबित्येवमादयः। ६१।
प्रत्ययलोपे प्रत्ययलक्षणं।। प्रत्ययनिमित्तं कार्यमसत्यपि प्रत्यये कथं नु नाम स्यादिति सूत्रमारभ्यते। प्रत्ययलोपे कृते प्रत्ययलक्षणं। प्रत्यय
निमित्तं तद्धेतुकं कार्यं भवति अग्निचित्। अधोगिति। सुपि इडिलुप्तयोः सुप्तिङंतं पदमिति पदसंज्ञा भवति। अधोगिति। दुहेर्लङ् तिपि श
लुकि तिलोपघत्वजश्त्वचर्त्वेषु कृतेषु कृतं। प्रत्ययग्रहणे तु वर्तमाने पुनः प्रत्ययग्रहणं किं। कृत्स्नप्रत्ययलोपे। यथा स्यादिह मा भूत्।
आघ्नीत। संग्मीत। हनिगम्योर्लिङ् आत्मनेपदे लिङः सलोपोऽनंत्यस्येति सीयुटः सलोपः प्रत्ययैकदेशलोपस्तत्र प्रत्ययलक्षणो अनुदात्तोपदे
शेत्यनुनासिकलोपो न भवति। प्रत्ययलक्षणमिति किं। रायः कुलं रैकुलं गवे हितं गोहितं। आयवादेशौ न भवतः। वर्णाश्रयत्वात्
। ६२। न लुमतांगस्य।। पूर्वेण प्रसक्तं प्रत्ययलक्षणमिति विशेषे प्रतिषेध उच्यते। लुमता शब्देन लुप्ते प्रत्यये यदंगं तस्य प्रत्ययलक्षणं कार्यं
न भवति। गर्गाः। मृष्टः। जुहुतः। शप्प्रत्ययोर्लुमता। लुप्तयोरंगस्य गुणवृद्धी न भवतः। लुमतेति किं। कार्यते। हार्यते। अंगस्येति किं। पंच। स
प्त। पयः। साम। ६३। अचोंऽत्यादि टि।। अच इति निर्धारणे षष्ठी। जातावेकवचनं। अचां संनिविष्टानां योंऽत्यो अच् तदादिशब्दरूपं टिसंज्ञं भवति
अग्निचित्। उत्शब्दः। सोमसुत्। उत्शब्दः। आतां। अथाम्। आम्शब्दः। पचेते। पचेथे। टिप्रदेशाः। टित आत्मनेपदानां टेरे इत्येवमादयः
। ६४। अलोंऽत्यात्पूर्व उपधा।। धात्वादौ वर्णसमुदाये योऽन्त्यादलः पूर्वोऽल् वर्णः स उपधासंज्ञो भवति। पच। पठ अकारः। भिद। छिद इकारः। बुध
युध उकारः। वृत वृध ऋकारः। अल इति किं। शिष्टः। शिष्टवान्। समुदायात्पूर्वस्य मा भूत्। उपधाप्रदेशाः। अत उपधाया इत्येव
मादयः। ६५। तस्मिन्निति निर्दिष्टे पूर्वस्य।। तस्मिन्निति सप्तम्यर्थनिर्देशे पूर्वस्यैव कार्यं भवति नोत्तरस्य। इको यणचि। दध्युदकं। मधुनिदं

चत्योदनं। निर्दिष्टग्रहणमानंतर्यार्थं। अग्निचिदत्र व्यवहितस्य मा भूत्। ६६। तस्मादित्युत्तरस्य।। निर्दिष्टग्रहणमनुवर्तते। त
स्मादिति पंचम्यर्थनिर्देशे उत्तरस्यैव कार्यं भवति। न पूर्वस्य। तिङ्ङतिङः। ओदनं पचति। इह न भवति। पचत्योदनमिति। ६७। स्वं रूपं श
ब्दस्याशब्दसंज्ञा।। इह शास्त्रे स्वरूपं शब्दस्य ग्राह्यं बोध्यं प्रत्याय्यं भवति। न बाह्योऽर्थः। शब्दसंज्ञां वर्जयित्वा। शब्देनार्थावगते। अर्थे कार्यस्यासंभ
वात्। तद्वाचिनां शब्दानां संप्रत्ययो मा भूदिति सूत्रमारभ्यते। अग्नेर्ढक्। आग्नेयमष्टाकपालं चरुं निर्वपेत्। अग्निशब्दो अग्निशब्दस्यैव ग्राहको
न भवति। न ज्वलनः। पावको धूमकेतुरिति। ततो भवति प्रत्ययः। उदश्वितोऽन्यतरस्यां। ॐ औदश्वित्कं। औदश्वितं। तक्रमपिष्टं। का
लशेयं उदकं तस्माद्धितमिति नातो भवति प्रत्ययः। अशब्दसंज्ञेति किं। दाधा घ्वदाप्। तरप्तमपौ घः। प्रत्ययग्रहणेषु च संज्ञिनो ग्रहणं
न संज्ञायाः। सिद्धं तद्विशेषाणां ग्रहणार्थं सिन्निर्देशः कर्तव्यः। ततो वक्तव्यं। ततो न वक्तव्यं तद्विशेषाणां ग्रहणं भवतीति किं। प्रयोजनं। वृक्षा
र्थं। पिन्निर्देशः कर्तव्यः। ततो वक्तव्यः। ततो पि वक्तव्यं। विभाषा वृक्षमृगतृणधान्य पूर्वापराधरोत्तराणां। प्लक्षन्यग्रोधं। प्लक्षन्यग्रोधौ। विस्वस्यापि वचनस्य वस्त्वा
र्थं। पर्यायवचनस्य च ग्रहणं भवति। स्वस्य च रूपस्य तद्विशेषाणां चेति। किं प्रयोजनं स्वाद्यर्थं। स्वेपुषः। स्वपोषं। रैपोषं। धनपोषं।
गोपोषं। जित्पर्यायवचनस्यैव राजाद्यर्थं। जिन्निर्देशः कर्तव्यः। ततो वक्तव्यं। पर्यायवचनस्यैव ग्रहणं भवति न स्वरूपस्य नापि तद्विशेषाणां
किंप्रयोजनं राजाद्यर्थं। सभा राजामनुष्यपूर्वा। इनसभं। ईश्वरसभं। तस्यैव न भवति। राजसभा। तद्विशेषाणां च न भवति। पुष्यमित्रस
भा। चंद्रगुप्तसभा। झित्तस्य च तद्विशेषाणां च मत्स्याद्यर्थं झिन्निर्देशः कर्तव्यः। ततो वक्तव्यं। तस्य ग्रहणं तद्विशेषाणां चेति। किंप्रयोजनं
मत्स्याद्यर्थं। पक्षिमत्स्यमृगान्हंति। मात्स्यिकः। तद्विशेषाणां च। शाकुलिकः। पर्यायाणां न भवति। अजिह्मान्हंति। अनिमिषान्हंति
अस्त्येकस्य पर्यायवचनस्य यतो मीनान्हंति मैनिकः। ६८। अणुदित्सवर्णस्य चाप्रत्ययः।। परेण णकारेण प्रत्याहारग्रहणं। अणृ
ह्यमाणं उदिच्च सवर्णानां ग्राहको भवति। स्वस्य च रूपस्य। प्रत्ययं वर्जयित्वा। आद्गुणः। अस्य च्वौ। यस्येति च। स्वरानुनासिक्यकालभिन्न
स्यापि रूपस्य। अप्रत्ययं वर्जयित्वा। अस्य च्वौ। यस्येति च। स्वरानुनासिक्यकालभिन्नस्यापि ग्रहणं भवति। उदित्खल्वपि।
चु टु। कुशकर्तृद्गितौ। चवर्गटवर्गयोः। चोः वर्गस्य च ग्रहणं भवति। अप्रत्यय इति किं। चिकीर्षुः। सनाशंसभिक्ष उः। असांप्रतिकं। दीर्घं

न भवति ६९ । तपरस्तत्कालस्य ॥ तपरो यस्मात् सोयं तपरः । तादपि परः तपरः । तपरो वर्णस्तत्कालस्यात्मना तुल्यकालस्य गुणांतर
युक्तस्य सवर्णस्य ग्राहको भवति । स्वरूपस्य च । विध्यर्थमिदं । अणिति नानुवर्तते । अण्णामन्येषां च तपराणामिदं नियमार्थं कृशाल्स अतोभि
स ऐस्नेव नादिषु । वृद्धिरेडादैच् फलात्संनप्रवृत्तमेव अतपराणस्तस्यावकाशः इति । किमुदाहरणं । अतोभिस ऐस् । वृक्षैः । कुक्षैः । विड्वनो
रनुनासिकस्यात् । अब्जाः । गोजाः । तत्कालस्येति किं । खट्वाभिः । मालाभिः ७० । आदिरन्त्येन सहेता ॥ आदिरन्त्येनेता इत्संज्ञकेन सह गृह्यमा
णस्तन्मध्यवर्तिनां वर्णानां ग्राहको भवति स्वस्य च रूपस्य । अण् । अक् । अच् । हल् । सुप् । तिङ् । अन्त्येनेति किं । सुडिति तृतीयैकवचने
ग्रहणं मा भूत् ७१ । येन विधिस्तदन्तस्य ॥ येन विशेषणेन विधिर्विधीयते स तदन्तस्यात्मनश्च समुदायस्य ग्राहको भवति अवश्यलाव्यः
अवश्यपाव्यः । समासप्रत्ययविधौ प्रतिषेधः । समासविधौ प्रत्ययविधौ च तदंतस्य विधेः प्रतिषेधो वक्तव्यः । द्वितीया श्रितादिभिः । स
ह समस्यते । कष्टश्रितः । इह मा भूत् । कष्टं परमश्रितः प्रत्ययविधौ नडादिभ्यः फक् नडस्यापत्यं नाडायनः । इह मा भूत् । सूत्रनडस्यापत्यं
सौत्रनाडिः । किम विशेषेणैतन्नेत्याह । उगितवर्णग्रहणवर्ज्जं । उगितश्चेति ङीप् प्रत्ययस्तदंतादपि भवति । भवती । अतिभवती । वर्णग्रहणं
अत इञ् दाक्षिः प्लाक्षिः । यस्मिन्विधिस्तदादावल्ग्रहणे । अल्ग्रहणेषु यस्मिन्विधिस्तदादाविति वक्तव्यं । अचि श्नुधातुभ्रुवां य्वोरियङु
वङौ । श्रियः । भ्रुवः ७२ । वृद्धिर्यस्याचामादिस्तद्वृद्धं ॥ यस्येति समुदाय उच्यते । अचां मध्ये यस्य वृद्धिसंज्ञक आदिभूतस्तच्छब्द
रूपं वृद्धसंज्ञं भवति । अचामिति जातौ बहुवचनं । शालीयः । कापठवीयः ॥ आदिरिति किं । सभासन्नयने भवः साभासन्नयनः ।
वानामधेयस्य वृद्धसंज्ञा वक्तव्या । देवत्ताः । दैवदत्तः । गोत्रांतादसमस्तवत्प्रत्ययो भवतीति वक्तव्यं । घृतप्रधानो रौढिः घृतरौढिः । तस्य
छात्रा घृतरौढीयाः । ओदनप्रधानाः पाणिनिः ओदनपाणिनिः । तस्य छात्रा ओदनपाणिनीयाः । वृद्धांभीमाः । वृद्धकाश्यपीयाः
जिह्वाकात्यहरितकात्यवर्जं । जैह्वाकाताः हारितकाताः ७३ । त्यदादीनि च ॥ यस्याचामादिग्रहणमनुवर्तते उक्तसंबध्यते
त्यदादीनि शब्दरूपाणि वृद्धसंज्ञानि भवंति । त्यदीयं तदीयं एतदीयं इदमीयं अदसीयं । द्वीपं । त्वादायनिः । मादायनिः । भवदीयं कि
मीयं ७४ । एङ् प्राचां देशे ॥ यस्याचामादिग्रहणमनुवर्तते । एङ् यस्याचामादिस्तत्प्राचां देशानामभिधाने वृद्धसंज्ञं भवति ।

एणीपचनीय वनीयः ॥ गोनर्दीयाः । भोजकटीयाः । एङिति किं । आहिच्छत्रः कान्यकुब्जः । प्राचामिति किं । देवदत्तो नाम वाहीकेषु ग्रा
मः । तत्र भवो दैवदत्तः । देश इति किं । गोमत्यां भवा मत्स्या गौतमः । प्रागुदंचौ विभजते हंसः क्षीरोदकं यथा । विदुषां शब्दसिद्ध्यर्थं सा नः पा
तु शरावती ७५ ॥ ॥ इति काशिकायां वृत्तौ प्रथमाध्यायस्य प्रथमः पादः समाप्तः ॥ ॥ गाङ्कुटादिभ्योऽञ्णिन्ङित् ॥ गाङिति गृह्यते गाङ् इति
देशोयं गाङिति इङादेशो गृह्यते न गाङ् गतौ ङकारस्यानन्यार्थत्वात् । कुटादयः । कुट कौटिल्ये इत आरभ्य प्रावत् कुङ् शब्दे इति एते
भ्यो गाङ्कुटादिभ्यः परं ञ्णितः प्रत्यया ङितो भवंति ङिद्वद्भवंति सर्वे । गाङ् । अध्यगीषातां । अध्यगीषत । कुटादिभ्यः । उत्कुटिता
उत्कुटितुं । उत्कुटितव्यं । उत्पुटिता । उत्पुटितुं । उत्पुटितव्यं । अञ्णिदिति किं । उत्कोटयति । उत्कोटकः । उत्कोटो वर्तते । व्यचेः कु
टादित्वमनसीति वक्तव्यं । विचिता विचितुं विचितव्यं । अनसीति किं । उरुव्यचाः ॥ १ ॥ विज इट् ॥ ओविजी भयचलनयोः । अस्मात्परः इडादिः प्रत्य
यो ङिद्भवति । उद्विजिता । उद्विजितुं । उद्विजितव्यं । इडिति किं । उद्वेजनं । उद्वेजनीयं । विभाषोर्णोः । इडिति वर्तते । ऊर्णुञ् आच्छादने । अस्मात्पर
इडादिः प्रत्ययो विभाषा ङिद्भवति । प्रोर्णुविता प्रोर्णविता इत्येव । प्रोर्णविता ३ ॥ सार्वधातुकमपित् ॥ सार्वधातुकं यदपित् तत् ङिद्भवति । कुरुतः
कुर्वंति । चिनुतः । चिन्वंति । सार्वधातुकमिति किं । कर्तव्यं । अपिदिति किं । करोति । करोषि ४ ॥ असंयोगाल्लिट् कित् ॥ अपिदित्यनुवर्तते
असंयोगांताद्धातोः परो लिट् प्रत्ययोपित् कित् भवति । बिभिदतुः बिभिदुः । इजतुः इजुः । असंयोगादिति किं । सस्रंसे । दध्वंसे । अपिदित्येव । बिभेद ५
॥ इंधिभवतिभ्यां च ॥ इंधि भवति एताभ्यां च परो लिट् प्रत्ययः किद्भवति । समीधे दस्युहन्तमम् । पुत्र ईधे अथर्वणः । भवतेः । बभूव । बभूव
बभूविथ । इंधेः संयोगार्थं वचनं भवतेः पिदर्थं वचनं । श्रन्थिग्रन्थिदंभिस्वंजीनामिति वक्तव्यं । श्रेथतुः श्रेथुः । ग्रेथतुः ग्रेथुः । देभतुः देभुः ।
परिषस्वजाते ६ ॥ मृडमृदगुधकुषक्लिशवदवसः क्त्वा ॥ मृड मृद गुध कुष क्लिश वद वस एतेभ्यः परः क्त्वा प्रत्ययः किद्भवति । न क्त्वा सेट्
इति प्रतिषेधं वक्ष्यति । तस्यायं पुरस्तादपकर्षः । गुधकुषक्लिशानां तु रलो व्युपधाद्धलादेः संश्चेति विकल्पे प्राप्ते नित्यार्थं वचनं । मृडित्वा मृदित्वा
गुधित्वा कुषित्वा क्लिशित्वा उदित्वा उषित्वा ७ ॥ रुदविदमुषग्रहिस्वपिप्रच्छः संश्च ॥ रुद विद मुष ग्रहि स्वपि प्रच्छ इत्येतेभ्यः परः संश्च क्त्वा च कितौ
भवतः । रुदविदमुषाणां रलो व्युपधादिति विकल्पे प्राप्ते नित्यार्थं वचनं ग्रहेर्विध्यर्थमेव । स्वपिप्रच्छ्योः सनर्थं ग्रहणं किदेव हि क्त्वा । रुदित्वा । रुरु

दिषति। विदित्वा। विविदिषति। मुषित्वा। मुमुषिषति। गृहीत्वा। जिघृक्षति। अनर्थकंतु ह्रस्वार्थं दीर्घ। इगंतु। सृष्ट्वा। सिसृक्षति। कृत्वा। चिकीर्षति। पृष्ट्वा। पिपृ
च्छिषति। ग्रहादीनां कित्वात् संप्रसारणं भवति। किरश्च पंचभ्य इति। पृच्छेरिडागमः ॥ ८ ॥ संनिसनुवर्तते केवलनिवृत्तं। इगंताद्धातोः
परो झलादिः सन् किद्भवति। चिकीर्षति। कृ इति किं। पिपासति। तिष्ठासति। झल इति किं। शिशयिषते। किमर्थमिदमुच्यते। गुणो मा भूदिति।
अज्झनगमां सनि इति दीर्घत्वं गुणस्य बाधकं भविष्यति। यथैवं तर्हि गुणं बाधते। एवं निष्ठोपमपि बाधेत। तस्माद्दीर्घत्वस्यावकाशप्रदानाय किद
मिदमारभ्यते। चिकीर्षति स्यादिषु सावकाशं दीर्घत्वं परत्वात् गुणेनोपेनबाध्यते। ज्ञास्यति। इकः। किं सं गुणो मा भूत्। दीर्घविधिर्मा भूत्। एतेषां पूर्वत्र
अनर्थकत्वात् ह्रस्वार्थं दीर्घादिगंतु प्रसज्यंते। सामर्थ्याद्धि पुनर्भाव्यमिदं दीर्घसंश्रयं। दीर्घाणिश्चाऽतते दीर्घे गिलोपस्तु प्रयोजनं ॥ ९ ॥
इकः सन् झल् किदिति वर्तते। समासे पञ्चमी न तेतशब्दः। हल् चासावंतश्च हलंतः। इगंताद्धातोः समीपगतात् हलः परः सन् झ
लादिः किद्भवति। बिभित्सते। इकश्रेव। पिपृच्छते। झलित्येव। विवर्द्धिषते। हलि ग्रहणस्य जातिवाचकत्वात् सिद्धं यियक्षति धीप्सति ॥ १० ॥
हलंतादिको झलकिदिति वर्तते। सन्निति निवृत्तं। इकसमीपाद्धलः परौ झलादी लिङ् सिचौ आत्मनेपदेषु परतः
कितौ भवतः। भित्सीष्ट। भुत्सीष्ट। सिचः खल्वपि। अभित्त। अबुद्ध। इकः। इत्येव। पेक्षीष्ट। अयष्ट। संप्रसारणं हि स्यात्। आत्मनेपदेष्विति किं।
अस्राक्षीत्। अद्राक्षीत्। सृजिदृशोर्झल्यमकितीति अमागमो न स्यात्। हलंतादित्येव। चेषीष्ट। अचेष्ट। गुणो न स्यात्। झलित्येव। वर्तिषीष्ट। अ
वर्तिष्ट। गुणो न स्यात्। लिङ् सिचाविति किं। द्वेष्टद्वेक्षते ॥ ११ ॥ तात्द्धातोः परौ लिङ् सिचावात्मनेपदेषु झलादी कितौ भवतः। कृषीष्ट
हृषीष्ट सिचः खल्वपि। अकृत। अहृत। झलित्येव। वरिषीष्ट। अवरिष्ट। आत्मनेपदेष्वित्येव। अकार्षीत्। अहार्षीत् ॥ १२ ॥ लिङ् सिचा
वात्मनेपदेष्विति वर्तते। गमेर्धातोः परौ लिङ् सिचावात्मनेपदेषु झलादिवाकितौ भवतः। सगंसीष्ट। संगसीष्ट। सिचः खल्वपि। समगत सम
गंस्त। कित्वपक्षे नुनासिकलोपो भवति अनुदात्तोपदेशवनतितनोत्यादीनामिति ॥ १३ ॥ हंतेर्धातोः परः सिच् प्रत्ययः कि
द्भवति। आहत। आहसातां। अहसत। सिचः कित्वात् अनुनासिकलोपः। सिच्ग्रहणं लिङ्निवृत्त्यर्थं उत्तरअनुवृत्तिमाभूत्। आत्मनेपदेष्व
नुत्तरार्थमनुवर्तते। इहतु परस्मैपदेषु हंतेर्वधभावश्यानित्यत्वात् कित्वस्य प्रयोजनं नास्ति ॥ १४ ॥ सिजात्मनेपदेष्विति व

११

र्तते। यमेर्धातोर्गंधने वर्तमानात् परः सिच् प्रत्ययः किद्भवति। आत्मनेपदेष्विति तः गंधनं। सूचनं परेण प्रच्छाद्यमानस्यावद्यस्याविष्कर
णं। अनेकार्थत्वाद्धातूनां यमिस्तत्र वर्तते। उदायत। उदायसातां। उदायसत। सूचितवानित्यर्थः सिचः कित्वात् अनुनासिकलोपः आ
ङोयमहन इत्यात्मनेपदं। गंधन इति किं। उदायंस्त पादं। उदायंस्त कूपाद्रज्जुम्। उद्धृतवानित्यर्थः। सकर्मकेपि समुदाङ्भ्यो यमोग्रंथे इत्या
त्मनेपदं ॥ १५ ॥ सिजात्मनेपदेष्विति वर्तते। यमेर्धातोरुपयमने वर्तमानात् परः सिच् प्रत्ययो विभाषा कि
द्भवति आत्मनेपदेषु परतः। उपायत कन्यां। उपायंस्त कन्यां। उपायत भार्यां। उपायंस्त भार्यां। उपयमनं स्वीकरणं विवाहो दारकर्म पाणि
ग्रहणमित्यर्थः। उपाद्यमः स्वकरणे इत्यात्मनेपदं ॥ १६ ॥ तिष्ठतेर्धातोरिदुसंज्ञकानां च कारः
अंत्यादेशः सिच् किद्भवति आत्मनेपदेषु परतः। उपास्थित। उपास्थिषातां। उपास्थिषत। घुसंज्ञकानां। आदित। अधित। इत्वं कस्य तका
रेत्वं दीर्घमिच्छंत्यतोपि सः। अंतरेणापि तो मात्रत। प्लुतस्य विषयेस्मृतः। नक्त्वासेट् क्त्वा प्रत्ययः सेट् किद्भवति। देवित्वा। सेवित्वा। वर्तित्वा। वर्द्धित्वा।
सेडिति किं। कृत्वा। हत्वा। क्त्वाग्रहणं किं निगृहीतिः। उपस्निहीतिः। निकुचितिः। नसेडिति छत्वे अक्तित्वं निष्ठायामवधारणात्। ज्ञापकान्न परो
क्षायां सनि मल्ग्रहणं विदुः। इत्वं किंत्सनियोगेन रेग्तुल्यं सुधीवनि। वस्वर्थं किदतिदेशाद्भिगद्दिति प्रयोजनं ॥ १८ ॥
शीङित्यनुवर्तते शीङ् स्विदिमिदिक्ष्विदिधृषइत्येतेभ्यः। परो निष्ठा प्रत्ययः सेट् न किद्भवति। शयितः। शयि
तवान्। प्रस्वेदितः। प्रस्वेदितवान्। प्रमेदितः। प्रमेदितवान्। प्रक्ष्वेदितः। प्रक्ष्वेदितवान्। प्रधर्षितः। प्रधर्षितवान्। सेडित्येव। स्वि
न्नः। स्विन्नवान्। स्विदादीनामादितश्चेति निष्ठायामिट् प्रतिषिध्यते विभाषा भावादिकर्मणोरिति पक्षेनुज्ञायते स विषयः क्लिष्टस्य
क्षेपस्य ॥ १९ ॥ मृषेर्धातोस्तितिक्षायां निष्ठा सेट् न किद्भवति तितिक्षा क्षमा। मर्षितः। मर्षितवान्। तिति
क्षायामिति किं। अपमृषितं वाक्यमाह ॥ २० ॥ निष्ठा सेडनकिदिति वर्तते। उदुपधाद्धातोः
परो भावे आदिकर्मणि च वर्तमानो निष्ठा प्रत्ययः सेट् न किद्भवति अन्यतरस्यां। द्युतितमनेन द्योतितमनेन। प्रद्युतितः। प्रद्योतितः।
मुदितमनेन मोदितमनेन। प्रमुदितः। प्रमोदितः। उदुपधादिति किं। लिखितमनेन विदितमनेन। भावादिकर्मणोरिति किं। रुचि

तंकाषयिएंददातिसिद्धिरित्येव। प्रभुक्तवोदनः। व्यवस्थितविभाषाचेयं। तेनशप्विकरणानामेवभवति। गुणपरिवेष्टने तेनगुधितमित्यत्र
भवति। १९॥ पूङः क्त्वा च॥ अन्यतरस्यामिति नस्वर्यते। उत्तरसूत्रेपुनर्यावचनात्। नसेडितिनिवर्तते। पुङश्चेद्दिहितः क्त्विश्क्तानिष्ठयोः।
पूङ्परोनिष्ठाप्रत्ययः सेदनकिद्भवति। पवितः। पवितवान्। क्त्वाप्रत्ययस्यनक्त्वासेडितिसिद्धएवप्रतिषेधः। तस्यग्रहणमुत्तरार्थं तथाचोक्तं।
नित्यमकित्वमिडाद्योः क्त्वानिष्ठयोः क्त्वाग्रहणमुत्तरार्थमिति। २२॥ नोपधात्थफान्ताद्वा॥ निष्ठेतिनिवृत्तं नकारोपधाद्धातोः थकारान्तात्
फकारान्ताच्चपरः क्त्वाप्रत्ययः सेड्वानाकिद्भवति। ग्रथित्वा। ग्रंथित्वा। श्रथित्वा। श्रंथित्वा। गुफित्वा। गुंफित्वा। नोपधादितिकिं रेफित्वा। थ
फान्तादितिकिं। अंसित्वा। ध्वंसित्वा। २३॥ वंचिलुंच्यृतश्च॥ वंचिलुंचिऋतइत्येतेभ्यपरः क्त्वाप्रत्ययः सेड्वानकिद्भवति। वचित्वा। वंचित्वा।
लुचित्वा। लुंचित्वा। अर्तित्वा। ऋतेरीयङ्। आर्द्धधातुकेविकल्पितः सपक्षेनास्ति तत्रेदमुदाहरणं। सेडित्येव। वक्त्वा। २४॥ तृषिमृषिकृशेः
काश्यपस्य॥ नक्त्वासेडितिप्रतिषेधेप्राप्तेकित्वं विकल्प्यते। तृषिमृषिकृशि इत्येतेभ्यः परः क्त्वाप्रत्ययः सेट् काश्यपस्याचार्यस्यमतेनवानकि
द्भवति। तृषित्वा। तर्षित्वा। मृषित्वा। मर्षित्वा। कृशित्वा। कर्शित्वा। काश्यपग्रहणं पूजार्थं वेत्येवहिवर्तते। २५॥ रलो व्युपधाद्धलादेः
संश्च॥ वेतिवर्तते। सेडितिच। उंश्चइश्चवी। तेउपधेयस्यसव्युपधः। उकारोपधादिकारोपधाच्चधातोरलन्ताद्धलादेः परः संश्च क्त्वाचसेडौवाकि
तौभवतो। द्युतित्वा। द्योतित्वा। दुद्युतिषते। दिद्योतिषते। लिखित्वा। लेखित्वा। लिलिखिषति। रलइतिकिं। देवित्वा। दिदेविषति। व्युपधा
दितिकिं। वर्तित्वा। विवर्तिषते। हलादेरितिकिं। एषित्वा। एषिषिषति। सेडित्येव। भुक्त्वा। बुभुक्षते। २६॥ ऊकालोऽज्झ्रस्वदीर्घप्लुतः॥ ऊइति
त्रयाणां। अयं एकमात्रिकद्विमात्रिकत्रिमात्रिकाणां प्रश्लेषनिर्देशः ह्रस्वदीर्घप्लुत इति द्वंद्वैकवद्भावेपुल्लिंगनिर्देशः। उऊऊ३इत्येवं कालो
ऽच् यथाक्रमं ह्रस्वदीर्घप्लुतइत्येवं संज्ञोभवति। उकालो ह्रस्वः। दधिमधु। ऊकालोदीर्घः। कुमारी। गौरी। ऊ३कालः प्लुतः। देवदत्त३। अत्रान्व
सि। कालग्रहणंपरिमाणार्थं। दीर्घप्लुतयोर्ह्रस्वसंज्ञामाभूत्। अकुप। अलूय। ह्रस्वस्यपितिकृतितुग्भवति। अज्ग्रहणं संयोगाच्
समुदायनिवृत्त्यर्थं। प्रतक्ष्य प्ररक्ष्य ह्रस्वाश्रयस्तुग्माभूत्। तितउच्छत्रं। दीर्घत्यिदन्ता हेतिविभाषा तुग्माभूदितिह्रस्वप्लुतप्रदेशाः।
ह्रस्वोनपुंसके प्रातिपदिकस्य। अकृत्सार्वधातुकयोर्दीर्घः। वाक्यस्य टेः प्लुत उदात्त इत्येवमादयः। २७॥ अचश्च॥ परिभाषेयं। स्थानिनियमार्थं

DR BHAU DAJI

ह्रस्वदीर्घप्लुताः स्वसंज्ञया शिष्यमाणाः अच एवस्थानेवेदितव्याः। वक्ष्यति। ह्रस्वोनपुंसके प्रातिपदिकस्य। रै अतिरि। नौ। अतिनु। गोउपगु।
अचइति किं सुवाक्। ब्राह्मणकुलं। अकृत्सार्वधातुकयोर्दीर्घः। चीयते। स्तूयते। अचइतिकिं। भिद्यते। छिद्यते। वाक्यस्य टेः प्लुत उदात्तः। देवदत्त३।
अचइतिकिं। अग्निचित्। सोमसुत्। तकारस्यमाभूत्। संज्ञयोविधानेनियमः। अज्ञितिकिं वर्तते। इहमाभूत्। द्यौः पंथाः सः कार्या कर्त्तरि
रिति। अत्रानियमोनास्ति। २८॥ उच्चैरुदात्तः॥ अज्ञितिवर्तते। उदात्तादिशब्दाः। स्वरेवर्णधर्मे लोकवेदयोः। प्रसिद्धाएव इहतद्गुणे अचिपरि
भाष्यंते। उच्चैरुपलभ्यमानोयोच् उदात्तसंज्ञोभवति। उच्चैरितिचश्रुतिप्रकर्षोनगृह्यते। उच्चैर्भाषिते। उच्चैः पठतीतिकिं ताल्वादिस्थानकृतमुच्चत्वं
चसंज्ञितोविशेषणं ताल्वादिषु हि भागवत्सुस्थानेषु वर्णानिष्पद्यंते। तत्रयः। समानेस्थाने ऊर्ध्वभागेनिष्पन्नोच् सउदात्तसंज्ञोभवति। यस्मि
न्नुच्चार्यमाणे आयामोगात्राणां निग्रहोभवति। रूक्षताचस्वरस्य संवृतताकंठविवरस्यचेति। पितेके उदात्तप्रदेशाः। आद्युदात्तश्चेत्येवमादयः
॥२९॥ नीचैरनुदात्तः॥ अज्ञितिवर्तते। नीचैरुपलभ्यमानोच् अनुदात्तसंज्ञोभवति। समानेस्थाने नीचभागेनिष्पन्नोऽनुदात्तः। यस्मिन्नु
च्चार्यमाणे गात्राणामन्ववसर्गोभवति। मार्दवं स्वरस्य मृदुतास्निग्धताकंठविवरस्योरुतामहता। त्वासमसिन। नेमेवानुधानि। नमस्तेरुद्र
नीलकंठसहस्राक्ष। अनुदात्तप्रदेशाः। अनुदात्तौ सुप्पितावित्येवमादयः। ३०॥ समाहारः स्वरितः॥ अज्ञितिवर्तते। उदात्तानुदात्तस्वरस
माहारोऽच् स्वरितसंज्ञोभवति। सामर्थ्यात् अत्रवर्णलोकयोः प्रसिद्धौ गुणावेवग्रहणं उदात्तानुदात्तौगृह्येतेनाचौ। तौसमाह्रियेतेयस्मिन्
चितस्यस्वरितसंज्ञाविधीयते। शिक्यंकन्या। सामन्य। क्वस्वरितप्रदेशाः तित्स्वरितमित्येवमादयः। ३१॥ तस्यादित उदात्तमर्द्धह्रस्वं॥ उदात्ता
नुदात्तस्वरसमाहारः स्वरित इत्युक्तं तत्रनज्ञायते। कस्मिन्नंशे उदात्तः कस्मिन्ननुदात्तः। कियान्वाउदात्तः कियाननुदात्तइतितदुभयमाख्यायते
तस्यस्वरितस्य। आदावर्द्धह्रस्वमुदात्तं परिशिष्टमनुदात्तं। परिशिष्टमनुदात्तमिति। अर्द्धह्रस्वमितिचार्द्धमात्रोलक्ष्येत। ह्रस्वग्रहण
मतंत्रं। सर्वेषामेव ह्रस्वदीर्घप्लुतानां स्वरितानामेषस्वरविभागः। शिक्यमित्यत्र आद्यर्द्धमात्रा आदितउदात्ता अर्द्धमात्रानुदात्ता। कन्येत्यर्द्धतियी-
कंन्येत्यत्र। अर्द्धमात्रा आदितउदात्ता। अध्यर्द्धमात्रानुदात्ता। माणवक३ माणवक इत्यत्र अर्द्धमात्रा आदित उदात्ता। अर्द्धमात्रानुदात्ता

यात्राअनुदात्ता २२। [illegible] त्रैस्वर्यपदानां प्रामेदुरात्संबुद्धावेकश्रुत्यं विधीयते तिरस्यतदिदमेकश्रुतिरेकश्रु
तिवाक्यं भवति। दूरात्संबोधयति। एनतत्संबोधनं संसंबुद्धिनेकथनं। स्वराणामुदात्तादीनामविभागो भेदतिरोधानमेकश्रुति।
आगच्छभोमानवकदेवदत्ता ३ दूरादितिकिं। आगच्छभो माणवक देवदत्त २३ [illegible] त्रैस्वर्येण
वेदे मंत्राः। पठ्यंते तेषां यज्ञक्रियायामपि तथैव प्रयोगे प्राप्ते एकश्रुति विधीयते। यज्ञकर्मणि मंत्राणामेकश्रुत्यं भवति। जपन्यूङ्ख
सामानिवर्ज्य इत्या। अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयं। अपां रेतांसि जिन्वतो३म्। यज्ञकर्मणीति किं। संपाठे मा भूत्। अ
जपेष्विति किं। ममाग्ने वर्चो विहवेष्वस्तु। जपोनुकरणमंत्रः उपांशुप्रयोगः। अन्यूङ्खसामस्विति किं न्यूङ्खाः। ओं ओं ओं ओं ओं ओं ओं
ओं ओं ओं ओं ओं ओं ओं ओं ओं। ओकाराः षोडश तेषु केचिदुदात्ताः। ऊ३ ऊ३ ऊ३ ऊ३ ऊ३। असामस्विति किं। ए३ विश्वं समं
त्रिणं दह। सामानि वाक्यविशेषस्या गीत उपच्यंते। तत्रैकश्रुतिर्नभवति न २४ [illegible] यज्ञकर्मणीति वर्तते। यज्ञकर्म
णि वषट्कार उच्चैस्तरां वा भवति। एकश्रुतिर्वा। वषट्शब्देन चात्र वौषट्शब्दोपलक्ष्यते। तस्येदं स्वरविधानं यथौषट्ग्रहणमेव कस्मान्न
कृतं। वैचित्र्यार्थं विचित्रा हि सूत्रस्य कृतिः। पाणिनेः। सोमस्याग्ने वीही ३ इ वौ३षट्। सोमस्याग्ने वीही ३ वौ३षट् [illegible]
छंदसि विषये विभाषा एकश्रुतिर्भवति। पक्षे त्रैस्वर्यमेवा वेति च प्रकृति विभाषा ग्रहणं यज्ञकर्मणि। प्राप्स्यनिवृत्त्यर्थं। तेनापंस्वाध्यायका
लेपाक्षि एकश्रुत्यं विधिर्भवति। इषेत्वोर्जेत्वा। इषेत्वोर्जेत्वा। अग्न आयाहि वीतये। अग्न आयाहि वीतये। अग्निमीळे पुरोहितं।
अग्निमीळे पुरोहितं। शन्नो देवीरभिष्टये। शन्नो देवीरभिष्टये। २६ [illegible] सुब्रह्मण्यायाम नि गदस्तत्र
यज्ञकर्मणीति विभाषा छंदसीति वैकश्रुतिः। प्राप्ता प्रतिषिध्यते। सुब्रह्मण्यायामेकश्रुतिर्न भवति। यस्तु तत्र प्राप्तः स्वरितस्तस्योदात्ता
देशो भवति। सुब्रह्मण्यो३म्। इंद्रागच्छ हरिव। आगच्छ मेधा। तिथेर्मेष वृषणश्वस्य मेने। गौरावस्कंदिन्नहल्यायै जार कौशिक ब्राह्मण गौ
तम ब्रुवाण श्वः सुत्यामागच्छ मघवन् अत्र सुब्रह्मण्योमिति। ओंकार स्वरितेन स्वरितः। तस्योदात्तो विधीयते। इंद्रागच्छेत्यामंत्रित
माद्यक्षरातं द्वितीयोक्षरेनुदात्तः। उदात्तादनुदात्तस्य स्वरित इति स्वरितः। प्लुतः। तस्यानेनोदात्तः क्रियते ह्यत्र प्लुतस्वौ संपन्नौ। आगच्छ

इत्याकार उदात्तस्ततः। परोनुदात्तः तस्य स्वरितः तस्यानेनोदात्तः क्रियते तदेवमिदं आगच्छेति चत्वार उदात्ताः। पश्चिमैकोनुदात्तः। हरि
व आगच्छेत्यनयैव प्रक्रियया चत्वार उदात्ताः द्वावप्यनुदात्तौ। मेधातिथेर्मेष इति। षष्ठ्यंतपरमामंत्रितमनुप्रविशति। सुमंत्रिते परांगवत्स्वरे इ
ति ततः। संकलस्या मंत्रिताद्युदात्तत्वे कृते द्वितीयमक्षरमनुदात्तं तस्योदात्तादनुदात्तं। तस्योदात्तादनुदात्तस्य स्वरित इति स्वरितत्वं प्राप्ते
इदमुदात्तत्वं विधीयते। तेन द्वावाद्युदात्तौ भवतः। शेषमनुदात्तं। वृषणश्वस्य मेन इति। समा [illegible] गौरावस्कंदिन्निति। तयैव द्वे
आद्ये अक्षरे उदात्ते शेषमनुदात्तं। अहल्यायै जारेति कथं तस्या मंत्रितानुप्रवेशात्तद्देव स्वरः। द्वावुदात्तौ शेषमनुदात्तं कौशिक ब्राह्मणेति
समस्तमामंत्रितं। आद्युदात्तं तत्र पूर्ववद्भीतिः। द्वावुदात्तौ शेषमनुदात्तं। एवं गौतमब्रुवाणेति तद्वदेव। श्वः सुत्यामागच्छ मघवन्निति श्वः
उदात्तः सत्यामित्यंतोदात्तः समजनि मरेति क्वयो विधाने उदात्त इति पठ्यते। आगच्छेति द्व्युदात्तौ। अंत्योनुदात्तः मघवन्निति पदात्परमामंत्रितं
निहन्यते २७ [illegible] सुब्रह्मण्यायामेव देवब्रह्मणः इति पठ्यते तेन पूर्वेण स्वरितस्योदात्तः प्राप्तः। अनेनानुदात्तो विधी
यते देवब्रह्मणः। स्वरितस्यानुदात्त आदेशो भवति। देवा ब्रह्माण आगच्छत। द्वयोरपि पदयोरामंत्रिताद्युदात्तत्वे। सतेशेषनिघाते योदात्ता
उदात्तस्य स्वरितः कृतः तस्यानुदात्तो भवति २८ [illegible] एकश्रुतिरिति अनुवर्तते। स्वरितात्परेषामनुदात्तानामेक
श्रुतिर्भवति। संहितायां विषये। इमं मे गंगे यमुने सरस्वती। शुतुद्रि माणवक जटिलकाध्यापक कगमिष्यसि। इमम्मित्यंतोदात्तं। मे इत्यनु
दात्तं विधिकाल एव निघात विधानात्तस्य पुनरुदात्तानुदात्तस्य स्वरित इति संपद्यते। तस्मात्स्वरितात्परेषामनुदात्तानां गंगे प्रभृतीनामेक
श्रुतिर्भवति। संहितायहणं किं। अवग्रहे मा भूत्। इमं मे गंगे यमुने सरस्वती २९ [illegible] अनुदात्तग्रहणमनुव
र्तते। उदात्तः परो यस्मात् स्वरितपरः उदात्तपरस्य स्वरितपरस्य चानुदात्तस्य सन्नतर आदेशो भवति। अनुदात्ततर इत्यर्थः। देवा मरुतः।
पृश्निमातरोऽपः। मातर इत्यनुदात्तः। अपइत्यंतोदात्तः क्व ऊ इदं परावस्तु मेष्वस्य इति तत्रानुदात्तपरे कादेशः उकारोनुदात्तः। तस्योदात्ते
परतः सन्नतर आदेशो भवति। इमं मे गंगे यमुने सरस्वती इकारोनुदात्तः। शुतुद्रि इत्येतदामंत्रितं पादादौ तस्मान्न निहन्यते। अनुदात्तं
सर्वमपादादाविति। तस्य प्रथममक्षरमुदात्तं तस्मिन्परभूते पूर्वस्य सरस्वतीकारस्य सन्नतर आदेशो भवति कगमिष्यक इत्यत्रानुदात्तस्य

सन्नंतर आदेशो भवति ॥ २० ॥ एवं ४० ॥ अइक एङ्क्षाश्चालयः ॥ अइक इतीयं संज्ञा भवति एकाल्प्रत्ययो यस्तस्य । असहायवाची एकशब्दः
स्पृशोनुदके क्विन् उदकोक्विन् । घृतस्पृक् । हलस्पृक् । मर्जोरिवः । अर्द्धभाक् । पादभाक् । एकालिति किं । सुराः अपृक्त प्रदेशाः । वेरपृक्तस्येत्ये
वमादयः ॥ ४१ ॥ तत्पुरुषः समानाधिकरणः ॥ कर्मधारयः तत्पुरुष इति समासविशेषस्य संज्ञा भवति तत्पुरुषः समानाधिकरणपदः कर्म
धारयसंज्ञो भवति अधिकरणशब्दोभिधेयवाची । समानाभिधेयः समानाधिकरण परमराज्यं । पाचकवृंदारिका । तत्पुरुष इति किं । पाचिका
भार्यः । समानाधिकरण इति किं । ब्राह्मणराज्यं । कर्मधारयजातीयदेशीयेष्विलेवमादयः ॥ ४२ ॥ प्रथमानिर्दिष्टं समास उपसर्जनं ॥ प्रथमया
विभक्त्या यन्निर्दिश्यते समासशास्त्रे तदुपसर्जनसंज्ञं भवति समास इति समासविधायकं शास्त्रं गृह्यते वक्ष्यति द्वितीया श्रितातीतपतितग
तात्यस्तप्राप्तापन्नैरिति द्वितीयासमासे द्वितीयेत्येतत् । प्रथमानिर्दिष्टं । तृतीयासमासे तृतीयेत्येतत् । चतुर्थीसमासे च चतुर्थीति । पंचमी
समासे तिपंचमीति । षष्ठीसमासे षष्ठीति । सप्तमीसमासे पूर्वनिपाते सेसमीति । कष्टश्रितः । शंकुलाखंडः । यूपदारु । वृकभयं । राजपुरुषः ।
अक्षशौंडः । उपसर्जन प्रदेशाः । उपसर्जनं पूर्वमित्येवमादयः ॥ ४३ ॥ एकविभक्तिचापूर्वनिपाते ॥ वि । एकाविभक्तिरस्येति तदिदमेकविभ
क्ति समासे विधीयमाने यन्नियतविभक्तिक द्वितीये संबंधिनी बहुविभक्तिभिर्युज्यमानेपि पदे कयैव विभक्त्या युज्यते तदुपसर्जनसं
ज्ञं भवति पूर्वनिपातं परत्व मुपसर्जन कार्य्यं वर्जयित्वा । निरादयः । क्रांताद्यर्थे पंचम्या पूर्वपदेनानाविभक्तिकेपि उत्तरपदं पंचम्यंतमेव भवति
निष्क्रांतः कौशांब्याः निः कौशांबिः निः क्रांतं कौशांब्याः निष्कौशांबिम् निः क्रांतेनान कौशांब्याः निःकौशांबिना । नः कौशांबये निः क्रां
ताय कौशांब्याः निःकौशांबये निः क्रांतस्य कौशांब्याः निष्कौशांबेः निः क्रांते कौशांब्याः निष्क्रांते कौशांब्याः निः कौशांबौ । निर्वाराणसिः
एकविभक्तीति किं । राजकुमार्यं । अपूर्वनिपात इति किं । नहि भवति । कौशांबिनिरिति ॥ ४४ ॥ अर्थवदधातुरप्रत्ययः ॥ प्रातिपदिकं अभि
धेयवचनोर्थशब्दः । अर्थवच्छब्दरूपं प्रातिपदिकसंज्ञं भवति । धातुं प्रत्ययं च वर्जयित्वा । डित्थः । कुंडं । पीठं । अर्थवदिति किं वनं धनं नांतस्याप
धेनमभिस्तन्नलोपो हि स्यात् । अधातुरिति किं । हंतेर्लङि अहन् नलोपः स्यात् । अप्रत्यय इति किं । काडे कुंडे ह्रस्वो नपुंसके प्रातिपदिकस्येति ह्र
स्वः स्यात् प्रातिपदिक प्रदेशाः ह्रस्वो नपुंसके प्रातिपदिकस्येवमादयः ॥ ४५ ॥ कृत्तद्धितसमासाश्च ॥ कृत्तद्धितसमासाः प्रातिपदिकसंज्ञा भवंति

अप्रत्यय इति । पूर्वसूत्रे पर्युदासात् कृदन्तस्य तद्धितांतस्य चानेन प्रातिपदिकसंज्ञा विधीयते । अर्थवत्समुदायानां समासग्रहणं नि
यमार्थं । कृत् कारकः । कर्ता । तद्धित । औपगवः कापट्यः । समासः । राजपुरुषः ब्राह्मणकंबलः समासग्रहणं स्यातिस्य यमार्थत्वात् वाक्यस्यार्थ
वत प्रातिपदिकसंज्ञा न भवति ॥ ४६ ॥ ह्रस्वो नपुंसके प्रातिपदिकस्य ॥ नपुंसकलिंगेर्थे यत्प्रातिपदिकं वर्तते तस्य ह्रस्वो भवत्यादेशः । अलोंत्य
स्य च । अतिरि कुलं । अतिनु जलं । नपुंसकेति किं । ग्रामणीः । सेनानीः । प्रातिपदिकस्येति किं । कांडे तिष्ठतः । प्रातिपदिकग्रहणसामर्थ्यादेकादेशः
पूर्वस्यांतवन्न भवति ॥ ४७ ॥ गोस्त्रियोरुपसर्जनस्य ॥ प्रातिपदिकस्येति वर्तते । इति स्वरूपग्रहणं स्त्रीति प्रत्ययग्रहणं स्वरितत्वादुपसर्जनग्रहणं
तयोर्विशेषणं गोरुपसर्जनस्य स्त्रीप्रत्ययांतस्य चोपसर्जनस्येति तादृश्या प्रातिपदिकस्य तदंतविधि उपसर्जन गोशब्दांतस्य उपसर्जनस्त्रीप्रत्ययांता
तस्य च प्रातिपदिकस्य ह्रस्वो भवति । गोचित्रगुः । शबलगुः । स्त्रीनिष्कौशांबिः निर्वाराणसि । अतिखट्वः । अतिमालः । उपसर्जनस्येति किं । राज
कुमारी । स्वरितत्वविज्ञानं किं अतितंत्रीः । अतिलक्ष्मीः । ईयसो बहुव्रीहौ प्रतिषेधो वक्तव्यः । बहुश्रेयसी । अविद्यमानश्रेयसी ॥ ४८ ॥ लुक्तद्धित
लुकि ॥ स्त्रीग्रहणमनुवर्तते । उपसर्जनस्येति च । पूर्वेण ह्रस्वे प्राप्ते लुग्विधीयते तद्धितलुकि सति स्त्रीप्रत्ययोपसर्जनस्य लुग्भवति । पंचेंद्राण्यो
देवता अस्य पंचेंद्रः । दशेंद्रः । पंचाग्निः । शकुल्याग्निः । क्रीतः । पटः । पंचशष्कुलः । दशशष्कुलः । आमलक्याः । फलमामलकं कुवलं बदरं । तद्धितग्र
हणं किं । गार्गीकुला लुकीति किं गार्गित्वं । उपसर्जनस्येत्येव । अवंती कुंती कुरु ॥ ४९ ॥ इद्गोण्याः ॥ पूर्वेण लुकि प्राप्ते इकारो विधीयते । गो
ण्यास्तद्धितलुकि सति इकार आदेशो भवति । पंचभिर्गोणीभिः । क्रीतः पटः पंचगोणिः दशगोणिः । इदिति योगविभागः । कर्तव्यः । तस्याद्यर्थः
पंचभिः सूचीभिः । क्रीतः पटः । पंचसूचिः । दशसूचिः । सर्वेषां विषय एव ॥ ५० ॥ लुपि युक्तवद्व्यक्तिवचने ॥ लुपीति लुप्संज्ञकया लुप्तस्य प्रत्यय
स्यार्थ उच्यते । तत्र लुपि युक्तवद्व्यक्तिवचने भवतः युक्तवदिति निष्ठाप्रत्ययेन कर्तृवतुना प्रकृत्यर्थ उच्यते । स हि प्रत्ययार्थमात्मना युनक्ति । तस्य युक्त
वतो व्यक्तिवचने युक्तवद्व्यक्तिवचने लुबर्थे विधीयते । अथवा युक्तः प्रकृत्यर्थः प्रत्ययार्थेन संबद्धः । तस्मिन्निव व्यक्तिवचने लुबर्थे भवतः । सप्त
म्यर्थे वति । व्यक्तिवचन इति च लिंगसंख्ययोः । पूर्वाचार्यनिर्देशः स्तरीयमेवेदं सूत्रं तथा चास्य प्रत्याख्यानं करिष्यति नहि शिष्यं संज्ञा प्रमाणत्वा
दिति व्यक्तिः स्त्रीपुंनपुंसकानि । पंचालाः क्षत्रियाः पुल्लिंगा बहुवचनविषया स्तेषां निवासो जनपदः । यथा तेषु व्यक्तिवचने तद्वज्जनपदे

भवतः। पंचालाः। कुरवोमगधाः मत्स्याः। अंगाः। वंगाः। सुह्माः। पुंड्राः। लुपीति किं। लुकिमाभूत्। लवणः। सूपः। लवणंशाकं लवणायवागूः व्यक्तिवचनेइतिकिं। शिरीषाणामदूरभवोग्रामः शिरीषास्तस्यवनं शिरीषवनं। विभाषौषधिवनस्पतिभ्यइतिणत्वंभवति। हरीतक्या दिषुव्यक्तिः। हरीतक्याः फलानि हरीतक्यः फलानि हरीतक्यादिभ्यश्चेति लुप्। पूर्ववचनमपिपेपवत् खलतिकादिषु वचनं। खलतिकस्यपर्वतस्या दूरभवानिवनानि खलतिकंवनानि ५१ विशेषणानां चाजातेः लुपीतिवर्तते लुबर्थस्ययानिविशेषणानि। तेषामपिचयुक्तवद्व्यक्तिवचनेभवतः। जातिंवर्जयित्वा। पंचालाः रमणीयाः बह्वन्नाः। बहुक्षीरघृताः। बहुमाल्यफलाः। गोदौरमणीयौ। बह्वन्नौ। बहुक्षीरघृतौ। बहुमाल्यफलौ। अजातेरितिकिं। पंचालाजनपदः गोदौग्रामः। जात्यर्थस्यचापुंवत्वबाधप्रतिषेधः। तेनजातिद्वारेणयानिविशेषणानि तेषामपियुक्तवद्भावप्रतिषेधोभवति। पंचालाजनपदोरमणीयः बह्वन्नः। गोदौग्रामोरमणीयोबह्वन्नइति। मनुष्यलुपिप्रतिषेधोवक्तव्यः। चंचाअभिरूपः। बर्हिकादर्शनीयः ५२ तदशिष्यं संज्ञाप्रमाणत्वात् तदितिप्रकृतंयुक्तवद्भावरूपंलक्षणं। प्रतिनिर्दिश्यते तदेतदशिष्यमवक्तव्यं कुतः संज्ञाप्रमाणत्वात्। संज्ञाशब्दाहिनानालिंगसंख्याः प्रमाणं। पंचालावरणाः। इतिनैतेयोगशब्दाः किंतर्हि जनपदादीनांसंज्ञा। एतास्तत्रलिंगंवचनंचस्वभावसिद्धमेवनयत्नप्रतिपाद्यं यथाआपोदारासिकतावर्षागृहाइति ५३ लुब्योगाप्रख्यानात्

लुबप्यशिष्योयोयंजनपदेलुबुच्यते वरणादिभ्यश्चेतिलुबुच्यते। अयमवक्तव्यः। किंकारणं योगाप्रख्यानात्। नहिपंचालाः वरणाइति चयोगः संबंधः प्रख्यायते नैतदुपलभामहे वृक्षयोगात् नगरेवरणाशब्दइतिकिं। तर्हिसंज्ञा एतास्तस्मादस्यतस्यनिवासः अदूरभवश्चेति तद्धितोनैवोत्पद्यतेकिंलुप्येविधानेविधानेन ५४ योगप्रमाणेचतदभावेऽदर्शनंस्यात् पंचालादयः संज्ञाशब्दाः नयोगनिमित्ताइत्येतत् तच्चावश्यमेवाभ्युपगंतव्यं। योगप्रमाणेहितदभावेदर्शनंस्यात्। परिपंचालदेशेशब्दोदृश्यतेचसंप्रतिविनैवक्षत्रियसंबंधंजनपदेषुपंचाल शब्दः। ततोऽवसीयतेनायंयोगनिमित्तकः किंतर्हिरूढिरूपेणैवतत्रप्रवृत्तइति ५५ प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात् अशिष्यमितिवर्तते। प्रधानंसमासेकिंचित्पदंप्रत्ययस्तव्यदादी। ताभ्यामर्थवचनमर्थाभिधानमनेनप्रकारेणभवतीति। पूर्वाचार्यैः परिभाषितं प्रधानोपसर्जनेप्रधानार्थसहब्रूतः। प्रकृतिप्रत्ययौप्रत्ययार्थंसहब्रूतः इति। तस्यापिनिराचार्यः प्रत्याचष्टे। अशिष्यमेतत्। अर्थ

स्यान्यप्रमाणत्वात्। अन्यइतिशास्त्रापेक्षयालोकोव्यपदिश्यते। शब्दैरर्थाभिधानंस्वाभाविकंपरिभाषितव्यमशक्यत्वात्। लोकतएवा र्थगतेः। पैरपिव्याकरणंनकृतंतेपिराजपुरुषमानयेत्युक्ते राजविशिष्टंपुरुषमानयंतिनराजानं नापिपुरुषमात्रं। औपगवमानयेत्युक्ते उपगु विशिष्टमपत्यमानयंतिनोपगुंनाप्यपत्यमात्रं। यश्चलोकतोर्थः सिद्धः तत्रकिंयत्नेन ५६ कालोपसर्जनेचतुल्यम् अशिष्यमितिवर्तते कालोपसर्जनेचाशिष्येकस्मादन्यप्रमाणत्वात्। तुल्यशब्दोहेत्वनुकर्षणार्थः। इहान्यैर्वैयाकरणैः कालोपसर्जनयोः परिभाषाकृता। अन्याय्योदुत्थानादन्याय्याच्चसंवेशनादेषोऽद्यतनकालः। अपरेतुपुनराहुः। अहरुभयतोर्धरात्रमेषोऽद्यतनः कालः इति। तथाउपस र्जनपरिभाषांकुर्वंति। अप्रधानमुपसर्जनमिति। तस्यापिनिराचार्यः प्रत्याचष्टे। लोकतोर्थगतेः पैरपिव्याकरणंनकृतंतेप्याहुः इदमस्मा भिरद्यकर्तव्यमिदंश्वःकर्तव्यमिदंह्यःकृतमिति। नंचमुत्पाद्यंतेयोपसर्जनेयमत्रगृह्येयाणांउपसर्जनमप्रमाणमितिगम्यते। यश्चलोकतोर्थः सिद्धस्तत्रकिंयत्नेन। यद्येवंपूर्वसूत्रएवकालोपसर्जग्रहणंकस्मान्नक्रियतेकिमर्थोयोगविभागः प्रदर्शनार्थः। अन्यदप्येवंजातीयकमशिष्य मिति। तथाहिपूर्वाचार्यपरिभाषांते। मत्वर्थेबहुव्रीहिः। पूर्वपदार्थप्रधानोऽव्ययीभावः। उत्तरपदार्थप्रधानस्तत्पुरुषः। उभयपदार्थप्रधानो द्वंद्वः। इत्येवमादितदप्यशिष्यमिति ५७ जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम् अशिष्यमितिनिवृत्तं। जातिनामाभिधानेकार्यस्तद भिधानेएकवचनमेवप्राप्तंइतदमुच्यते जातेराख्याजात्याख्या तस्यांजात्याख्यायामेकस्मिन्नर्थेबहुवचनमन्यतरस्यांभवतिजात्यर्थोया बहुवद्भवतीतियावत्। तेनतद्विशेषणानामजातिशब्दानामपिसंपन्नादीनांबहुवचनमुपपद्यते। संपन्नोयवः। संपन्नायवाः। संपन्नोव्रीहिः संपन्नाव्रीहयः। पूर्ववयाब्राह्मणः। प्रत्युत्थेयः। पूर्ववयसोब्राह्मणाः प्रत्युत्थेयाः। जातिग्रहणंकिं। देवदत्तोयज्ञदत्तः। आख्याग्रहणंकिं। काश्यप प्रतिकृतिः। काश्यपोभवत्ययंजातिशब्दोनतत्वेनेनजातिराख्यायतेकिं। तर्हिप्रतिकृतिः। एकस्मिन्नितिकिं। व्रीहियवौ। संख्याप्रयोगेप्रति षेधोवक्तव्यः। एकोव्रीहिः। संपन्नः। सुभिक्षंकरोति ५८ अस्मदोद्वयोश्च अस्मदएकत्वेद्वित्वेचबहुवचनमन्यतरस्यांभवति। अहंब्रवी मी। आवांब्रूवः। वयंब्रूमः। सविशेषणस्यप्रतिषेधोवक्तव्यः। अहंदेवदत्तोब्रवीमि। अहंगार्ग्योब्रवीमि। अहंपंडितोब्रवीमि। युष्मदिगुरावे केषां। त्वंमेगुरुः। यूयंमेगुरवः ५९ फल्गुनीप्रोष्ठपदानांचनक्षत्रे चकारोद्वयोरित्यनुकर्षणार्थः। फल्गुन्योर्द्वयोः प्रोष्ठपदयोश्चन

नक्षत्रयो र्बहुवचनमन्यतरस्यां भवति। कदापूर्वः फाल्गुन्यः कदापूर्वे फाल्गुन्यौ कदापूर्वे प्रोष्टपदे कदापूर्वाः प्रोष्टपदाः। नक्षत्रइतिकिं। फ
ल्गुन्यौ माणविके॥ ६०॥ छन्दसि पुनर्वस्वोरेकवचनं॥ अन्यतरस्यामितिवर्तते। द्वयोर्द्विवचने प्राप्ते पुनर्वस्वोश्छन्दसि विषये एकवचनम
न्यतरस्यां भवति। पुनर्वसुर्नक्षत्रं॥ ६१॥ विशाखयोश्च॥ छन्दसातिवर्त्तते। द्ववनेप्राप्ते छन्दसि विषये विशाखयोरेकवचनमन्यतरस्यां भ
वति। विशाखा नक्षत्रमिन्द्राग्नि देवते॥ ६२॥ तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यं॥ छन्दसीतिनिवृत्तं तिष्यएकः पुनर्वसूद्वौ
तेषां द्वन्द्वो बह्वर्थः तत्र बहुवचने प्राप्ते द्विवचनं विधीयते। तिष्यपुनर्वस्वोर्नक्षत्रविषये द्वन्द्वे बहुवचनस्य प्राप्ते द्विवचनं विधीयते। तिष्यपुनर्व
स्वोर्नक्षत्रविषये द्वन्द्वे बहुवचनस्य प्रसंगे नित्यं द्विवचनं भवति। उदितौ तिष्यपुनर्वसू दृश्यते। तिष्यपुनर्वस्वोरितिकिं। राधा अनुराधाः। न
क्षत्र इतिकिं। तिष्यश्च माणवकः पुनर्वसवश्च माणवकौ तिष्यपुनर्वसवो माणवकाः ननु च प्रकृतमेव नक्षत्रग्रहणं किमर्थं पुनरुच्यते पर्याया
णामपि यथा स्यात्। सिद्धपुनर्वसू। पुष्यपुनर्वसू इति। द्वन्द्व इति किं। यस्तिष्यस्तौ पुनर्वसू एषां ते इमे तिष्यपुनर्वसवः। उन्मुग्धा तिष्यस्य यव विपर्यासेन
दृश्यमाणा बहुव्रीहिणा उच्यन्ते तेन नक्षत्रसमाहारेणायं। बहुवचनस्येतिकिं। एकवचनस्य मा भूत्। तिष्यपुनर्वसु इदमिति सर्वो द्वन्द्वो विभाषया
एकवद्भवतीति। अस्यैतदेव ज्ञापकं। नित्यग्रहणं विकल्पनिवृत्त्यर्थं ६३॥ सरूपाणामेकशेष एकविभक्तौ॥ समानं रूपं येषामिति सरूपाः सरू
पाणां शब्दानामेकविभक्तौ परत एकशेषो भवति एकः शिष्यते। इतरे निवर्तन्ते। वृक्षश्च वृक्षश्च वृक्षौ वृक्षश्च वृक्षश्च वृक्षाः। प्रत्ययार्थ निवेशात्
नानेकस्याभिधानं तत्रानेकार्थस्याभिधाने अनेकशब्दत्वं प्राप्तं तस्मादेकशेषः। सरूपाणामिति किं। वृक्षन्यग्रोधौ। रूपग्रहणं किं। भिन्नेऽप्यर्थे यथा स्यात् मा
ताः अक्षाः पादाः माषा इति एकग्रहणं किं। द्विबहवः शेषा मा भूवन्। शेषग्रहणं किं। आदेशो मा भूत्। एकविभक्ताविति किं। पयः पयो जर
यतीति ब्राह्मणाभ्यां च कृतं ब्राह्मणाभ्यां देहि ६४॥ वृद्धो यूना तल्लक्षणश्चेदेव विशेषः॥ शेषइति वर्त्तते पुनेति सहयोगे तृतीया यूना सि
हवचने वृद्धः शिष्यते युवा निवर्तते। वृद्धशब्दः पूर्वाचार्य संज्ञा गोत्रस्यास्मिंस्तर्हि तं वृद्ध इति। वृद्धो यूना सहवचने शिष्यते। तल्लक्षणश्चेदेव
विशेषो भवति। तदिति वृद्धयूनोर्निर्देशः लक्षणशब्दो निमित्तपर्यायः चेच्छब्दो निमित्तपर्यायः चेच्छब्दो यद्यर्थे एवकारो वधारणार्थः विशे
षो वैरूप्यं वृद्धयुवनिमित्तकमेव यदि वैरूप्यं भवति। ततो वृद्धः शिष्यते। सयुवा निवर्तते समानायामाकृतौ वृद्धयुवप्रत्ययाभिधेये। गार्ग्यश्च गार्ग्या

यणश्च गार्ग्यौ वात्स्यश्च वात्स्यायनश्च वात्स्यौ। वृद्ध इति किं। गर्गश्च गार्ग्यायणश्च गर्ग गार्ग्यायणौ। यूनेति किं। गार्ग्य गर्गौ तल्लक्ष
णश्चेदिति किं। गार्ग्यवात्स्यायनौ कुत्सासौवीरत्वं च भागवित्तिकस्यापरो विशेषो विद्यते ६५॥ स्त्री पुंवच्च॥ शेष इति वर्त्तते। वृद्धो यूनेति च सर्वं तल्लक्ष
णश्चेदिति किं। गार्ग्य वात्स्यायनौ। एककारः किमर्थः। भागवित्तिश्च भागवित्तिकश्च भागवित्ती भागवित्तिः स्त्री वृद्धा यूना सह वचने शिष्यते
तल्लक्षणश्चेदेव विशेषो भवति पुंसश्च चास्याः कार्यं भवति स्त्र्यर्थः पुमर्थवद्भवति। गार्गी च गार्ग्यायणश्च गार्ग्यौ। वात्सी च वात्स्यायनश्च
वात्स्यौ। दाक्षी च दाक्षायणश्च दाक्षी ६६॥ पुमान् स्त्रिया॥ तल्लक्षणश्चेदेव विशेष इति वर्त्तते। वृद्धो यूनेति निवृत्तं स्त्रिया सहवचने पु
मान् शिष्यते। स्त्री निवर्तते स्त्रीपुल्लिङ्गलक्षणश्चेदेव विशेषो भवति। ब्राह्मणश्च ब्राह्मणी च ब्राह्मणौ कुक्कुटश्च कुक्कुटी च तल्लक्षणश्चेदे
व विशेष इत्येव कुक्कुटश्च मयूरी च कुक्कुटमयूर्यौ। एवकार इत्येव। इन्द्रश्च इन्द्राणी च इन्द्रेन्द्राण्यौ। पुंयोगादाख्यायामित्यपरो विशेषः पु
मानिति किं। प्राक् च प्राची च प्राक् प्राच्यौ प्रागिति अव्ययमलिङ्गं ६७॥ भ्रातृपुत्रौ स्वसृदुहितृभ्यां॥ यथासंख्यं भ्रातृपुत्रशब्दौ शिष्येते
स्वसृदुहितृभ्यां सहवचने। स्वस्रा सहवचने भ्रातृशब्दः शिष्यते। भ्राता च स्वसा च भ्रातरौ। दुहित्रा सहवचने पुत्रशब्दः शिष्यते। पुत्रश्च दुहिता
च पुत्रौ ६८॥ नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यां॥ तल्लक्षणश्चेदेव विशेष इति वर्तते। नपुंसका नपुंसकमात्रकृते विशेषे
अनपुंसके न सहवचने नपुंसकं शिष्यते। एकवच्चास्य कार्यमन्यतरस्यां भवति। शुक्लश्च कम्बलः शुक्ला च बृहतिका शुक्लं च वस्त्रं तदि
दं शुक्लं तानिमानि शुक्लानि। अनपुंसकेनेति किं। शुक्लं च शुक्लं च शुक्लं च शुक्लानि एकवद्भवतीति न भवति ६९॥ पिता मात्रा॥ अन्यतरस्या
मिति वर्त्तते नैकवदिति। मात्रा सहवचने पिता वा शिष्यते। अन्यतरस्यामिति पिता च माता च पितरौ मातापितरौ वा पितरौ वा ७० श्वशुरः श्व
श्र्वा। अन्यतरस्यामिति वर्तते। श्वश्र्वा सहवचने श्वशुरशब्दः शिष्यते अन्यतरस्यां। श्वश्रूश्च श्वशुरश्च श्वशुरौ। श्वश्रूश्वशुराविति वा ७१॥ त्यदा
दीनि सर्वैर्नित्यं॥ दीनि शब्दरूपाणि सर्वैः सहवचने शिष्यन्ते। त्यदादिभिरन्यैश्च। सर्वग्रहणं साकल्यार्थं नित्यग्रहणं विकल्पनिवृत्त्यर्थं
स च देवदत्तश्च तौ यश्च देवदत्तश्च यौ त्यदादीनां मिथो यद्यत्परं तत्तच्छिष्यते स च यश्च यौ यश्च कश्च कौ ॥ ७२॥ ग्राम्यपशुसंघेष्वतरुणेषु स्त्री॥

ग्राम्याणांपशूनांसंघाः ग्राम्यपशुसंघाः तेषुसहविवक्षायांस्त्रीशिष्यते। पुमानाश्रियेपिपुंसः शेषेप्राप्तेस्त्रीशेषोयंविधीयते। अ
तरुणग्रहणंसामर्थ्यात्पशूनांविशेषणंगावः इमाः अजाविमा। ग्राम्यग्रहणंकिंरुरवइमे। पृषतइमे। पशुष्विति किं। ब्राह्मणाःक्षत्रि
याः। संघेष्विति किं। एतौगावौचरतः। अतरुणेष्विति किं। वत्साइमेवर्करा इमे। अनेकशफेष्वितिवक्तव्यं इह माभूत् अश्वाःगर्दभाः
॥७३॥ एवं १४८॥ ॥इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ प्रथमस्याध्यायस्य द्वितीयः पादः॥ ॥भूवादयो धातवः॥ भूप्रभृतयोवा
च्यः। शब्दाः क्रियावाचिनोधातुसंज्ञाभवन्ति। भू। भवति। एधा। एधते। स्पर्द्ध। स्पर्द्धते। धातुशब्दः। पूर्वाचार्यसंज्ञा। तेचक्रियावचनानां
संज्ञांकृतवंतः। तदिहापिपूर्वाचार्यसंज्ञाग्रहणात्। क्रियावचनानामेव भ्वादीनां संज्ञा विधीयते। भ्वादीनांवकारोयमंगलार्थः प्रयुज्य
ते। भुवोवार्थंवदन्तीति भ्वर्थाश्चावादयः स्मृताः धातुप्रदेशाः धातोरित्येवमादयः १ ॥उपदेशेऽजनुनासिक इत्॥ उपदिश्यतेऽनेने
त्युपदेशः शास्त्रवाक्यानि सूत्रपाठः खिलपाठश्च। तत्र योऽजनुनासिकः स इत्संज्ञो भवति। एधँ स्पर्द्धँ प्रतिज्ञानुनासिक्याः पाणिनीयाः।
उपदेशइतिकिं। अभ्र आँ अपः अजितिकिं। आतो मनिन्क्वनिब्वनिपश्च। मकारस्येत्संज्ञा न भवति। अनुनासिक इतिकिं। सर्वस्या वामा
भूत्। इत्प्रदेशाः आदितश्चेत्येवमादयः २ ॥हलन्त्यम्॥ उपदेशे इति वर्तते। अंत्येभवमंत्यम्। धात्वादेः समुदायस्य परं यद्धलन्ते इत्सं
ज्ञं भवति। अइउण् णकारः। ऋलृक् ककारः। एओङ् ङकारः। यउपदेश इत्येव। अग्निचित्। सोमसुत्। हल्। हलिति द्वितीयमन्त्यं हल्य
हणंतंत्रेणोपात्तं द्रष्टव्यं। तेनप्रत्याहारपाठे हलित्यत्र लकारस्येत्संज्ञा क्रियते। तथा च सति हलसामिवन प्रत्याहारेणेतरेतराश्रयदोषो भवति
विभक्तौ तुस्माः। पूर्वेण प्राप्तायामित्संज्ञायां विभक्तौ वर्तमानानां तवर्गसकारमकाराणां प्रतिषेध उच्यते। तवर्गः। पउ। सिउः सामिनाल्याः
वस्मात्। सकारः जस्। ब्राह्मणाः। तस्। थस्। पचतः। पचथः। मकारः। अपचतां। विभक्ताविति किं। अचोयत्। उणादयो बहुलम्। तुध अस्मिन्
किमोत्। इदमिति चात्र प्रतिषेधो न भवति। अनित्यत्वात्स्य प्रतिषेधस्य इदमस्थमुरित्यकारानुबन्धनिर्देशादनित्यत्वमुपलक्ष्यते ४
॥आदिर्ञिटुडवः॥ इदितिवर्तते। आदिशब्दः प्रत्येकमभिसंबध्यते। ञिटुडु इत्येते संभवाया। आदितो वर्तमाना इत्संज्ञा भवन्ति ञिमिदास्ने
हने। ञिल्लः ञिधृषा धृष्टः ञिक्ष्विदा क्ष्विण्णः। टुवेपृकंपने वेपथुः। टुओश्वि। श्वयथुः। डुपचष्। पक्त्रिमं। डुवप्। उप्त्रिमं। डुकृञ् कृत्रिमम्

॥आदिरितिकिं॥ पटूयति। कंडूयति। उपदेश इत्येव निकारीयति ५ ॥षः प्रत्ययस्य॥ आदिरिति वर्तते। षकारः प्रत्ययस्यादिरित्संज्ञा
भवति। शिल्पिनि ष्वुन्। नर्तकी। खनकी। रजकी। प्रत्ययस्येति किं। षोडः। षंडः। षडिकः। आदिरित्येव। अविमह्योष्टिषच्। अविषो महिषः
६ ॥चुटू॥ चवर्गटवर्गौ प्रत्ययस्यादितो वर्तमानौ इत्संज्ञौ भवतः। गोत्रे कुञ्जादिभ्यश्च्फञ्। कौञ्जायन्यः छस्य ईयादेशं वक्ष्यति। जस्।
ब्राह्मणाः इस्य दृतेव वक्ष्यति। शंडिकादिभ्यो ञ्यः एं डिक्यः। टवर्गः। चरेष्टः। कुरुचरी। मद्रचरी। इस्य इकादेशं वक्ष्यति सास्यां जनेर्डः। उपस
रजोमौ दुरजः। डस्य एयादेशं वक्ष्यति। अत्राणः। आत्मन्। पृथग्योगकरणमस्य विधेरनित्यत्वज्ञापनार्थम्। तेन वित्तश्चंचुप् चणपौ केशचंचुः
केशचणः। अथालुठारश्च तेनाशिकायाः संज्ञायां टीटञ्नाटज्भ्रटच इति। अवटीटम् ७ ॥लशक्वतद्धिते॥ तद्धितवर्जितस्य प्रत्यय
स्यादित्लो कारशकारकवर्गा इत्संज्ञा भवन्ति। लकारः। ल्युट्। चयनं। यवनं। शकारः। कर्त्तरि शप्। भवति। कवर्गः। क्तक्तवतू निष्ठा। भुक्त
वान्। प्रियवशे वदः खच्। प्रियंवदः। ग्लाजिस्थश्च ग्स्नुः। जिष्णुः। भूष्णुः। भंजभासमिदो घुरच्। भंगुरं। भासुरं। गडः सिउन्सामिनाल्याः व
स्मात् वृजस्य। अतद्धित इति किं। चूडालः। लोमशः। कर्णिका ८ ॥तस्य लोपः॥ तस्येत्संज्ञकस्य लोपो भवति। तथा चैवोदाहृतं। तस्यग्रहणं
सर्वलोपार्थं। अलोन्त्यस्य माभूत्। आदिर्ञिटुडव इति ९ ॥यथासंख्यमनुदेशः समानाम्॥ संख्याशब्देन क्रमो लक्ष्यते। यथासंख्यं यथाक्रममनु
देशो भवति। अनुदिश्यत इत्यनुदेशः पश्चादुच्चारणमित्यर्थः। समानां समसंख्यानां सम परिपठितानामनुदेशिनां च यथाक्रममुद्देशि
भिः सहानुदेशिनः संबध्यन्ते तदीशलाल इत्यमन्तकि चचराड्ढक्छण्ढञ्यकः। प्रथमाः प्रथमः द्वितीया द्वितीयः इत्येवमादि। तौदेय। शाला
तुरीयः। वार्म्मतेयः कौचवार्य्यः। समानामिति किं। लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्य्यनवः। लक्षणादयश्चात्वारोऽर्थाः प्रत्यादयस्त्र
यः सर्वेषां सर्वत्र कर्मप्रवचनीयसंज्ञा भवति। इहकस्मान्न भवति। येशोपरा आदेशिगाधज्ञ। खचेति। स्वरितेन लिंगेन यथासंख्यं यत्र नेष्यते
तत्र स्वरितत्वम्प्रतिज्ञायते। स्वरितेनाधिकार इति। स्वरितग्रहणं पूर्वेणापि संबध्यते १० ॥स्वरितेनाधिकारः॥ स्वरितेनेतिः लिंगे इत्थंभूतल
क्षणे तृतीया। स्वरितो विशेषो वर्णधर्मस्तेन चिह्नेनाधिकारो वेदितव्यः। अधिकारो नाम विनियोगः। स्वरितत्वयुक्तं शब्दरूपमधिकृतं वा
दुत्तरत्रोपतिष्ठते प्रतिज्ञा स्वरिताः पाणिनीयाः। प्रत्ययः। धातोः ङ्याप्प्रातिपदिकात्। अंगस्य। भस्य। पदस्य। ११

ङितःपदं। अविशेषेण धातोरात्मने परपरस्मैपदविधास्यते। तत्रायन्नियमः क्रियते। अनुदात्तेतोये धातवो ङितश्चते भ्य आत्मने
पदं भवति नान्येभ्यः। अनुदात्तेभ्यः। आस। आस्ते। वस। वस्ते। ङि। सूङ्। सूते। शीङ्। शेते। १२। भावकर्मणोः। लकर्म्मणिभावे चात्मने
पदं भवति। भावे। ग्लायते भवता। आस्यते भवता। कर्म्मणि। क्रियते कटः क्रियते। भारः कर्म्मकर्तरी। लूयते केदारः। स्वयमेवेति परस्मै
पदं न भवति। तस्य विधाने द्वितीयकर्तृग्रहणमनुवर्तते कर्तव्यः कर्तरि तत्र परस्मैपदं भवति। कर्तरि कर्म्मव्यतिहारे कर्मशब्दः क्रियावाची
व्यतिहारो विनियमः। यत्रान्यसंबंधिनीं क्रियामन्यः करोतीतरसंबंधिनीं चेतरः स कर्म्मव्यतिहारः। तद्विशिष्टक्रियावचनाद्धातोरात्मनेप
दं भवति। व्यतिलुनते। व्यतिपुनते। कर्म्मव्यतिहार इति किं लुनाति पुनाति। कर्तृग्रहणमुत्तरार्थं शेषात्कर्तरि परस्मैपदमिति १४। न
गतिहिंसार्थेभ्यः। पूर्वेणात्मनेपदं प्राप्तं प्रतिषिध्यते गत्यर्थेभ्यो हिंसार्थेभ्यश्च धातुभ्यः। कर्म्मव्यतिहारे आत्मनेपदं न भवति। व्यति
गच्छंति। व्यतिसर्प्पंति हिंसार्थेभ्यः। व्यतिहिंसंति व्यतिघ्नंति। प्रतिषेधे हसादीनामुपसंख्यानं व्यतिहसंति। व्यतिजल्पंति। व्यतिप
ठंति। हरतेनप्रतिषेधः। संप्रहरंते राजानः। १५। इतरेतरान्योन्योपपदाच्च। इतरेतर अन्योन्यस्य यपमुपपदाद्धातोरात्मनेपदं न भव
ति। इतरस्य व्यतिलुनंति। अन्योन्यस्य व्यतिलुनंति परस्परोपपदाच्चेति वक्तव्यं। परस्परं व्यतिलुनंति १६। नेर्विशः। शेषात्कर्तरि परस्मै
पदे प्राप्ते निपूर्वाद्विशतेरात्मनेपदं विधीयते। नेः परस्माद्विशतेरात्मनेपदं भवति निविशते। नेरिति किं विशति प्रविशति। आगमस्त कृष्णे
नैव गृह्यते तेनाधनास्ति व्यवधानम्। न्यविशत इति। नेरुपसर्गस्य ग्रहणं अर्थवद्ग्रहणे नानर्थकस्येति तस्मादिह न भवति। मधुनि विशंति
भ्रमराः। १७। परिव्यवेभ्यः क्रियः। डुक्रीञ् द्रव्यविनिमये ञित्वात् कर्त्रभिप्राये क्रियाफल इति सिद्धमेवात्मनेपदं। अकर्त्रभिप्रायार्थमारंभः
परिव्यवेभ्य उत्तरस्मात्क्रीणातिधनामिति १८। विपराभ्यां जेः। शेषात्कर्तरि परस्मैपदं नियमस्यापवादः विपरापूर्वाज्जयतेरात्मनेपदं भ
वति विजयते पराजयते। विपराभ्यामिति किं जयति अभिजयति विपराशब्दावुपसर्गौ गृह्येते साहचर्यात् तेनेह न भवति। बहु विजयति
वनं पराजयति वनं १९। आङो दोऽनास्यविहरणे। अकर्त्रभिप्रायार्थो यमारंभः आङ्पूर्वाद्ददातेरनास्यविहरणे वर्तमानादात्मनेप
दं भवति। विद्यामादत्ते अनास्यविहरण इति किं। उरस्यं व्याददाति अस्यविहरणासमानक्रियादपि प्रतिषेधो वक्तव्यः। विकाश्या १८

MEMORIAL

ददाति। स्वांगकर्मकाच्चेति वक्तव्यं इहमाभूत्। व्याददते पिपीलिकाः पतंगमुखं २०। क्रीडोऽनुसंपरिभ्यश्च। क्रीडृ विहारे। अस्मा
दनुसंपरिइत्येवं पूर्वादि पर्वात्मात्मनेपदं भवति। अनुक्रीडते। परिक्रीडते। आङः खल्वपि आक्रीडते। समोऽकूजन इति वक्तव्यं उहमा
भूत्। संक्रीडंति शकटानि। समासाहयोरिन्याहि उपसर्गौ गृह्येते तेन कर्म्मप्रवचनीययोगे न भवति। माणवकमनुक्रीडति। समायामाग
मे आत्मनेपदं वा वक्तव्यं। समाडपेक्षा कालहरणं। आगमयस्व तावन्माणवकं। शिक्षेर्जिज्ञासायां विद्यासु शिक्षते। धनुषि शिक्षते
आशिषि नाथः। सर्पिषो नाथते। मधुनो नाथते। आशिषीति किं। माणवकमनुनायति हरतेर्गतिताच्छील्ये। पैतृकमश्वा अनुहरते
मातृकं गावो अनुहरंते। गतिताच्छील्ये इति किं मातुरनुहरति किरतेर्हर्षजीविकाकुलायकरणेष्विति वक्तव्यं हर्षे। अपकिरते वृषभो हृष्टः
जीविकायां। अपकिरते कुक्कुटो भक्ष्यार्थी। कुलायकरणे। अपकिरते श्वा आश्रयार्थी। कुलं इद्धातो। अपाद्धतुष्पाच्छकुनिष्वालेखन
इति सुट्। हर्षादिष्विति किं। अपकिरति कुसुमं। आङि नुप्रच्छोरुपसंख्यानं। आनुते शृगालः। आपृच्छते गुरून्। शपउपालंभने इति व
क्तव्यं। वाचा शरीरस्पर्शनमुपालंभनं देवदत्ताय शपते यज्ञदत्ताय शपते। उपालंभन इति किं। शपति २१। समवप्रविभ्यः स्थः। समवप्र
वि इत्येवं पूर्वात्तिष्ठतेर्धातोरात्मनेपदं भवति संतिष्ठते। अवतिष्ठते। प्रतिष्ठते। आङः स्थः प्रतिज्ञाने इति वक्तव्यं। अस्ति सकारस्येपा
र्थ्यातिष्ठते स्मिमात्रमातिष्ठते आपिशलिः। आगमौ गुणवृद्धी आतिष्ठते २२। प्रकाशनस्थेयाख्ययोश्च। स्वाभिप्रायकथनं प्रकाशनं
स्थेयस्याख्या स्थेयः विवादपदे निर्णयकर्ता निर्णेता लोके स्थेय इति रूढिः। तत्प्रतिपत्त्यर्थमाख्याहणं प्रकाशने स्थेयाख्यायां च तिष्ठत
आत्मनेपदं भवति। प्रकाशने तावत् तिष्ठते कन्या छात्रेभ्यः तिष्ठते वृषली ग्रामपुत्रेभ्यः प्रकाशयत्यात्मानमित्यर्थः। स्थेयाख्यायां त्वयि तिष्ठते नापि
तिष्ठते। संशय्य कर्णादिषु तिष्ठते यः २३। उदोऽनूर्ध्वकर्मणि। उत्पूर्वात्तिष्ठतेरनूर्ध्वकर्म्मणि वर्तमानादात्मनेपदं भवति। कर्मशब्दः क्रियावाची।
अनूर्ध्वता विशिष्टक्रियावचनात्तिष्ठतेरात्मनेपदं भवति गेहे उत्तिष्ठते। कुटुंबे उत्तिष्ठते। तदर्थं यतत इत्यर्थः। उदईहायामिति वक्तव्यं। इहमाभूत्।
माछतमुत्तिष्ठति शतसु घट इत्यर्थः इहाकर्णमनूर्ध्वकर्मणा एव विशेषणं न धातोः। अनूर्ध्वकर्मणीति किं। आसनादुत्तिष्ठति २४। उपान्मंत्र
करणे। उपपूर्वात्तिष्ठतेर्मंत्रकरणे वर्तमानादात्मनेपदं भवति ऐंद्र्या गार्हपत्यमुपतिष्ठते। आग्नेय्या आग्नीध्रमुपतिष्ठते। मंत्रकरण इति किं
भर्तारमुपतिष्ठति यौवनेन। उपाद्देवपूजासंगतकरणमित्रकरणपथिष्विति वक्तव्यं देवपूजायामादित्यमुपतिष्ठते संगतकरणे रथिकानुपति

का॰ प्र॰
१९

एते तेनवरतातिष्ठ मित्रकरणे महामंत्रानुपतिष्ठते संगतकरण मित्रकरणयोः कोविशेषः। संगतकरणमुपश्लेषणं। नयथा गंगायमु
पतिष्ठते। मित्रकरणं कोविशेषः संगतकरणमुपश्लेषणं विनापि मैत्रीसंबंधः। रथिकानपंथानमुपतिष्ठते। वालिप्सायामिति
वक्तव्यं। भिक्षुको ब्राह्मणकुलमुपतिष्ठते उपतिष्ठतीति वा २५ ‌अकर्मकादिति वर्तते। उपपूर्वात्तिष्ठतेरकर्मका दकर्मकक्रियावच
नादात्मनेपदं भवति। यावद्भुक्तमुपतिष्ठते। यावदोदनमुपतिष्ठते। भुक्तमिति भावे क्तप्रत्ययः भोजने भोजने संनिधीयित इत्यर्थः। अकर्मका
दितिकिं राजानमुपतिष्ठति २६ अकर्मकादिति वर्तते। उद्वि इत्येवं पूर्वात्तपतेरकर्मकक्रियावचनादात्मनेपदं भवति उत्तपते
वितपते दीप्यत इत्यर्थः अकर्मकादित्येव। उत्तपते पाणिं वितपते पाणिं उत्तपते पृष्ठं वितपते पृष्ठं। स्वांगं चेहन पारिभाषिकं गृह्यते। अश्व
म्भृति मित्यांगमिति। किं तर्हि स्वमंगं स्वांगं तेनेह न भवति देवदत्तो यज्ञदत्तस्य पृष्ठमुत्तपति उदिति वामिति किं निष्टपति २७ हनः
अकर्मकादिति वर्तते। यमहनपरमेहा नहिंसागत्योरिति परस्मैपदिनौ ताभ्यामाङ्पूर्वाभ्यामकर्मकक्रियावचनाभ्यामात्मनेपदं भवति आयच्छते
आयच्छेते हनः खल्वपि आहते आघ्नाते आघ्नते अकर्मकादित्येव आयच्छति कूपाद्रज्जुं। आहंति वृषलं पादेन। स्वांगकर्मकाच्चेति वक्तव्यं। आ
यच्छते पाणिं आहते शिरः स्वांगं चेह पारिभाषिकं न गृह्यते किं तर्हि स्वमंगं स्वांगं तेनेह न भवति। आहंति शिरः परकीयामिति २८
प्रच्छिस्वसीति श्रुविदिभ्यः। अकर्मकादित्येव शेषात्कर्तरि परस्मैपदे प्राप्ते संपूर्वेभ्यो गमृच्छिप्रच्छिस्वरतिश्रुविदिभ्य एतेभ्यः कर्मकेभ्यः
हि परस्मैपदे इति भाश्रीयते। बहुलं छंदसि। आमाड्योगेपि इत्याडभावि क्रियते। स दृशोक्लि इति गुणः समरंत संशृण्वते संविते स्फूना
देशस्य ग्रहणं। समृच्छिष्यते। अन्यादेशस्य लटेरित्येव सिद्धमात्मनेपदं। अर्तिरुभयत्र पठ्यते त्सगतिप्रापणयोरिति ऋ भ्वादौ सगताविति
जुहोत्यादौ विशेषाभावादुभयोरपि ग्रहणं। विदेर्ज्ञानार्थस्य ग्रहणं परस्मैपदिभिर्गमादिभिः। साहचर्यात् न लाभार्थस्य स्वरितेत्वादुभयतो भा
त्मनेपदविधानप्रतिवक्तव्यं। संपस्यते। अकर्मकादित्येव ग्रामं संगच्छति। २९ अकर्मकादिति निवृत्तं अतः परं सामान्येना
त्मनेपदविधानप्रतिवक्तव्यं। निसमुपविभ्यो ह्वः इत्येवं पूर्वात् ह्वयतेरात्मनेपदं भवति निह्वयते। संह्वयते। उपह्वयते विह्वयते। अकर्त्रभिप्रायार्थो
पमारंभः स्पर्धायां विषये आङ्पूर्वात् ह्वयतेरात्मनेपदं भवति निह्वयते। तत्र प्रेत्रिलात्सिद्धमेवात्मनेपदं उपसर्गादस्यत्यूह्योर्वावचनं निरस्यति
समूहते ३० अकर्त्रभिप्रायार्थो यमारंभः स्पर्धायां विषये आङ्पूर्वात् ह्वयतेरात्मनेपदं भवति स्पर्धा संघर्षः पराभिभवेच्छा
स विषयो धात्वर्थस्य धातुस्तु शक्तियुक्त मल्लो मल्लमाह्वयते छात्रः छात्रमाह्वयते स्पर्धमानस्तस्याह्वानं करोतीत्यर्थः स्पर्धायामिति किं गामाह्वयति १९

३१ हसिक्षेपप्रतियत्नप्रकथनोपयोगेषु कृञः। कर्त्रभिप्राये क्रियाफले सिद्धमेवात्मनेपदं अकर्त्रभिप्रायार्थो
यमारंभः गंधनादिष्वर्थेषु वर्तमानाद्धातोः करोतेरात्मनेपदं भवति गंधनमपकारयुक्तं हिंसात्मकं सूचनं। तथाहि वल्मगंधअर्दने। अर्दहिंसाया
मिति चुरादौ पठ्यते। अवक्षेपनं भर्त्सनं सेवनमनुवृत्तिः। साहसिक्यं साहसिकं कर्म प्रतियत्नः सतो गुणांतराधानं प्रकथनं प्रकर्षेण कथनं। उपयो
गो धर्मादि प्रयोजनो विनियोगः। गंधनेतावत्। उत्कुरुते उदाकुरुते। सूचयतीत्यर्थः। अवक्षेपणे। श्येनो वर्तिकामुपकुरुते। भर्त्सयतीत्यर्थः।
सेवने। गणकाउद्गणस्योपस्कुरुते। तस्य सतो गुणाधानं करोतीत्यर्थः साहसिक्ये। परदारान्प्रकुरुते तेषु सहसा प्रवर्तत इत्यर्थः। प्रतियत्ने। एधो
दकस्योपस्कुरुते। कांडगुणस्योपस्कुरुते तस्य सतो गुणाधानं करोतीत्यर्थः। षष्ठीसु इत्यकरोतेः प्रतियत्ने सुडयं विधीयते अतः प्रतिपद इत्येव
प्रकथने गाथाः प्रकुरुते। जनापवादान्प्रकुरुते। प्रकर्षेण कथयतीत्यर्थः। उपयोगे शतं कुरुते। सहस्रं प्रकुरुते। धर्मार्थं शतं विनियुक्त इत्यर्थः
एतेषु इति किं कटं करोति ३२ अकर्त्रभिप्रायार्थोयमारंभः। अधिपूर्वात्करोतेः प्रसहने वर्तमानादात्मनेपदं भवति।
प्रसहनमभिभवः अजरासंधो पतमधिकुरुते तमधिचक्रे तमभिबभूव। न यातेन पराजित इत्यर्थः प्रसहन इति किं। अर्थमधिकरोति।
पृथग्योगकरणमुपसर्गविशेषणार्थं ३३ अकर्मकादित्यनुवर्तते विपूर्वात्करोतेरकर्त्रभिप्राये क्रियाफले शब्दकर्मण आत्मने
पदं भवति कर्मशब्द इहकारकाभिधायी न क्रियावचनः। क्रोष्टा विकुरुते स्वरान्। ध्वांक्षो विकुरुते स्वरान्। शब्दकर्मण इति किं विकरोति पयः ३४
विपूर्वात्करोतेरकर्मकक्रियावचनादात्मनेपदं भवति विकुर्वते सैंधवाः साधु दांताः शोभनं वल्गंतीत्यर्थः
ओदनस्य पूर्णाः। छात्रा विकुर्वते निःफलं चेष्टंत इत्यर्थः। अकर्मकादिति किं कटं विकरोति ३५
णिनि प्रायणे कर्त्रभिप्राये क्रियाफले सिद्धमेवात्मनेपदं। अकर्त्रभिप्रायार्थोयमारंभः। संमाननादिषु सत्सु विशे
षणेषु नयतेर्धातोरात्मनेपदं भवति। संमाननं पूजनं नयते चार्वी लोकायते चार्वी बुद्धिः तत्संबंधादाचार्यो पि चार्वी ते स लोकायते शास्त्रे पदा
र्थान् युक्तिभिः स्थिरीकृत्य शिष्येभ्यः प्रतिपादितास्ते युक्तिभिः सम्मानिताः पूजिता भवंति। उत्संजनमुत्क्षेपणं माणवकमुदानयते अर्ह
थाउपनेतास्वयमाचार्यः संपद्यते। माणवकमुपनयते। आत्मानमाचार्यं कुर्वन् माणवकमात्मसमीपं प्रापयतीत्यर्थः ज्ञानं प्रमेयनिश्चयः।
नयते चार्वी लोकायते। तत्र प्रमेयं निश्चिनोतीत्यर्थः। भृतिर्वेतनं कर्मकरानुपनयते भृतिदानेन समीपं करोतीत्यर्थः विगणनं ऋणादेर्नि

का॰प्र॰
२॰

प्यातिनं महाः करं विनयं ते निष्पातियंतित्यर्थः व्ययो धनादिषु विनियोगः शतं विनयते सहस्रं विनयते धर्मार्थे शतं सहस्रं वा प्रयुंक्त
ते इत्यर्थः। एतेष्विति किम् अजां नयति ग्रामं ३६ कर्तृस्थे चाशरीरे कर्मणि कर्तृदेवतादित्युक्तेर्वाच्यः। तत्रस्थे कर्मणि
अशरीरे सति नयतेरात्मनेपदं भवति। शरीरं प्राणिकायस्तदेकदेशोपि शरीरं क्रोधं विनयते। मन्युं विनयते कर्तृस्थ इति किं देवदत्तो
यज्ञदत्तस्य क्रोधं विनयति ३७ वृत्तिसर्गतायनेषु क्रमः। शेषात्कर्तरि परस्मैपदे प्राप्ते वृत्त्यादिष्वर्थेषु क्रमेर्धातोरात्मनेपदं भवति।
वृत्तिरप्रतिबंधः। सर्ग उत्साहः। तायनं स्फातता वृत्तौ तावत् ऋक्ष्वस्य क्रमते बुद्धिः यजुःष्वस्य क्रमते बुद्धिः। न प्रति
हन्यत इत्यर्थः। सर्गे व्याकरणाध्ययनाय क्रमते बुद्धिः श्लोकाध्ययनाय क्रमते उत्सहत इत्यर्थः तायने। अस्मिन् शास्त्राणि क्रमंते वर्धंत इत्यर्थः। एष्वि
ति किं। अपक्रामति। क्रमः परस्मैपदेष्विपरीत्यः ३८ उपपराभ्याम्। वृत्तिसर्गतायनेष्विति वर्तते उपपराभ्यां क्रमतेर्वृत्त्यादिष्वर्थेषु व
र्तमानादात्मनेपदं भवति किमर्थमिदमुच्यते उपसर्गनियमार्थं सोपसर्गादुपपराभ्यामेव नान्यस्मादिति। उपक्रमते। पराक्रमते। उपपराभ्यामिति किं। सं
क्रामति वृत्त्यादिष्वित्येव। उपक्रामति पराक्रामति ३९ आङ उद्गमने। आङ्पूर्वात्क्रमतेरुद्गमने वर्तमानादात्मनेपदं भवति। आक्रमते
आदित्यः आक्रमते चंद्रमाः। आक्रमंते ज्योतींषि। उद्गमन इति किं। आक्रामति माणवकः कुतुपं ज्योतिरुद्गमन इति वक्तव्यं। इह मा भूत्
आक्रामति धूमो हर्म्यतलं ४० वेः पादविहरणे। विपूर्वात्क्रमतेः पादविहरणेर्थे वर्तमानादात्मनेपदं भवति विहरणं विक्षेपः सुष्ठु विक्रमते सा
धु विक्रमते अश्वादीनां गतिविशेषो विक्रमा उच्यते। यद्यपि चक्रमिः। पादविहरण एव पठ्यते। क्रमपादविक्षेप इति तथाप्यनेकार्थत्वाद्धा
तूनामेवमुक्तं पादविहरण इति किं नस। विक्रमत्यजिनसंधिः ४१ प्रोपाभ्यां समर्थाभ्याम्। प्रउपेत्ताभ्यां। प्रउपेत्येताभ्यामुपसर्गाभ्यां
परस्मात्क्रमतेरात्मनेपदं भवति तौ चेत्प्रोपौ समर्थौ तुल्यार्थौ भवतः क्वानयोस्तुल्यार्थता। आदिकर्मणि। प्रक्रमते भोक्तुं। उपक्रमते
भोक्तुं। समर्थाभ्यामिति किं। पूर्वेद्युः प्रक्रामति गच्छतीत्यर्थः। अपरेद्युरुपक्रामति आगच्छतीत्यर्थः। अथोपपराभ्यामित्यनेनात्मनेपद
मत्र कस्मान्न भवति। वृत्त्यादिग्रहणं तत्रानुवर्तते। ततोन्यत्रेदं प्रत्युदाहरणं। अनुपसर्गाद्वा। अप्राप्तविभाषेयं क्रम इति वर्तते उपसर्गवियुक्ता
त्क्रमेरात्मनेपदं भवति। क्रामति क्रमते। अनुपसर्गादिति किं। संक्रामति ४३ अपह्नवे ज्ञः। शेषात्कर्तरि परस्मैपदे प्राप्ते जानातेरपह्नवे
वर्तमानादात्मनेपदं भवति। अपह्नवो निह्नुतिरपलापः सोपसर्गश्चापह्नवे वर्तते न केवलः। शतमपजानीते। सहस्रमपजानीते
अपलपतीत्यर्थः अपह्नव इति किं न त्वं किंचिदपि जानासि ४४ अकर्मकाच्च। कर्त्रभिप्रायार्थोयमारंभः कर्त्रभिप्राये ह्यनुपसर्गादि

त्युक्तिन स्याति। अकर्मकादकर्मकात्क्रियावचनात्। जानातेरात्मनेपदं भवति सर्पिषो जानीते। कथं वायमकर्मकः। नात्र सर्पिरादि
पत्वेन विवक्षितं किं तर्हि ज्ञानपूर्विकायां प्रवृत्तौ करणत्वेन तथा ह्यज्ञोविदर्थस्य करण इति षष्ठी विधीयते सर्पिषो जानीते न धुनो जानीते स
र्पिषा उपायेन प्रवर्तत इत्यर्थः। अकर्मकादिति किं। स्वरेण पुत्रं जानाति ४५ संप्रतिभ्यामनाध्याने। इति वर्तते सकर्मकार्थोयमारंभः
संप्रतिपूर्वाज्जानातेरनाध्याने वर्तमानादात्मनेपदं भवति। अनाध्यानमनुत्कंठा शतं संजानीते सहस्रं संजानीते। अनाध्यान इति किं।
मातुः संजानाति उत्कंठ इत्यर्थः ४६ भासनोपसंभाषा ज्ञानयत्नविमत्युपमंत्रणेषु वदः। शेषात्कर्तरि परस्मैपदे प्राप्ते भासनादिषु
अर्थेनि विशेषणेषु सत्सु वदतेरात्मनेपदं स्यात्। भासनं दीप्तिः। वदते धार्मिकोकायते। भासमानो दीप्यमानस्तत्रस्तत्र पदार्थान्व्यक्तो
करोतीत्यर्थः। उपसंभाषा उपसांत्वनं कर्मकरानुपवदते उपसांत्वयतीत्यर्थः। ज्ञानं सम्यगवबोधः वदते चार्वी लोकायते। जानातीत्यर्थः तुमि
त्यर्थः यत्नपदार्थान्लोकोकरोतीत्यर्थः। यत्र उत्साहः। क्षेत्रे वदते गेहे वदते तद्विषयमुत्साहमाविष्करोतीत्यर्थः विमतिर्नानामतिः। क्षेत्रे विव
दंते गेहे विवदंते विमतिपतिता विचित्रं भाषत इत्यर्थः। उपमंत्रणं रहस्युपच्छन्दनं कुलभार्यामुपवदते परदारानुपवदते। उपच्छन्दयतीत्य
र्थः। एतेष्विति किं यत्किंचिद्वदति ४७ व्यक्तवाचां समुच्चारणे। वद इति वर्तते व्यक्तवाचां समुच्चारणं सहोच्चारणं। तत्र वर्तमानाद्वदते
रात्मनेपदं भवति। ननु वद व्यक्तायां वाचीत्येव व्यक्तो तत्र किं व्यक्तवाचामित्यनेन विशेषणेन प्रसिद्ध्युपसंग्रहार्थमेतत्। व्यक्तवाचः
ति हि मनुष्याः प्रसिद्धाः। तेषां समुच्चारणे यथा स्यात् संप्रवदंते ब्राह्मणाः संप्रवदंते क्षत्रियाः। व्यक्तवाचामिति किम् वरतनु सम्प्रव
दति कुक्कुटाः। समुच्चारण इति किं। ब्राह्मणो वदति क्षत्रियो वदति। अनोरकर्मकात् वद इति व्यक्तवाचामिति वर्तते अनुपूर्वाद्वदतेरकर्मकाद्व्यक्तवा
चां विषये आत्मनेपदं भवति। अनुवदते कठः कलापस्य। अनुरत्नेमोनः पैप्पलादस्य अनुः सादृश्ये यथा कलापो धीयमानो वदति तथा कठ इत्यर्थः
अकर्मकादिति किं। पूर्वमेव यदुदितमनुवदति। व्यक्तवाचामित्येव। अनुवदति वीणा ४९ विभाषा विप्रलापे। वद इति वर्तते। व्यक्तवाचां
समुच्चारण इति च। विरुद्धः प्रलापो विप्रलापः विप्रलापात्मके व्यक्तवाचां समुच्चारणे वर्तमानाद्वदतेरात्मनेपदं भवति विभाषा प्राप्तविभाषेयं विप्र
वदंते सांवत्सराः विप्रवदंति सांवत्सराः। विप्रवदंते मौहूर्ताः विप्रवदंति वा युगपत्परस्परं विप्रतिषेधेन विरुद्धं वदंतीत्यर्थः विप्रलाप इति किं

संप्रचरति ब्राह्मणः। व्यक्तवाचामित्येव। विप्रवदंति शकुनयः। ससुधारण इत्येव। कर्मणामौहताः मौहुतेने संविप्रवदति॥५०
गृनिगरण इति तुदादौ पठ्यते। तस्येदं ग्रहणं। न तु गृ शब्द इति क्र्यादिपठितस्य। तस्य ह्यव पूर्वस्य प्रयोगो नास्ति शेषात् इति परस्मैपदे प्राप्ते
अवपूर्वान्गिरतेरात्मनेपदं भवति। अवगिरते। अवगिरते। अवादिति किं। गिरति। समः प्रतिज्ञाने। पूर्वेणैव सिद्धे अतिज्ञाने वर्त
मानादात्मनेपदं भवति। प्रतिज्ञानमः प्रशाति श्रवोणी ... लधाकारि परस्मैपदे प्राप्तेः उदश्चरः सकर्मकात् क्रियावचनादात्मनेपदं भव
ति। गेहमुच्चरते। कुटुंबमुच्चरते उत्क्रम्य गच्छतीत्यर्थः। सकर्मकादिति किं। बाष्पमुच्चरति। समस्तृतीयायुक्तात्। संपूर्वाच्चरतेः तृतीयायुक्तादात्म
नेपदं भवति। तृतीयाविभक्ति ... तथा चरतेरर्थद्वारकोयोगः अश्वेन संचरते। रथेन संचरते। तृतीयायुक्तादिति किं। उभौ लोकौ संचरति इमं चा
मुं च देवल। पश्यन्नत्र यथयोगः संभवति। तृतीयानुनकृतदति प्रकरदाहरणं भवति। दानश्च सा चेच्चतुर्थ्यर्थे दाण दाने परस्मैपदी ततः संपूर्वात्तृती
यायुक्तादात्मनेपदं भवति। सा चेत्तृतीया चतुर्थ्यर्थे न शिष्टव्यवहारे तत्तीयात्कव्यं। दास्या संप्रयच्छते। वृषल्या संप्रयच्छते। कामुकः सन् यस्यदास्य
दाने परस्मैपदी। ततः संपूर्वात्तृतीयायुक्तादात्मनेपदं भवतीति। पुनः तृतीयात चतुर्थ्यर्थे स्यात्। वक्तव्यमेवैतदशिष्टव्यवहारे तृतीया चतुर्थ्य
र्थे भवतीति वक्तव्यं। दास्या संप्रयच्छते। वृषल्या संप्रयच्छते। कामुकः सन् यस्य ... चतुर्थ्यर्थ इति किं। पाणिना संप्रयच्छति। समः प्रशब्दे
न व्यवधाने कथमात्मनेपदं भवति। समइति विशेषणषष्ठीन पंचमी ५५ ... उपाद्यमः स्वकरणे शेषात् कर्तरि परस्मैपदे प्राप्ते उपपूर्वाद्यमः स्वक
रणे विशिष्टमिह स्वकरणं गृह्यते। न स्वकरणमात्रं। भार्यामुपयच्छते। कन्यामुपयच्छते स्वकरण इति किं। देवदत्तो यज्ञदत्तस्य भार्यामुपयच्छति
५६ ... ज्ञाश्रुस्मृदृशः इत्येतेषां सन्नन्तानामात्मनेपदं भवति। तत्र ज्ञानाते परस्मैपदे प्राप्ते ... सन्नैः आत्मनेपदं विहितं श्रुदृशोरपि
समो गमृच्छि ... विहितं तस्मिन्विषये पूर्ववत्सनः इत्येव सिद्धमात्मनेपदं ततोऽन्यत्रानेन विधीयते स्मरते पुनरप्राप्तं विधानं धर्मं जिज्ञास
ते। गुरुं शुश्रूषते। नष्टं सुस्मूर्षते। नृपं दिदृक्षते। सन इति किं। जानाति। शृणोति। स्मरति। पश्यति ५७ ... अनोरज्ञा आत्मनेपदं
अनेन प्रतिषिध्यते। अनुपूर्वाज्जानातेः सन्नन्तादात्मनेपदं न भवति। तथा सति सकर्मकस्यैवायं प्रतिषेधः पुत्रमनुजिज्ञासति। नायमनुजि
ज्ञासति। अनोरिति किं। धर्मं जिज्ञासते। प्रत्याङ्भ्यां श्रुवः। प्रति आङ् इत्येवं पूर्वाच्छृणोतेः सन्नन्तादात्मनेपदं न भवति। प्रतिशुश्रूषति आशुश्रू

षति। उपसर्गग्रहणं चेदं। तस्मादिह प्रतिषेधो न भवति। देवदत्तं प्रति शुश्रूषते। शदेः शितः शद्लृ शातने परस्मैपदी तस्मादात्मनेपदं वि
धीयते। शदेः शितः शिता शितो वा संबंधि तस्मादात्मनेपदं भवति। शीयते। शीयेते। शीयन्ते। शित इति किं। अशत्स्यत्। शत्स्यति। शिशत्स
ति। म्रियते लुङ्लिङोश्च म्रिङ् प्राणत्यागे ङित्वादात्मनेपदमत्र सिद्धमेवेति नियमार्थमिदं वचनं। म्रियतेर्लुङ्लिङोः शितश्चात्मनेपदं भवत्यन्यत्र भ
वति। अमृत। मृषीष्ट। शितः। स्वल्वपि म्रियते। नियमः किमर्थः मरिष्यति अमरिष्यत् ६१ ... सनन्तो यो धातुरात्मनेपदीत
स्मात्सनंतादात्मनेपदं भवति। येन निमित्तेन पूर्वस्मादात्मनेपदं विधीयते। तेनैव सनंतादपि भवति। अनुदात्तङित आत्मनेपदं। आस्ते शेते
सनंतादपि। तदेव निमित्तं। आशीसिषते। शिशयिषते। नेर्विशः। निविशते निविविक्षते। आङ् उद्गमने। आक्रमते। आचिक्रंसते। इह न भवति
शिशत्सति मुमूर्षति नहि शदिम्रियती मात्रमात्मनेपद निमित्तं। अनुहि शिदाद्यपि तच्च सनन्तास्ति। यस्य च हेतुर्नैव निमित्ताभावः। प्रतिषिध्यते।
पूर्ववत् सनंतं। तेषु निमित्तं। अनुचिकीर्षति। इह जुगुप्सते। मीमांसते। इति अनुदात्तेत्त्वादात्मनेपदं भवति श्रवपते ... समुदायस्यापि
शेषकं भवतीति ६२ ... अकर्त्रभिप्रायार्थोऽयमारंभः आम्प्रत्ययो यस्माद्विहितः सोऽयमाम्प्रत्ययः। आम्प्रत्यय
स्येव धातोः कृञो नुप्रयोगस्यात्मनेपदं भवति। ईहांचक्रे। ईहांचक्रे। यदि विध्यर्थमेतत् तर्हि उज्झांचकार उब्जांचकार इति कर्त्रभिप्राये क्रि
याफले आत्मनेपदं प्राप्नोति। नैष दोषः। उभयमनेन क्रियते। विधिर्नियमश्च कथं। पूर्ववदिति वर्तते। सद्वितीयो यत्नोऽभविष्यति। कृञ इ
ति किं। ईहामास। ईहांबभूव। कथं पुनरस्यानुप्रयोगो यावता कृञ्चानुप्रयुज्यते लिटीत्युच्यते। कृञिति प्रत्याहार ग्रहणं तत्र विज्ञायते सकृञ्
विधानां प्रत्याहारः। आमः ... योगसंपद्य कर्तरीति कृञ शब्दाहारस्य भावात् कृञो द्वितीय तृतीयेति कृञ्कारः ६३ ...
सायाचेषु। युजिर्योगे स्वरितेत्। तस्य कर्त्रभिप्राये क्रियाफले सिद्धमेवात्मनेपदं। अकर्त्रभिप्रायार्थोऽयमारंभः। प्रउप इत्येवं पूर्वाद्युजेरज
न्त्रयोग विषयादात्मनेपदं भवति प्रयुंक्ते। उपयुंक्ते। अयज्ञपात्रेष्विति किं। द्वंद्वं यज्ञपात्राणि प्रयुनक्ति धीरः स्वरा द्यन्तोपसृष्टादिति वक्तव्यं।
उद्युंक्ते। नियुंक्ते॥ ६४ ... क्ष्णुसंज्ञ्ये परस्मैपदी। ततः संपूर्वादात्मनेपदं भवति। समो गमृच्छीत्यत्रैव कस्मान्न पठितः।
अकर्मकादिति तत्रानुवर्तते शस्त्रं संक्ष्णुते। संक्ष्णुवाते। संक्ष्णुवते सम इति किं। विक्ष्णोति ६५ ... भुज पालना भ्यवहारयोरिति
तुधादौ पठ्यते। तस्मादनवने पालने वर्तमानादात्मनेपदं भवति। ओदनं भुंक्ते। भुंजाते। भुंजते। अनवन इति किं। भुनक्त्येनमग्निराहितः। अव

नप्रतिषेधे नरो भाटिकस्येवग्रहणम्भिलापते। नत्वौदाहिकस्य भुजकौटिल्य इत्यस्य। तेनेह नाभवति भुजतिपाणिं ६६ णिचश्च
चेत्सकर्तृ। नाध्याने। णिचश्चेति कर्त्रभिप्राये क्रियाफले सिद्ध मेवात्मनेपदं। अकर्तृत्रभिप्रायार्थोयमारम्भः। एमंताद्आत्मनेपदंभवति। कथं।
अणौयत्कर्मणौ चेत्स देवकर्मसएवकर्त्ताभवति। अनाध्याने। आध्यायनं वर्जयित्वा। आरोहंतिहस्तिनंहस्तियकाः। आरोहयते हस्ती स्वयमेव
उपसिंचंतिहस्तिनंहस्तियकाः। उपसेचयते हस्ती स्वयमेव पश्यंति भृत्या राजानं दर्शयते राजा स्वयमेव। णेरिति किं। आरोहंति हस्तिनं हस्तियकाः। आ
रोह्यमाणो हस्ती साध्वारोहति। अणाविति किं। गणपतिगणः स्वयमेव। कर्मग्रहणं किम्। लुनाति दात्रेण। लावयति दात्रं स्वयमेव। णौ चेदिति किं
समानक्रियार्थः। आरोहंति हस्तिनं हस्तियकाः। आरोह्यमाणो हस्ती भीतान् सेचयति मूत्रेण। पसःग्रहणमन्यकर्मार्थम्। आरोहंति हस्तिनं ह
स्तियकाः आरोह्यमाणो हस्ती स्थलमारोहयति। मानुष्यान्। कर्तेति किं। आरोहंति हस्तिनं हस्तियकाः तानारोहयति महामात्रः। अनाध्यान इति
किं। स्मरति वनगुल्मस्य कोकिलः। स्मरयत्येनं वनगुल्मः। स्वयमेव नतु यात्र कर्मकर्तरीमूलोदाहरणानि। तत्र कर्मवद्भावेनैव सिद्धमात्मनेपदं किमर्थ
मिदमुच्यते। कर्मस्थभावकानां कर्मस्थक्रियाणां च कर्मवद्भावो विधीयते कर्तृस्थभावकार्थमारंभः। तथा च तुहिः। कर्तृस्थक्रियः द्वयोः कर्तृस्थभाव
कउदाहरणं अपरिस्पंदरूपधात्वर्थो भावः परिस्पंदरूपस्तु क्रिया ६७ भीस्म्योर्हेतुभये णेरिति वर्तते अकर्त्रभिप्रायार्थोयमारंभः। बिभे
तेः विस्मेतेः। स्मयतेश्च एयंताद् आत्मनेपदं भवति हेतुभये। हेतुप्रयोजकः। कर्तृलिकारवाच्यः। ततः श्चेद्भयं भवति। भयग्रहणमुपलक्षणार्थं। विस्म
योपि तत एव। मुंडो भीषयते। जटिलो भीषयते। मुंडो विस्मापयते जटिलो नित्यं स्मयते रित्याकारः। हेतुभय इति किं। कुंचिकयैनं भाययति। रूपेण
विस्मापयति। अत्र कुंचिका भयस्य कारणं न हेतुः ६८ गृधिवंच्योः प्रलंभने णेरिति वर्तते। अकर्त्रभिप्रायार्थोयमारंभः। गृधु अभिकांक्षायां
वंचु गतौ। विलेतयोर्णयंतयोः प्रलंभने वर्तमानयोरात्मनेपदं भवति। प्रलंभनं वर्तमानयोरात्मनेपदं भवति। प्रलंभनं विसंवादनं मिथ्याफलाख्याना
माणवकं गर्धयते। माणवकं वंचयते प्रलंभन इति किम्। श्वानं गर्धयति। गर्दभस्योत्सादयतीत्यर्थः। अहिं वंचयति परिहरतीत्यर्थः ६९ लियः
सम्माननशालीनीकरणयोश्च णेरिति वर्तते अकर्त्रभिप्रायार्थोयमारंभः। लीङ् श्लेषणे। दिवादौ पठ्यते लीश्लेषणे त्यस्या सामान्यविशेषाभा
वात्। द्वयोर्ग्रहणं लियोर्ण्यंतात्सम्मान नशालीनीकरणयोर्वर्तमानादात्मनेपदं भवति। चशब्दात्प्रलंभनेच। संमाननं संपूजनं। शालीनीकरणं

न्यग्भावनम्। जटाभिः शालायत इत्यर्थः। पूजामधिगच्छतीत्यर्थः। श्येनो वर्तिकामुल्लापयते न्यक्करोतीत्यर्थः। प्रलंभने बालकमुल्लापयते।
कोपिसंमाद्यतीत्यर्थः। विभाषलीयते रित्याकारो विधीयते। तदा तस्मिन्विषये नियमोन्यत्र विकल्पः। व्यवस्थितविभाषाहि सा सम्माननादि
ष्विति किं बालकमुल्लापयति ७० मिथ्योपपदात्कृञोभ्यासे णेरिति वर्तते। अकर्त्रभिप्रायार्थोयमारंभः। एयंतात्करोतेर्मिथ्योपपदादात्मने
पदं भवति अभ्यासे। अभ्यासः पुनः पुनः करणमावृत्तिः पदं मिथ्याकारयते सापराधं स्वरादि दुष्टमसकृदुच्चारयतीत्यर्थः। मिथ्योपपदादिति किम् पदं
सुष्ठु कारयति स्म। अत इति किं। पदं मिथ्याभापयति। अभ्यास इति किं। पदं मिथ्या कारयति। सकृदुच्चारयतीत्यर्थः ७१ स्वरितञितः कर्त्रभिप्राये
क्रियाफले णेरिति निवृत्तं। शेषात्कर्तरि परस्मैपदे प्राप्ते स्वरितेतो ञितश्च धातोर्यच्च भात्मनेपदं भवति कर्त्रभिप्राये क्रियाफले। गम्यमाने क
र्तारं च श्रीयाफलमभिप्रैति क्रियायाः फलं क्रियाफलं प्रधानभूतं यदर्थमसौ क्रियारमते तच्चेत्कर्तुर्लकारवाच्यस्य भवति। यजते। पचते नित
रत्वयी। सुनुते। कुरुते। स्वर्गादिकं प्रधानं फलमिह कर्तारमभिप्रैति। कर्त्रभिप्राय इति किं। यजति याजकाः। पचंति पाचकाः। पच निच दक्षिणाप्र
भृति कर्तुश्च फलमिहास्ति तथापि न तदर्थः क्रियारंभः। अपाद्वदः। अर्त्रभिप्राय इति वर्तते। अपपूर्वाद्वदतेः। अत्रभिप्राये क्रियाफले आत्मनेपदं भवति
धनकामो न्यायमपवदते। न्यायापवादेन धनमर्जयिष्यामीति मन्यते। कर्त्रभिप्राये क्रियाफल इत्येव। अपवदति ७३ णिचश्च कर्त्रभिप्राये
क्रियाफल इति श्रुतवर्तते णिजंताद् आत्मनेपदं भवति। कर्त्रभिप्राये क्रियाफले। कटं कारयते। ओदनं पाचयते। कर्त्रभिप्राय इत्येव। कारयति
परस्य कटस्य मुदासीनो यमो ग्रंथे। कर्त्रभिप्राय इति वर्तते। समुदाङ्भ्यो यमोऽग्रन्थे इत्येव प्रवर्तीयमः। कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवति। अग्रंथे ग्रं
थविषयश्चेत्प्रयोगो भवति। व्रीहीन्संयच्छते। भारमुद्यच्छते वस्त्रमायच्छते। आङ् पूर्वो दिकर्मकोऽदाने यमहन इति सिद्धमात्मनेपदं सकर्मकार्थ
मिदं पुनर्ग्रहणं। अग्रंथ इति किं उद्यच्छति चिकित्सां वैद्यः। कर्त्रभिप्राय इत्येव संयच्छति उद्यच्छति ७५ अनुपसर्गाज्ज्ञः कर्त्रभिप्राय इति वर्तते
अनुपसर्गाज्जानातेः कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवति। गां जानीते। अश्वं जानीते। अनुपसर्गादिति किं। स्वर्गं लोकं प्रतिजानाति सिम्
द। कर्त्रभिप्राय इत्येव। देवदत्तस्य गां जानाति ७६ विभाषोपपदेन प्रतीयमाने। स्वरितञित इत्यादिभिः
पंचभिः पंचभिः सत्रैरात्मनेपदं कर्त्रभिप्राये क्रियाफले व्यवस्थिविहितं तदुपपदेन द्योतितं न प्राप्नोतीति वचनमिदमारभ्यते समीपे श्रूयमाणं
शब्दांतरमुपपदं तेन प्रतीयमाने कर्त्रभिप्राये क्रियाफले विभाषात्मनेपदं भवति। स्वयज्ञं यजते। यजति वा। स्वं कटं कुरुते करोति वा। स्वं पुत्र

मपवदते। अपवदतिवा। एवंपंचसूत्र्यामप्युदाहार्य्यं ७८ पूर्वेणप्रकरणेनात्मनेपदनियमःकृतः परस्मैपद
मनियतंतत्सर्वतः प्राप्नोति। तदर्थमिदमारभ्यते। येभ्योधातुभ्योयेनविशेषणेनात्मनेपदमुक्तं। अतोयदन्यत्सशेषः शेषात्कर्तरिपरस्मैपदंभ
वति। शेषादेवनान्यस्मात्। अनुदात्तङित आत्मनेपदमुक्तं। आस्ते। शेते। ततोन्यत्रपरस्मैपदंभवति। याति। वाति। नेर्विशः। आत्मनेपदमुक्तंनिवि
शते। ततोन्यत्रपरस्मैपदं। आविशतिप। कर्तरीतिकिं। पच्यते। गम्यते। कर्मकर्तरिकस्मान्नपरस्मैपदंभवति। पच्यतेओदनः। स्वयमेव। क
र्तरिकर्मव्यतिहारइतिद्वितीयंकर्तृग्रहणमनुवर्तते। तेनकर्तैवयःकर्तैवयःकर्तातत्रपरस्मैपदंभवति कर्मकर्तरिनभवति ७९
कर्त्रभिप्रायेक्रियाफलेगंधनादिष्वर्थेषुकरोतेरात्मनेपदंविहितंतदपवादःपरस्मैपदंविधीयते। अनुपराभ्यांपूर्वात्करोतेः परस्मैपदंभ
वति। अनुकरोति। पराकरोति ८१ क्षिपप्रेरणेस्वरितेततः कर्त्रभिप्रायक्रियाफलविवक्षयात्मनेपदंप्राप्तेपरस्मै
पदंविधीयते प्रत्यभ्यतिभ्यःपरस्मैपदंभवति। प्रयहाणिगंगा। प्रादितिकिं। आक्षिपते ८२ मृषइतितिक्षायां स्वरितेत्ततः। तथैवात्म
नेपदेप्राप्तेपरस्मैपदंविधीयते। परिपूर्वात्। मृषेर्धातोः परस्मैपदंभवति। परिमृष्यति। परिमृष्यतः। परिमृष्यन्ति। वहतिमपिकेचिदनुवर्तयं
तिपरिवहति ८२ रमुक्रीडायामनुदात्तेत्तात्मनेपदी ततः परस्मैपदंविधीयते विआङ्परिइत्येवंपूर्वाद्रमतेः परस्मैपदं
भवति। आरमति। परिरमति। व्याङ्परिभ्यइतिकिं। अभिरमते ८३ रमइत्येव उपपूर्वाद्रमतः परस्मैपदंभवति। देवदत्तमुपरमति। उ
परमयतीतियावत्। अतएवानीतिरण्यर्थोऽन्तर्भावितः। पृथग्योगकरणमुत्तरार्थमिअकर्मकाद्विभाषावक्ष्यति। सोपपूर्वाद्यथास्यात् ८४
रमइत्येवानुवर्तते। पूर्वेणनित्येपरस्मैपदेप्राप्तेविकल्प्यआपरभ्यते। उपपूर्वाद्रमतेरकर्मकाद्विभाषापरस्मैपदंभवति। याव
द्भुक्तमुपरमति। यावद्भुक्तमुपरमते। तावन्निवर्ततइत्यर्थः ८५ णिचश्चेतिकर्त्रभिप्रायक्रियाफल
विवक्षायामात्मनेपदेप्राप्तेपरस्मैपदंविधीयते। बुधयुध। नश। जन। इङ्। प्रु। द्रु। सुइत्येतेभ्योण्यंतेभ्योधातुभ्यः परस्मैपदंभवति। बोधयति। योधय
ति। नाशयति। जनयति। अध्यापयति। प्रावयति। द्रावयति। स्रावयति। यत्राकर्मकास्तेषामण्यकर्मकाच्चित्तवत्कर्तृकादित्येवसिद्धेयचलनचित्त
वत्कर्तृकार्थंमि। योधयति। अश्नाति। बोधयतिपद्मम्। नाशयतिदुःखम्। जनयतिसुखम्। द्रुक्तचलनार्थाअपितेभ्योनिगरणचलनार्थ
भ्यश्चेतिसिद्धे धराङ्लनार्थान्तदर्थवचनं। प्रवते। प्राप्नोतीतिगम्यते। अयोद्रवंति। विलीयंतइत्यर्थः। कुंडिकास्रवति। स्यंदतइत्यर्थः। अत्रत्रुटि

यत्रमात्रंद्विपदाद्युदाहरणंनत ८६ अवर्द्धिषतावविवर्द्धिषते स्यसनोरितिकिंवर्त्तते ९२ कृपोवृतोरित्या
देवस्यसनोर्विकल्पः सिद्धः लुटिविधितेव कारस्तर्हिस्यसनोरनुकर्षणार्थोनवक्तव्यः एवंतर्हियंप्राप्तिः कृपः पूर्वप्राप्तिंबाधेत। तस्माच्चकारःस्य
सनोरनुकर्षणार्थःक्रियते। लुटिचस्यसनोश्चकृपःपरस्मैपदंवाभवति। कल्प्ता। कल्पिता। इति। स्येकल्प्स्यति। कल्पिता। कल्पिष्यते। विकल्पिष्यते।
अत्रपरस्मैपदंतत्वत्तासिचवृपद्रतिप्रतिषेधः। यत्रात्मनेपदंतत्रेड्भवत्येव ९३
कडारः। कर्मधारयइतिवक्ष्यति। आएतस्मात्सूत्रावधेर्यानीतऊर्ध्वमनुक्रममिष्या
मः। तत्रैकासंज्ञाभवतीतिवेदितव्यं। कापुनरसौपयरा अनवकाशाच। अन्यत्रसंज्ञासमावेशान्नियमार्थंवचनं। एकैवसंज्ञाभवतीति। वक्ष्यति।
ह्रस्वंलघुभिद। छिद। संयोगेगुरुशिक्षि। भिनिगरणचलनार्थेभ्यश्च। णेरितिवर्तते। कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदापवादः।
परस्मैपदंविधीयते। निगरणमभ्यवहारः। चलनंकंपनं। निगरणार्थेभ्यश्चलनार्थेभ्यश्चधातुभ्योण्यंतेभ्यः। परस्मैपदंभवति। निगारयति। आ
शयति। भोजयति। चलनार्थेभ्यश्च। चलयति। चोपयति। कंपयति। अयमपियोगः सकर्मकार्थः। अचित्तवत्कर्तृकार्थश्च। अदेः प्रतिषेधोवक्तव्यः
अत्तिदेवदत्तः। आदयतिदेवदत्तेन। अणावकर्मकाच्चित्तवत्कर्तृकात्। णेरितिवर्तते। कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदापवादः। पर
स्मैपदंविधीयते। अण्यंतोयोधातुरकर्मकश्चित्तवत्कर्तृकश्चतस्मात्ण्यंतात्परस्मैपदंभवति। आस्तेदेवदत्तः। आसयतिदेवदत्तम्। शेतेदेवदत्तः
शाययतिदेवदत्तम्। अणावितिकिं। चेतयमानं। प्रयोजयति। चेतयतेइतिकेचित्प्रकुदाहरंतितदयुक्तं। हेतुमण्णिचोविधिः प्रतिषेधोपिप्रत्या
सत्तेस्तस्यैवन्याय्यः। तस्मादिहचेतयतीतिपरस्मैपदेनैवभवितव्यं। इदन्तुप्रत्युदाहरणं। आरोहयमाणंप्रयोजयति। आरोहतं। अकर्मकादिति
किं। कटंकुर्वाणंप्रयोजयति। कारयते। चित्तवत्कर्तृकादितिकिं। शुष्यंतिव्रीहयः शोषयतेव्रीहिनातपः ८८ ॥ध्मनाध्यसपरि
मुहरुचिनृतिवदवसः॥ पूर्वेणयोगद्वयेननिगरणचलनार्थेभ्यश्चअणावकर्मकाच्चित्तवत्कर्तृकादिति। कर्त्रभिप्रायक्रियाफलविवक्षायामात्मने
पदापवादपरस्मैपदंविहितं। तस्यप्रतिषेधोयमुच्यते। यत्रकर्त्रभिप्रायक्रियाफलविषयंपरस्मैपदंतदवस्थितमेतेननप्रतिषिध्यते। पाययति।
आऽय्यम्। आत्मनेपदमेवभवति। पिबतिर्यातिर्निगरणार्थः दमिप्रभृतयश्चित्तवत्कर्तृकाः नृतिश्चलनार्थः पितेषापरस्मैपदंनभवति। पाय
यते। दमि। दमयते। आङ्यम। आयामयते। यमोपरिवेषणइतिमित्संज्ञाप्रतिसिध्यते। परिमुह। परिमोहयते। रुचि। रोचयते। नृति। नर्त

पते। वंरवायते। वसवासयते। पादिषु धेट् उपसंख्यानं। धायते शुशुमेकसमीचि ९। [illegible] लोहितादिडाज्भ्यः क्यषितिवक्तति। वा
तदंताद्धातोः। परस्मैपदंभवतिशेषादितिनित्ये प्राप्ते विकल्पार्थं वचनं। लोहितायति लोहितायते। पटपटायति। पटपटायते। अथात्र परस्मै
पदं। नमुक्तेकथमात्मनेपदं लभ्यते यावतानुदात्तङितइत्येवमादिनाप्रकरणेन तन्नियतं। एवं तर्ह्यस्मिन्नेपदमेवात्र विकल्पितं विधीयते तेन
नंतरं परस्मैपदप्रतिषेधेन सन्निधापितामहसपध्यते। तेनमुक्तेशेषात्कर्तरि परस्मैपदं भविष्यति १०। [illegible] तस्मा
द्धयंयाचिसादयोपि सम्पूपर्यंतास्तथैव व्ययदिश्यंते। बहुवचनानिर्देशाद्धाधोर्यातिभवति। अनुदात्तेत्वान्नित्यमात्मनेपदे प्राप्ते कृतादिभ्यो लु
ङि परस्मैपदं वा भवति। व्यद्युतत्। व्यद्योतिष्ट। अलुठत्। अलोठिष्ट। लुङि इति किं। द्योतते ११। [illegible] कृतादिष्वेव वृत्तादयः पठ्यं
ते। वृतु वर्तने। स्यंदू [illegible]। शृधु शब्दकुत्सायां। स्यंदू प्रस्रवणे। कृपू सामर्थ्ये इत्येतेभ्यः स्यसनि च परतो वा परस्मैपदं भवति। वर्त्स्यति। अवर्त्स्यत्
विवृत्सति। वर्तिष्यते। अवर्तिष्यत। विवर्तिषते। वृत्। वृत्तातिः। अवर्त्स्यत्। विवृत्सति [illegible]। संयोगपरस्य ह्रस्वस्य लघुसंज्ञा प्रा
प्नोति गुरुसंज्ञा च। एकाल्संज्ञेति। अतततक्षत्। अररक्षत्। सन्वल्लघुनि च अरउत्सेव विधिर्नभवति १। [illegible] विप्रतिषे
धः। यत्र द्वौ प्रसंगावन्यार्थावेकस्मिन्युगपत् प्राप्नुतः स विप्रतिषेधः। तुल्यबलविरोधो विप्रतिषेधः तस्मिन् विप्रतिषेधे परं कार्यं भवति। उ
त्सर्गापवादनित्यानित्यांतरंगबहिरंगेषु तुल्यबलवत्ता नास्तीति नायमस्य योगस्य विषयो बलवतैव तत्र भवितव्यं। अप्रवृत्तौ पर्यायेण वा प्रवृत्तौ
प्राप्तायां वचनमिदमारभ्यते। अतो दीर्घो यञि सुपि च। सस्य च कारः। रक्षाभ्यां। बहुवचने झल्येत् इत्यस्यावकाशः रक्षेषु पुरुषेषु। इहोभयं प्राप्नोति
रक्षेभ्य इति परं भवति विप्रतिषेधेन २। [illegible] ईचि ऊच इ अविभक्तिकोयं निर्देशः स्त्रियमाचष्टाति इति स्त्र्याख्यौ। मूलविभु
जादिदर्शनात्कः ईकारांतमूकारांतं स्त्र्याख्यं शब्दरूपं नदीसंज्ञं भवति। ईकारांतं। कुमारी गौरी शार्ङ्गरवी लक्ष्मीः। ऊकारांतम् ब्रह्मबंधूः। वीरबं
धूः यवाग्वः। पूइति किं। मात्रे दुहित्रे देहि। स्त्र्याख्याविति किं। ग्रामणीः खलपूः आख्याग्रहणं किं। शब्दार्थे स्त्रीलिंगे यथा स्यात्। पदांतरयोगेना
भूत्। ग्रामण्ये स्त्रियै। खलप्वे। स्त्रियै। नदीप्रदेशाः आण्नद्या इत्येवमादयः ३। [illegible] पूर्वेणातिप्रसक्ता नदीसंज्ञा
प्रतिषिध्यते। स्थितिः स्थानं। इयङुवङोः स्थानमनयोरिति इयङुवङ्स्थानौ यौ यूतौ नदीसंज्ञौ न भवतः। स्त्रीशब्दं वर्जयित्वा। हे भ्रूः आस्त्रीति
किं। हे स्त्री ४। [illegible] प्रतिषेधे आमी विकल्पः इयङुवङ्स्थानौ यौ यूतौ वा आमि षष्ठीबहुवचने नदीसंज्ञौ भवतः

Dr. BHAU DAJI MEMORIAL

श्रीणां श्रियाम् भ्रूणाम् भ्रुवं अस्त्रीत्येव स्त्रीणां ५। [illegible] दीर्घस्य नदीसंज्ञा विहिता। ह्रस्वस्य न प्राप्नोति। इयङुवङ्स्था
नयोश्च प्रतिषिद्धा तस्मात् ङिति च विधीयते। ङितिपारतः। ह्रस्वः श्वयोः संबंधीयः स्त्र्याख्यः इयङुवङ्स्थानौ च यूवा नदीसंज्ञौ भवतः
कृत्यै। कृतये। धेन्वै धेनवे। श्रियै श्रिये। भ्रुवै भ्रुवे। अस्त्रीत्येव। स्त्रियै स्त्र्याख्यानिसेव। अग्नये वायवे। भानवे ६। [illegible]
[illegible] ह्रस्व इति वर्तते। शेषो घ्यसखि संज्ञो भवति। सखिशब्दं वर्जयित्वा। कश्च शेषः। ह्रस्वमिवर्णं यदुर्गतं यन्न स्त्र्याख्यं यच्च न नदीसं
ज्ञं स शेषः। अग्नये वायवे। धेनवे। कृतये। असखीति किं। सख्या सख्ये सख्युः सख्यौ। घिप्रदेशाः द्वंद्वे घि इत्येवमादयः ७। [illegible]
[illegible] पतिशब्दस्य घिसंज्ञायां प्राप्तायां नियमः क्रियते। पतिशब्दः समास एव घिसंज्ञो भवति। प्रजापतिना प्रजापतये। समा
स इति किं। पत्या पत्ये पत्युः पत्यौ। कथमन्यत्र पतिना सहेति। छंदसि सर्वे विधयो विकल्प्यंते। छांदसोयं प्रयोग इत्यदोषः। एवकारकरण
मिष्टतोवधारणार्थं। दृढमुष्टिना दृढमुष्टये ८। [illegible] पतिरिति वर्तते। पूर्वेण नियमात् समासे न प्राप्नोतीति वचन
मारभ्यते। षष्ठ्यंतेन शब्देन युक्तः पतिशब्दश्छंदसि विषये वा घिसंज्ञो भवति। कुलुंचानां पतये नमः। कुलुंचानां पत्ये नमः। क्षेत्रस्य पत
ये क्षेत्रस्य पत्ये। षष्ठीयुक्त इति किं। मया पत्या जरदष्टिर्यथासः छंदसीति किं। ग्रामस्य पत्ये ९। [illegible] मात्रिकस्याचो ह्रस्वसंज्ञा
विधीयते ह्रस्वमक्षरं। लघुसंज्ञं भवति छेत्ता भेत्ता। अचिकरत्। अजीहरत्। लघुप्रदेशाः। पुगंतलघूपधस्य च दीर्घो लघोरित्येवमा
दयः १०। [illegible] ह्रस्व इति वर्तते। पूर्वेण लघुसंज्ञायां प्राप्तायां गुरुसंज्ञा विधीयते। संयोगे परतो ह्रस्वमक्षरं गुरुसंज्ञं भवति।
कुंडा कुण्डा सिक्षा। गुरुप्रदेशाः। गुरोश्च हलः इत्येवमादयः ११। [illegible] संयोग इति नानुवर्तते। सामान्येन संज्ञा। विधानं दीर्घमक्षरं
गुरुसंज्ञं भवति। ईहांचक्रे। ऊहांचक्रे १२। [illegible] तदादि प्रत्यये गमू। यस्मात्प्रत्ययो विधीयते धातोर्वा प्रातिपदिकाद्वा त
दादिशब्दरूपं प्रत्यये परतोंगसंज्ञं भवति। कर्तृ हर्तृ कर्ता करिष्यति हरिष्यति। हरिष्यति। अकरिष्यत्। औपगवः। कापटवः। यस्मादिति सं
ज्ञिनिर्देशार्थं तदादीति संबंधात्। प्रत्ययग्रहणं किं। न्यविशत। व्यक्रीणीत। नेर्विश इत्युपसर्गाद् विधिरस्ति। तदादेरंगसंज्ञा स्यात्। वि
धिग्रहणं किं प्रत्ययपरत्वमात्रे माभूत्। स्त्रीयीयति। तदादिवचनं स्यादिनुमर्थं। करिष्यावः। करिष्यामः। कुंडानि। पुनः प्रत्ययग्रहणं।

का॰प्र॰
२५

किंअर्थं।भ्वर्यं।अंगप्रदेशाः।अंगस्येत्येवमादयः १३। सुप्तिङंतंपदम्। सुप्तिङितिप्रत्याहारग्रहणंसुबंतंतिङंतंचशब्दरूपंपदसं
ज्ञंभवति ब्राह्मणाः पचंति।पदसंज्ञायांमंतग्रहणमन्यत्रसंज्ञाविधौप्रत्ययग्रहणेतदंतविधेःप्रतिषेधार्थं।गौरीब्राह्मणीतरा।प
दप्रदेशाः।पदस्य।पदादित्येवमादयः १४। नःक्ये इतिकाद्। क्यषांसामान्येनग्रहणं।नांतशब्दरूपंक्येपरतः।पदसंज्ञंभवति
प्रत्ययेपरतो।पूर्वंपदसंज्ञंभवतष्टक्कुसौ।मधरीपः।उर्णायायुस्।ऊर्णायुः।कलोरण।छंदसिवस्।कलियः १६। स्वादिष्वसर्वनाम
स्थाने। स्वादिष्वितिसुशब्दादेकवचनादभ्यभकपः।प्रत्ययापरिग्रहंतो।स्वादिषुप्रत्ययेषुपरतःसर्वनामस्थानवर्जितेषुपूर्वंपद
संज्ञंभवति।।राजभ्यां।राजभिः।राजत्वं।राजता।राजतरः।राजतमः।असर्वनामस्थानइतिकिं।राजानौ।राजानः १७। यचिभम्।
स्वादिष्वसर्वनामस्थानइतिवर्तते।पूर्वेणपदसंज्ञायांप्राप्तायांतदपवादोभसंज्ञाविधीयते।यकारादावजादौचस्वादौसर्वनामस्थानव
र्जितेप्रत्ययेपरतःपूर्वंभसंज्ञंभवति।यकारादौगार्ग्यः।वात्स्यः।अजादौ।दाक्षिः प्लाक्षिः।नभोद्विरोमनुषांवत्युपसंख्यानं।नभइवनभस्वत्
वृषण्वस्वश्वयोः।वृषण्शब्देतदस्वश्वयोः।परतोभसंज्ञंभवतिछंदसिविषये।वृषाण्वसुः।वृषणश्वः।भप्रदेशाः।भस्येत्येवमादयः १८
तसौमत्वर्थे। भमितिवर्तते।तकारांतंसकारांतंचशब्दरूपंमत्वर्थेप्रत्ययेपरतोभसंज्ञंभवति।उदश्वित्वान् घोषः विप्रुत्वान्वत्सारक
सकारांतं।पयस्वी ओजस्वीतसाविति किं तक्षवान्ग्रामः १९। अयस्मयादीनिछंदसि। अयस्मादीनिछंदसिशब्दरूपाणिछंदसि
विषयेसाधूनिभवंति।भसंज्ञापदसंज्ञाधिकारेवचनात्।तेनमुखेनसाकलमयस्मयादीनांविधीयते।अयस्मयंवर्म।अयस्मयानिपा
त्राणि।अयस्मयीभिः क्वचिदुभयमायेभवति।सुष्टुभासन्स्वकृतागणेनापदत्वात्कुलं।भत्वात्।जश्त्वंभवति।छंदसीत्येनबहुवचनं
विहिततस्यानेनबहुत्वसंख्यावाच्यतेनतिकिं।अयोमयंवर्म २०। बहुषुबहुवचनं। ड्याप्रातिपदिकाइतिस्वादयोत्वस्यतिभाद
पइतिसामान्येनबहुवचनंविहितंतस्यानेनबहुत्वसंख्यावाच्यत्वेनविधीयते बहुषुबहुवचनंभवतिबहुत्वमस्यवाच्यत्वभवतीभावद
कर्मादियोपरेविभक्तिनामार्थाभिव्यात्स्तदीपेबहुत्वेबहुवचनं।कर्मादिषुबहुषुबहुवचनमित्यर्थः।ब्राह्मणाःपचंति।पत्रयत्रसंख्यासंभा
तितत्रायमुपदेशः।अव्ययेभ्यस्तनिःसंख्येभ्यःसामान्यविहिताः।स्वादयोभवंत्येव २१। द्व्येकयोर्द्विवचनैकवचने। द्वित्वैकत्व
योरर्थयोरर्थाभिधानंभवति। द्वित्वेद्विवचनंभवति।एकत्वेएकवचनंभवति।ब्राह्मणौपचतः ब्राह्मणः पचति २२। कारके। का

२५

रकइतिविशेषणमपादानादिसंज्ञाविषयमधिक्रियतेकारकइत्यधिकारोवेदितव्यः।यदितऊर्द्ध्वमनुक्रमिष्यामःकारकइत्येवंवेदितव्यं
कारकशब्दस्यनिमित्तपर्यायः।कारकान्निमित्तंहेतुरित्यनर्थांतरं।कस्यहेतुःक्रियायाःइतिवक्ष्यति।ध्रुवमपायेपादानम्।ग्रामादागच्छ
ति।पर्वतादवरोहति।कारकइतिकिं।वृक्षस्यपर्णोपतति।कुंडपस्यपिंडः पतति।अकथितंचकारकंकर्मसंज्ञंभवति।।माणवकंपं
थानंपृच्छतिकारकइतिकिं।माणवकस्यपितरंपंथानंपृच्छतीति।कारकसंशब्देनेतुचान्येनविशेषणेनव्यवहारोवेदितव्यः २३।
ध्रुवमपायेपादानम्। ध्रुवंपदमपायुक्ते।अपायेसाध्येपरवधिभूतंतत्कारकमपादानसंज्ञंभवति।ग्रामादागच्छति।पर्वतादवरोहति
सार्थाद्धीनः स्यात्पतति।जुगुप्साविरामप्रमादार्थानामुपसंख्यानं।अधर्माज्जुगुप्सते।अधर्माद्विरमति।धर्मात्प्रमाद्यति।अपादानप्र
देशाः।अपादानेपंचमीत्येवमादयः।।२४। भीत्रार्थानांभयहेतुः। बिभेत्यर्थानांधातूनांप्रयोगेत्रायत्यर्थानांचभयहेतुर्यत्कारक
मपादानसंज्ञंभवति।चौरेभ्योबिभेति। चौरेभ्यउद्विजते।त्रायत्यर्थानां।चौरेभ्यस्त्रायते।चौरेभ्योरक्षति।भयहेतुरितिकिं।अरण्ये
बिभेति अरण्येत्रायते।२५। पराजेरसोढः। पराजयस्यजयने।प्रयोगेअसोढोयोर्थःसोढुंनशक्यतेतत्कारकमपादानसंज्ञंभवति
अध्ययनेसोढुंनस्यइत्यर्थः।असोढइतिकिं।शत्रून्पराजयते।२६। वारणार्थानामीप्सितः। वारणार्थानांधातूनांप्रयोगेइप्सितोयो
र्थस्तत्कारकमपादानसंज्ञंभवति।प्रवृत्तिविघातो।वरणं।यवेभ्यगाः।वारयति।इप्सितइतिकिं।यवेभ्योगांरक्षतिक्षेत्रे २७। अंत
र्द्धौयेनादर्शनमिच्छति। व्यवधानमंतर्द्धिः।अंतर्द्धिनिमित्तंयेनादर्शनमात्मानइच्छतितत्कारकमपादानसंज्ञंभवति।उपाध्यायादंतर्द्ध
त्ते।उपाध्यायान्निलीयते।मासौउपाध्यायोमांद्राक्षीदितिनिलीयते।अंतर्द्धाविति किं चौरान्नदिदृक्षते।इच्छतिग्रहणंकिं।अदर्शने
छायांसत्यांसत्यपिदर्शनेयथास्यात्।२८। आख्यातोपयोगे। आख्याताप्रतिपादयिता।उपयोगेइतिकिंनियमपूर्वकविद्याग्रहणं
उपयोगेसाध्येआख्यातायस्तत्कारकमपादानसंज्ञंभवति।उपाध्यायादधीते।उपाध्यायादागमयति।उपयोगइतिकिं।नटस्यशृणोति
ग्रंथिकस्यशृणोति २९। जनिकर्तुःप्रकृतिः। जनेःकर्ताजनिकर्ता।जन्यर्थस्यजन्मनःकर्ताजायमानस्तस्ययाप्रकृतिःकारणं
हेतुस्तत्कारकमपादानसंज्ञंभवति।।शृंगाच्छरोजायते।गोमयाद्वृश्चिकोजायते ३०। भुवःप्रभवः। कर्तुरितिवर्ततेभवनंभूःप्रभ

यस्तस्मादिति प्रभवः। प्रकृतुः प्रथमयोयस्तत्कारकमपादानसंज्ञं भवति। हिमवतो गंगा प्रभवति। कास्मीरेभ्यो वितस्ता प्रभवति। प्रथ
मत उपलभ्यत इत्यर्थः॥ ३१॥ कर्म्मणा यमभिप्रैति स संप्रदानं॥ कर्म्मणा करणभूतेन यमर्थमभिप्रैति तत्कारकं संप्रदानसंज्ञं भवति।
अन्वर्थसंज्ञाविज्ञानात्। ददातिकर्म्मणेति विज्ञायते। उपाध्यायाय गां ददाति। माणवकाय भिक्षां ददाति। क्रियाग्रहणमपि कर्त्तव्यं क्रिय
मायमभिप्रैति संप्रदानमिति। श्राद्धाय निगर्हते। युद्धाय संनह्यते। पत्ये शेते। संप्रदानप्रदेशाः। चतुर्थी संप्रदाने इत्येवमादयः। कर्म्मणः करण
संज्ञा वक्तव्या संप्रदानस्य च कर्मसंज्ञा। पशुना रुद्रं यजते। पशुं रुद्राय ददातीत्यर्थः॥ ३२॥ रुच्यर्थानां प्रीयमाणः॥ रुचिना समानार्था रुच्यर्थाः
अन्यकर्तृकोऽभिलाषो रुचिः। रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणो योऽर्थस्तत्कारकं संप्रदानसंज्ञं भवति। देवदत्ताय रोचते मोदकः। यज्ञ
दत्ताय स्वदते मोदकः। देवदत्तस्य स्याभिलाषस्याभिलाषस्य मोदकः कर्ता। प्रीयमाण इति किं। देवदत्ताय रोचते मोदकः पथि॥ ३३॥ श्ला
घह्नुङ्स्थाशपां ज्ञीप्स्यमानः॥ श्लाघह्नुङ्स्थाशप इत्येतेषां ज्ञीप्स्यमानो योऽर्थस्तत्कारकं संप्रदानसंज्ञं भवति। ज्ञीप्स्यमानो ज्ञपयितु
मिष्यमाणो बोधयितुमभिप्रेतः। देवदत्ताय श्लाघते देवदत्तः श्लाघमानस्तां श्लाघां तमेव ज्ञपयितुमिच्छतीत्यर्थः। एवं देवदत्ताय ह्नुते।
स्थायदेवदत्ताय तिष्ठते। यज्ञदत्ताय तिष्ठते। देवदत्ताय शपते। यज्ञदत्ताय शपते। ज्ञीप्स्यमान इति किं। देवदत्ताय श्लाघते पथि॥ ३४॥
धारेरुत्तमर्णः॥ धारयतेः प्रयोगे उत्तमर्णो योऽर्थस्तत्कारकं संप्रदानसंज्ञं भवति। उत्तममृणं यस्य स उत्तमर्णः। कस्य चोत्तमर्
णं। यदीयं धनं धनस्वामी प्रयोक्ता उत्तमर्णः संप्रदानसंज्ञो भवति। देवदत्ताय शतं धारयति। यज्ञदत्ताय सहस्रं धारयति। उत्तमर्ण इति किं।
देवदत्ताय शतं धारयति ग्रामे॥ ३५॥ स्पृहेरीप्सितः॥ स्पृह ईप्सायां चुरादावदन्तः पठ्यते। स्पृहयतेः प्रयोगे ईप्सितो योऽर्थस्तत्कारकं संप्रदानसंज्ञं
भवति। ईप्सित इत्यभिप्रेत उच्यते। पुष्पेभ्यः स्पृहयति। फलेभ्यः स्पृहयति। ईप्सित इति किं। पुष्पेभ्यः स्पृहयति वने॥ ३६॥ क्रुधद्रुहेर्ष्यासू
यार्थानां यं प्रति कोपः॥ अमर्षः क्रोधः। अपकारो द्रोहः। अक्षमा ईर्ष्या। गुणेषु दोषाविष्करणमसूया। क्रुधाद्यर्थानां धातूनां प्रयोगे यं प्रति को
पस्तत्कारकं संप्रदानसंज्ञं भवति। क्रोधस्तावत् कोप एव। द्रोहादयोऽपि कोपप्रभावा एव गृह्यन्ते। तस्मात् सामान्येन विशेषणं यं प्रति कोप इति।
देवदत्ताय क्रुध्यति। देवदत्ताय द्रुह्यति। देवदत्तायेर्ष्यति। देवदत्तायासूयति। यं प्रति कोप इति किं। भार्यामीर्ष्यति। मैनामन्योऽद्राक्षीदिति- २६

॥ ३७॥ क्रुधद्रुहोरुपसृष्टयोः कर्म॥ पूर्वेण संप्रदानसंज्ञायां प्राप्तायां कर्मसंज्ञा विधीयते। क्रुधद्रुहोरुपसृष्टयोरुपसर्गसंबद्धयोः यं प्रति
कोपस्तत्कारकं कर्मसंज्ञं भवति। देवदत्तमभिक्रुध्यति। देवदत्तमभिद्रुह्यति। उपसृष्टयोरिति किं। देवदत्ताय क्रुध्यति। देवदत्ताय द्रुह्यति॥ ३८॥ रा
धीक्ष्योर्यस्य विप्रश्नः॥ राधेरीक्षेश्च कारकं संप्रदानसंज्ञं भवति। कीदृशं। यस्य विप्रश्नः। विविधः प्रश्नो विप्रश्नः। स कस्य भवति। यत्संब
धि शुभाशुभं पृच्छ्यते। देवदत्ताय राध्यति। देवदत्ताय राध्यति। देवदत्तायेक्षते। नैमित्तिकः पृष्टः सन् देवदत्तस्य दैवं पर्य्यालोचयतीत्यर्थः
॥ ३९॥ प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता॥ प्रत्याङ्पूर्वस्य शृणोतेः कारकं संप्रदानसंज्ञं भवति। कीदृशं। पूर्वस्य कर्ता। पूर्वस्याः क्रियायाः क
र्ता संप्रदानसंज्ञो भवति। देवदत्ताय गां प्रतिशृणोति। देवदत्ताय गामाशृणोति। प्रतिजानीत इत्यर्थः॥ ४०॥ अनुप्रतिगृणश्च॥ पूर्वस्य कर्तेति
वर्तते। अनुप्रतिपूर्वस्य गृणातेः कारकं पूर्वस्याः क्रियायाः कर्तृभूतं संप्रदानसंज्ञं भवति। होत्रेऽनुगृणाति। होता प्रथमं शंसति तमन्यः प्रो
त्साहयति। अनुगरः प्रतिगर इति हि शंसितुः प्रोत्साहने। मुच्यते। होत्रेऽनुगृणाति। होतारं शंसन्तं प्रोत्साहयतीत्यर्थः॥ ४१॥ साधकतमं क
रणं॥ क्रियासिद्धौ यत्प्रकृष्टोपकारकत्वेन विवक्षितं तत्साधकतमं करणसंज्ञं भवति। दात्रेण लुनाति। परशुना छिनत्ति। तमब्ग्रहणं किं। गंगा
यां चकारात्करणसंज्ञं च। अक्षान्दीव्यति। चकारात्करणं। अक्षैर्दीव्यति॥ ४२॥ परिक्रयणे संप्रदानमन्यतरस्यां॥ साधकतममिति वर्तते इ
देण करणसंज्ञायां प्राप्तायां संप्रदानसंज्ञा विधीयते। परिक्रयणे यत्साधकतमं कारकं तदन्यतरस्यां संप्रदानसंज्ञं भवति। परिक्रयणं वे
तनादिना नियतकालं स्वीकरणं। नात्यन्तिकः क्रय एव। शताय परिक्रीतोऽनुब्रूहि। शतेन परिक्रीतोऽनुब्रूहि। सहस्राय परिक्रीतोऽनुब्रूहि। सहस्रे
ण परिक्रीतोऽनुब्रूहि॥ ४४॥ आधारोऽधिकरणं॥ अधियन्ते यस्मिन् क्रिया इत्याधारः। कर्तृकर्मणोः क्रियाश्रयभूतयोर्धारणात् क्रियां प्रति य
आधारस्तत्कारकमधिकरणसंज्ञं भवति। कटे आस्ते। शकटे आस्ते। स्थाल्यामोदनं पचति। अधिकरणप्रदेशाः। सप्तम्यधिकरणे चेत्येवमादयः
॥ ४५॥ अधिशीङ्स्थासां कर्म॥ पूर्वेणाधिकरणसंज्ञायां प्राप्तायां कर्मसंज्ञा विधीयते। अधिपूर्वाणां शीङ्स्थाआसां इत्येषामाधारो यत्कारकं
कर्मसंज्ञं भवति। ग्राममधिशेते। ग्राममधितिष्ठति। ग्राममध्यास्ते॥ ४६॥ अभिनिविशश्च॥ अभिनिवि शतेराधारो यस्तत्कारकं कर्मसंज्ञं
भवति। ग्राममभिनिविशते। पर्वतमभिनिविशते। कथं कल्याणेऽभिनिवेशः। यथासंख्यया यस्मिन् यस्मिन्नभिनिविशते इति। अन्यतर
स्यामिति वर्तते। परिक्रयणे संप्रदानमन्यतरस्यामित्यतः सा च व्यवस्थितविभाषा विज्ञायते॥ ४७॥ उपान्वध्याङ्वसः॥ उप अनु अधि

आङः इत्येवं पूर्वस्य वसतेराधारो यस्तत्कारकं कर्मसंज्ञं भवति। ग्राममुपवसति। सेनामनुवसति। ग्राममधिवसति। ग्राममावसति। वसेरस्यार्थस्य प्रतिषेधो वक्तव्यः। ग्रामे उपवसति। भोजननिवृत्तिं करोतीत्यर्थः॥४८॥ कर्तुरीप्सिततमं कर्म॥ कर्तुः क्रियया यदाप्तुमिष्टतमं तत्कारकं कर्मसंज्ञं भवति। कटं करोति। ओदनं पचति। ग्रामं गच्छति। कर्तरीति किं। माषेष्वश्वं बध्नाति। कर्मण ईप्सिता माषा न कर्तुः। तमग्रहणं किं। पयसा ओदनं भुंक्ते। कर्म इत्यनुवर्तमाने पुनः कर्मग्रहणमाधारनिवृत्त्यर्थं। इतरथा। आधारस्यैव हि स्यात्। गेहं प्रविशतीति। सक्तून्पिबति। ओदनं पचतीत्येवमादिषु न स्यात्पुनः। कर्मग्रहणात्सर्वं आसिद्धं भवति। कर्मप्रदेशाः। कर्मणि द्वितीयेत्येवमादयः॥४९॥ तथायुक्तं चानीप्सितम्॥ येन प्रकारेण कर्तुरीप्सितं क्रियया युज्यते तेनैव प्रकारेण तदनीप्सितमपि युक्तं भवति। तस्य कर्मसंज्ञा विधीयते इप्सितं सर्वमनीप्सितम्। द्वेष्यमितरच। विषं भक्षयति। चौरान्पश्यति। ग्रामं गच्छन्वृक्षमूलान्युपसर्पति॥५०॥ अकथितं च॥ अकथितं च यत्कारकं तत्कर्मसंज्ञं भवति। केनाकथितं पादानादिभिर्विशेषकथाभिः। परिगणनं कर्तव्यं। दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ ब्रुविशासिगुणेन च यत्सचते तदकीर्तितमाचरितं कविना। उपयुज्यत इत्युपयोगः पयःप्रभृतिस्तस्य निमित्तं गवादिस्तस्योपयुज्यमानपयःप्रभृतिनिमित्तस्य गवादेः कर्मसंज्ञा विधीयते। पाणिनां। कांश्यपात्र्यां गां दोग्धि पय इति। पात्र्यादिकमप्युपयोगनिमित्तं तस्य कस्मान्न भवति। नैतद्भक्तिविहिता तत्र करणादिसंज्ञा तदर्थमाह। अपूर्वविधाविति। ब्रुविशासिगुणेन च यत्सचते तदकीर्तितमाचरितं कविनाब्रुविशास्योर्गुणः। ब्रुविशासिगुणः क्रियासाधनं प्रधानं कर्म धर्मादिकं। तेन च यत्सचते यत्संबध्यते तदकथितमुक्तं सत्कारेण। दुहि। गां दोग्धि पयः। याचि। पौरवं गां याचते। रुधि। गामवरुणद्धि व्रजं। प्रच्छि माणवकं पंथानं पृच्छति। भिक्षि। पौरवं गां भिक्षते। चिञ्। वृक्षमवचिनोति फलानि। ब्रुवि। माणवकं धर्मं ब्रूते। शासि माणवकं धर्ममनुशास्ति॥५१॥ गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ॥ अर्थशब्दः प्रत्येकमभिसंबध्यते। गत्यर्थानां बुध्यर्थानां प्रत्यवसानार्थानां च धातूनां। तथा शब्दकर्मकाणामकर्मकाणां चाण्यन्तानां यः कर्ता स ण्यन्तानां कर्मसंज्ञो भवति। गच्छति माणवको ग्रामं। गमयति माणवकं ग्रामं। याति माणवको ग्रामं। यापयति माणवकं ग्रामं। गत्यर्थेषु नीवह्योः प्रतिषेधो वक्तव्यः। नयति भारं देवदत्तः। नाययति भारं देवदत्तेन। वहति भारं देवदत्तः। वाहयति भारं देवदत्तेन। वहेरनियंतृकर्तृकस्येति वक्तव्यं। इह प्रतिषेधो मा भूत्। वहंति यवान्बलीवर्दाः। वाहयति यवान्बलीवर्दान्। इति गत्यर्थाः। बुध्यते माणवको धर्मं। बोधयति माणवकं धर्मं। वेत्ति माणवको धर्मं। वेदयति माणवकं धर्मं। बुध्यर्थाः। प्रत्यवसानमभ्यवहारः। भुंक्ते माणवकः ओदनं। भोजयति माणवकमोदनं। अश्नाति माणवक ओदनं। आदिखाद्योः प्रतिषेधो वक्तव्यः।

अत्ति माणवक ओदनं। आदयति माणवकेनौदनं। खादति माणवकः। खादयति माणवकेन। भक्षेरहिंसार्थस्य प्रतिषेधो वक्तव्यः। भक्षयति पिंडीं देवदत्तः। भक्षयति पिंडीं देवदत्तेन। अहिंसार्थस्येति किं। भक्षयंति बलीवर्दाः सस्यं। भक्षयति बलीवर्दान्सस्यं इति॥ प्रत्यवसानार्थाः। अधीते माणवको वेदं। अध्यापयति माणवकं वेदम्। पठति माणवको वेदं। पाठयति माणवकं वेदं इति। शब्दकर्मकाणां। अकर्मकाणां। आस्ते देवदत्तः। आसयति देवदत्तं शेते देवदत्तः। शाययति देवदत्तम्। एषामिति किम्। पचत्योदनं देवदत्तः। पाचयत्योदनं देवदत्तेन। अण्यंतानामिति किं। गमयति देवदत्तो यज्ञदत्तम्। तमपरः प्रयुंक्ते गमयति देवदत्तेन यज्ञदत्तं विष्णुमित्रः। हृक्रोरन्यतरस्यां। अणिकर्ता सणाविति वर्तते। हरतेः करोतेश्चाण्यंतयोर्यः कर्ता स ण्यंतयोरन्यतरस्यां कर्मसंज्ञो भवति। हरति भारं माणवकः। हारयति भारं माणवकं माणवकेनेति वा। करोति कटं देवदत्तः। कारयति कटं देवदत्तं देवदत्तेनेति वा। अभिवादिदृशोरात्मनेपदे उपसंख्यानं। दृशः। अभिवदति गुरुं देवदत्तः। अभिवादयते गुरुं देवदत्तं देवदत्तेनेति वा। पश्यंति भृत्या राजानं। दर्शयते भृत्यान्राजानं भृत्यैरिति वा। आत्मनेपद इति किं। दर्शयति चैत्रं मैत्रमपरः। प्राप्तविकल्पत्वाद्द्वितीयैव। अभिवादयति गुरुं माणवकेन पिता। अप्राप्तविकल्पत्वात्तृतीयैव॥५३॥ स्वतंत्रः कर्ता॥ स्वातंत्र्य इति प्राधान्यभूत उच्यते अगुणभूतो यः क्रियाप्रसिद्धौ स्वातंत्र्येण विवक्षितोर्थः तत्कारकं कर्तृसंज्ञं भवति। देवदत्तः पचति। स्थाली पचति। कर्तृप्रदेशाः। कर्तृकरणयोस्तृतीयेत्येवमादयः॥५४॥ तत्प्रयोजको हेतुश्च॥ कर्तेति संबध्यते। तस्य प्रयोजकस्तत्प्रयोजको निपातात्समासः। स्वतंत्रस्य प्रयोजको योऽर्थः तत्कारकं हेतुसंज्ञं भवति। चकारात्कर्तृसंज्ञश्च। कर्तृसंज्ञासमावेशार्थश्चकारः। कुर्वाणं प्रयुंक्ते कारयति हारयति। हेतुमति चेत्येवमादयः॥५५॥ प्राग्रीश्वरान्निपाताः॥ अधिरीश्वर इति वक्ष्यते। प्रागेतस्मादवधेर्यानित ऊर्ध्वमनुक्रमिष्यामः निपातसंज्ञास्ते वेदितव्याः। वक्षति। चादयोऽसत्त्वे। च। वा। ह। अह। प्राग्वचनं संज्ञासमावेशार्थं। गत्युपसर्गकर्मप्रवचनीयसंज्ञाभिः सह निपातसंज्ञा समाविशति। रेफोच्चारणमीश्वरे तोसुन्कसुनौ विषयमवधिमा विज्ञायीति। रीश्वराद्बीश्वरान्मा भूत् कृन्मेजंतः। परोपि सः समासेष्वव्ययीभावो लौकिकं चातियतने॥५६॥ चादयोऽसत्त्वे॥ चादयो निपातसंज्ञा भवंति न चेत्सत्त्वे वर्तन्ते। प्रसत्त्वप्रतिषेधो यां। सत्त्वमिति च द्रव्यमुच्यते। च। वा। ह। अह। एव। एवम्। नूनम्। शश्वत्। युगपत्। भूयस्। नेत्। चेत्। चन्। कच्चित्। यत्र। नह। हंत। माकिम्। नकिम्। माङ्। मङोङः प्रयोगविशेषणार्थः। मङ्ङ लुङि ति ह्रस्वो भवति। माभवतु। माकरिष्यति। नञ्। यावत्। तावत्। त्वै। द्वै। श्रौषट्। वौषट्। वषट्। स्वाहा।

स्वधा। ओंम्। तथाहि। खलु। किल अथो। अथ। अधम्। स्मस्मी। अ। इ। उ। ऋ। ऌ। ए। ऐ। ओ। ऊन्। उस्सहल। आतंक। वेलायां। मात्रा
याम्। मात्रायाम्। पाथा। तथा। किम्। यत्। तत्। पुरापिकाविकृ। हाहा। हेहै। प्राय। प्यट। अहो। उताहो। हौ। अथो। नौ। ननु। नन्वे। नहि।
अस्ति। अहि। नु। नु इति। इव। वत। घट्घट्। यायाता अम्। आम्। शम्। शाश्रीकम्। समहिको। हिरुक्। उकन्। अनुकम्। उकम्। नहिकन्।
सलम्। सततम्। इव। अहो। मुधा। वत्। नोचेत्। नहि। जातु। कथं। कुतः। क्व। अंतः। हाहौ। हेहा। हहो। आहोस्वित्। संवत्। संवत्। धो। दिष्ट्या।
पशु। कट्। सह। अनु। षक्। अगलुक्। जातक। नाजक। अपो। अरो। अलवट्। वेट्। वाट्। कुम्। कुम्। रघुम्। शेषित्। नव्या। इन्। कान्। शनि
सीम। वै। उपसर्गाविभक्तिस्वरप्रतिरूपकाश्च निपाताः। उपसर्गप्रतिरूपकाः। अवदत्तं विदत्तं चमदत्तं वाहि कर्मणी। निदनमनुदत्तं चसुदत्तं
चसुदत्तमपिवेष्यत। अथ उपसर्गातिइति तत्वं न भवति। दुर्नीतिम्। दुर्नयः। उपसर्गादिति णत्वं न भवति। असत्व इति किम्। क्रियायोगे इ
ति। अथ प्रादीनां स्वभावादेव क्रियायोग इति से स्यति। संज्ञा वंश्यन्यथा। उपसृज्यंत इति उपसर्गाः। प्रादयो हि अप्रयुज्यमाना क्रियामाक्षि
पति। यथा। अतिमाल इति। इह अप्रयुज्यमान क्रांत इति क्रियामस्या क्षिप्यते अप्रयुज्यमानानां नामेव विशेषक्रियायोग इति न भपति परि, संबंधे
इरंनेति वाच्यां तेषां संबंधाभावात्। न चानिमात्रत्ती तिवाच्यं क्रांत इत्येन यासंबंधात्। नियमार्थं तत्। यथा प्रायो यया क्रियाया संबंध्यत्
सति किमर्थं इत्याह यमेव प्रतिदे उपसर्गाः। ननु क्रियां त्वं युति तेन प्रगतो नायको ऽस्मादिति प्रनायकः। इत्यादौ णत्वं नाशीयया संबं
धः स प्राप्रयुज्यमानायया हि संबंधनानंतर संबद्ध इति उपसर्गाः। क्रियायोग इति वादिना मुपसर्ग सर्गसंज्ञामाभूत्। असत्व इत्येवापश
सेनापशु वेपुरतः पशुः पुरोडोशः स्वरादि निपातमव्ययमित्येव मादयः॥ ५७ प्रादयः॥ प्रादयोसत्वे निपातसंज्ञा भवति। प्र। परा। अप।
सम्। अनु। अव। निर्। दुर्। वि। आङ्। नि। अधि। अपि। अति। सु। उत्। अभि। प्रति। परि। उप। पृथग्योगकरणमुत्तरसंज्ञा विशेषार्थम्।
उपसर्गाः। क्रियायोगे प्रादयः क्रियायोगे उपसर्गसंज्ञा भवंति। प्रणयति। परिणयति। प्रणायकः। परिणायकः। क्रियायोग इति किं।
प्रगतो नायको ऽस्माद्देशात् प्रनायको देशः। मरुच्छब्दस्यो पसंख्यान्। मरुद्भिः दत्तो मरुत्तः। संज्ञाविधानसामर्थ्यादिन्य अन्त लोपि अथ उप
सर्गात् इति त्वं भवति। श्रत् शब्दस्योपसंख्यानम्। तत अत श्रोपसर्गा इत्वं भवति। श्रद्धा। उपसर्गप्रदेशाः उपसर्गे घोः किरित्येव
मादयः॥ ५९॥ गतिश्च॥ गतिसंज्ञकाश्च प्रादयो भवंति क्रियायोगे प्रकृत्य प्रकृतम्। यत्प्रकरोति। योग उत्तरार्थः। उत्तरत्र गतिसंज्ञैव
यथा स्यात्। उपसर्गसंज्ञामाभूत्। ऊरिस्यादिषु त्रोपसर्गप्रादुर्भ्यामस्तिर्यच्चर इति षत्वं प्रसज्येत। चकारः संज्ञासमावेशार्थः। प्राणि

तम्। अभिषिक्तं। गतिर्ननंतर इति स्वरः। उपसर्गादिति षत्व णत्वे भवतः। कारिकाशब्दस्योपसंख्यानं। कारिकाकृत्य। कारिकाकृ
तम्। यत्कारिकाकरोति। पुनश्चनसौ छंदसि गतिसंज्ञौ भवत इति वक्तव्यं। पुनरुत्सृत्य। वासौ देयम्। गति गताविति निघातो भवति।
चनोहितः। गतिरनंतर इति स्वरः गतिप्रदेशाः कुगतिप्रादय। ऊर्यादि च्विडाचश्च ऊर्यादयः। शब्दाश्च्व्यंता डाजंताश्च क्रियायोगे ग
तिसंज्ञा भवंति। च्विडाचोः कृभ्वस्ति योगे विनानंतत्वाद् ऊर्यादीनामपि तैरेव योगे गतिसंज्ञा विज्ञायते। ऊरी उररी शब्दावंगीकरणे
विस्तारे च। ऊरीकृत्य। ऊरीकृतम्। यदूरीकरोति यदूरीकृतं। एवं उररीकृत्य पापि। ताली। वेताली। धुरी। शकलासंशकलाः ध्वंसकल
भ्रंजकल। एते शकलादयो हिंसायां। शकलाकृत्य संशकलाकृत्य ध्वंसकलाकृत्य भ्रंसकलाकृत्य गुलुगुधा पीडार्थे। गुलुगुधाकृत्य। सजूः
सहार्थे सजूःकृत्य। फलु। फली। विक्ली। अक्ली। इति विकारे। फलूकृत्य। फलीकृत्य अक्लीकृत्य। आसीकृत्य। आलाष्टि। केवासी। केवाली।
शेवाली। पिप्पाली। सेवाली। निषाली दीर्घा। वस्मशा। मसमसा। एते हिंसायाम्। श्रोषट्। वौषट्। वषट्। स्वाहा। स्वधा। प्रादुस्। श्रत्। अविस्। ध्वंताः
स्वच्चपि। शुकीकृत्य। शुकीकृतं। यच्छुक्लीकरोति। डाचः पटपटाकृत्य। नेदपटपटाकृतम्। यत्पटपटाकरोति हि अनुकरणं च्चानिति परंतुका
करोति इति परनिमित्तिकिं वादिति कृत्वा निरष्ठीवत्॥ ६२॥ आदरानादरयोः॥ सदसति। प्रीतिसंज्ञा आदरः। परिभव औदासीन्यमनादरः
अदरनं सदसत्श्च शब्दौ गतिसंज्ञौ भवतः। इति परो यस्मात्। इति नहु आदिः। अनुकरणमनीति परं क्रियायोगे गतिसंज्ञं भवति। स्या हु
स्या कृतं यत्संकृत्य। सत्कृतम्। यत्सत्करोति। असत्कृत्य। असत्कृतम्। यदसत्करोति। आदरानादरयोरिति किं। सत्कृत्वा कांडं गतः॥ ६३
भूषणेऽलम्॥ अलमिति प्रतिषेधे सामर्थ्ये निपातो भूषणे चेति विशेषणमुपादीयते। भूषणेपी अलंशब्दः स गतिसंज्ञो भवति। अलंकृत्य
अलंकृतम्। यदलंकरोति। भूषण इति किं। अलंभुक्त्वा ओदनं गतः॥ ६४॥ अंतरपरिग्रहे॥ अंतः शब्दो ऽपरिग्रहे ऽर्थे गतिसंज्ञो भवति नपरि
ग्रहः। स्वीकरणं तदभावे गतिसंज्ञा विधीयते। अंतर्हत्य। अंतर्हतं। यदंतर्हंति। अपरिग्रह इति किं। अंतर्हत्वा मूषिकां श्येनो गतः परिगृह्य
गतः इत्यर्थः। अंतः शब्दस्याङ्कि विधिणत्वेषु पसर्गसंज्ञा वक्तव्या। अंतर्धा। अंतर्धिः। अंतर्णयति॥ ६५॥ कणेमनसी श्रद्धाप्रतीघाते॥
कर्णशब्दो मनः शब्दश्च श्रद्धाप्रतिघाते गतिसंज्ञौ भवतः। कणेहत्य पयः पिबति। मनोहत्य पयः पिबति। तावत्पिबति यावदभिला
षो निवृत्तः। श्रद्धा प्रलोभेसर्थः श्रद्धाप्रतीघात इति किं। कणेहत्वा गतः मनोहत्वा गतः॥ ६६॥ पुरोऽव्ययम्॥ अति प्रसयांतः पुरः शब्दोप

यंगतिसंज्ञंभवति। समासस्वरोपाचारः। प्रयोजनं। पुरस्कृत्य पुरस्कृतं। पुरस्करोति। अव्ययमितिकिं। पूः पुरः कृत्वा गतः। ६७।
अस्तं च। अस्तंशब्दो मकारान्तोऽव्ययमनुपलब्धौ वर्तते। स गतिसंज्ञो भवति। अस्तंगत्य। सविता पुनरुदेति। अस्तंगतानि धनानि। यस्तं
गच्छति अव्ययमित्येव अस्तं काण्डं गतः क्षिप्रं निपर्यः। ६८। अच्छ गत्यर्थवदेषु। अच्छशब्दोऽव्ययमभिशब्दस्यार्थे
वर्तते। स गत्यर्थेषु धातुषु वदतौ च गतिसंज्ञो भवति। अच्छगत्य। अच्छगतं। यदच्छ गच्छति। वदतौ। अच्छोद्य। अच्छोद्यं यदच्छ वदति।
अव्ययमित्येव उदकम् अच्छं गत्वा। ६९। अदोऽनुपदेशे। अदस्शब्दस्त्यदादिषु पठ्यते। सोऽनुपदेशे गतिसंज्ञो भवति। उपदेशः परार्थः। स्व
यमेव तु यदा बुद्ध्या परामृशति तदा नानुपदेश इति सोऽस्य विषयः। अदःकृत्य। अदःकृतम्। यददः करोति। अनुपदेश इति किं। अदः कृ
त्वा काण्डं गतः इति परस्य कथयति। ७०। तिरोऽन्तर्धौ। अन्तर्धिर्व्यवधानं। अत्र तिरः शब्दो गतिसंज्ञो भवति। तिरोभूय। तिरोभूतं। यत्तिरोभव
ति। अन्तर्धाविति किम्। तिरो भूत्वा पार्श्वतो भूत्वेत्यर्थः। ७१। विभाषा कृञि। अन्तर्धाविति वर्तते। कृञि विषये तिरः शब्दः करो
तौ परतः विभाषा गतिसंज्ञो भवति तिरस्कृत्य। यत्तिरस्करोति। अन्तर्धावित्येव तिरस्कृत्वा काण्डं तिष्ठति। ७२। उपाजेऽन्वाजे। उपाजे
इत्येतावन्वाजे शब्दौ विभक्तिप्रतिरूपकौ निपातौ दुर्बलस्य सामर्थ्याधाने वर्तेते तौ कृञि विभाषा गतिसंज्ञौ भवतः। उपाजेकृत्य। उपाजे
कृत्वा। अन्वाजेकृत्य। अन्वाजे कृत्वा तिष्ठति। ७३। साक्षात्प्रभृतीनि च। विभाषा कृञीति वर्तते। साक्षात्प्रभृतीनि शब्दरूपाणि विभाषा कृ
ञि गतिसंज्ञानि भवन्ति। साक्षात्प्रभृतिषु च्व्यर्थवचनं। साक्षात्कृत्य। साक्षात्कृत्वा। मिथ्याकृत्य मिथ्याकृत्वा। साक्षात्। मन्तव्यं विभाषा। संनत्का। अर्थे
लवणं। उष्णं। शीतम्। उदकम्। आर्द्रम्। गतिसंज्ञासंनियोगेन लवणादीनां मकारान्तत्वं निपात्यते। अग्नौ वशे। विकसने। प्रतपने। प्रहसने।
विहसने। प्रादुस्। आविस्। नमस्। ७४। अनत्याधान उरसिमनसी। विभाषा कृञीति वर्तते। अत्याधानमुपश्लेषणं तदभावे अनत्या
धाने उरसिमनसि शब्दौ विभाषा कृञि गतिसंज्ञौ भवतः। उरसिकृत्य। उरसिकृत्वा। मनसिकृत्य। अनत्याधान इति किं। उरसि कृत्वा पाणिं शेते। ७५।
मध्ये पदे निवचने च। विभाषा कृञीत्यनुवर्तते। चकाराद् अनत्याधान इति च। मध्ये पदे निवचने इत्येते शब्दाः अनत्याधाने विभाषा कृञि गति
संज्ञा भवन्ति। मध्येकृत्य। मध्येकृत्वा। पदेकृत्य। पदेकृत्वा। निवचनं वचनाभावः। निवचनेकृत्य। निवचनेकृत्वा। वाचं नियम्येत्यर्थः। अनत्या
धान इत्येव। हस्तिनः पदे कृत्वा शिरः शेते। ७६। नित्यं हस्ते पाणावुपयमने। हस्ते पाणौ इत्येतौ शब्दौ कृञि नित्यं गतिसंज्ञौ भवतः। उपयमने। उपयमनं
दारकर्म। हस्तेकृत्य। पाणौकृत्य। दारकर्म कृत्वेत्यर्थः। उपयमन इति किं। हस्ते कृत्वा कार्षापणं गतः। ७७। प्राध्वं बन्धने। कृञीति वर्तते। २९

प्राध्वमिति मकारान्तमव्ययमानुकूल्ये वर्तते। यदानुकूल्यं बन्धनहेतुकं भवति तदा प्राध्वं शब्दः कृञि नित्यं गतिसंज्ञो भवति। जीवि
कोपनिषदावौपम्ये। जीविका उपनिषद् इत्येतौ शब्दौ औपम्ये विषये कृञि नित्यं गतिसंज्ञौ भवतः। जीविकाकृत्य। उपनिषत्कृत्य। औपम्य इति किं। जीविकां कृत्वा
गतः। ७९। ते प्राग्धातोः। ये गत्युपसर्गसंज्ञकाः प्राक् पूर्वं धातोः। प्रयोक्तव्याः। तथैवोदाहृताः। ते ग्रहणमुपसर्गार्थं। गतयो ह्यनन्तराः
॥८०। छन्दसि परेऽपि। प्राक्प्रयोगे प्राप्ते छन्दसि परेऽप्यनुज्ञायते। छन्दसि विषये गत्युपसर्गसंज्ञकाः। पूर्वे परेऽपि प्रयोक्तव्याः। न च प
दे गते तेषामयुज्यमानानां संज्ञाकार्यं किंचिदस्ति। केवलं तु परप्रयोगे क्रियायोगो गम्यमानः इति ज्ञाप्यते। याति नि हस्तिना। नियाति हस्ति
ना। हन्ति निमुष्टिना। निहन्ति मुष्टिना। ८१। व्यवहिताश्च। गत्युपसर्गसंज्ञकाः छन्दसि व्यवहिता दृश्यन्ते। आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोम
भिः। आयाहि। ८२। कर्मप्रवचनीयाः। इत्यधिकारोऽयं दितव्यः। यानित ऊर्ध्वमनुक्रमिष्यामः। कर्मप्रवचनीयाः संज्ञा
स्ते वेदितव्याः। आ रीश्वरादिति यावत्। वक्ष्यति। अनुर्लक्षणे। शाकल्यस्य संहितामनु प्रावर्षत्। कर्मप्रवचनीयप्रदेशाः। कर्मप्र
वचनीययुक्ते द्वितीयेत्येवमादयः। ८३। अनुर्लक्षणे। अनुशब्दो लक्षणे द्योत्ये कर्मप्रवचनीयसंज्ञो भवति। शाकल्यस्य संहितामनु
प्रावर्षत्। अगस्त्यमन्वसिञ्चत्प्रजाः। किमयमिदमुच्यते। यावता लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्य
नव इत्यनेन सिद्धैवानोः कर्मप्रवचनीयसंज्ञा। हेत्वर्थं तु वचनं हेतुतृतीयां बाधित्वा द्वितीयैव यथा स्यात्। ८४। तृतीयार्थे। अनुशब्द
स्तृतीयार्थे द्योत्ये कर्मप्रवचनीयसंज्ञो भवति। नदीमन्ववसिता सेना। पर्वतमन्ववसिता सेना। पर्वतेन सह बद्धेत्यर्थः। ८५। हीने। हीनो न्यू
नः। स उत्कृष्टापेक्षः। तेनेयं हीनोत्कृष्टसम्बन्धे संज्ञा विधीयते। हीने द्योत्येऽनुः कर्मप्रवचनीयसंज्ञो भवति। अन्वर्जुनं योद्धारः। आ
नुशाकटायनं वैयाकरणाः। ८६। उपोऽधिके च। उपशब्दोऽधिके हीने च द्योत्ये कर्मप्रवचनीयसंज्ञो भवति। उप खार्यां द्रोणः। उप निष्के का
र्षापणं। हीने। उप शाकटायनं वैयाकरणाः। ८७। अपपरी वर्जने। अपपरिशब्दौ वर्जने द्योत्ये कर्मप्रवचनीयसंज्ञौ भवतः। प्र
कृतेन सम्बन्धिना कस्यचिदप्राप्तिः संयोगाभावो वर्जनं। अप त्रिगर्तेभ्यो वृष्टो देवः। परि त्रिगर्तेभ्यो वृष्टो देवः। वर्जन इति किम्। ओदनं परिषि
ञ्चति। ८८। आङ्मर्यादावचने। आङित्येष शब्दो मर्यादावचने कर्मप्रवचनीयसंज्ञो भवति। अवधिर्मर्यादा। वचनग्रहणादभिविधिः
परिगृह्यते। आ पाटलिपुत्राद् वृष्टो देवः। आ कुमारं यशः पाणिनेः। आ सांकाश्यात्। आ मथुरायाः। मर्यादावचन इति किं। ईषद

श्रा॰प्र॰ ३० धक्रियायोगयोमभिन्न। ८९ ॥लक्षणेत्थंभूता॥ ख्यानभागविप्सासु प्रतिपर्यनवः। लक्षणेत्थंभूताख्याने भागेवीप्सायां च विषय
भूतायां प्रतिपर्यनव इत्येते कर्मप्रवचनीयसंज्ञा भवंति। लक्षणे तावत्। वृक्षं प्रति विद्योतते विद्युत्। वृक्षं परिवृक्षमनु। इत्थंभूताख्याने
साधुर्देवदत्तो मातरं प्रति। मातरं परि मातरमनु। भागे। यदत्र मां प्रति स्यात्। मां परि। मामनु। वीप्सायां वृक्षं वृक्षं प्रति सिंचति
अनुसिंचति। लक्षणादिष्विति किं। ओदनं परिसिंचति। अथ परिशब्दयोगे। पंचमी कस्मान्न भवति। पञ्चम्यापाङ्परिभिरिति। वर्ज
नविषये सा विधीयते। अपशब्दसाहचर्यात्। ९०॥अभिरभागे॥ लक्षणादिष्वेव भागवर्जितेषु। अभिः कर्मप्रवचनीयसंज्ञो भवति
वृक्षमभियो। द्योतते विद्युत्। साधुर्देवदत्तो मातरमभि। वृक्षमभिसिञ्चति। अभाग इति किं। भागः। स्वीक्रियमाणोंशः यदत्र मामभिष्यात्।
तद्दीयतामित्यर्थः। ९१॥प्रतिः प्रतिनिधि॥ प्रतिदानयोः। मुख्यसदृशः प्रतिनिधिः। दत्तस्य प्रतिनिर्यातनं प्रतिदानं। प्रतिनिधिविषये
प्रतिदानविषये च प्रतिः कर्मप्रवचनीयसंज्ञो भवति। अभिमन्युरर्जुनतः प्रति। हीणेभ्यः। कृष्णो व्यागच्छति। कुतः नस्य गिच्छति। अनर्थ
काववितिलं निस्पृशो तस्य किं विस्यर्थः। कुतः अगच्छतीत्यर्थः। गत्युपसर्गपिछाति ९२॥अधिपरी अनर्थकौ॥ अधिपरिशब्दावनर्थ
कौ अनर्थांतरवाचिनौ कर्मप्रवचनीयसंज्ञौ बाधनाया कर्मप्रवचनीयसंज्ञा विधीयते ९३॥सुः पूजायां॥ सुशब्दः पूजायामर्थे कर्मप्रव
चनीयसंज्ञो भवति। कसिक्तं भवता। कस्तुतं भवता। वालर्थः। स्तपते। उपसर्गसंज्ञाश्रयं षत्वं भवति। पूजायामिति किं। सुसिक्तं किं तया
त्र। ९४॥अतिरतिक्रमणे च॥ अतिशब्दः अतिक्रमणे पूजायां च कर्मप्रवचनीयसंज्ञो भवति निष्पन्नेपि फलेक्रियायां तिरतिक्रमणं।
अतिशिक्तमेव भवता। अतिस्तुतमेव भवता। पूजायां। अतिसिक्तं भवता। शोभनं कृतमित्यर्थः। ९५॥अपिः पदार्थसंभावना॥ न्ववसर्ग
गर्हासमुच्चयेषु। पदार्थे संभावने अन्ववसर्गे गर्हायां समुच्चये वा त्तमानोपिशब्दः कर्मप्रवचनीयसंज्ञो भवति। पदांतरस्याप्रयुज्यमानः
स्यार्थः पदार्थः। सर्पिषोपि स्यात्। मधुनोपि स्यात्। मात्राबिंदुः स्तोकमित्यस्यार्थे पिशब्दो वर्तते। संभावनमधिकार्थं वचनेन शक्तेरप्रतिघा
ताविष्करणं। अपि सिंचेन्मूलसहस्रम्। अपि स्तुयाद्राजानं। अन्ववसर्गः। कामचारानुज्ञानं। अपि सिंच। अपि स्तुहि। गर्हानिंदाधिग्ग
म्यं देवदत्तम्। अपि सिंचेत्स्कंडुम्। अपि स्तुयाद्वृषलं। समुच्चये। अपि सिंच। अपि स्तुहि। सिंच च स्तुहि। उपसर्गसंज्ञाबाधनार्थं वच
नं भवति ९६॥अधिरीश्वरे॥ ईश्वरः स्वामी। स च स्वमपेक्षते। तदयं स्वस्वामिसंबंधे अधिः कर्मप्रवचनीयसंज्ञो भवति। तत्र कदाचि
त्स्वामिनः कर्मप्रवचनीयविभक्तिः सप्तमी भवति। कदाचित्स्वात्। अधिब्रह्मदत्ते पंचालाः। अधि पंचालेषु ब्रह्मदत्तः ९७॥विभाषा॥ ३०

अधिः करोतौ विभाषा कर्मप्रवचनीयसंज्ञो भवति। यदत्र मामधि करिष्यति। कर्मप्रवचनीयसंज्ञापक्षे गतिसंज्ञा बाधा नाति ङि चोदात्तम
वतीति निघातो न भवति ९८॥लः परस्मैपदं॥ लइति षष्ठी आदेशो ये लादेशाः परस्मैपदसंज्ञा भवंति। तिप्। तस्। झि। सिप्। थस्। थ।
मिप्। वस्। मस्। शतृक्वसू च। परस्मैपदप्रदेशाः। शेषात्कर्तरि परस्मैपदमित्येवमादयः ९९॥तङानावात्मनेपदं॥ तङिति प्रत्याहारो नथानां वचना
नामानाविति शानच्कानचोर्ग्रहणम्। पूर्वेणपरस्मैपदसंज्ञायां प्राप्तायां तङानयोरात्मनेपदसंज्ञा विधीयते। त। आताम्। झ। थास्। आथाम्। ध्वं
इड्। वहि। महिङ्। आनः। एवं चापि शानच्कानचौ। करत्येव। कतिह निघानाः। आत्मनेपदप्रदेशाः। अनुदात्तङित आत्मनेपदमित्येवमादयः
१००॥तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः तिङोष्टादश प्रत्ययाः। नव परस्मैपदसंज्ञकाः। तत्र परेषु त्र्यस्त्रिकायः। यात्क्रमं प्रथममध्यमोत्तम
संज्ञा भवंति। तिप्तस्झि इति प्रथमपुरुषः। सिप्थस्थ इति मध्यमः। मिप्वस्मस् इत्युत्तमः। तआतांझ इति प्रथमः। थासाथांध्वमिति मध्य
मपुरुष इड्वहि। महिङिति उत्तमपुरुषः। प्रथममध्यमोत्तमप्रदेशाः शेषे प्रथम इत्येवमादयः १०१॥तान्येकवचनद्विवचनबहुवचनान्येकशः॥
सानि तिङस्त्रीणि त्रीणि विहितानि एकवचनद्विवचनबहुवचनसंज्ञानि भवंति। एकैकशः। एकैकं पदमित्येकवचनं। तसिति द्विवचनं। झीति बहुव
चनानि तिङस्त्रीणि त्रीणि विहितानि एकवचनद्विवचनबहुवचनसंज्ञानि भवंति। एकैकशः। एकैकं पदमित्येकवचनं। तसिति द्विवचनं। झीति बहुव
चनं एवं सर्वत्र। एकवचनद्विवचनबहुवचनप्रदेशाः द्व्येकयोर्द्विवचनैकवचने। बहुषु बहुवचनमित्येवमादयः १०२॥सुपः॥ तिङां त्रिके
ष्वेकवचनादिसंज्ञा विहिता संप्रति। सुपां त्रिकेषु विधीयते। सुपश्च त्रीणि वचनानि एकवचनद्विवचनबहुवचनसंज्ञानि भवंति। एकैकशः। सु
इत्येकवचनं। औ इति द्विवचनं। जसिति बहुवचनं एवं सर्वत्र १०३॥विभक्तिश्च॥ विभक्तिसंज्ञकाश्च सुपो भवति तिङश्च विभक्तिप्रदेशाः।
अष्टन आ विभक्तावित्येवमादयः १०४॥युष्मद्युपपदे॥ समानाधिकरणे स्थानिन्यपि मध्यमः। कस्येत्यधिकृत्य सामान्येन तिवादयो विहिताः।
तेषामयं पुरुषनियमः क्रियते। युष्मद्युपपदे सति व्यवहिते चाव्यवहिते च समानाधिकरणे समानाभिधेये तुल्यकारके स्थानिन्यपि प्रयुज्यमानेपि
मध्यमः पुरुषो भवति। त्वं पचसि। युवां पचथ। अप्रयुज्यमानेपि। पचसि। पचथः। पचथ। समानाधिकरण इति किं। त्वया पच्यते ओदन १०५
प्रहासे च मन्योपपदे मन्यते रुत्तम एकवच्च। प्रहासः परिहासः क्रीडा। प्रहासे च गम्यमाने मन्योपपदे धातोर्मध्यमः पुरुषो भवति। मन्यतेश्चोत्तमः
स चैकवद्भवति। एहि मन्ये ओदनं भोक्ष्यसे। नहि भोक्ष्यसे भुक्तः सोतिथिभिः। एहि मन्ये रथेन यास्यसि नहि यास्यसि यातस्तेन पितेति। मध्यमो

त्तमायाः प्राप्तयोः उत्तममध्यमौ विधायते। प्रहासइतिकिं। एहिमन्यसे ओदनंभोक्ष्येसुष्ठुमन्यसेसाधुमन्यसे १०६। अस्मद्युत्तमः।
उत्तमपुरुषोनिपत्यते। अस्मद्युपपदेसमानाधिकरणेसमानाधिये प्रयुज्यमानेऽप्यप्रयुज्यमानेऽपिउत्तमपुरुषोभवति। अहंपचामि। आवां
पचावः। वयंपचामः। अप्रयुज्यमानेऽपि पचामि। पचावः। पचामः॥ १०७॥ शेषेप्रथमः॥ शेषइतिमध्यमोत्तमविषयादन्यदुच्यते। यत्रयु
ष्मदस्मदीसमानाधिकरणेनोपपदेस्तस्तत्रशेषेप्रथमपुरुषोभवति। पचति पचतः पचन्ति १०८। परःसन्निकर्षः॥ संहिता परशब्दोऽत्या
तिशयार्थेवर्ततेसन्निकर्षःप्रत्यासत्तिः। परोयःसन्निकर्षोवर्णानामर्द्धमात्राकालव्यवधानःससंहितासंज्ञोभवति। दध्यत्र। मध्वत्र। संहि
ताप्रदेशाः। संहितायामित्येवमादयः १०९॥ विरामोऽवसानं॥ विरतिर्विरामोविरम्यते। नेनेतिविरामः सोऽवसानंसंज्ञोभवति। वृक्षः।
प्लक्षः। अवसानप्रदेशाःखरवसानयोर्विसर्जनीयइत्येवमादयः ११०॥ एवंकर्ण २५१ इत्यपसंख्याभवति। गुणैर्गणाविवृतगूढविस्पष्टशब्दा
व्युत्पत्तिरूपप्रसिद्धिर्वृत्तिरियंकाशिकानाम॥ ॥इतिकाशिकायांवृत्तौप्रथमाध्यायस्यचतुर्थःपादः॥ ॥शके १०८६ शा० शु० ३३

॥ इति काशिकाप्रवर्त्तांप्रथमाध्यायसंपूर्णं॥

Dr. BHAU DAJI MEMORIAL

॥ अथ काशिकाप्रवर्त्तांद्वितीयोध्यायः॥

ॐनमः श्रीगणेशायनमः॥समर्थःपदविधिः॥परिभाषेयं यः कश्चिदिहशास्त्रेपदविधिःश्रूयतेसमर्थोवेदितव्यः॥वि
धीयतइतिविधिःपदानांविधिःपदविधिःसमासादिःसमर्थाशक्तः विग्रहवाक्यार्थाभिधानेयःशक्तःसमर्थो
वेदितव्यः।अथवासमर्थपदाश्रयत्वात्समर्थःसमर्थानांपदानांसंबद्धार्थानांसंसृष्टार्थानांवविधिर्वेदितव्यः
का०१ वक्ष्यतिद्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः कष्टंश्रितः।समर्थग्रहणंकिं।पश्यदेवदत्तकष्टंश्रितो
विष्णुमित्रोगुरुकुलं।तृतीयातत्कृतार्थेनगुणवचनेन।शंकुलाखंडः।शंकुलयाखंडः।शंकुलखंडः
समर्थग्रहणंकिं।किंत्वंकरिष्यसिशंकुलयाखंडोदेवदत्तस्य।चतुर्थीतदर्थार्थबलिहितसुखरक्षितैः।यूप
दारुयूपदारु।समर्थग्रहणंकिं।गच्छत्वंयूपायदारुदेवदत्तस्यगृहे।पंचमीभयेन।वृकेभ्योभयंवृकभयं।
समर्थग्रहणंकिं।गच्छत्वंमावृकेभ्योभयंदेवदत्तस्यपतत्दत्तात्।षष्ठी।राज्ञःपुरुषः।समर्थग्रहणंकिंभार्या
राज्ञःपुरुषोदेवदत्तस्य।सप्तमीशौंडैः।अक्षेषुशौंडःअक्षशौंडः।समर्थग्रहणंकिं।शक्तस्त्वमक्षेषुशौंडःपि
बतिपानागारे।पदग्रहणंकिं।वरणेविधौसमर्थपरिभाषामाभूत्।तिष्ठतुदध्यशानत्वंशाकेन।तिष्ठतुकुमा
रीछत्रंहरदेवदत्तात्।यणादेशः।निसश्चनुम्भवति।सुबामंत्रितेपराङ्गवत्स्वरे।सुबंतमामंत्रितेपरतःपरस्यांग
वद्भवतिस्वरेस्वरलक्षणेकर्तव्ये।तादात्म्यातिदेशोयं।सुबंतममाद्वितस्वरप्राविशतीवस्यति।आमंत्रितस्या
दिरुदात्तोभवतिससुप्कस्यापियथास्यात्।कुंडेनाटन्।अंगग्रहणंकिंपथामृत्पिंडीभूताःस्वरंभिन्न
उभयोरादुदात्तत्वंमाभूत्बहुवचनात्किं।स्याश्रयमपियथास्यात्।आनकुंडेनाटन्।आमएकान्तरमामंत्रित
मनंतिकेइत्येकश्रुतिर्भवति।स्वरइतिकिं।कूपेसिंचन्याचमन्।षत्वणत्वेप्रतिषेधोपराङ्गवद्भवति।सु
बंतस्यपराङ्गवद्भवतीत्युक्तेसमानाधिकरणस्योपसंख्यानमनंतरत्वात्।तीक्ष्णेनपरशुनावृश्च

मिष्या।मस्तसमाससंज्ञावेदितव्याः।वक्ष्यतियथा।सादृश्ययथावृद्धब्राह्मणानामंत्रपरस्याप्रग्वर्त्तनंसं
तापप्रज्ञासमवेशार्थीसमासप्रदेशाःद्वितीयासमासेईवमादयः॥वा॥सहसुपा।सुपितिवर्त्ततेस
हेतिचसुपेति।अएतदधिकृतंवेदितव्यापदिनउईमनुक्रमिष्यामस्तत्रदमुपस्थितंइष्टव्यं।वक्ष्यतिद्वि
द्वितीयाश्रितातीतपतितात्रि।असहसमस्यतेकष्टश्रितः।सहग्रहणंयोगविभागार्थंतिङ
पिसहयथास्यात्अनुव्यचलत्।अनुप्रावर्षत्॥छ॥॥अव्ययीभावः।अव्ययीभावइत्यधिकारो
वेदितव्यः।यानितऊर्ध्वमनुक्रमिष्यामःअव्ययीभावसंज्ञास्तेवेदितव्याःवक्ष्यतियथासादृश्ये
यथावृद्धंब्राह्मणानामंत्रयस्व।अन्वर्थसंज्ञाचेयंमहतीपूर्वपदार्थप्राधान्यमव्ययीभावस्यदर्शयति
अव्ययीभावप्रदेशाःअव्ययीभावश्चेत्येवमादयः॥छ॥अव्ययंविभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावा
त्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्यांतवचनेषु।
सुप्सुपेतिचवर्त्तते।विभक्त्यादिष्वर्थेषुयदव्ययंवर्त्ततेतत्समर्थेनसुबंतेनसहसमस्यतेअव्य
यीभावश्चसमासोभवति।वचनग्रहणंप्रत्येकंसंबध्यते।विभक्तिवचनेतावत्।स्त्रियाधिकृत्यक
था।प्रवर्त्तते।अधिस्त्रि।अधिकुमारि।सप्तम्यर्थेऽव्ययंविभक्तिः।समीपे।कुंभस्यसमीपंउपकुंभं
उपमणिकं।समृद्धिःसद्धेराधिक्यंसमृद्धिः।मद्राणांसमृद्धिःसुमद्रं।सुमगधंवर्त्तते।व्यृद्धिर्ऋद्धेरभावः
दुःशादिवं।दुर्यवनंवर्त्तते।अर्थाभावः।अभावोमक्षिकाणांनिर्मक्षिकं।निर्मशकंवर्त्तते।
अत्ययोभूतत्वमतिक्रमः।अतीतानिहिमानिनिर्हिमं।निःशीतंवर्त्तते।असंप्रतिउपभोगस्यवर्त
मानकालप्रतिषेधः।अतितृजसकंबलंसकंबलंसाछादनंतस्यायमुपभोगकालोनभवतीत्यर्थः

द्भ मादुर्भावः प्रकाशताशद्भस्य इति धारीणानस्य तप्ता णिनी। पाणिशद्धो लेके प्रकाशत इत्यर्थः।य
का।०२ स्यता अनुरथ पादातं। रथानां पश्चात्। यथार्थे पदव्यं पवर्त्तनसमस्यते। योग्यतावीप्सा पदार्था
नतिवृत्तिःसादृश्यं चेति यथार्थाः अनुरूपं रूपयोग्यं भवतीत्यर्थः। यथाशक्ति आनुपूर्व्ये अनुक्र
मः। अनुज्येष्ठं प्रविशंतु भवंतः। ज्येष्ठानुपूर्व्या। योगयत्पमेकालातस्नवकंभ हि यथाः। सादृश्यतु
ल्यता। किमर्थामिदमुच्य। यथार्थ इत्येव मिद्धं। गुणभूतेपि सादृश्ये यथा स्यात। सदृश्यः सखिस्य
ससाकि सखि। संपत्तिरनुपआभिभावा। समृद्धे रत्यः। ब्रह्मवाचाणां। सक्षत्रं शालेकापतानां। साक
ल्यमशाषता सातृणमस्यच हरति। सबुसान किंचिदप्यवहार्यपरित्यागतीत्यपमर्थः। घिकार्थ
वचनेन। आतइति परिग्रहापेक्षपासमास्तिरूच्यतोसा। न रेभ्यः॥६॥ ॥लक्षणेनाभिप्रती आभिमु
ख्यो॥ लक्षणं चिह्नं तद्वाचिना सुबंतेन सह अभिप्रभी शद्वावाभिमुख्ये वर्तमानौ विभाष्या समस्येते अ
व्ययीभावश्च समासोभवति। अभ्यग्नि शलभाः पतंति। अग्निमभिप्रत्यग्नि। अभिप्रति आभिमुख्य
स आभिमुख्यं पतंतीत्यर्थः। लक्षणेनेति किं। स्रुघ्नं प्रतिगतः प्रतिगतः प्रति निवृत्तस्य स्रुघ्नमेवाभिमुखं गतः
स· अभिप्रतीइति किं। येनाग्निस्तेनमः। आभिमुख्य इति किं। अभ्यंकागावः॥७॥ प्रयंकागाव अनुर्यत्समया
समीया। अनुर्यस्य समीपावाचीतेन लक्षणाः भूतेन सह विभाषा समस्पते अव्ययीभावश्च समासो
भवति। अनुवनमशनिर्गतः। अनुरिति किं वनं समया। यत्समयेति किं। वृक्षमनुविद्योतते विद्युत अ
व्यय विभक्ति समीपेत्येव सिद्धे पुनर्वचनं विभाषार्थ॥८॥ ॥यस्य चायामः लक्षणेनेति। वर्त्तते। आपाम

देर्थ्यां। आनुर्यस्यायामवाचीतेन लक्षणभूतेन सह मस्यते अव्ययीभावश्च समासोभवति। अ
का।०३ नुगंगं वाराणसी। अनुयमुनायामिनमथुरायामोलक्ष्यते। आयाम इतिकिं। वृक्षमनुविद्योतते
विद्युत॥९॥ ॥तिष्ठद्गुप्रभृतीनिच। तिष्ठद्गादयः समुदायारायनिपास्तंतेतिष्ठद्गुप्रभृतीनि शद्धरूपाणि अ
व्ययीभावसंज्ञानि भवति तिष्ठद्गुकालविशेषा। तिष्ठंति गावो यस्मिन्काले दोहनाय एतिष्ठद्गुकालं नः।
खलेपच्चा। निप्रथमांता। निर्विभक्त्यंतरेणनैवसंबंध्यंते अन्यपदार्थे चन्नेतेः चकारो। वधारणार्थः अ
परः समास्ये न भवति परमतिष्ठद्गिति तिष्ठद्गु वहद्गु। आयतीगवंखलेबुसं॥ खलेयवं। लूनयवां लू
यमानयवं। पुतयवं पूयमानयवं संहृतयवं संह्रियमाणयवं सहबुसं संह्रियमाणबुसं एक
लशद्धाः। समंभूमि समंपदाति सुषमं विषमं। निष्यमादुःषमं। अपरसमं। आयतीसमं प्राह्णं प्रा
गंरथं॥ प्रदक्षिणं अपरादक्षिण। संप्रति। असंप्रति पापसमं पुराणसमं। इच्कर्मव्यतिहारे दंडादंड
डी। मुसलामुसलि॥१०॥ ॥पारेमध्येषष्ठ्यावा॥ षष्ठीसमासे प्राप्तेनदपवदीःव्ययीभाव आरभ्यते। वा वच
नाच्च षष्ठीसमासोपिपक्षेऽभ्यनुज्ञायते। पारमध्ये शद्धौ षष्ठ्यंतेन सह विभाषा समस्येते व्ययीभावश्च
समासोभवति। तत्संनियोगेनचानयोरेकारांतत्वं निपात्यते। पारेगंगायाः पारेगंगं मध्येगंगा षष्ठी
समस्पक्षे। गंगापारं गंगामध्य। महाविभाषा पावक। विकल्पः क्रियते॥११॥ ॥संख्यावंशेन॥ वि
तो· धाथा जन्मना वा प्राणिनामेक लक्षणां संतानो वंश इत्यभिधीयते तत्र भवो वंश्यः तद्वाचिना सुबं
तेन सह संख्या समस्यते अव्ययीभावश्च समासोभवति द्वैमुनी व्याकरणस्य वंश्ये द्विमुनि व्याकरणस्य

त्रिमुनी व्याकरणस्य पदानुविधपात द्वतमाभे दीवबस्ततद्रा समानाधिकारम्यभवति। द्विमुनिव्याकरणं। त्रिमुनिव्याकरण मित्रन्मला॥ पंचविशतिमद्धाडं॥ ७॥ नदीभिश्च॥ संख्येति नदी
वचनैः शब्दैः सह संख्या समस्यते अव्ययीसमासो भवति। समाहारच्चायमिष्यते। सप्तगंगा द्वियमुनांपंचनदं। सप्त गोदावरं॥ ७॥ ॥अन्यपदार्थे च संज्ञायां॥ संख्येति निवृत्तं नदी ग्रहण मनुवर्त्तते। नदीभिः सह सुबंतं मन्यपादार्थे वर्त्तमानं संज्ञायां विषये समस्यते अव्ययीभावश्च समासो भवति। विभाधिकारेपि नित्यसमास एवायं। नहि वाक्येन संज्ञा गम्यते। उन्मत्तगंगं नाम देशः। लोहितगंगं। तूष्णीगंगं। शनैगंगं। अन्यपदार्थ इति किं। शीघ्रगंगो देशः॥ ७॥ ॥तत्पुरुषः॥ तत्पुरुष इति संज्ञाधिक्रियते प्राग्बहुव्रीहेर्यामितऊर्द्धमनुक्रमिष्यामस्तत्पुरुषसंज्ञास्ते वेदितव्याः वक्ष्यति द्वितीया। श्रितातीतपतित। कष्टश्रितः। पूर्वाचार्यसंज्ञा चेयं महती संज्ञाकरणमुपायेरपि तदीयस्य परिग्रहार्थं। उत्तरपदार्थप्रधानस्तत्पुरुष इति। तत्पुरुषप्रदेशाः तत्पुरुषे कृति बहुलमित्येवमादयः॥ ७॥ ॥द्विगुश्च॥ द्विगुश्च समासस्तत्पुरुषसंज्ञो भवति। द्विगोस्तत्पुरुषत्वे समासांताः प्रयोजनं पंचराजी दशराजी द्व्यहः त्र्यहः पंचगवं। दशगवं॥ ७॥ द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः। सुप्सुपेति वर्त्तते। तस्य विशेषणमेतत् द्वितीया। द्वितीयांतं सुबंतं श्रितादिभिः सह समस्यते तत्पुरुषश्च समासो भवति। कष्टं श्रितः कष्टश्रितः नरकं श्रितः। अतीतः कांतारमतीतः कांतारातीतः पतितः। नरकं पतितः नरकपतितः ग्रामं गतः ग्रामगतः। नरकगतः अत्यस्तः तरंगान् अत्यस्तः तरंगात्यस्तः तुहिनात्यस्तः। प्राप्तः

सुखप्राप्तः। आपन्नः। सुखमापन्नः सुखापन्नः दुःखापन्नः। श्रितादिषु गमिगाम्यादीनामुपसंख्यानं। ग्रामं गमी ग्रामगामी। ग्रामं गामी ग्रामगामी ओदनं बुभुक्षुः ओदनबुभुक्षुः॥ ७॥ ॥स्वयं क्तेन॥ स्वयमेतदव्ययं आत्मनेत्यस्यार्थे वर्त्तते। तस्य द्वितीयासम्बन्धेनुपपन्न इति प्रकृतिग्रहणमुत्तरार्थमनुवर्त्तते। स्वयमित्येतत् सुबंतं क्तेन सह समस्यते तत्पुरुषश्च समासो भवति॥ स्वयंधौतौ पादौ स्वयं विलीनमाज्यं एकपदे स्वं पंचसमासत्वाद्भवति॥ ७॥ ॥खट्वा क्षेपे॥ खट्वा शब्दो द्वितीयांतः क्तांतेन सह क्षेपे गम्यमाने सह समस्यते तत्पुरुषश्च समासो भवति क्षेपो निंदा साच समासार्थ एवेतेन। विभाषाधिकारेपि नित्यसमास एवायं नहि वाक्येन क्षेपो गम्यते। खट्वारोहणं चेह विमार्गप्रस्थानस्योपलक्षणं। सर्व एव विनीतः खट्वारूढ इत्युच्यते खट्वारूढः जाल्मः। उत्पथप्रस्थित इत्यर्थः। क्षेप इति किं। खट्वामारूढः॥ ७॥ ॥सामि॥ सामीत्येतदव्ययं अर्द्धशब्दपर्यायस्तस्यासत्ववाचित्वात् द्वितीयमानास्ति संबंधः। तत्सुबंतं क्तांतेन सह समस्यते तत्पुरुषश्च समासो भवति। सामिकृतं। सामिपीतं सामिभुक्तं। एकपदे मैकस्वर्यं च समासत्वाद्भवति॥ ७॥ ॥कालाः॥ द्वितीयांतेनेति वर्त्तते कालवाचिनः शब्दा द्वितीयांताः क्तांतेन सह समस्यते तत्पुरुषश्च समासो भवति। अनत्यंतसंयोगार्थं वचनं। षण्मुहूर्त्ताश्चराचराः ते कदाचिदहर्गच्छंति कदाचिद्रात्रिं। अहरति सृता मुहूर्त्ताः। अहः संक्रांताः। अहरारूढाः। रात्रिसंक्रांताः। रात्र्यारूढाः। रात्रिसंक्रांताः। मासप्रमितश्चंद्रमाः मासं प्रमातुमारब्धः मासप्रमितः प्रतिपच्चंद्रमाः॥ ७॥ ॥अत्यंतसंयोगे च॥ कालाइतीवृत्

प्रा

तकनेतिनिवृत्त्यं। असंतत योगः। कालास्यस्वनसंबंधिनाव्याप्तिः। कालवाचिनः शब्दात् द्वितीयोता असंतसंयोगे गम्यमानसुपात्सह समस्यते तत्पुरुषश्च समासो भवति। मुहूर्तसुखं स एकल्याणी सर्वरात्रशोभनी॥ ६॥ तृतीया तत्कृतार्थेन गुणवचनेन। सुप्सुपा निवर्त्तते तस्य विशेषणमेतत्॥ तृतीयांतं सुबंतं गुणवचनेनार्थशब्देन च सह समस्यते तत्पुरुषश्च समासो भवति। किं दृशेन गुणवचनेन तत्कृतेन तदर्थकृतेन तृतीयार्थकृतेनेति पावत्। शकुलखंडः

नं॰ ४ शकुलाखाखडः॥ किरिणाकाणः। मिरीकाणः। अर्थशब्देन धान्येनार्थ धान्यार्थः। तकृतेन निकि अन्हाकाणः गुणवचने

पावत्। शकुलपाखंडः शकुलोखंडः। किरीणाः मिरीकाणाः अर्थशब्देन धान्येनार्थो धान्यार्थः। तकृतेन तिकीगेभिर्वपावन॥ ६॥ ॥ पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः॥ पूर्वसदृशसमउनार्थकलहनिपुणमिश्रश्लक्ष्णाः एतैः सह तृतीयांतं समस्यते तत्पुरुषश्च समासो भवति। अस्मादेव वचनात् पूर्वार्थादिभियोगे तृतीयाभाव इति ज्ञापकोऽवाद्रष्टव्यः मासेन पूर्वः सवत्सरपूर्वः सदृशः मातृसदृशः पितृसदृशः सम। मातृसमः। ऊनार्थ माषोनां कर्षापणोनां माषविकलं कार्षापणाविकलं। कलह आसिकलहो वाक्कलहः निपुणः वाङ्निपुणः। आचारनिपुणः मिश्रा गुडमिश्रः तिलमिश्रः। श्लक्ष्णः। आचारश्लक्ष्णः। अभिवारस्ये। पसख्यनं। मासेनावरः मासवरः संवत्सरावरः॥ ६॥ ॥ कर्तृकरणे कृता बहुलं॥ तृती

व॰ ७५ योतवर्त्तते कर्तरि करणे च यातृतीया तदंतं कृदंतेन सह समस्यते बहुलं तत्पुरुषश्च समासो भवति सर्वोपाधिव्यभिचारार्थं बहुलग्रहणं। अहिनाहतः अहिहतः। करणेन खेन भिन्नो नखनिर्भिन्नः। परशुना छिन्नः परशुछिन्नः कर्तृकरणे इति किं। भिक्षाभिरुषितः। बहुलग्रहणं किं। दात्रेण लूमावान् परशुना छिन्नवान् इति समासो न भवति पादहारको गलेचोपक इति च भवति॥ ६॥ कृत्यैरधिकार्थवचने॥ स्तुतिनिंदाप्रयुक्तमध्यारोपितार्थवचनमधिकार्थवचनं कर्तृकारणयोर्यातृतीया तदंतं सुबंतं कृत्यैः सह समस्यते अधिकार्थवचने गम्यमाने तत्पुरुषश्च समासो भवति। कर्त्ता। काकपेया नदी॥ श्वलेह्यः कूपः करणा। बाष्पच्छेद्यानि तृणानि कंटकसंचेय उदनः। पूर्वस्यैवायं प्रपंचः। कृत्यग्रहणे यातृणपतो ग्रहणं कर्तव्यं इह माभूत्। काकैः पातव्या इति॥ ६॥ ॥ अन्नेन व्यंजनं॥ तृतीया इति वर्त्तते व्यंजनवाचितृतीयांतमन्नवाचिना सुबंतेन सह समस्यते तत्पुरुषश्च समासो भवति संस्कार्यमन्नं संस्कारकं व्यंजनं। दध्ना उपसिक्त ओदनः दध्योदनः।

ज॰ क्षीरौदनः। वृत्तौ क्रियापा अंतर्भावाद्व्यंजनयोः सामर्थ्यं॥ ६॥ ॥ भक्ष्येण मिश्रीकरणं॥ मिश्रीकरणवाचितृतीयांतं भक्ष्यवाचिना सुबंतेन सह समस्यते तत्पुरुषश्च समासो भवति॥ खरविशदमभ्यवहार्यं भक्ष्यं तस्य संस्कारकं मिश्रीः घनाः गुडधानाः गुडपृथुकाः। वृत्तौ क्रियाया अंतर्भावात् पूर्वोत्तरपदयोः सामर्थ्यं॥ ६॥ ॥ चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः॥ सुपेति वर्त्तते तस्य विशेषणमेतत्॥ भादि तिसर्वनाम्ना चतुर्थ्यंतस्यार्थः परामृश्यते। तस्मा इदं तदर्थः अर्थ बलि हित सुखर क्षित ईसेतैः सह चतुर्थ्यंतं समस्यते तत्पुरुषश्च समासो भवति। तदर्थेन प्रकृतिविकारभा

वे समासो यमिष्यते पूपा पदारु पू पदारु।कुंडला प हिरणं पकुंडल हिरणपां इह न भवति
रधनाय स्थाली॥आवहनलो पोलूखलमिति।चतुर्थी च।स्मादव ज्ञा पकार्त्तद्ध्यं भयतिअ
र्था अर्थेन नित्यसमास्य वचनं सर्व लिंगता च वक्तव्या।ब्राह्मणार्थः सूपः॥ब्राह्मणार्थ पयः।
ब्राह्मणार्था पावग्गूः बलि।।कुबेरापबलिः कुबेरबलिः महाराज बलिः।हितं गोहितं।अश्वहि
तसुरखं।अश्वसुखं रक्षितं गोरक्षितं॥अश्वरक्षितं॥५॥ पंचमी भयेन॥ सुप् सुपेतिवर्तते
स्याविशेषणमितत् पव म्येत भय शब्देन सुबंतेन सह स मस्यते तत्पुरुषश्च समासो भवति।
वृकेभ्यो भयं वृकभयं।चौरभयं पांसुभयं भयभीत भीतिभी भिरितिव क्तव्यं वृकभीतः
वृकभीतिः॥ वृकभीः पूर्वस्यैवायं बहुल ग्रहणस्य प्रपंचः तथा च ग्राम निर्गतः अधर्म जुगु
प्सुरित्येवमादि सिद्धं भवति॥५॥ अपेता टमुक्तमपतितापत्रस्तैरल्पशः॥आपेत आपोढमुक्त
पतित अपत्रस्तः इत्येतैः सह पंचम्यंत समस्यते तत्पुरुषश्च समासो भवति।आपत।सुखापे
तः अपोढ कल्पनापोढः मुक्त।चक्रमुक्तः।पतितः स्वर्गपतितः अपत्रस्त तरंगपत्रस्तः।तरंग
पत्रस्तः।अल्पशः इति समस्याच तत्पुरुषश्च समासो भवति।अपेत।सुखापेतः।अपो
ढाकल्पनाल्प विषयता मा च ष्ट।अल्पाय च मी सस्मतेन सर्वा।प्रासादात् म्यातितः।भोगा
नादपत्रतः इत्येवमादौ न भवति।कर्तृकरणे कृता बहुलमित्यस्यैवायं प्रपंचः॥७॥ ॥स्तोकां
तिकद्दूरार्थकृच्छ्राणि क्तेन॥स्तोक अंतिक दूर इत्येवमर्थाः शब्दाः कृच्छ्रशब्दश्च पंचम्यं
तान्तेन सह मस्यंते तत्पुरुषश्च समासो भवति स्तोकात् स्तोकान्मुक्तः।अंतिकात् अंतिकादस्य

तितः।भोताना दयत्रस्तः इत्येवमादौ न भवति कर्तृकरणे कृता बहुलमित्यस्यैवायं प्रपंचः
॥७॥ स्तोकांतिक इत्येर्थकृच्छ्राणि नु।स्तोक अंतिक अदुर इत्येवमर्थः गतः।अभ्याशादाग
ताः।दुरादागतः।विप्रकृष्टादागत कृच्छ्रा कृच्छ्रान्मुक्तः।कृच्छ्राल्लब्धः पंचम्याः स्तोकादिभ्य इत्य
लुक्।शतस हस्रो परेणाति वक्तव्यं शतात् परे परःशताः।सहस्रात्परे परःसहस्राः राजदंतादित्व
त्परनिपातः निपातनात्सुडागमः॥८॥ ॥ सप्तमी शौंडैः॥ सप्तम्यंत शौंडादिभिः समस्य
ते तत्पुरुषश्च समासो भवत्यते।अक्षेषु शौंडो अक्षशौंडः।अक्षधूर्त्तः।अक्षकितव।शौंड धू
र्त कितव व्याड प्रवीण संवीत।।अंतर अंतर् शब्द स्त्वत्राधिकरण प्राधान्ये व्यपदिश्यते॥
आधिपटु।तान्दुशाला च वल निपुण सिद्धो प्रसक्ति पाप अंतरावादरक्ष।दिषु अधिकरणे
सप्तमी॥९॥ सिद्धशुष्क पक्व बंधैश्च॥सप्तमीति वर्तते॥सिद्ध शुष्क पक्व बंध इत्येतैः स
प्तम्यंत समस्यंते तत्पुरुषश्च समासो भवति।सांकाश्य सिद्धः कांपिल्य सिद्धाः शुष्क आ
तप शुष्कः।छायाशुष्कः।स्थालीपाक्वः कुंभीपाक्वाः।चक्रबंधः चक्रबंधः।वसमासोभ
वति क्षेपे गम्यमाने।तीर्थध्वांक्ष इवतीर्थध्वांक्षः अनवस्थित इत्यर्थः।तीर्थवत् काकः
तीर्थवापसः ध्वांक्षेण क्षेपे तीर्थध्वांक्षस्तिष्ठति॥९॥ ॥ कृत्यैर्ऋणे॥सप्तमीति वर्त्तते कृ
त्यप्रत्ययांतैः सह सप्तम्यंतं सहमस्यते तत्पुरुषश्च समासो भवति क्षेपे गम्यमाने यत्प्र
येनैव ष्यते।मासेदेयमृणं मासदेयं संवत्सरदेयं।अहंदेयं ज्ञाण ग्रहणं नियोगोपलक्ष
णार्थं तेनेहापि समासो भवति।पूर्वाह्णगेयं समा प्रातरध्येयो नुवाकः ऋणइति किं।म

सिदेया।भिक्षां॥ ७॥ ॥संज्ञायां॥ संज्ञायांविषयेसप्तम्यंतंसुपासहसमस्यतेतत्पुरुष
का॰ ६ श्चसमासोभवतिसंज्ञासमुदायोपाधिःतेननित्यसमासएवायं।नहिवाक्येनसंज्ञागम्य
ते।आररोयातिलकाःआररोपतिषमाषः।वने।किंशुकाःवनेबिल्वकाः।कूयेपिणाचकाः।
लक्षतांसप्तम्याःसंज्ञायामित्यलुक्॥ ७॥ ॥क्तेनाहोरात्रावयवाः॥अहरवयवाःरात्र्यवय
वाश्चसप्तम्यंताःक्तांतेनसहसमस्यंतेतत्पुरुषश्चसमासोतवर्तिता पूर्वाह्णकृतंअपराह्णकृ
तं।पूर्वरात्रकृतंअपररात्रकृतं।अवयवग्रहणं किं।उलूखलेराभरणेःपिशाचीयदभा
षतःएतत्सुतेदिवावृत्तंराशौवृत्तंतुदृक्षसिअहनिभुक्तं।रात्रौवृत्तांबहुलग्रहणात्रात्रिकं
संध्यांगर्जितमित्यादयः॥ ७॥तत्र॥तत्रेत्येतत्सप्तम्यंतंक्तांतेनसहसमस्यतेतत्पुरुष
स॰ समासोभवति।तत्रभुक्तं।तत्रकृतं।तत्रपीतं।ऐकपद्यमैकस्वर्यंचसमासत्वाद्भवति
॥ ७॥ ॥क्षेपे॥ क्षेपे।निंदाक्षेपेगम्यमानेसप्तम्यंतंक्तांतेनसहसमस्यतेतत्पुरुषश्चसमा
सोभवति।अवतप्तेनकुलस्थितं।वापलमेतत्अनवस्थितत्वेनेत्यर्थः।उद
केविशीर्णं।प्रवाहेमूत्रितं।भस्मनिहुतं।निष्फलंयत्क्रियतेतदेवमुच्यते॥तत्पुरुषेकृतिब
हुलमित्यलुक्॥ ७॥ ॥पात्रेसमितादयश्च॥ दयश्चासमुदायाएवनिपात्यंते॥पात्रेसमितादयःशब्दा
स्तत्पुरुषसंज्ञाभवंतिक्षेपेगम्यमाने।यच्चात्रक्तांतेनसहसमासस्तेपापूर्वेणैवसिद्ध
पुनःपाठेपुरस्ताद्राद्यादिपरिग्रहार्थःपूर्वपदाद्युदात्तत्वंपथस्यादिति।युक्तारोह्यादिषुहि
समितादयेश्चौ।यच्यंतेपात्रेसमिताःपात्रेबहुलाःअवधारणेनक्षेपोगम्यते।पात्रएवस

मितानेपुनःक्वचिदपिइति।उदुंबरमशकादिषुउपमयाक्षेपःमातर्यपिपुरुषमात
रिपुरुषोपितप्रतिविद्वेषानेन।पिंडीशूरादिषुनिरीहतापा॥अव्यक्तत्वाच्चाकृतिग
का॰ ७ णश्च।पात्रेसमिताः।पात्रेबहुलाः।उदुंबरमशकाः।उदरकृमिः।कूपकच्छपः।कूपचूर्णकः।अवटकच्छपः।कूपमंडूकः।कुंभमंडूकः।उदपानमंडूकः।नगरवायसाः।मा
तरिपुरुषाः।पिंडीशूरः।गेहेशूरः।गेहेनर्दी।गेहेक्ष्वेडी।गेहेविजिती।गेहेव्याडः।गेहेतृप्तः।
गेहेधृष्टः।गर्भतृप्तः।आखनिकबकः।गोष्ठेशूरः।गोष्ठेविजिती।गोष्ठेक्ष्वेडी।गोष्ठेमेही।गोष्ठेप
टुः।गोष्ठेपंडितः।गोष्ठेप्रगल्भः।कर्णेटिरिटिरा।कर्णेचुरचुरा।चकारोऽवधारणार्थःतेनसमा
सांतरंनभवतिपरमपात्रेसमिताइति॥ ७॥ ॥पूर्वकालैकसर्वजरत्पुराणनवकेव
लाःसमानाधिकरणेन॥सुप्सुपेतिचवर्ततेतस्यविशेषणमेतत्।पूर्वकालएकसर्व
३ जरत्पुराणनवकेवला।इत्येतेसुबंताःसमानाधिकरणेनसुपासहसमस्यंते
तत्पुरुषश्चसमासोभवति।प्रवृत्तिनिमित्तस्यस्यशब्दस्यैकस्मिन्नर्थवृत्तिःसमाना
धिकरण्यंपूर्वकालइत्यर्थनिर्देशःपरिशिष्टानांस्वरूपग्रहणं।पूर्वकालोपरकालेन
सहसमस्यते।स्नातानुलिप्तः।कृष्टसमीकृतं।दग्धप्ररूढा।एकशाटी।एकभिक्षा।सर्वदे
वाः।सर्वमनुष्याः।जरद्धस्ती।जरद्वृषः।पुराणान्नं।नवसथं।नवावसथं।नवावसथं।केवला
न्नं।केवलावसथं॥समानाधिकरणेनेतिकिं।एकस्याःशाटी॥ ७॥ ॥दिक्संख्ये
न संज्ञायां॥समानाधिकरणेपापादसमासेरनुवर्तते।दिग्वाचिनःशब्दाःसंख्याचसमानाधि

Dr. BHAU DAJI MEMORIAL

कारणेनसुबंतेसहमस्यतेतत्पुरुषश्चसमासोभवतिसंज्ञायविषयोपूर्वेषुकंमशा
मी।।संख्यापूर्वान्मा:सप्तर्षयःसतापमिनितिः।उत्तर।वृक्षःपंचब्राह्मणेः।।ध।। ।।तद्धि
ता थेत्तिरपदसमाहारेच।।दिक्संख्येइत्यनुवर्त्तते।तद्धितार्थ।विषयेउत्तरपदेचपरतःस
माहारेचाभिधेयदिक्संख्यसमाना।विकरणेनसुपासहसमस्यतेतत्पुरुषश्चसमासोभव
तितद्धितार्थोतावत्।पूर्वस्यांशालायांभावःदिक्पूर्वपदादसंतायाञः पौर्वशालः।अ।परशा
लाउत्तरपदोपूर्वशालप्रियाः।अषमासोभवति।तद्धितार्थेतावत् पूर्वस्यांशालांभावः
दिक्पूर्वपदादसंतापारशालप्रियः।समाहारेदिक्शब्दोनसभवति।संख्यातद्धितार्थेपां
चमापितिः।पंचकपालोशकपालःउत्तरपदोपंचगवधनोदशगवधनःसमहारोपंचपू
लीदशपूलीपंचकुमारीदशकुमारीसनपुंसकमितिनन्पुंसकत्वेह्रस्वोनपुंसकेप्राप्रा
तिपादिकस्यतिह्रस्वत्वं।।ध।। ।। संख्या पूर्वोद्विगुः।।तद्धितार्थोत्तरपदसहमाहारेचैतत्र
षःसंख्यापूर्वःसमासाःसद्विगुसंज्ञोभवतितद्धितार्थेतावत्पंचसुकपालेषुसंस्कृतःपंच
वकपालोदशकपालःसंस्कृतंभक्षाइतीहाणअगतस्यद्विगोलुगेनपत्येइतीलुक् उत्त
रपदोपंचनावप्रियः।नावोद्विगोरितिसमासांतोभवतिसमाहारेपंचपूली।द्विगोरितिङी
पूभवति।द्विगुप्रदेशाः।द्विगोरीत्यचमावयः।ध।। ।। कुत्सितानि कुत्सनैः कुत्सितञ्चवचनैःसुबंतानि
कुत्सनवचनैःसुबंतःसहसमस्यतेतत्पुरुषश्चसमासोभवतिशएप्रवतिमित्रकुत्स।याम

यसमासइष्यते।विशेषणं।विशष्येणेतिपरनिपातेप्राप्तेविशष्यस्यपूर्वनिपातार्थआ
रंभःवैयकारणखसूचिःनिःप्रतिईत्यर्थःपतिकःकितवः।अपजापाजतृष्णपरःमीमांस
कदुर्दुरुतः।ना।स्तिकः।उ।त्नितानीतिकावैयाकरणश्चोरः।नसुत्रवैयाकरणकं कु
त्समतोकुत्स्यनेरितिकिं।कुत्सितोब्राह्मणः। ।ध।। ।।पापाणके कुत्सितैः पापरणाकश
ब्दोत्रग्ना।भिधापितोतयोःपूर्वेणसमासेपरनियातःप्रसःपूर्वनिपातार्थमिदमारभ्यते।पा
पआणकऐतेसुबंतेकुत्सितवचनैःसहमस्यतेतत्पुरुषश्चसमासोभवति।पापनापि
७३
तःपापकुलालः।अणकानापितः।अणकानपित।अणकुलालाः।।ध।। ।।उपमाना
निसामान्यवचनैः।।उपमीयतेऽनेनेत्युपमानानांउपमानवाचीनिसुबंतानिसामान्यवच
नैःसुबंतनैःसहमहस्यतेतत्पुरुषश्चसमासोभवति।उपमानोपेमयापाःसाधारणेधर्मःसा
मान्यतद्विशिष्टोपामयेवनेनेरयंमसमासः।शस्त्रीईवइदपामाशस्त्रीपामारेवलाकु
मुदश्येनी।हसगरुदा।न्यग्रोधपरिमेडला।उपमानानितिकिं देवाश्यमा।सामान्यवचनैः
रितिकिंफालाइवना दुलाः।पर्वताइवबालहकाः।।ध।। ।।उपमितं व्याघ्रादिभिःसमान्य
प्रयोगे।उपमेयमुपमितं।तद्वाचिसुबंतंव्याघ्रादिभिःसामर्थ्यातउपमानेवचनैःसहसम
स्यतेतत्पुरुषश्चसमासोभवतितवेत्सामान्यवाचीशब्दःप्रयुज्यते।विशेषणे।विशष्येणे
तिपरतिपातेप्राप्ते।विशष्यस्यपूर्वनिपातार्थआरभःपुरुषायंव्याघ्रःइवव्याघ्रःपुरुषव्या
घ्रःपुरुषसिंहः।सामान्यप्रायोगइतिकिं।पुरुषोव्याघ्रइवशूरःव्याघ्रसिंहं।।समा

न्य।प्रयागइतिकिं।पुरुषोव्याघ्रइवशूरः।व्याघ्रासिंह।तक्षा॥तनुपभाचंदना।वृक्षावृषा
नग. ६ वराहाहस्तिन्।कुंजरासरु।एचतापुंडरिका।नलाहकाआकृतिगारा।श्वापंतेनेरमपिभवति।
मुखपद्य।मुखकमल।कराकिशलयं।पार्थिवचंद्रःइत्येवमादि॥७॥ ।विशेषणं विशेष्या
विशेषणवाचिसुबंतं।विशेष्यवाचिनासुबंतेनसमानाधिकरणेनबहुलंसहसमस्य
तेतत्पुरुषश्चसमासोभवति।निलोत्पलं।रक्तोत्पल।बहुलवचनंव्यवस्थार्थं।क्व।चित्रसमा
सएवाकृष्णसर्पोलोहितशा।लिः।क्व।चित्रभवत्येवरामोजामदग्न्यः।अर्जुनकार्तवीर्यः।क्व
चिद्विपाल्पः।निलोत्पलं।विशेषणमिति।किं।तक्षक८सर्पः ।ति।किं।लोहितस्तक्ष
कः पूर्वापर प्रथमचरमजघन्यसमानमध्यमध्यमविरश्च।पूर्वःअपरःप्रथमःचरमःजघन्यःस
मानमध्यःमध्यमःवीरःइत्येतेसुबंताःसामानाधिकारणेनसुपासहसमस्यतेतत्पुरुषश्चसमासो
भवति॥पूर्वपुरुषः।अपरपुरुषःप्रथमपुरुषः।चरमपुरुषः।जघन्यपुरुषः।समानपुरुषः
मध्यमपुरुषःवीरपुरुषःपूर्वास्यैवायंप्रपंचः॥ कृतादिभिः॥श्रेण्यादयःसुबंताः
कृतादिभिःसामानाधिकारणेसहसमस्यंतेतत्पुरुषश्चसमासोभवतिआरेणादिषुश्रेण्याद्यर्थवचनं
अश्रेणयःश्रेणयःकृताःश्रेणिकृताःएकीकृताःपूगीकृताः।श्रेणयादयःपठ्यंते।कृतादिराकृ
तादिगणः।उक्तंच्यंसानाउक्तगतिप्रादयईत्यनेननित्यसमासःश्रेणीकृताः।श्रेणि।एक।पुग
कुंडमिराशिविशिस्वनिचयः॥निधान।इंद्र।देव।मुंड।भूत।श्रावणवदान्य।अध्यापका।ब्राह्मण

व०।० ९ क्षत्रिय।पटु।पंडित।कुशल।चपाल।निपुणकृपण।श्रेण्यादिः।मित।मन।भूता।उक्ता।स
समाख्याता।समाम्नाता।समाख्याता।संभावित।अवधीरिता।निराकृत।अवकल्पित।उपकृ
ता।उपकृताइतिकृतादिः॥७॥ ।शिष्टेनानञ्॥नञैवविशेषोयस्यसर्वमन्यत्कृ
त्यादिकंतुल्यंतत्र।क्त।शिष्टंतेननञ।क्तिशिष्टेनक्तांतेनसमानाधिकरणेनसहअनञ्कांतस
मस्यतेतत्पुरुषश्चसमासोभवति।कृतंचतदकृतंचकृताकृतं।भुक्ताभुक्तं।पितापीतं।उदितानु
दितानुदितोतभक्तत्वात्रैवभेदकं।अशितानशितेनजीवति।क्लिष्टाक्लिशितेनवर्तते
कृतादिनामुपसंख्य कृतापाकृतंभुक्तंविभुक्तंपीतंविपीतंगतप्रत्यागतं।पातानुपातं
कपाकापिका।पुटापुटिका।फलाफलिकामानोन्मानिका।समानाधिकरणा।धिकारेशाक
पार्थिवादीनामुपसंख्यानमुत्तरपदलोपश्च॥शाकप्रधानःपार्थिवःशाकपार्थिवः।कुतपसौ
श्रुतःअजातौल्वलिः॥७॥ ।रमोत्कृष्टाःपूज्यमानैः॥सत्महत्परमउत्तमउत्कृष्टइ
येतेपूज्यमानैःसहसमस्यतेतत्पुरुषश्चसमासोभवतिपूज्यमानैरितिवचनात्पूजावचनाःसद्वा
दयोविज्ञायंत।सत्पुरुषःमहापुरुषः।परमपुरुषःउत्तमपुरुषः।उत्कृष्टपुरुषः।पूज्यमानैरितिकिं
उत्कृष्टोःवर्ईमात॥७॥ ।नागकुंजरैःपूज्यमानं॥वृंदारकनागकुंजरइत्येतैःस
हपूज्यमानवाचिसुबंतसमस्यतेतत्पुरुषश्चसमासोभवतिपूज्यमानमितिवचनात्वृंदारकाद
यःपूजावचनागृह्यंते।गोवृंदारकः।अश्ववृंदारकः।गोनागःअश्वनागः।गोकुंजरःअश्वकुंज

रः। पूज्य पूज्य मन। मि तिकिं। सुषी मोनागः॥ ६॥ ॥ कतरकतमौ जातिपरिप्रश्ने॥ कतरकत
मौ जातिपरिप्रश्ने वर्त्तमानौ नसमर्थेन सुपा सह समस्येते तत्पुरुषश्च समासो भवति। कतरकठ
कतरकालापः कतमकठः कतमकलापः ननु कतमशब्दस्तावज्जातिपरिप्रश्न एव व्युत्पादितः
कतरशब्दोपि साहचर्यात्तदर्थं एव ग्रहीष्यते किं जातिपरिप्रश्ने ग्रहणेन। एवं तर्हि प्रायिकं
कतमशब्दोऽन्यत्रापि वर्त्तत इति। तथा च प्रत्युदाहरणं॥ कतरो भवतां देवदत्तः। कतमो भ
वतां देवदत्तः॥ ६॥ ॥ किं क्षेपे॥ किमेतत् क्षेपे गम्यमाने सुपा सह समस्यते तत्पुरुषश्च समासो
भवति। किं सखा योभिद्रुह्यति॥ किंगौर्यो न वहति॥ किंमः क्षेपे इति समासांतो न भवति
इति किं। को राजा पाटलिपुत्रे। ६॥ ॥ पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रव
क्तृश्रोत्रियाध्यापकधूर्त्तैर्जातिः॥ ॥ उभयव्यंजना पोटेत्यभिधीयते। गृष्टिः सकृत्प्रसूता। व
शा वंध्या॥ वेहद्गर्भघातिनी। बष्कयणी तरुणवत्सा। पोटादिभिः सह जातिवाचि सुबंतं समस्य
ते तत्पुरुषश्च समासो भवति। इभपोटा इभ्ययुवतिः अग्निस्तोकः। उदश्वित्कतिपयं। गोगृष्टिः। गो
धेनुः। गोवशा। गोवेहत्। गोबष्कयणी। कठप्रवक्ता। कठश्रोत्रियः। कठाध्यापकः। सह समस्यते
कठधूर्त्तः। जातिरिति किं। देवदत्ता प्रवक्ता गुतरम्य हेणा मरसं थी॥ ६॥ ॥ प्रशंसावचनैश्च॥
जातिरिति वर्त्तते जातिवाचि सुबंतं प्रशंसावचनैः सह समस्यते तत्पुरुषश्च समासो भवति। रु
ढिशब्दाः प्रशंसावचना गृह्यंते मतल्लिकादयस्ते चाविशिष्टलिंगत्वादन्यलिंगेपि जातिशब्द

स्य लिंगोपादा एव समानाधिकारणा भवंति। गोप्रकांडं अश्वप्रकांडः गोमतल्लिका। अश्व
मतल्लिका। गोमचर्चिका। अश्वमचर्चिका। जातिरिति किं। कुमारी मतल्लिका॥ ६॥ ॥
युवा खलतिपलितवलिनजरतीभिः॥ खलत्यादिभिः समानाधिकरणैः सह युवशब्दः सम
स्यते तत्पुरुषश्च समासो भवति। जरतीभिरिति स्त्रीलिंगनिर्देशः प्रातिपदिकग्रहणे लिंगविशि
ष्टस्यापि ग्रहणमिति ज्ञापनार्थः। युवा खलतिः युवतिः खलती युवखलती। युवा पलितः युवप
लितः। युवतिः पलिता युवपलिता। युवा वलिनः युववलिनः। युवतिर्वलिना युववलिना॥ युवा जरन्
युवजरन्। युवतिर्जरती युवजरती॥ ६॥ ॥ कृत्यतुल्याख्या अजात्या॥ कृत्यप्रत्ययांतास्तु
ल्यपर्यायाश्च सुबंताः अजातिवचनेन समस्यंते तत्पुरुषश्च समासो भवति। भोज्यो ष्णं
भोज्यलवणं पानीयशीतं तुल्याख्याः। तुल्यश्वेतः तुल्यमहान्। सदृशश्वेतः। सदृशमह
न्। अजात्येति किं। भोज्य उदनः॥ ६॥ ॥ वर्णो वर्णेन॥ वर्णो विशेषवाचि सुबंतं व
र्णविशेषवाचिना सुबंतेन समानाधिकरणेन सह समस्यते तत्पुरुषश्च समासो भवति। कृ
ष्णसारंगः लोहितसारंगः। कृष्णशवलः। लोहितशवलः। अवयवद्वारेण कृष्णशब्दः
समुदायेन वर्त्तमानः समानाधिकरणे भवति॥ ६॥ ॥ कुमारः श्रमणादिभिः॥ कुमा
रशब्दः श्रमणादिभिः सह समस्यते तत्पुरुषश्च समासो भवति। स्त्रीलिंगाः पठ्यंते श्रमण प्र
व्रजिता कुलटा इत्येवमादयस्तेः सह स्त्रीलिंग एव कुमारशब्दः समस्यते ये तु पुंलिंगाः

अध्यायाको।भिरूयकः पडितइतितेरुभयथाप्रतिपदिकग्रहणे।लिङ्गविशिष्टस्यापिग्रहण
कौ॰ ३० मिति।।कुमारीश्रमण कुमारश्रमण।।श्रमणाप्रव्रजिता।।कुलटागर्भिणीःतापसीदासीचंध
की।।अध्यायकाआभिरूपकापंडितपटु।मृडाकुशलाचपला।निपुणा।चतुष्पादोगर्भिण्या।च
तुष्पादाचिनःसुबंतागार्भिणीशब्देनसमस्यतेतत्पुरुषश्चसमासोभवतिगोगर्भिणीअजागर्भिणी
अतिरितिवक्तव्यं।इहमाभूत्।कालाक्षीगर्भिणी।।स्वस्तिमतीगर्भिणी।।
ब्राह्मणीगर्भिणी।।७।।मयुरव्यंसकादयश्च।।समुदायाएव।निपात्यंते।मयूरव्यं
॰रा॰ सकादयःशब्दासुसेरूपसंज्ञाभवंति।चेकारएवधारणार्थःपरममयुरव्यंसकइतिसमासांतं
नभवति।मयूरव्यंसकः।छत्रव्यंसकः।कांबोजमुंडः।यवनमुंडः।पचनमुंडः।पाचालनमुडःछदसि
हस्तेगृह्य।पादेयस्यालागूलेगृह्य।उद्दापा।एहीडादमोऽयपदार्थे।एहीडप्रहियवर्तते एहि
वाणिजायाक्रिया।आयेहिना।णिप्रएहिस्वागता।।अपहिस्वगता।प्रहिस्वागता।रान्टनृतविच
क्षणा।।उदपेसृजा।।उद्मविधामा।।उत्तमविरचा।।उत्पथात्एहिद्वितीया।।अयेहिद्वितीया
प्रोहकरटा।।अयोहकरटा।प्रोहकर्दमा।।प्रोहकर्दमाउद्धरचूडा।आहारचेला।।अहारवस
ना।।आहारापानिता।।उ॰॰ नियना।उच्चंचउन्नी।।चाचअ।चप्रांचानिश्चप्रचां
अकिंचनंसंकिंचनांस्तःसकालकः।शीला।स्थिरकाःभुक्तासुहिताप्राप्यपापीयानउत
त्वव्यकुक्काः॥निपत्तराहिर्ण॥।निरवाम्यश्यामाआयहिप्राणमाद्दहपंचमीइहद्वितीया

जहिलकर्म्मणा।बहुलमाभिक्ष्यकर्त्तारंच।भिद्धानिजहिजोडा।उजहिजोडस्तभःआख्यात
मख्योतेनाक्रिपासातत्से।आश्नीतपिबता।पचतभृज्ञातासादतमोदता।।खादतमोदतवमा
कौ॰ ३१ आहारनिचपा।।आवपनिकिरा।उप्तचविणाच।भिद्धिलवरणाः।।छिद्रविचक्षणा।पचलव
णा।पचप्रकूटाअचहितलक्षणास्तपुरुषोमयूरव्यंसकादिषुद्रष्टव्यः।। ।।इतिनपादिपविराचि
दशिनेक
एका धिकारणम्॥।एकादशो।स्पास्तीसेकदेशीअवयविनीतद्वाचिनसुबंतेनसहपूर्वापराधरो
त्तरशद्वाःसामर्थ्यादेकदेशवचनःसमस्यतेतत्पुरुषश्चसमासोभवति।।एकाधिकारणग्रहण
णमेद्रव्याकदेशिनोविशेषएकंचेदधिकारणमेकद्रव्यमेकदेशिभवतिषष्ठीसमासापवादो
उपयोगःपूर्वकायस्यपूर्वकायः।अपरकायः।आधरकायः।उत्तरकायः।एकदेशिनोवि
तिकिं।पूर्वनाभेःकायस्य।धिकारणइतिकिंपूर्वछत्राणममत्रय।कार्थमध्य।इइतिकिंसरव्यावि
धायपूर्वस्याङ्गस्येतिज्ञापकात्सर्वेणीकदेशशब्देनाङःसमासोभवति।।६।।
ऐकदेशिनैकाधिकारणवर्त्तसमप्राविभागेअर्धशद्वोनपुंसकमाविष्टलिंगत्वस्येदग्रहणं।।
आर्द्धमित्यतेतन्नपुंसकमेकदेशिनेकाधिकारणेनसहसमस्यतेतत्पुरुषश्चसमासोभवतिषष्ठी
समासापवादोययोगः।अर्द्धपिप्पल्याःअर्द्धपिप्पली।अर्द्धकोशातकनपुंसकमितिकिंद्वीन
सहसमस्यतेतत्पुरुषश्चसमासोभवतिषष्ठिसमासयावदोयगराः।ऐकदेशिनेयवअ

ईषणेद्विवदत्तस्य। देवदत्तेन सह समासो न भवति॥ एका। धिकारण इत्येच अर्द्धं पिप्पलीनां ॥५॥ ॥ द्वितीयतृतीय चतुर्थतुर्याण्यन्यतरस्यां॥ एकदेशिनैकाधिकरण इति। वर्त्तते

षष्ठी। समासापवादोयं पाणिनः अन्यतरस्याग्रहणात् तरस्यां सोपि भवति एकाधि पुराणे तिप्रतिषेधश्च त एवान्यतरस्यां ग्रहणा सामर्थ्यान्न प्रवर्त्तते। द्वितीय। दीनी शब्दरूप

णि एकदेशिनैकाधिकरणे न सह मन्यतरस्यां मसह समस्यते तत्पुरुषश्च समासो भवति

द्वितीयं भिक्षायाः द्वितीयभिक्षा। भिक्षा द्वितीयं वा॥ तृतीय भिक्षायाः तृतीयभिक्षा। भिक्षा

भिक्षातृतीयं वा। चतुर्थं भिक्षायाः चतुर्थतिक्षा भिक्षाचतुर्थं वा तुर्यं भिक्षायाः तुर्यतिक्षा॥

तिक्षातुर्यं वा॥ एकदेशिनैव द्वितीयं भिक्षाया भिक्षुकस्य एकाधिकरणे इत्येव। द्विती

यं भिक्षाणां॥५॥ ॥ प्राप्तापन्ने च द्वितीयया॥ एकदेशिनैकाधिकरण इति निवृत्त॥ समा

से प्राप्ते वचनमिदम्॥ विधानसामर्थ्याल्लोपि भवति प्राप्त आपन्न इत्येते द्वितीयां तेन सह स

मस्यते तत्पुरुषश्च समासो भवति। प्राप्तो। जीविकं॥ प्राप्तजीविकः जीविकां प्राप्त इति

वा॥ आपन्नो जीविकं॥ आपन्नजीविकः जीविकामापन्न इति वा॥५॥ ॥ कालाः परिमाणिना॥ प

रीमाणमस्यास्तीति परीमाणी तद्वाचिना। सुबन्तेन सह समर्थाः परीमाणवचनाः कालशब्दाः

समस्यन्ते। तत्पुरुषश्च समासो भवति षष्ठीसमासविषये योगारंभः मासो जातस्य मासजा

तः। संवत्सरजातः यहजाताः अहजातः अहजाता॥ ॥ नञ्॥ नञ् समर्थेन सुबन्तेन सह समस्य

ते तत्पुरुषश्च समासो भवति। अब्राह्मणः अष्टशालः न गो नालो पात्रिका अपचसि त्वं

जाल्मः॥५॥ ईषदकृता॥ ईषदित्ययं शब्द आकृदन्तेन तत्पुरुषश्चसमासो नसुपा सह समस्यते तत्पु

रुषश्च समासो भवति। ईषद्गुणवचनेनेति वक्तव्य ईषत्कडारः ईषत्पिंगलः। ईषद्विकटः ईषदुन्न

तः ईषत्पीतां ईषद्रक्तं। गुणवचनेनेति किं ईहतल्लवति। ईषगार्ग्यः॥५॥ ॥ षष्ठी॥ षष्ठ्यन्तं सु

बन्तं समर्थेन सुबन्तेन सह समस्यते तत्पुरुषश्च समासो भवति यज्ञः पुरुषो राजपुरुषः ब्राह्मणं

कंबलाः। कृद्योगा च षष्ठीसमस्यात इति वक्तव्यं। इध्मव्रश्चनः पलाशशातनः। कि

मर्थमिदमुच्यते। प्रतिपदविधाना षष्ठी न समस्यते इति वक्ष्यति तस्यायं पुरस्तादपकर्षः॥

॥५॥ याजकादिभिश्च॥ पूर्वेण समासः सिद्ध एव तस्य कर्त्तरि चेति षेधे प्राप्ते न वचनमिदं प्रति

प्रसवार्थं॥ याजकादिभिः सह समस्यते तत्पुरुषश्च समासो भवति। ब्राह्मणयाजकाः। क्षत्रिययाजकः याजकः पूजकः परिचारक परिवेषकः स्नातक अध्यापक उत्सादक उद्वर्त्तक होतृ पो

तृ भर्त्तृ रथगणक। पत्तिगणक। तत्स्थैश्च गुणैः षष्ठी समस्यत इति वक्तव्य चदनं गंधः कपि

त्थरसः गुणान्तरेण॥ तरस्य पश्चेति वक्तव्यं सर्वेषां श्वेततरः सर्वेषां श्वेतः सर्वेषां महत्तरः सर्व

महान्। न निर्धारणे इति षेधे प्राप्तेवचनमिदं सर्वशुक्ला गौः॥५॥ ॥ न निर्द्धारणे॥ पूर्वेण समासे

प्राप्ते प्रतिषेध आरभ्यते॥ निर्द्धारणे या षष्ठी सा न समस्यते जातिगुणक्रियाभिः समुदायादेक

शब्दस्य प्रथक्करणं निर्द्धारणं मनुष्याणां क्षत्रियः शूरतमः। कृष्णा गवां संपन्नक्षीरतमा।

कौ॰ ३२

धावत्र ध्यगानांशीघ्रतमः। प्रतिपदविधानच षष्ठीन समस्यतइति कृत्य। सपिषोज्ञान मधु
नोसतं॥ ७॥ ॥पूरणगुणं सुहितार्थसद्व्ययतव्यसमानाः॥ पूरणगुण सुहितार्थसत्। अव्ययतव्य
यतव्यसमानाधिकरण इत्येतैः सहषष्ठीनसमस्यते। अर्थशब्दाः प्रत्येकमाभिसंबध्यते। तत
स्वरूपविधिर्नभवति॥ पुराण॥ ७॥ छत्राणपंचमः छत्राणां दशमः गुणा॥ बालकयः शौक्लंक
कस्यकार्थ्यासुहितं। धर्मसवर्था। फलानामनृप्तः सन्। ब्राम्हणस्यकुर्वन्॥ ब्राम्हणस्यकुर्वाणः
अव्यय। ब्राम्हणस्य द्रष्टा ब्राम्हणस्य कृत्वा तव्यः कर्त्तव्यतव्यता सनुबंधकेन समासे। भ
वत्येवा॥ ब्रम्हणकर्त्तव्यं समानाधिकारण। मुकस्यमारविदन्य एशः पाटलिपुत्रस्य पाणिनेःकरा
स्या किंचस्यात्। पूर्वनिपातस्यानियमः स्यात्। अनेनए पानुप्राप्तौमतिषिद्धायं। विशेषणंविश
ष्यणे। तिभवत्येवसमासाः। पूर्वानिपातश्चतदानियोगविशेषणस्येवे॥ ७॥ ॥ क्तेनच
पूज्यायं॥ मतिबुद्धिपूज्यार्थभ्यश्चेतितस्यदयहणं पूजायहणनुपलक्षण। थैक्तोपाः पूजार्थ
विहितस्तेन षष्ठिनसनस्यते। राज्ञांमता राज्ञ बुद्ध एतापुजितः पूजापरोमानो। छात्रस्यहसि
तं छत्रहसितं॥ ७॥ ॥ आधिकरणवाचिनाच॥ क्ते। धिकरणेन ध्रौव्यगतिप्रत्यवसनार्थभ्य
इतिवक्ष्यति स्येदं ग्रहण आधिरणवाचिना क्तेनषष्ठीनसमस्यते। ईवमेषापातम॥ इदंप्रेषाभु
क्त॥ ७॥ कर्म्मणिच॥ क्तेनतिनिवृत्रं कर्मग्रहणं षष्ठीविशेषण कर्म्मणिचपाषष्ठीसानसमस्य

DR. BHAU DAJI MEMORIAL

कौ॰ २३

॥ पा ॥

तेउभयप्राप्तौकर्म्मणितिषष्ठ्याइदंग्रहणआश्चर्योगिवांदोहोअगोपालकेनएचतेमउदनस्य
भजिनंदेवदत्तन। साधुखलुपसाः पानदेवदत्तेन। विचित्रासुत्रस्यकृतिः पाणिनिना॥ ७॥
॥तृजकाभ्यां कर्त्तरि॥ कर्त्तृग्रहणंषष्ठीविशेषणं। कर्त्तरिपाषष्ठीसातृचा अकेनचसहनसमस्य
ते॥ भावतः शापिका। यचतआमिका। भवतोगोग्रामिका तृच कर्त्तरियं विधिधीपनेतप्रायोगेष
ष्ठीनास्तितस्मात् तृच् ग्रहणमुत्तरार्थं कर्त्तरि किं। ईक्षुभक्षिकांमधारयसि॥ ७॥ ॥कर्त्तरिच॥ ७॥
कर्त्तरिच॥ कर्त्तरिपौ अजकोता। पांसहषष्ठीनसमस्पते। समर्थ्यादकस्यविशषणा। थकर्तृग्रहणं
मितरतृव्य। भिचामावात् अयांब्रष्टाः पुराभेत्रा। वज्रस्यभर्त्ता ननुच भर्तृशब्दोद्यपंयाजकादिषुव्य
त। संबधिशब्दस्ययतिपार्थापस्यतत्र ग्रहणं अकः खल्वपिउदनस्यभोजकः। सत्रूनांवापकः॥ ७॥
॥नित्यंक्रीडाजीकयोः॥ नेतिनिवृत्ततृजकौ॥ नित्यंसमासोविधीयते। क्रीडापां जीविकायांचनित्यष
ष्ठीसमस्यतेतत्पुरुश्चसमासोभवति। तृच क्रीडाजीविकयोर्नास्ति। यकएवोदाहियते उद्दालकपु
ष्पभंजिका। वारणपुष्पप्रचायिका॥ जीविकायां॥ दंतलेखकोनखलेखकाः। क्रीडाजीविकयोरि
तिकिं। नुदनस्यभाजकः॥ ७॥ ॥कुगतिप्रादयः॥ नित्यमितिवर्त्तते। कुशब्दोव्ययंगृह्यते गह्यादिस्य
इचर्यात्। नद्रव्यवचनः। कुगतिप्रादायश्च समर्थेन शब्दांतरेण सह नित्यसमस्यते तत्पुरुषश्च समासोभ
वति। कुपापार्थे। कुपुनुषः। गति। करी कृत्या करीकृतं। यदूरीकरोति। प्रादयः दुर्निंदायां॥ स्वतिः स्व
तीपूजायां॥ सुपुरुषः अतिनुषः आडीषदर्थे। आपिंगलः प्राप्ति कंचेतदुपाधिवचनमन्यत्रापिहि

समसोदृश्यते। कोर्ध्वकदुष्यं। दुष्कृतंसंकृत सकृत। अतिसुतं। अवदुमिति। प्रादयोगताद्यर्थेप्रथ
मायाः॥ प्रगतः आचार्याः प्राचार्यः प्रान्तेवासी। अत्यादयः क्रान्ताद्यर्थे द्वितीयया। अतिक्रान्तः खट्वाम
तिखट्वः। अतिमालः। अवादयः क्रुष्टाद्यर्थे तृतीयया। अवकुष्टः कोकिलया अवकोकिलः। पर्यादय
ो ग्लानाद्यर्थे चतुर्थ्या। परीपानोऽध्यायनाय पर्यध्ययनः। अलंकुमार्यै अलंकुमारिः। निरादयः क्रान्ताद्यर्थे प
ञ्चम्या। निःक्रान्तः कौशाम्ब्याः निष्कौशाम्बिः। निर्वाराणसिः। इवेन। विन किलो पश्च पूर्वपदाद्दीर्घस्वरश्च
वक्तव्यं। वासासिवव। प्रादिप्रसंगे कर्मप्रवचनीयानां प्रतिषेधोवक्तव्यः। वृक्षं प्रति विद्योतते वि
द्युत्। साधुर्देवदत्तो मातरं प्रति॥ ५॥ ॥उपपदमतिङ्॥ उपपदमतिङन्तं समर्थेन शब्दान्तरे
ण सह समस्यते नित्यं तत्पुरुषश्च समासो भवति॥ कुम्भकारो नगरकारः। अतिङिति किं। धानाहा
रको व्रजति। सुप्सुपेति वर्त्तमाने तत्र कुरत्सिडाप्रप्रसंगः। ऐतन्न सपयाति। एतयोर्योगयोः
सुप्सुयेति न संबध्यते इति। प्राक्सुबुत्पत्तेः
तदुपपत्रं भवति॥ अश्वक्रीती धनक्रीती॥ ५॥ ॥अमैवाव्ययेन॥ पूर्वेण समासे सिद्धे नि
यमार्थवचनं। अव्ययेन। पपदस्य पः समासाः सोऽमैव नान्येन स्वादुंकारं भुंक्ते। संपन्नका
रं भुंक्ते। लवणकारं भुंक्ते। अमैवेति किं। कालसमयवेला सु तुमुन्। कालो भोक्तुं वक्तारकर
णमुपपदविशेषणार्थं अमैव यत्तुल्यविधानं उपपदं तस्य समासो यथा स्यात्। अमा चान्येन य
त्तुल्यविधानं तस्य मा भूत्। अग्रेभुक्त्वा। अग्रेभोजं॥ ५॥ ॥तृतीयाप्रभृतीन्यन्यतरस्यां॥ अम

मैवत्यनुवर्तते। उपदंशस्तृतीयायामित्यतः प्रभृति यान्युपपदानि तान्यमा अव्ययेन सह
न्यातरस्यां समस्यते तत्पुरुषश्च समासो भवति। उभयत्र विभाषेण। पदमैव तुल्यविधानमु
पपदं तस्य प्राप्ते यथा पदंशस्तृंमी पायांमिति। यत्पुनरमा चान्येन तुल्यविधानं तस्याप्राप्ते
यथा अव्यये यथाभिप्रेताख्याने कृञः क्त्वाणमुलाविति। मुलकोपदंशं भुंक्ते मूलकेनोपदं
शं भुंक्ते। उच्चैःकारमाचष्टे उच्चैःकारं अमैवेसेव। पार्यप्तिवचने श्वलंमर्थेषु पार्याप्तोभुभोक्तुं॥
॥ ५॥ ॥क्त्वा च॥ अमैवेति पूर्वयोगेनुवृत्ते नान्यत्र नप्राप्तेति वचनमारभ्यते क्त्वाप्रत्यय
[illegible]सह तृतीयाप्रभृतीन्युपपदानि अन्यतरस्यां समस्यते तत्पुरुषश्च समासो भवति। उच्चैः
कृत्य। उच्चैः कृत्वा। अव्यये यथा थाभिप्रेताख्याने इति क्त्वा प्रत्ययः। समासयक्षेल्पवेव। तृतीयाप्रभृ
तीनीत्येव। अलं कृत्वा॥ खलु कृत्वा॥ ५॥ ॥शेषो बहुव्रीहिः॥ उपयुक्तादन्यः शेषः। शेषसमासो
बहुव्रीहिसंज्ञो भवति कश्च शेषः यत्रान्यः समासेनोक्तः वक्ष्याति अनेकमन्यपदार्थे॥ चित्रगुः।
शबलगुः कृष्णोप्रएसंगाः। शेष इति किं। उन्मत्तगंगं। बहुव्रीहिप्रदेशाः। न बहुव्रीहाविसेवमा
दयः॥ ५॥ ॥अनेकमन्यपदार्थे॥ अनेकं सुबन्तं अन्यपदार्थे वर्त्तमानं समस्यते बहुव्रीहिश्च समा
सो भवति प्रथमार्थ ते कं वर्जं पित्वा सर्वेषु विभक्त्यर्थेषु बहुव्रीहिर्भवति। प्राप्तमुदकं यं ग्रामं प्राप्तो
दको ग्रामः। ऊढरथो। नद्वान् उपहृतपशुरुद्रः। उद्धृतौदाना स्थली। चित्रगुर्देवदत्तः। वीरपु
रुषको ग्रामः। प्रथमार्थे पुनः न भवति। वृष्टे देवे गतः अनेकग्रहणं किं। बहूनामपि पदार्थ

कौ।३४ स्यात्।सुक्ष्मजटकेशेनसुननातिनयासमा।बहुव्रीहिः समानाधिकरणनामितिवक्तव्यं।
व्याधिकरणनाभोभूत।पंचतिर्भुक्तमस्य।अव्ययानां चे।उच्चैर्मुखः सप्तम्युपमान पूर्वपदस्य
सपदलपश्चवक्तव्यः।कंठस्थितः कलोऽस्य कंठेकालः।उरसिलोमा।उष्ट्रस्य मुखमिवमुखं
यस्य उष्ट्रमुखः।खरमुखः समुदायविकारषष्ठ्याश्च बहुव्रीहिर्वक्तव्यः उत्तरपदलोपश्च तिव
क्तव्यं।केशानां समाहारश्चूडाऽस्य केशचूडः।सुवर्णस्य विकारोऽलंकारोऽस्य सुवर्णालंकारः।प्रा
दिभ्यो धातुजस्योत्तरपदस्य लोपश्च बाहुव्रीहिर्वक्तव्यः प्रपतितं पर्णं प्रपर्णः प्रपतितपलाशाः
प्रपलाशाः।प्रपलाशः।नञोऽस्त्यर्थानां बहुव्रीहिर्वाचोत्तरपदलोपश्च वक्तव्यः।अविद्यमानपुत्रः
अपुत्रः।अविद्यमानभार्यः।अभार्यः।सुबाधिकारेऽस्तिक्षीरादीनां बहुव्रीहिर्वक्तव्यः।अस्तिक्षीरा ब्राह्मणी
अस्त्यादयो निपाताः।छ।संख्ययाऽव्ययासन्नादूराधिकसंख्याःसंख्येये।संख्येयेया संख्या वर्त्त
तयासहाव्ययासन्नादूराधिकसंख्याः समस्यन्ते बहुव्रीहिश्च समासो भवति।अव्यय।उपदशाः उ
पविंशाः।आसन्नदशाः।आसन्नविंशाः अदूरदशाः अदूरविंशाः।अधिकदशाः अधिकविंशाः।स
ख्या।द्वित्राः।त्रिचतुराः।द्विदशाः संख्येय इति किं।पंच ब्राह्मणाः।अव्ययासन्नादूराधिकसंख्या इ
ति किं ब्राह्मणपंच।संख्येये इति किं आधिका विंशतिर्गवां।।छ।।दिङ्नामान्यन्तराले।।दिशां ना
मानि सुबंतानि अंतराले वाच्ये समस्यन्ते बहुव्रीहिश्च समासो भवति दक्षिणस्याश्च पूर्वस्याश्च दि
शो यदंतरालं दक्षिणपूर्वा दिक्।पूर्वा दिक उत्तरपश्चिम पश्चिमदक्षिणा।।सर्वनाम्नो वृत्तिमा

कौ०३५ त्रे पुंवद्भावः।नामग्रहणं रूढ्यर्थं।इह मा भूत्।ऐन्द्र्याश्च कौबेर्याश्च दिशो यदन्तरालं ऐन्द्रकौबेरं
लमिति।।छ।।तत्र तेनेदमिति सरूपे।।तत्रेति सप्तम्यंतं गृह्यते।।तेनेति तृतीयांतं तत्रेति सप्तम्यं
ते सरूपे तेनेति च।।तृतीयांते इदमिति एतस्मिन्नर्थे समस्यते बहुव्रीहिश्च समासो भवतीइ
तिवैकरणे स्ततश्चाद्विवक्षार्थात्किं मर्थमनुसारयति तत्रो ग्रहणं प्रहरणं कर्मव्यतिहारायु
सर्वे- द्धं च समासार्थइति करणं।लाभ्यां ते यर्त्तत्रेति निर्दिष्ट ग्रहणे चेत्प्रद्भवति पत्तेनेति निर्दिष्ट
प्रहरणं चेत्प्रभवति।पदिदमिति निर्दिष्टं युद्धं चेत्तभवति।केशेषु केशेषु च गृहीत्वेदं युद्ध
[crossed out]र्थइ विसर्गे प्रवृत्तं।केशाकेशि कचाकचि दंडैश्च दंडैश्च प्रहृत्य इदं युद्धं वृत्तं दंडा
दंडि मुशला मुशलि इच कर्मव्यतिहारे इति इच् समासांतः सच्चाव्ययं अन्येषामपि दृश्य
तां इति पूर्वपदस्य दीर्घत्वात् सनुपग्रहणं किं।हलैश्च मुशलैश्च प्रहृत्य इदं युद्धं वृत्तं।।छ।।तेन
सहेति तुल्ययोगे।।सहेत्येतच्छब्दस्तु तुल्ययोगे वर्तमानं तेनेति तृतीयांतेन सह समस्यते ब
हुव्रीहिश्च समासो भवति।सह पुत्रेणागतः सपुत्रः सच्छात्रः।सकर्मकरः।तुल्ययोग इति किं।
सहैव दशभिः पुत्रैर्भारं वहति गर्दभी।सत्स्वेव दशपुत्रेषु सैव भारस्य वाहिका।विद्यमानैरवबु
भिः पुत्रैर्भारं वहतीत्यर्थः।कथं सकर्मकः सलोमकः सपक्षक इति नह्यत्र तुल्ययोगो ग
म्यते।किं तर्हि विद्यमानता।।प्रायिकं तुल्ययोग इति विशेषणमन्यत्रापि समासो दृश्यते।।
।।छ।।चार्थे द्वंद्वः।।अनेकमिति वर्तते।।अनेकं सुबंतं चार्थे वर्तमाने समस्यते द्वंद्वसंज्ञश्च

समासोभवति। समुच्चयान्वाचयेतरेतरयोगसमाहारा। एश्चार्थाः। तत्र समुच्चय। नवाचययोरसमः
र्थ्यात्रास्तिसमासः इतरेतरसमाहारच विधायते वृक्षश्च न्यग्रोधश्च प्लक्षन्यग्रोधौ धवश्च
खदिरश्च कसमासे पूर्वप्रायोक्तव्य। पूर्वचचनं परप्रयोग निवृत्त्यर्थं। अनियमाहिस्यात् द्वि
तीया। कष्टश्रितः। तृतीया॥ शंकुलाखंडः॥ चतुर्थी। यूपादारु। पलाशश्च धवखदिरं पालाशं।
वाक्त्वचश्च वाक्त्वचं। वाग्दृषदं। द्वंद्वेचेत्सेच माहरयाः॥ ६॥ उपसर्जनं पूर्वं। समास इतिवर्त्त
ते। उपसर्जनसंज्ञकं समासे पूर्वंप्रायोक्तव्यं। पूर्वचचन परप्रायोग। निवृत्त्यर्थी अनियमाहि
स्यात् द्वितीया॥ कष्टाश्रितः॥ तृतिया॥ शंकुलाखडः। चतुर्थी यूपादरु। पमी॥ यूपादारु। प
चमी। वृकभयं। षष्ठी। ऐनपुरुष। सप्तमी अक्षौंडः॥ ६॥ राजदंतादिषु परं॥ पूर्वनिपामे
प्राप्ते परप्रयोगार्थं वचनं। राजदंतादिषु परमुपसर्जनं प्रयोक्तव्यं। नकेवलं मुपसर्जनस्य
अन्यास्यापि यथालक्षणं विहितस्य पूर्वनिपातस्य परनिपाते विभयहे। दंतानां राजा राजदंताः
वनस्या अग्रेवणं॥ निपातनादलुकु। एजदंतः। अग्रेवर्ण लिप्रवासितं नग्नमुषितं॥ सिक्तसंमृ
ष्टा भृष्टालुंचितं। अवक्लिन्नपक्वं। अपितोप्तां उप्तगाढं। पूर्वकालस्य परनिपातः उलूखलमुस
लदुलं किएव। द्रषदुपलं। अरोह्यप। निवध की॥ चित्ररथवाह्लिकं। अवसश्मकशूद्रा पी
स्नातकएजानै॥ विष्वनावसेनार्जुनो॥ आक्षिभ्रुवं। दारगवं शब्दार्थी॥ धर्माथो। कामार्था।
आनियमश्चात्रेष्यते। अर्थशाथो॥ अथधर्मौ अर्थकामौ। नयन्थवक्तव्यमिदं। धर्मार्थादिषु

भपमिति। वैभक्तारिकमतं गोजवाज। गोवालधानी॥ पूलीसकरडं। स्थुलपूलासंउरी
इवीजं तिक्ताश्चस्थं चित्रास्वाती। म। पीपती॥ जापालीदंपती। जापा शब्दस्य जंभावोदंभा
वश्च निपात्यते। पुत्रपतीपुत्रपशू। केशश्मश्रुकेणीः श्मश्रुकेशौ। शीऐवबीजं। सर्पिर्मधुनी।
मधुसमर्पिषो। आधांतौ॥ अतादिगुणं वृद्धी॥ वृद्धीगुणे॥ ६॥ द्वंद्वे घि॥ पूर्वमितिवर्त्तते द्वं
द्वसमासे घ्यंतं पूर्वप्रयोक्तव्य॥ पटगुप्तौ मृदुगुप्तौ॥ अनेकप्राप्तावेकत्र नियमः शेषेऽनियमः
पटुमृदुशुक्लाः॥ पटुशुक्लमृदवः द्वंद्व इतिकि निस्पष्टपदुः॥ ६॥ अजाद्यदंतं॥ द्वंद्व इतिवर्त्तते॥
अजाद्यदंतं शब्दरूपं द्वंद्वे समासे पूर्वप्रायोक्तव्यं॥ उष्ट्रशशं॥ बहुष्वनियमः। अश्वरथेंद्राः इंद्र
थाश्वाः॥ द्वंद्वे घ्यंताद्यदंतं विप्रतिषेधेन॥ इंद्राग्नी॥ इंद्रवायू॥ नपरकारण कि॥ अश्वापोषा वृ
षाश्वेई तिना॥ ६॥ अल्पाच्तरं॥ अल्पाच्तरं शब्दरूपं द्वंद्वे समासे पूर्वप्रयोक्तव्यं॥ कुक्षश्च न्य
ग्रोधोश्च। प्लक्षन्यग्रोधौ॥ धन्याश्वकरणं॥ बहुषनियमः शखदुंदुभिवीणाः॥ विणाशंखदुं
दुभयाः॥ शरत्तुनक्षत्राणामनुपूर्व्येण समानाक्षराणं॥ पूर्वनिपातो वक्तव्यः। हेमंतशिशिर
सनाः॥ चित्रास्वाति॥ कृत्तिकारोहिणपी॥ समानाक्षराणामिति किं॥ ग्रीष्मवसंतौ॥ लघ्व
क्षरं पूर्वं निपात्यं॥ दितिवक्तव्यं॥ कुशकाशः शरबीज॥ अभ्यर्हितं पूर्वंनिपातनीयमिति वक्तव्यं॥ माता
पितरौ॥ श्रद्धामेधो दीक्षातपसी॥ वर्णानामनुपुपूर्व्येण। पाता पूर्वनिपातः। ब्राह्मणक्षत्रि
यविट्शूद्राः॥ समानाक्षराणामित्यत्र नास्ति॥ आरश्चेज्यापमः॥ पूर्वमियातोवक्तेव्यः॥ पु

कौ॰ १८ धिष्ठिरार्जुनौ ॥ संख्याया अल्पीयस्याः पूर्वनिपातो वक्तव्यः ॥ द्वित्राः । त्रिचतुराः । नवती
रात्नं ॥ ६॥ ॥ सप्तमी विशेषणे ॥ चित्रगुः । शावलगु सर्वनाम संख्ययोरुपसंख्यानं ॥
सर्वश्वेतः । सर्वकृष्णः । द्विशुक्लः । द्विकृष्णः ॥ अनेयोरकत्र समसंप्रधारणीयापरत्वात्संख्या
याः पूर्वनिपातः ॥ द्वन्यः अन्यः ॥ वा प्रियस्य पूर्वनियताः ॥ प्रियगुडः गुडप्रियः प्रियगुडः ॥ सप्त
म्याः पूर्वनिपाते प्राप्त गुडनिपाः ॥ दिसः सप्तम्यंतं परं गुडकंद्वं ॥ गडु शिणः कथं चंहगुडः ॥ प्राप्त
स्याचाव धाध्यास्येपा ॥ ६॥ ॥ निष्ठा ॥ निष्ठांतं च बहुव्रीहिसमासे पूर्वं प्रयोक्तव्यं ॥ कृतकटः ॥ भि
क्षिताभिक्षः ॥ अवमुक्तोपानत्कः ॥ आहुतसुब्रह्मण्याः ॥ ननु च विशेषणमेव निष्ठा ॥ नैष नियमो वि
शेषणविशेष्यभावस्य विवक्षानिबंधनत्वात् ॥ कटेष्वानमनेनेतिवा विग्रहितव्यः ॥ निष्ठायाः पूर्वनि
पाते जातिकालसुखादिभ्यः परत्वं ॥ शार्ङ्गजग्धी पालंडुभक्षिती ॥ मासजाता संवत्सरजातः सुखजातः
दुःखजाताः कथं कृतकटः ॥ भुक्तोदनः ॥ प्राप्तस्य बाधा व्याख्येया ॥ ६॥ ॥ वाहिताग्न्यादिषु ॥
निष्ठेति पूर्वनिपाते प्राप्ते विकल्प उच्यते ॥ आहिताग्न्यादिषु निष्ठांतं पूर्वं प्रयोक्तव्यं ॥ आहिताग्निः ॥
अग्न्याहितः ॥ प्रहरणार्थेभ्यश्च परे निष्ठासप्तम्यौ भवत इति वक्तव्यं ॥ अस्युद्यतः ॥ दंडपाणीः ॥ क
थं गुप्तगराः उद्यतासिः ॥ प्राप्तस्य बाधा व्याख्येया ॥ आहिताग्निजातपुत्रः ॥ जातदंतः जातश्म
श्रुः ॥ तैलपीतः ॥ घृतपीतः ॥ ऊढभार्याः गतार्थः ॥ आकृतिगणश्चायं ॥ तेन गडुकंठप्रभृतं पदद्वैबद्र
ष्टव्याः ॥ ६॥ ॥ कडाराः कर्मधारये ॥ गुणशब्दानां विशेषणत्वात्पूर्वनिपाते विकल्प उच्यते

कौ॰ ७ कडारादयः शब्दाः कर्मधारये समासे वा पूर्वं प्रयोक्तव्याः ॥ कडारजैमिनिः ॥ जैमिनिकडारः ॥ गडुलका
णखंजकुंटखंडखलतिगौराः ॥ वृद्धभिक्षुकः ॥ पिंगलतनुवचराः ॥ कर्मधारय इति किं ॥ कडारपु
रुषो ग्रामः ॥ ॥ इति श्रीपादिक काशिकायां वृत्तौ द्वितीयस्याध्यायस्य द्वितीयः पादः ॥ ॥ अनभिहिते ॥ अ
नभिहित इत्ययमधिकारो वेदितव्यः यदित ऊर्ध्वमनुक्रमिष्यामो ऽनभिहित इत्येवं तद्वेदितव्यं ॥ अन
भिहिते अनुक्ते अनिर्दिष्टे कर्मादौ विभक्तिर्भवतीति ॥ अनभिहितेति तिङ्कृत्तद्धितसमासैः परिसंख्यानं ॥
वक्ष्यति कर्मणि द्वितीया कटं करोति ग्रामं गच्छति ॥ अनभिहित इति किं ॥ तिङ् क्रियते कटः ॥ कृत् कृ
तः कटः ॥ तद्धितः शतेन परिक्रीतः शात्यकः ॥ समासाः प्राप्तानुदकं ग्रामं प्राप्तोदको ग्रामः परिसंख्या
नं किं ॥ कटं करोति भीष्ममुदारं दर्शनीयं ॥ बहुषु बहुवचनमित्येवमादिनां संख्यावाच्यत्वेन विभ
क्तीनामुपादिष्टा तत्र विशेषणार्थमिदमारभ्यते अनभिहितकर्माद्याश्रये ष्वेकत्वादिषु द्वितीयपादयो
वेदितव्य इति ॥ ६॥ ॥ कर्मणि द्वितीया ॥ द्वितीयादयः शब्दाः पूर्वाचार्यैः सुपां त्रिकेषु स्मर्यंते रथात्र
व्यवहाराः कर्मणि कारके पासंख्या ॥ तत्र द्वितीया विभक्तिर्भवति ॥ कटं करोति ॥ ग्रामं गच्छति ॥ उभस
र्वतोः कार्याधिगुपर्यादिषु त्रिषु ॥ द्वितीयाम्रेडितांतेषु ततो ऽन्यत्रापि दृश्यते ॥ उभयतो ग्रामं सर्वतो
ग्रामं धिग्देवदत्तं ॥ उपर्युपरि ग्रामं ॥ अध्यधि ग्रामं ॥ अधो ऽधो ग्रामं ॥ अभितः परितः समया निकषा
हा प्रतियोगेषु च दृश्यते ॥ अभितो ग्रामं ॥ परितो ग्रामं समया ग्रामं ॥ निकषा ग्रामं ॥ हा देवदत्तं ॥ बुभु
क्षितं न प्रति भाति किंचित् ॥ ६॥ ॥ तृतीया च होश्छंदसि ॥ कर्मणा तिवर्तिते द्वितीयायां प्राप्तायां

तृतीया विधीयते चशब्दात् । सा च भवति । छंदसि विषये जुहोतेः कर्मणि तृतीया विभक्तिर्भवति द्वितीया
च । यवाग्वाग्निहोत्रं जुहोति यवागूमग्निहोत्रं जुहोति छंदसीति किं । यवागूमग्निहोत्रं जुहोति ॥६॥ ॥
अंतरांतरेणयुक्ते ॥ द्वितीया स्वर्यतेन तृतीया ॥ अंतरा अंतरेण शब्दौ । निपातौ साहचर्याद् गृह्येते ।
आभ्यां योगे द्वितीया विभक्तिर्भवति । षष्ठ्यपवादोऽयं योगः तत्र अंतराशब्दो मध्यमाधेयप्रधानमाचष्टे ।
अंतरेणशब्दस्तु तच्च विनार्थं च । अंतरा त्वां च मां च कमंडलुः । अंतरेण त्वां च मां च कमंडलुः । अंतरेण पुरुषकारं
न लभ्यते । युक्तग्रहणं किं । अंतरा तक्षशिलां च पाटलिपुत्रं च स्रुघ्नस्य प्राकारः ॥६॥ ॥कालाध्व
नोरत्यंतसंयोगे ॥ कालशब्देभ्योऽध्वशब्देभ्यश्च द्वितीया विभक्तिर्भवति अत्यंतसंयोगे गम्यमाने
। क्रियागुणद्रव्यैः साकल्येन कालाध्वनोः संबंधोऽत्यंतसंयोगः मासमधीते । संवत्सरमधीते । क्रोशं
योजनमधीते ॥ मासं कल्याणी । मासं गुडधानाः ॥ क्रोशमधीते ॥ योजनमधीते । क्रोशं कुटिला न
दी । क्रोशं पर्वतः योजनं पर्वतः ॥ अत्यंतसंयोग इति किं । मासस्य द्विरधीते क्रोशस्यैकदेशे पर्वतः ।
॥६॥ ॥अपवर्गे तृतीया ॥ कालाध्वनोः अत्यंतसंयोग इति वर्त्तते अपवर्गः फलप्राप्तौ सत्यां क्रियापरिस
माप्तिः अपवर्गे गम्यमाने कालाध्वनोरत्यंतसंयोगे तृतीया विभक्तिर्भवति । मासेनानुवाकोऽधीतः । सं
वत्सरेणानुवाकोऽधीतः । योजनेनानुवाकोऽधीतः अपवर्ग इति किं । क्रोशमधीतोऽनुवाकः समा
धीतः कर्त्तव्यावृत्तौ फलासिद्धेरभावात् तृतीया न भवति समाधीतोऽनुवाको न चानेन गृहीतः ॥६॥
॥सप्तमीपंचम्यौ कारकमध्ये ॥ कालाध्वनोरिति वर्त्तते । कारकयोर्मध्ये ये कालाध्वानौ ताभ्यां सप्तमी

पंचम्यौ विभक्ती भवतः अद्य भुक्त्वा देवदत्तो द्व्यहे भोक्ता द्व्यहाद्भोक्ता त्र्यहे भोक्ता त्र्यहाद्भोक्ता अत्र
र्दुशक्तोर्मध्ये कालाध्वनोरिति वर्त्तते ॥ कइहस्थोऽयमिष्वासः क्रोशे लक्ष्यं विध्यति क्रोशाल्लक्ष्यं वि
ध्यति क्रोशे लक्ष्यं विध्यति कर्तृकर्मणोः ॥ कारकयोः कर्मापादानयोः कर्माधिकरणयोर्वा मध्ये
॥ क्रोशः । सर्व्याख्यातानुदेशोऽनभ्यच्छ परिस्वजनात् ॥६॥ ॥कर्मप्रवचनीययुक्ते द्वितीया ॥ कर्मप्रवच
नीयैर्युक्ते द्वितीया विभक्तिर्भवति ॥ शाकल्यस्य संहितामनुप्रावर्षत् ॥ आगस्त्यमन्वसिंचत्प्रजाः ॥६॥ ॥
यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी ॥ कर्मप्रवचनीययुक्त इति वर्त्तते यस्मादधिकं यस्य
चेश्वरवचनं कर्मप्रवचनीयैर्युक्ते तत्र सप्तमी विभक्तिर्भवति । उप खार्यां द्रोणः । उप निष्के कार्षाप
णं । यस्य चेश्वरवचनमिति स्वस्वामिनोर्द्वयोरेव पर्यायेण सप्तमी विभक्तिर्भवति ॥ अधि ब्रह्मद
त्ते पंचालाः ॥ अधि पंचालेषु ब्रह्मदत्त इति ॥ द्वितीयावादो योगः ॥६॥ ॥पंचम्यपाङ्परिभिः ॥ अप
आङ् परि इत्येतैः कर्मप्रवचनीयैर्युक्ते पंचमी विभक्तिर्भवति अप त्रिगर्तेभ्यो वृष्टो देवः । अप पाटलिपुत्रा
द्वृष्टो देवः । परि त्रिगर्तेभ्यो वृष्टो देवः । अपेन साहचर्यात्परेर्वर्जनार्थस्येदं ग्रहणं । लक्षणादिषु न भव
ति । वृक्षं परि विद्योतते विद्युत् ॥६॥ ॥ प्रतिनिधिप्रतिदाने च यस्मात् ॥ मुख्यसदृशः प्रतिनिधिः दत्त
स्य प्रतिनिर्यातनं प्रतिदानं । यस्मात्प्रतिनिधिर्यतश्च प्रतिदानं तत्र कर्मप्रवचनीययुक्ते पंचमी विभ
क्तिर्भवति । अभिमन्युरर्जुनतः प्रति ॥ प्रद्युम्नो वासुदेवतः प्रति । माषानस्मै तिलेभ्यः प्रतियच्छति ॥ न
नु प्रत्यतिनिधिप्रतिदाने कर्मप्रवचनीययुक्ते । ननु यतः प्रतिनिदाने अंतरं स च धातुः । प्रयोग

स्त्रिव ॥५॥ ॥ गत्यर्थकर्म्मणि ॥ गत्यर्थानां धातूनां चेष्टाक्रियाणां च

कौ०३८ स्यंदाक्रियाणां कर्म्मणि कारके अध्वर्वर्जिते द्वितीयाचतुर्थ्यौ भवतः। ग्रामं गच्छति। ग्रामाय गच्छति। ग्रामं व्रजति। ग्रामाय व्रजति

गत्यर्थग्रहणं किं। ओदनं पचति। कर्म्मणीति किं। अश्वेन व्रजति। चेष्टायामिति किं। मनसा पाटलिपुत्रं

गच्छति। अनध्वनीति किं। अध्वानं गच्छति। आध्वान्यथ ग्रहणं। पंथानं गच्छति। मार्गं गच्छति। आस्थितप्राप्ते

पंथा। पथि शेयः। आस्थितः सम्प्राप्तः आक्रान्त उच्यते। यत्र उत्पथेन पंथानं गच्छति तत्र भवितव्यमेव

चतुर्थ्या। पथे गच्छतीति॥ द्वितीयाग्रहणं किं न चतुर्थ्येव विकल्प्येत। आयवादविपर्ययेपि यथा स्यात् ग्रामं।

ग्राम यं गता। कृधो गल्लक्षणा षष्ठि न भवति॥ ४॥ ॥ सम्प्रदाने कारके चतुर्थी वि

भक्तिर्भवति। उपाध्यायाय गां ददाति॥ माणवकाय भिक्षां ददा। तिदेवदत्ताय रोचते॥ पुष्पेभ्यः स्पृहय

तीत्यादि चतुर्थी विधाने तादर्थ्य उपसंख्यानं। यूपाय दारु। कुंडलाय हिरण्यं रंधनाय स्थाली॥ अव

हननाय उलूखलं ॥ मूत्राय कल्पते यवागूः। मूत्राय संपद्यते यवागूः

मूत्रः कपीशर्थ निर्दिर्शः। मूत्राय सम्पद्यते यवागूः। मूत्राय जायते यवागूः उत्पातेन ज्ञाप्यमानेन चतुर्थी

वक्तव्या। वाताय कपिला विद्युत्। आतपाय तिलोहिनी। पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेत्॥

हितयोगे चतुर्थी वक्तव्या। गोभ्यो हितं॥ अरोचनाय हितं॥५॥

॥क्रियार्थोपपदं यस्य सोऽयं क्रियार्थोपपदः तुमुन्ण्वुलौ क्रियायां क्रियार्थायां। भविष्यति मालक्षणे क्रियार्थोपप

दस्य स्थानिनोऽप्रयुज्यमानस्य धातोः कर्म्मणि कारके चतुर्थी विभक्तिर्भवति॥ द्वितीयापवादोयं

DR. BHAU DAJI MEMORIAL

कौ०३९ गः। एधेभ्यो व्रजति। पुष्पेभ्यो व्रजति॥ क्रियार्थोपपदस्येति किं। प्रविशन्तं पिण्डीं भक्षयस्व।

नी॥ ननु क्रियार्थोपपदः कर्म्मणीति किं एधेभ्यो व्रजति शकटेन॥ स्थानिन इति किं॥ एधानाहर्तुं

र्तुं व्रजति॥६॥ ॥तुमर्थाच्च भाववचनात्॥ तुमुना समानार्थस्तुमर्थः। तुमर्थात् भाववचनप्रत्ययात्

ययात् प्रतिपदिकाच्चतुर्थी विभक्तिर्भवति। भाववचनाश्चेति वक्ष्यति॥ तस्येदं ग्रहणं। पा

काय व्रजति। यागाय व्रजति॥ भूतये व्रजति। सम्पत्तये व्रजति। तुमर्थादिति किं। पाकस्यागारं

भाववचनादिति किं। कारको व्रजति॥७॥ नमः स्वस्ति॥ नमः स्वस्ति

स्वाहा स्वधालं वषड्योगे च चतुर्थी विभक्तिर्भवति। नमो देवेभ्यः। स्वस्ति प्रजाभ्यः। स्वाहाग्न

ये स्वधा पितृभ्यः अलं मल्लो मल्लाय। आलमिति पर्याप्त्यर्थ ग्रहणं प्रभुर्मल्लो मल्लाय शक्तो मल्लो

मल्लाय। वषडिन्द्राय। चकारः पुनरस्यैव समुच्चयार्थः। तेनाशीर्विवक्षायां परापि षष्ठी

बाधित्वा चतुर्थ्येव भवति स्वस्ति गोभ्यो भूयात् ब्राह्मणेभ्यः स्वस्ति ब्राह्मणेभ्यः॥८॥ ॥

।मन्यतेः कर्म्म मन्यकर्म्म मन्यकर्म्मणि प्राणिवर्जिते विभाषा चतुर्थी वि

भक्तिर्भवति अनादरे गम्यमाने। अनादरस्तिरस्कारः न त्वा तृणं मन्ये न त्वा तृणाय मन्ये न

त्वा तृणाय मन्ये। न त्वा तृणाय मन्ये। न त्वा बुसाय मन्ये न त्वा बुसाय मन्ये मन्यतिग्रहणं

किं। न त्वा तृणं चिन्तयामि विकरणनिर्देशः किमर्थः। न त्वा तृणं मन्वे। अनादर इति किं। अश्मा

नं दृषदं मन्ये मकष्ठमुलूखलं। अध्यायात् सुतं मन्ये मयस्यमाता न पश्यति। अप्राणिष्विति किं

नक्षा श्रगालं मन्ये। पदेतद प्राणिधिति एतदनादि बिति। वक्तव्य। व्यवास्थितविभाषाचनेप॥
नत्वामद्व्ये नावं मन्ये पावत्नीर्णतनाव्यंनत्वा अन्न मन्ये पावतभुक्तं श्राधंद्वं।प्राणिषु नभयो
नत्वा का क मन्ये॥नत्वाश्रगालं मन्येईह चतुर्थीद्वितीचभवति।नत्वा श्व।न मन्ये।नत्वाशुनेम
न्ये।युष्मदाः कस्मान्नभवति चतुर्थी।एतदपिहिमन्यतेः कर्म्माय ंच्छिन्नविभाषाविज्ञानदेवनभ
भवति॥७॥ ॥कर्तृकरणयोस्तृतीया॥ कर्तृरिकरणे च वक्ररथेतृतीया।विभक्तिर्भवति।दवस्ते
न कृत्तं। यज्ञदत्तेन भुक्त। काष्ठेणद्रात्रेण लुनाति। परशुनाछिनत्ति।तृतीया।विधाने प्रकृत्यादी
ना मुपसंख्यानं प्रकृत्याभिनुयः प्रकृत्यादश नियःप्रायेणा याज्ञिकाः।प्रायेण वैयाकरणः।गा
र्ग्यो।स्मिनगोत्रेण समेनधावति विषमेणधावति॥द्विद्रोणेन धान्यंक्रीरणति पचकेन भूनक्री
रणति।सहस्रेणयस्रनक्रीणाति।७॥ ॥सहयुक्तेऽप्रधाने॥ सहार्थेन युक्ते अप्रधाने तृया
विभक्तिर्भवति पुत्रेण सहगोमान आगमः पुत्रेण सह गोमान्।पितुरत्र क्रियादि सबंधः शब्देनो
च्यते पुत्रस्य नुप्रतियमान इतिसस्याप्राधान्यं सहार्थेन च योगे।विधानत्वर्थं। यप्रयोगेपिभव
ति।पुत्रेण सार्द्धमिति॥विनापि सहशब्देन भवति। वृद्धा यूने ति निदर्शनात्॥अप्रधानइति किं
शिष्येण सहोपाध्यायस्य गौः॥७॥ ॥येनांगविकारः॥ अंगशब्दः अंगसमुदाये शरीरे वर्त्त
येनेति च तद्वयवयोहेतुत्वेन निर्दिश्यते।येनांगेन विकृतेनांगिनो विकारो लक्ष्यते ततस्तृ
तीया विभक्तिर्भवति।अक्ष्णा काणः पादेन खंजः।पाणिना कुणिः।अवयवधर्म्मेण समुदायो व्यपदि

श्यते॥अंगविकारइति किं।।अक्षि काणमस्या।।७॥ ॥इत्थंभूतलक्षणे॥ कंचित्प्रकारं प्राप्त इ
त्थंभूतस्तस्य लक्षण मित्थंभूतलक्षणं ततस्तृतीया विभक्तिर्भवति॥अपि भवान् कमण्डलुना छा
त्रमद्राक्षित्।छत्रेण यध्यायो।शिखया परिव्राजकाः।इह न भवति कमण्डलुपाणिश्छात्रइतिलक्ष
णस्यसमासेंऽतर्भूतत्वात्इत्थंभूतइति किं।वृक्षं प्रति विद्योतनं॥७॥ ॥संज्ञोऽन्यतरस्यां कर्मणि॥
॥सपूर्वस्य जानातेः कर्म्मणि कारके द्वितीयायां प्राप्तायामन्यतरस्यां तृतीया विभक्तिर्भवति॥
पित्रा संजानीते॥पितरं संजानीते।मात्रा संजानीते॥मातरं संजानीते।।७॥ ॥हेतौ॥ फलसा
धनयोग्यः पदार्थो लोके हेतुरुच्यते॥तद्वाचिनस्तृतीया विभक्तिर्भवति॥धनेन कुलं
कन्यायाशोकः॥विद्यया यशः॥७॥अकर्तर्यृणे पंचमी॥हेतावितिवर्तते।कर्त्तवर्जितं य
दृणं हेतुस्तद्वाचिनः पंचमी विभक्तिर्भवति। शताद्बद्धः। सहस्राद्बद्धः।अ
कर्त्तरीति किं।शतेन बंधितः।शतमृणाचइवतिप्रयोजकत्वाच्च कर्तृसंज्ञः।।७॥ ॥विभाषा गु
णेऽस्त्रियां॥ हेतौ विति वर्तते।गुणे हेतावस्त्रीलिंगे विभाषा पंचमी विभक्तिर्भवति।जाड्याद्बद्धः।जा
ड्येन बद्धः।पांडित्यान्मुक्तः।पांडित्येन मुक्तः।गुणग्रहणं किं।धनेन कुलं।अ
स्त्रियामिति किं।बुद्ध्या मुक्तः॥७॥ ॥षष्ठी हेतुप्रयोगे॥ हेतुप्रयोगे हेतुशब्दस्य प्रयोगे हेतौ
द्योत्ये षष्ठी विभक्तिर्भवति॥अन्नस्य हेतोर्वसति॥७॥ ॥सर्वनाम्नस्तृतीया च॥ सर्वनाम्नो
हेतु शब्द प्रयोगे हेतौ द्योत्ये तृतीया विभक्तिर्भवति षष्ठी च पूर्वेण षष्ठ्यां प्राप्तायां।मिद

का॰ २०

मुच्यते। कस्य हेतोर्वसति। केन हेतुना वसति यस्य हेतोर्वसति येन हेतुना वसति निमित्तक
रणंहेतुषु सर्वासां प्रायदर्शनं। किं निमित्तं। वसति केन निमित्तेन वसति। कस्मै निमित्ताय वसति क
स्मान्निमित्ताद्वसति कस्य निमित्तस्य वसति। कस्मिन्निमित्ते वसति एवं कारणे प्युदाहार्यः अर्थ
ग्रहणं चैतत्। पर्यायापादानं तु स्वनुपविधिर्म्मा विज्ञापितेनेह। पिभवति॥ किं प्रायोजनं
वसति। केन प्रायोजनेन वसति। कस्मै प्रायोजनाय वसति कस्मात्प्रयोजनात् वसति कस्य प्रयो
जनस्य वति। कस्मिन् प्रायोजनेन वसति॥ ७॥ ॥अपादाने पञ्चमी॥ अपादानकारके॥ पञ्चमी
विभक्तिर्भवति। ग्रामादागच्छति पर्वतादावरोहति। वृकेभ्यो बिभेति। अध्ययनात्पराजयते। पं
चमी विधाने ल्यब्लोपे कर्म्मण्युपसंख्यानं। प्रासादमारुह्य प्रेक्षते प्रासादात्प्रेक्षते। अधिकरणे चोप
संख्यानं। आसने उपविश्य प्रेक्षते आसनात्प्रेक्षते। शयनात्प्रेक्षते। प्रश्नाख्यानयोश्च पञ्चमी व
क्तव्या॥ कुतो भवान् पाटलिपुत्रात् यतश्चाध्वकालनिर्माणं तत्र पञ्चमी वक्तव्या॥ गवधुमतः
सांकाश्यं चत्वारि योजनानि। कार्त्तिक्या आग्रहायणी मासे। तद्युक्तात्काले सप्तमी वक्तव्या। का
र्त्तिक्या आग्रहायणी मासे। अध्वनः प्रथमा सप्तमी च वक्तव्या। गवधुमतः सांकाश्यं चत्वा
रि योजनानि चतुर्षु योजनेषु वा॥ ७॥ ॥अन्यारादितरर्त्तेदिक्छब्दाञ्चूत्तरपदाजाहियुक्ते॥
अन्य आरात् इतर ऋते दिक्छब्द आञ्चूत्तरपद आच् आहि इत्येते योगे पञ्चमी विभक्तिर्भवति अन्य
इत्यर्थग्रहणं तेन पार्यायप्रयोगे भवति अन्यो देवदत्तात् भिन्नो देवदत्तात् अर्थान्तरं देवदत्ता

का॰ ९

त्॥ विलक्षणो देवदत्तात्॥ आराच्छब्दो दूरान्तिकयोर्वर्त्तते॥ तत्र दूरान्तिकार्थैः षष्ठ्यन्यतरस्यामि
ति प्राप्ते पञ्चमी विधीयते॥ आराद्देवदत्तात्। आराद्यज्ञदत्तात् इतरइति निर्दिश्यमानप्रतियोगिपद
र्थ उच्यते इतरो देवदत्तात्। ऋतेइति अव्ययं वर्ज्जनार्थे ऋते देवदत्तात्। ऋते यज्ञदत्तात् दिक्छब्द
पूर्वो ग्रामात्। उत्तरो ग्रामात्। पूर्वो ग्रीष्माद्वसन्तः उत्तरो ग्रीष्मात् संज्ञा दिक्छब्द इत्यत्र ग्रहणं देशका
लवृत्तिनापि दिक्छब्देन योगे यथा स्यात्। इभ रथाहि दिक्षु वर्त्तिष्यते स्यात् ईयमस्याः पूर्वा तिसु
स्मात्र इह तु न स्यात्। अपमस्मात्पूर्वैः कालः आञ्चूत्तरपदा प्राक् ग्रामात्॥ प्रत्यक् ग्रामात् न नु
चापमपि दिक्छब्द एव शब्दार्थप्राप्ते पेनेति वक्ष्यति न स्यात् यं पुरस्तादपकर्षः अचादक्षिणा ग्रामा
त् उत्तरा ग्रामात्। आहि दक्षिणाहि। दक्षिणाहि ग्रामात्। उत्तराहि ग्रामस्याव। पुरस्तात् ग्रामस्य
उपरि ग्रामस्य। एहि ग्रामात्स्यात॥ ७॥ ॥षष्ठ्यतसर्थप्रत्ययेन॥ दक्षिणोत्तराभ्यामतसुच् इति वक्ष्य
ति अतसर्थैर्न प्रत्ययेन युक्ते षष्ठी विभक्तिर्भवति दक्षिणतो ग्रामस्य। उत्तरतो ग्रामस्य। मु हि
ग्रामाते॥ ७॥ षष्ठ्यतसर्थप्रत्ययेन॥ दक्षिणोत्तराभ्यामतसुच् इति वक्ष्यति॥ अतसर्थेन प्रत्ययेन
सह युक्ते षष्ठी विभक्तिर्भवति॥ दक्षिणतो ग्रामस्य। उत्तरतो ग्रामस्य। पुरो ग्रामस्य पुरस्ता
त् ग्रामस्य उपरि ग्रामस्य। उपरिष्टाद् ग्रामस्य॥ ७॥ ॥एनपा द्वितीया॥ एनबन्यतरस्यामदूरे
रपंचम्या इति वक्ष्यति। तेन युक्ते द्वितीया विभक्तिर्भवति। पूर्वेण षष्ठ्या प्राप्तायामिदं वचन
दक्षिणेन ग्रामस्य। उत्तरेण ग्रामस्य षष्ठ्या। अपतो दक्षिणेन ग्राम। उत्तरेण ग्रामस्यातदर्थ योग

विभगः कर्त्तव्यः ॥ ६॥ ॥ पृथग्विनानानाभिस्तृतीयान्यतरस्याम् ॥ पंचमीग्रहणमनुवर्त्तते । प्र
थकु विनाना इत्येतैर्योगे तृतीया विभक्तिर्भवति अन्यतरस्यां पंचमी चाप्रथक् देवदत्तेन । प्रथक्
देवदत्तेरेवदत्तात् । विनादेवदत्तात् नाना देवदत्तेन नाना देवदत्तात् । पृथक् विना नाना
इति योगे विभागो द्वितीयार्थः । विना वातं विना वर्षं विद्युत्प्रपतनं विना । हस्तिदोषं कृतान्दोषा
न्केनेमो पतितौ द्रुमौ ॥ ॥ करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य ॥ ॥ स्तो
क अल्प कृच्छ्र कतिपय इत्येतेभ्योऽसत्त्ववचनेभ्यः करणे कारके अन्यतरस्यां तृतीयाभक्तिप्रचम्पश्च
स्ति विधियते तृतीयायां करण इत्येव सिद्धा पञ्चानु धर्ममात्रमकरणात पा विवक्ष्यते नेन द्रव्यवदा स्तो
कादीनामसत्त्ववचनस्तोकान्मुक्तः स्तोकेन मुक्तः अल्पान्मुक्तः अल्पेन मुक्तः कृच्छ्रान्मुक्तः कृ
च्छ्रेण मुक्तः कतिपयान्मुक्तः कतिपयेन मुक्तः असत्त्ववचनवचनस्येति किं स्तोकेन विषेण ह
तः अल्पेन मधुना मात्राः करण इति किं क्रियाविशेषणे कर्मणि माभूत स्तोकं पचति ॥५॥ दूरान्ति
कार्थैः षष्ठ्यन्यतरस्याम् ॥ पंचम्यानुवर्त्तते दूरान्तिकार्थैः शब्दैर्योगे षष्ठी विभक्तिर्भवत्यन्यतरस्यां पंच
मी च । दूरं ग्रामात् दूरं ग्रामस्य विप्रकृष्टं ग्रामात् विप्रकृष्टं ग्रामस्य अन्तिकं ग्रामस्य अन्तिकं
ग्रामस्य । अभ्याशं ग्रामात् अभ्याशं ग्रामस्यात् । अन्यतरस्यां ग्रहणं पंचम्यार्थ इतरथा हि तृतीया
यक्षेस्यात् ॥ ८॥ ॥ दूरान्तिकार्थेभ्यो द्वितीया च ॥ पंचम्यनुवर्त्तते । दूरान्तिकार्थेभ्यः शब्देभ्यो द्वि
तीया विभक्तिर्भवति पंचमी तृतीया समुच्चयते । दूरं ग्रामस्य । दूराद्ग्रामस्य दूरेण ग्रामस्यात् इति

यदि अर्थविधानं असत्त्वग्रहणं चानुवर्त्तते । सत्त्वशब्देभ्यो यथायथं विभक्तयो भवति । दूरः पथाः ।
दूराय पथे दहिदूरस्य पथस्या ॥ ६॥ ॥ सप्तम्यधिकरणे च ॥ सप्तमी विभक्तिर्भवत्याधिकरणे
कारके च कारा दूरान्तिकार्थेभ्यश्च कटे आस्ते । शकटे आस्ते दूरान्तिकार्थेभ्यः खल्वपि दूरे ग्रामस्य ।
अन्तिके ग्रामस्याद्दूर इति कार्थेभ्यश्चतस्रो विभक्तयो भवंति द्वितीया तृतीया पंचमी सप्तम्यः सप्तमी
विधानं कस्मै विषयस्य कर्मण्युपसंख्यानं ॥ आ । धीती व्याकरणे ॥ परिगणितीया ज्ञेके आम्नाती
छंदसि । सा साधुप्रयोगे च सप्तमी वक्तव्या ॥ साधुर्देवदत्तो मातरि असाधुः पितरि कारकार्हणा
चकारकत्वे सप्तमी वक्तव्या । ऋद्धेषु भुंजानेषु दरिद्रा आसते ब्राह्मणेषु तरत्सु वृषला आसते आक
रकार्हाणां च आकारकत्वे सप्तमी वक्तव्या । दरिद्रेष्वासीनेषु ऋद्धा भुंजते । वृषलेष्वासीनेषु
ब्राह्मणास्तरंति । तद्विपर्यासे च सप्तमी वक्तव्यः ॥ ऋद्धेष्वासीनेषु दरिद्रा भुंजते ॥ ब्राह्मणेष्वासीनेषु
वृषला स्तरंति ॥ निमित्तात्कर्मसंयोगे सप्तमी वक्तव्या ॥ चर्मणि द्वीपिनं हन्ति दंतयोर्हंति कुंजरं के
शेषु चमरीं हन्ति सीम्नि पुष्कलको हतः ॥ ६॥ ॥ यस्य च भावेन भावलक्षणम् ॥ सप्तमीवर्त्तते भावः क्रि
या यस्य च भावेन यस्य च क्रियया क्रियांतरं लक्ष्यते ततो भाववतः सप्तमी विभक्तिर्भवति प्रसिद्धा
चाक्रिया क्रियांतरं लक्ष्यति ॥ गोषु दुह्यमानासु गतः दुग्धास्वागतः अग्निषु हूयमानेषु गतः । हतेष्व
भावेन तति किं यो जटाभिः स भुंक्ते पुनर्भावग्रहणं किं यो भुंक्ते स देवदत्तः ॥ ६॥ षष्ठी चानादरे ॥ प्र
वेण सप्तम्याः प्राप्ता या षष्ठी विधीयते ॥ चकारात्स प्रभवति अनादरा धिके भावलक्षणे भावव

तः षष्ठीसप्तम्यौ विभक्ती भवतः। रुद्रतः प्राव्राजीत्। रुदति प्राव्राजीत्। क्रोशतः प्राव्राजीत्। क्रोशं
तमनादृत्य प्रव्रजितइत्यर्थः॥ ॥ ॥ स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च॥ षष्ठीस
कौ० २२ सम्यौ वर्त्तते॥ स्वामिनइश्वरअधिपतिदायादसाक्षिन्प्रतिभूप्रसूतइत्येतैर्योगे षष्ठीसप्तम्यौ विभ
क्ती भवतः। गवांस्वामी गोषु स्वामी। गवामीश्वरः गोष्वीश्वरः। गवामधिपतिः। गवां दायादाः गोषु दायादाः। ग
वां साक्षी गोषु साक्षी॥ गवां प्रतिभूः। गोषु प्रतिभूः। गवां प्रसूतः गोषु प्रसूतः। षष्ठ्यामेव प्राप्तायां प
क्षे सप्तमीविधानार्थं वचनं॥ ॥ ॥ आयुक्तकुशलाभ्यां चासेवायां॥ षष्ठीसप्तम्यौ वर्त्तेते। आ
युक्तो व्यापारितः कुशलः कटकरणस्य। कुशलः कटकारणे॥ आसेवायामिति किं आयुक्तो गौः
शकटे। ईषद्युक्तइत्यर्थः तत्र सप्तम्येवाधिकरणे भवति॥ ॥ यतश्च निर्द्धारणं॥ षष्ठीसप्तम्यौ वर्त्त
ते जातिगुणक्रियाभिः समुदायादेकदेशस्य पृथक्करणं निर्द्धारणं यतो निर्द्धारणं ततः षष्ठीस
प्तम्यौ विभक्ती भवतः। मनुष्याणां क्षत्रियः शूरतमः मनुष्येषु क्षत्रियः शूरतमः गवां कृष्णा संप
न्नक्षीरतमा। गोषु कृष्णा संपन्नक्षीरतमा॥ अध्वगानां धावन्तः शीघ्रतमाः। अध्वगेषु धावन्तः शीघ्र
तमा॥ ॥ पञ्चमी विभक्ते॥ यतश्च निर्द्धारणमिति वर्त्तते षष्ठीसप्तम्योरपवादो योगः। वि
भागो विभक्तं। यस्मिन् निर्द्धारणाश्रये विभक्तमस्ति ततः पञ्चमी विभक्तिर्भवति। माथुराः पाटलिपुत्रे
भ्यः सुकुमारतराः आढ्यतराः॥ ॥ साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः॥ साधुनिपुण
इत्येताभ्यां योगे अर्चायां गम्यमानायां सप्तमी विभक्तिर्भवति न चेत् प्रतिः प्रयुज्यते मा

कौ० २३ तरि साधुः पितरि साधुः। मातरि निपुणः॥ पितरि निपुणः नवचनं तत्संबुद्धिसंज्ञं भवति। हे पटो दे
वत्तस्य संबुद्धिप्रदेशाः एङ्ह्रस्वात् संबुद्धेरित्येवमादयः॥ ॥ षष्ठी शेषे॥ कर्त्रादिभ्यो ऽन्यः प्रातिपदिका
र्थव्यतिरिक्तः स्वस्वामिसम्बन्धादिः शेषः। अर्चायामिति किं। साधुर्भृत्यो राजस्तत्त्वकथने न वञ्चतीति॥ अप्रतेरिति किं। साधुर्देवदत्तो मा
तरं प्रति। अप्रत्यादिभिरिति वक्तव्यं। साधुर्देवदत्तो मातरं परि मातरं मनु॥ ॥ ॥ प्रसितोत्सुकाभ्यां तृतीया च॥ प्रसितउत्सुकइत्येताभ्यां योगे तृतीया विभक्तिर्भवति॥ चकारात् सप्तमी च। प्र
सिताः प्रसक्तो। यस्तत्रानिशं बद्धः स उच्यते केशैः प्रसितः केशेषु प्रसितः केशैरुत्सुकः॥ ॥ ॥ नक्षत्रे च
लुपि॥ तृतीयासप्तम्यावनुवर्त्तेते। लुबन्तान्नक्षत्रशब्दात्तृतीयासप्तम्यौ च। प्रातिपदिकार्थे विभ
क्ती भवतः पुष्येण पायसमश्नीयात्॥ मघाभिः पललौदनं मघासु पललौदनं। नक्षत्र इति किं।
पञ्चालेषु वसति। लुपीति किं। मघासु ग्रहः इह कस्मान्न भवति॥ आधाराधिकरणे इति
वर्त्तते वचनं तु पक्षे तृतीयाविधानार्थं॥ ॥ ॥ प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा॥
प्रातिपदिकार्थः सत्ता॥ लिङ्गं स्त्रीलिङ्गपुलिङ्गनपुंसकानि परिमाणं। द्रोणाः खारी आढकं वच
नमेकत्वद्वित्वबहुवचनानि मात्रशब्दः प्रत्येकमभिसंबध्यते प्रातिपदिकार्थलिङ्गपरिमाणवचन
मात्रे प्रथमा विभक्तिर्भवति॥ प्रातिपदिकार्थे। उच्चैः नीचैः। लिङ्गग्रहणं किं कुमारी वृक्षः कुण्डम
त्रापि प्रथमा स्यात् परिमाणग्रहणं किं द्रोणः खारी आढकमित्यत्रापि यथा स्यात्। वचनग्रहणं
किं। एकत्वादिषु प्रथमा स्यात्। एकः द्वौ॥ बहवः प्रातिपदिकग्रहणं किं। निपातस्यानर्थकस्यानर्थ

का॰ वृ॰ २
२२
कस्यप्रातिपदिकस्य मुक्तं। ततो पियस्याथस्यात प्रलंबते। अध्यागच्छति॥५॥ संबोधनेचा
आमि मुख्य करणं संबोधनं। तदापिके प्रातिपदिकार्थे प्रथमा न प्राप्नोइ तिवचनं मारभ्यते॥ सं
बोधने च प्रथमा विभक्तिर्भवति। हे देवदत्तो हे देवदत्तौ हे देवदत्ताः॥५॥ समंत्रितं॥ संबोध
ने प्रथमा लदंतं शब्दरूपमामंत्रितसंज्ञं भवति। तथावे चोदाहृतं। आमंत्रित प्रदेशाः आमंत्रित
प्रदेशा आमंत्रितं पूर्वमविधामानवत इत्येवमादयः॥५॥॥ सा वचनं सबुद्धि। आमंत्रितमथ
मायायदेकवचनं तत्संबुद्धिसंज्ञं भवति। हपटोदवत्त संबुद्धि प्रदेशाः। एङ्ह्रस्वात्संबुद्धेरित्येमा
वमादयाः॥५॥॥ षष्ठी शेषे कर्मादिभ्योऽन्यः प्रातिपदिकार्थव्यतिरिक्तस्वस्वामिसंबंधादिशेष
स्तत्र षष्ठी विभक्तिर्भवति। एञः पुरुषः। पशोः पादः। पितुः पुत्रः॥५॥ ज्ञो विदर्थस्य करणे॥ ज्ञा
नातेरविदर्थः। अथवा मिथ्याज्ञानवचनः। सर्पिषिरक्ताः प्रतिहतो वा चित्तभ्रांतदाम्नान। सर्वम
वग्राह्यं प्रतिपद्यते मिथ्याज्ञानमज्ञानमेव। अविदर्थस्येति किं। स्वरणपुत्रं जनाति॥५॥॥ अ
धीगर्थदयेशां कर्माणि शेष इति वर्त्तते। अधीगर्थाः स्मरणार्थाः दयदान गतिरक्षणेषु इष ऐश्वर्ये
एतेषां कर्माणि कारके शेषत्वेन विवक्षिते षष्ठी विभक्तिर्भवति। मानुरध्येति मातुः स्मरति स
र्पिषो दयते। मधुनो दयते। सर्पिष ईष्टे। मधुन ईष्टे। कर्माणीति किं मानुर्गुणैः स्मरति शेष इत्येव
मातरं स्मरति॥५॥॥ कृञः प्रतियत्ने॥ सतो गुणान्तराधानं प्रतियत्नः। करोते कर्माणीति किं मा
नुर्गुणैः स्मरति शेष इत्येव एधोदकस्यापस्कुरुते शत्रुपत्रस्योपस्कुरुते प्रतियत्न इति किं २३

करटक एति। कर्म्माणीति किं॥ एधोदकस्य स्कुरुते प्रज्ञाया शेष इत्येव॥ एधोदकमुपस्कुरुते॥५॥
रुजार्थानां भाववचनानामज्वरेः॥ रुजार्थानां भाववचनानां भावकर्तृकाणां ज्वरिवर्जितानां। कर्म
णि कारके शेषत्वेन विवक्षिते षष्ठी विभक्तिर्भवति। चोरस्य रुजति रोगः। चोरस्यामयति आमयः रु
जार्थानां। मिति किं। एति जीवंतमानेदोनरं वर्षशतादपि। जीवपुत्रक। मामे चतयासाहसमाचरः
भाववचनानामिति किं। नदीकूलानि रुजति। अज्वरेरिति किं चोरं ज्वरयति द्रुस अदरिसनाप्यारि
तिवक्ष्यां चोरसंतापपतिसातापः शेष इत्येव। चोरं रुजति रोगः॥५॥॥ आशिषिनाथः॥ नाथ्युना
थपाञ्चो पतापैश्वर्या। शीपुयज्यते। तस्याशीः क्रियस्य कर्म्माणि कारके षष्ठी विभक्तिर्भवति॥ सर्पिषो
नाथते। मधुनो नाथते॥ आशिषीति किं। माणवकमुपनाथति अंगपुत्रकाचीय॥५॥ जासिनिप्र
हणनाटक्राथपिषां हिंसायां॥ जासिनिप्रहणनाटक्राथपिष इत्येतेषां हिंसाक्रियाणां कर्माणि कारके षष्ठी विभक्तिर्भवति
जसु हिंसायां जसु ताडन इति चुरादौ पठ्यते तस्येदं ग्रहणं। नदैवादिकस्य जसु मोक्षण इत्यस्य। चौरस्योज्जासयति। वृषलस्योज्जा
सयति निप्रहण इति संघातविगृहीतविपर्यस्तग्रहणं। चौरस्य निप्रहंति। चौरस्य निहंति। चौरस्य प्रहंति। चौरस्य प्रणिहंति। चौर
स्योत्क्राडयति। वृषलस्योन्नाटयति। चौरस्य क्राथयति। वृषलस्य क्राथयति। निपातनाद्वृद्धिः। अयं घटादौ पठ्यते। अयक्रथ
क्रथ क्लथ हिंसार्था इति तत्र घटादयो मित इति ह्रस्वत्वस्यात्। चौरस्य पिनष्टि। वृषलस्य पिनष्टि। हिंसायामिति किं। धानाः पिन
ष्टि शेष इत्येव चौरमुज्जासयति। एषामिति किं। चौरं हिनस्ति। निप्रहरण इति किं। चौरं निहंति॥ व्यवहृपणोः समर्थयोः॥५॥

व्यव हृपणोस्तदर्थयोः समर्थयोः कर्म्मणि कारके। षष्ठिविभक्तिर्भवति। द्यूते क्रयविक्रयव्यवहारे च समानार्थत्वमनयोः। शतस्य व्यवहरति। सहस्रस्य व्यवहरति। शतस्य पणते। सहस्रस्य पणते। आयप्रत्ययः कस्मान्न भवति। स्तुत्यर्थस्य पणते रायप्रत्यय इष्यते। समर्थयोरिति किं। शलाकं व्यवहरति। ब्राह्मणान्पणायते स्तौतीत्यर्थः। शेषत्वेन। शतं पणते। दिवस्तदर्थस्य। व्यवहृपणोः समार्थस्य दीव्यते। कर्म्मणि षष्ठि विभक्तिर्भवति। शतस्य दीव्यति। सहस्रस्य दीव्यति। तदर्थस्येति किं। ब्राह्मणं दीव्यति। योगविभाग उत्तरार्थः। विभाषोपसर्गे। दिवस्तदर्थस्येति। नित्यं षष्ठ्यां प्राप्तायां सोपसर्गस्य विकल्प्यते। उपसर्गे सति दिवः। कर्मणि कारके विभाषा षष्ठि विभक्तिर्भवति। शतस्य प्रतिदीव्यति। सहस्रस्य प्रतिदीव्यति। शतं प्रतिदीव्यति। सहस्रं प्रतिदीव्यति। उपसर्गस्येति किं। शतस्य दीव्यति। तदर्थस्येत्येव। शलाकां प्रतिदीव्यति। द्वितीया ब्राह्मणे। ब्राह्मणविषये प्रयोगे दिवस्तदर्थस्य कर्म्मणि कारके द्वितीया विभक्तिर्भवति। ग्रामस्य तदहः सभायां दीव्येयुः अनुपसर्गस्य षष्ठ्यां प्राप्तायां इदं वचनं सोपसर्गस्य तु छंदसि व्यवस्थितविभाषयापि सिद्ध्यति। प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने। प्रेष्य इति इष्यते दैवादिकस्य लोटो मध्यमपुरुषस्यैकवचनां तस्माद्भवयाति। ब्रुतिरपि तद्विषय एव गृह्यते। प्रेष्यब्रुवोर्हविषः कर्मणः षष्ठिविभक्तिर्भवति। देवतासंप्रदाने सति। अग्नये छागस्य हविषो वपाया मेदसः प्रेष्य। अग्नये छागस्य हविषो वपाया मेदसोनुब्रूहि। प्रेष्यब्रुवोरिति किं। अग्नये छागं हविर्वपां मेदो जुहुधि। हविष इति किं। अग्नये गोमयान् प्रेष्य। देवतासंप्रदान इति किं। माणवकाय पुरोडाशं प्रेष्य। हविषः प्रस्थितस्य प्रतिषेधो वक्तव्यः। इंद्राग्निभ्यां छागं हविर्वपां मेदः प्रस्थितं प्रेष्य। चतुर्थ्यर्थे बहुलं छंदसि। छंदसि विषये चतुर्थ्यर्थे षष्ठिविभक्तिर्भवति बहुलं। पुरुषमृगश्चंद्रमसः। पुरुषमृगश्चंद्रमसे। गोधा कालका दार्वाघाटस्ते वनस्पतीनां। ते वनस्पतिभ्यः। बहुलग्रहणं किं। कृष्णो रात्र्यै। हिमवतो हस्ती। षष्ठ्यर्थे चतुर्थी वक्तव्या। या खर्वेण पिबति तस्यै खर्वो जायते। ३।

Dr. BHAU DAJI MEMORIAL

पादतो धावति तस्यै स्रामदन। यान्स्नाति यो अप्सु स्नाति तस्यै उदकमृत्युः। यान्त्वक्ते तस्यै काणः। याभ्यंक्ते तस्यै दुश्चर्मा। या प्रलिखति तस्यै खलतिः अपमारी। या आंक्ते तस्यै काणः। यजेश्च करणे। यजेर्धातोः करणे कारके छंदसि बहुलं षष्ठिविभक्तिर्भवति। घृतस्य यजते। घृतेन यजते। सोमस्य यजते। सोमेन यजते। कृत्वोर्थप्रयोगे काले अधिकरणे। छंदसि बहुलमिति निवृत्तं। कृत्वोर्थानां प्रत्ययानां प्रयोगे काले अधिकरणे षष्ठी विभक्तिर्भवति पंचकृत्वो ह्नो भुंक्ते द्विरह्नो धीते। कृत्वोर्थग्रहणं किं। अह्नि सेते। प्रयोगग्रहणं किं। अहनि भुक्ते गम्यते हि द्विरिति कृत्वसुचेति तत्प्रयुज्यमाने भवति। कालग्रहणं किं। द्विः कांस्यपात्र्यां भुंक्ते। अधिकरण इति किं। द्विरह्ना भुंक्ते। शतरत्नेन द्विरह्न्या धीते। कर्तृकर्मणोः कृति। कृत्प्रयोगे कर्तरि कर्म्मणि च षष्ठी विभक्तिर्भवति। भवतः शायिका। भवत आसिका। कर्म्मणि। अपां स्रष्टा। पुरां भेत्ता। वज्रस्य भर्ता। कर्तृकर्म्मणोरिति किं। शस्त्रेण भेत्ता। कृतीति किं। तद्धितप्रयोगे मा भूत्। कृतपूर्वी कटं। भुक्तपूर्वी ओदनं। शेष इति निवृत्तं। पुनः कर्मग्रहणात्। इतरथा हि। कर्तरि च कृतीति ब्रूयात्। उभयप्राप्तौ कर्म्मणि। पूर्वेण षष्ठ्यां प्राप्तायां नियम्यते। उभयप्राप्ताविति बहुव्रीहिः। उभयोः प्राप्तिर्यस्मिन् कृति सोयमुभयप्राप्तिः तत्र कर्म्मण्येव षष्ठी विभक्तिर्भवति न कर्तरि। आश्चर्यो गवां दोहो गोपालकेन। रोचते मे ओदनस्य भोजनं देवदत्तेन। साधु खलु पयसः पानं यज्ञदत्तेन। बहुव्रीहिविज्ञानादिह न भवति। आश्चर्यमिदमोदनस्य पाको ब्राह्मणानां च प्रादुर्भाव इति। अकाकारयोः प्रयोगे नेति वक्तव्यं भेदिका देवदत्तस्य काष्ठानां। चिकीर्षा देवदत्तस्य कटस्य। शेषे विभाषा। अकाकारयोः स्त्रीप्रत्यययोर्ग्रहणात् तदपेक्षया शेषः स्त्रीप्रत्यय एव गृह्यते। विचित्रा जगतः कृतिः पाणिनेः पाणिनिना। केचिद्विशेषेणैव विभाषामिच्छंति। शब्दानामनुशासनमाचार्येण आचार्यस्येति वा। क्तस्य च वर्तमाने। नलोकाव्ययनिष्ठेति प्रतिषेधे प्राप्ते पुनः षष्ठी विधीयते। क्तस्य वर्तमानकालविहितस्य प्रयोगे षष्ठि विभक्तिर्भवति। राज्ञां मतः। राज्ञां बुद्धः। राज्ञां पूजितः। क्तस्येति किं। ओदनं पचमानः। वर्तमान इति किं। ग्रामं गतः। नपुंसके भाव उपसंख्यानं। छात्रस्य हसितं। मयूरस्य नृत्तं। कोकिलस्य व्याहृतं। शेषविज्ञानात्सिद्धं। तथा च कर्तृविवक्षायां तृतीयापि भवति। छात्रेण हसितमिति। अधिकरणवाचिनश्च। क्तोधिकरणे चेति वक्ष्यति तस्य प्रयोगे षष्ठी विभक्तिर्भवति। अयमपि प्रतिषेधापवादो योगः। इदमेषामासितं। इदमेषां

पितं। इदमहेः सप्तं। इदनुन कपेयासिं। इदमेषांभुक्तं। इदमेषामाशितं। द्विकर्मकाणां प्रयोगे कर्तरी कालिद्वयोरपि षष्टिद्वितीया च न्
नेताश्वस्य ग्रामस्य चैत्रः। अन्ये प्रधाने कर्मण्याहुः। नेतानेताश्वस्य ग्रामं चैत्रः॥ न लोकाव्ययनिष्ठाखलर्थतृनां॥ कर्तृकर्मणोः कृती
ति षष्टिप्राप्ता प्रतिषेध्यते लउउक। अव्ययनिष्ठा। खलर्थतृन्। इत्येतेषां प्रयोगे षष्टिविभक्तिर्न भवति। लः शतृशानचौ। कानकस्
कि किनौ च। ल उंते। ओदनं पचन्। ओदनं पचमानः। ओदनं पेचानः। ओदनं पेचिवान्। षष्टिः सोमं दधृगिः। उ कटं चिकीर्षुः। ओदनं बुभुक्षुः। कन्यामलं
करिष्णुः। इष्णुचोपि प्रयोगे निषेधः। उक। आगामुकं वाराणसीं रक्ष आहुः। उकप्रतिषेधे कमेर्भाषायामप्रतिषेधः। दास्याः कामुकः इष
त्याः। कामुकः। अव्यय। कटं कृत्वा। ओदनं भुक्त्वा। अव्ययप्रतिषेधे तोसुन् कसुनोरप्रतिषेधः। पुरा सूर्यस्योदेतोराधेयः। पुरा क्रूरस्य विसृपो
विरप्शिन्। निष्ठा ओदनं भुक्तवान्। देवदत्तेन कृतं। खलर्थ ईषत्करः। कटो भवता। ईषत्पानः। सोमो भवता। तृन्निति प्रत्याहारग्रहणं। लटः शतृ
शानचावित्यारभ्य आ तृनो नकारात्। तेन शानन्। चानश्। शतृ तृन्नामपि प्रतिषेधो भवति। सोमं पवमानः। नडमाघ्नानः। अधीयन् पाण्य
णं। कर्ता कटान्। वदिता जनापवादान्। द्विषः शतुर्वावचनं। चौरं द्विषन्। चौरस्य द्विषन्। अकेनोर्भविष्यदाधमर्ण्ययोः। अकस्य भविष्यति का
ले विहितस्य इनस्तु भविष्यति आधमर्ण्ये च विहितस्य प्रयोगे षष्टिविभक्तिर्न भवति। कटं कारको व्रजति। ओदनं भोजको व्रजति। इनः खल्वपि
ग्रामं गमी। ग्रामं गमी। आधमर्ण्ये शतं दायी। सहस्रं दायी। भविष्यदायी भविष्यदाधारणा परोरिति किं। यवानां लावकः। सक्तूनां पायकः। अ
वश्यंकारी कटस्य। इह कस्मान्न भवति। वर्षशतस्य पूरकः। पुत्रपौत्राणां दर्शक इति। भविष्यदधिकारे विहितस्याकस्येदं ग्रहणं॥ कृत्यानां कर्त
रि वा॥ कर्तृकर्मणोः कृतीति नित्यं षष्टिप्राप्ता कर्तरि विकल्प्यते। कृत्यानां प्रयोगे कर्तरि वा षष्टिविभक्तिर्भवति न कर्मणि। भवता कटः कर्तव्यः। भवतः
कटः कर्तव्यः। कर्तरीति किं। गेयो माणवकः साम्नां। उभयप्राप्तौ कृत्ये षष्ठ्याः प्रतिषेधो वक्तव्यः। नेतव्या ग्रामं शाखा देवदत्तेन। नेतव्या ग्राममजा
देवदत्तेन॥ तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्यां॥ तुल्यार्थैः शब्दैर्योगे तृतीया विभक्तिर्भवति। अन्यतरस्यां पक्षे षष्ठी च। तुलोपमा
शब्दौ वर्जयित्वा शेषे विषये तृतीयाविधानात् न यमुक्ते षष्ठ्येव भवति। तुल्यो देवदत्तेन। तुल्यो देवदत्तस्य। सदृशो देवदत्तेन। सदृशो
देवदत्तस्य। अतुलोपमाभ्यामिति किं। तुला देवदत्तस्य नास्ति। उपमा कृष्णस्य न विद्यते। योगे वर्तमाने अन्यतरस्यां ग्रहणमुत्तरसूत्रे

तस्य चकारेणानुकर्षणार्थं इतरथा हि तृतीयानुकृष्येत॥ चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः॥ आशिषि गम्यमानायां।
आयुष्य। मद्र। भद्र। कुशल। सुख। अर्थ। हि। इत्येतैर्योगे चतुर्थी विभक्तिर्भवति। चकारो विकल्पानुकर्षणार्थः। शेषे चतुर्थीविधानात् यामुक्ते
षष्ठीविभक्तिर्भवति। अत्रायुष्यादीनां पर्यायग्रहणं कर्तव्यं। आयुष्यं देवदत्ताय भूयात्। आयुष्यं देवदत्तस्य भूयात्। चिरंजीवितं देवदत्ताय दे
वदत्तस्य वा भूयात्। मद्रं देवदत्ताय भूयात्। मद्रं देवदत्तस्य। भद्रं देवदत्ताय। भद्रं देवदत्तस्य। कुशलं देवदत्ताय। कुशलं देवदत्तस्य। निरामयं देवद
त्त निरामयं देवदत्तस्य। सुखं देवदत्ताय। सुखं देवदत्तस्य। शं देवदत्ताय। शं देवदत्तस्य। अर्थो देवदत्ताय। अर्थो देवदत्तस्य। प्रयोजनं देवद
त्ताय। प्रयोजनं देवदत्तस्य। हितं देवदत्ताय। हितं देवदत्तस्य। पथ्यं देवदत्ताय। पथ्यं देवदत्तस्य। आशिषीति किं॥ आयुष्यं देवदत्तस्य तप०॥ इति
जयादित्यकृतायां वृत्तौ द्वितीयस्याध्यायस्य तृतीयः पादः॥ ॥ द्विगुरेकवचनं॥ द्विगुः समासः एकवचनं भवति। एकस्य वचनमेकवचनं
एकस्यार्थस्य वाचको भवतीत्यर्थः। तदनेन प्रकारेण द्विगोरर्थस्यैकवद्भावो विधीयते। द्व्यर्थ एकवद्भवतीति। समाहारद्विगोश्चेदं ग्रहणं नान्य
स्य। पंचकपालाः समाहृताः पंचपूली दशपूली। अर्थस्यैकत्वात् सुप्रयोगेप्येकवचनं भवति। पंचपूलीयं शोभनेति। द्वंद्वश्च प्राणितूर्यसे
नांगानां। एकवचनमिति वर्तते। अंगशब्दस्य प्रत्येकं परिसमाप्यते। त्रीणि वाक्यानि संपद्यंते। प्राण्यंगानां द्वंद्व एकवद्भवति। तूर्यांगानां
सेनांगानां च। प्राण्यंगानां तावत् पाणिपादं। शिरोग्रीवं। तूर्यांगानां मार्दंगिकपाणविकं। वीणावादकपरिवादकं। सेनांगानां। रथिका
श्वारोहं। रथिकपादातं। हस्त्यश्वादिषु परत्वाद् द्वंद्वविभाषयैव भवितव्यं। इतरेतरयोगे समाहारे च द्वंद्वो विहितः। तत्र समाहारस्यैकत्वा
ल्लिङ्गमेवैकवचनं। इदं तु प्रकरणं विषयविभागार्थं। प्राण्यंगादीनां समाहार एव द्वंद्वः। दधिपयआदीनामितरेतरयोगस्य। वृक्षमृगादीना
मुभयत्रेति। अनुवादे चरणानां॥ चरणशब्दः शाखानिमित्तकः पुरुषेषु वर्तते। चरणानां द्वंद्व एकवद्भवति अनुवादे गम्यमाने। प्र
माणांतरावगतस्यार्थस्य शब्देन संकीर्तनमात्रमनुवादः। उदगात् कठकालापं प्रत्यष्ठात् कठकौथुमं कठकालापादिना यदि प्रमाणांतरावगतं
माणांतरावगते पदार्थे पुनः शब्देनानूद्यते तदैतदुदाहरणं। यदा तु प्रथमोपदेशस्तत्र प्रत्युदाहरणं। अनुवाद इति किं। उदगुः कठका

लापाः। स्थेणगेरयतन्यां चेतिवक्तव्यं। स्थेणगेरितिकिं। अनंदिः। दक्काश्वाः। अपलन्याइतिकिं उधंतिकदकाश्वाः
अध्वर्युर्नैयस्यक्रतोर्विधानंसो ध्वर्युक्रतुः अध्वर्युक्रतु वाचिनांशब्दानामनपुंसकलिंगानांद्वंद्वएकवद्भवति। अध्व
र्कक्रतुरनपुंसकंद्वंद्वइतिगोण्णोनिर्देशः। अर्कश्वमेधं। सान्हातिरात्रं। अध्वर्युक्रतुरितिकिं। इषुवज्रौ। उदगिद्वलभिदौ। अनपुंसकइति
किं। राजसूयवाजपेये। इदकस्मान्नभवति। दर्शपौर्णमासौ। क्रतुशब्दः सौमयज्ञेषुरूढः। अध्ययनतोऽविप्रकृष्टाख्यानां। अध्ययनेन
निमित्तेनयेषामाविप्रकृष्टाप्रत्यासत्त्राआख्यातेषांद्वंद्वः एकवद्भवति पदकक्रमकं। क्रमकवार्तिकं। संपाठः। वाशनं। नोक्रमस्यप्रत्यासत्त्रः।
अध्ययनतइतिकिं। पितापुत्रौ। अविप्रकृष्टाख्यानामितिकिं। याज्ञिकवैयाकरणौ। जातिरप्राणिनां। अप्राणिनांजातिवाचिनांशब्दा
नांद्वंद्वएकवद्भवति प्राणिनोवर्जयित्वा। आराशस्त्रि धाना शष्कुलि। जातिरितिकिं। नंदकपांचजन्यौ अप्राणिनामितिकिं। ब्राह्मणक्षत्रिय
विट्शूद्राः नजिवद्युक्तन्यायेनद्रव्यजातीयानामयमेकवद्भावोनगुणक्रियाजातीनां रूपरसगंधस्पर्शाः गमनाकुंचनप्रसारणानि। जातिपरत्वे
चजातिशब्दानामयमेकवद्भावोननियतद्रव्यविवक्षायां। इहकुंडेबदरामलकानितिष्ठंति। विशिष्टलिंगोनदीदेशोऽग्रामाः। विशिष्टलिंग
नांभिन्नलिंगानांनदीवाचीनांशब्दानांदेशवाचीनांचग्रामवर्जितानांद्वंद्वएकवद्भवति। नचयपयोर्द्वंद्वोनदीत्युच्यते देशावयवदेशः। नदी
देशवाचीनांइत्यसमासनिर्देशएवायं दध्यश्वादएवातीव उभयेएयपति। गंगाशोणं। देशः खल्वपि। कुरवश्चकुरुक्षेत्रंचकुरुकुरुक्षेत्रं कुरु
जांगलं। विशिष्टलिंगइतिकिं। गंगायमुने। मद्रकेकयाः। नदीदेशइतिकिं। कुक्कुटमयूरौ। अग्रामाइतिकिं। जांबवश्चशालूकिनीच। जांबव
शालूकीन्यौ। नदीग्रहणं। नदेशत्वात्। जनपदोहिदेशः। तथाचपर्वतानांग्रहणंनभवति। कैलासश्चगंधमादनंचकैलासगंधमादने। अग्रामा
इति। अभनगराणांप्रतिषेधोवक्तव्यः। इहमाभूत। मथुराचपाटलिपुत्रंचमथुरापाटलीपुत्रं उभयतश्चग्रामाणां। प्रतिषेधोवक्तव्यः। शौर्यंचनगरं
केतवतंचग्रामः। शौर्यकेतवते। क्षुद्रजंतवः। अपरिचितपरिमाणः। क्षुद्रः। क्षुद्रजंतुवाचिनांद्वंद्वः एकवद्भवते। दंशमशकं। यूकालिक्षं
क्षुद्रजंतवइतिकिं। ब्राह्मणक्षत्रियौ। क्षुद्रजंतुरनुस्थिः स्यादथवा क्षुद्रएवयः। शतेवाप्रसृतौयेषां। केचिदानकुलादपि। आनकुलादपि।
तीयमेवस्मृतिः प्रमाणमितरामांतद्विरोधात्। येषांचविरोधःशाश्वतिकः। विरोधोवैरंशाश्वतिकोनित्यः। एषांशाश्वतिकोविरोध

स्तद्वाचीनांशब्दानांद्वंद्वएकवद्भवति। मार्जारमूषकं। श्वशृगालं। अहिनकुलं। शाश्वतिकं। गोपालिशालं। कायनाः। कलहायंते। च
कारः। पुनरस्यैवसमुच्चयार्थः। तेनपशुशकुनिद्वंद्वविरोधिनामनेननित्यमेकवद्भावोभवति। अश्वमहिषं काकोलूकं। शूद्राणामनिर
वसितानां। निरवसानंबहिः। करणंकुतोबहिः। करणंभावात्। येर्भुक्ते। पात्रंसंस्कारेणापिनशुध्यति तेनिरवसिताः। ननिरवसिताः
अपिरवसिताः। अनिरवसिताः अनिरवसितशूद्रवाचीनांशब्दानांद्वंद्वएकवद्भवति। तक्षायस्कारं। रजकतंतुवायं। अनिरवसितानामिति
किं। चंडालमृतपाः। गवाश्वप्रभृतीनि च। गवाश्वप्रभृतीनिकृतैकवद्भावानिद्वंद्वरूपाणिसाधूनिभवंति। गवाश्वं। गवाविकं। गवैडकं। अ
जाविकं। अजैडकं। कुब्जवामनं। कुब्जकैरातकं। पुत्रपौत्रं। श्वचंडालं। स्त्रीकुमारं। दासीदासं। कुटीकुटं। भागवतीभागवतं। गवाश्वप्रभृतिषु
योपरितंद्वंद्ववत्तं रूपांतरेत्वनायंविधिर्भवति। गोश्वं गोश्वौ। पशुद्वंद्वविभाषेवभवति। विभाषावृक्षमृगतृणधान्यव्यंजन पशुश
कुन्यश्ववडवपूर्वापराधरोत्तराणां। वृक्षमृगतृणधानायंजनपशुशकुनि अश्ववडवपूर्वापर अधरोत्तर। इत्येतेषांद्वंद्वे विभाषैकवद्भवति। प्लक्ष
न्यग्रोधं। प्लक्षन्यग्रोधाः रुरुपृषतं रुरुपृषताः। कुशकाशं। कुशकाशाः। व्रीहियवं। व्रीहियवाः। दधिघृतं। दधिघृते। गोमहिषं। गोमहिषाः। ति
त्तिरिकपिंजलं। तित्तिरिकपिंजलाः। अश्ववडवं। अश्ववडवौ। पूर्वापरं। पूर्वापरे। अधरोत्तरं। अधरोत्तरे। बहुप्रकृतिः। फलसेनावनस्पतिमृग
शकुनिक्षुद्रजंतुधान्यतृणानां। एषांबहुप्रकृतिरेवद्वंद्वएकवद्भवति। नद्विप्रकृतिः। बदरामलके। रथिकाश्वारोहौ। प्लक्षन्यग्रोधौ। रुरुपृषतौ।
हंसचक्रवाकौ। यूकालिक्षे। व्रीहियवौ। कुशकाशौ। विप्रतिषिद्धंचानधिकरणवाचि। परस्परविरुद्धं विप्रतिषिद्धं विप्रतिषिद्धार्थानांशब्दानां
अनधिकरणवाचीनां अद्रव्यवाचीनांद्वंद्वएकवद्भवति। विभाषानुकर्षणार्थश्चकारः शीतोष्णं शीतोष्णे। सुखदुःखं। सुखदुःखे। जीवितमरणं।
जीवितमरणे। विप्रतिषिद्धमितिकिं। कामक्रोधौ। अनधिकरणवाचीतिकिं। शीतोष्णेउदके। नदधिपयआदीनि। यथायथमेकवद्भावेप्राप्ते
प्रतिषेधआरभ्यते दधिपयआदीनिशब्दरूपाणिनैकवद्भवंति। दधिपयसी। सर्पिर्मधुनी। मधुसर्पिषी। ब्रह्मप्रजापती। शिववैश्रवणौ
स्कंदविशाखौ। परिव्राट्कौशिकौ। प्रवर्ग्योपसदौ। शुक्लकृष्णे। इध्माबर्हिषी। निपातनाद्दीर्घः। दीक्षातपसी। श्रद्धातपसी। मेधातपसी। अध्ययनत
पसी। उलूखलमुसले। आद्यवसाने। श्रद्धामेधे। ऋक्सामे। वाङ्मनसे। अधिकरणैतावत्त्वे च। नेतिवर्तते। अधिकरणंवर्तिपदार्थः। तस्मिन्नेत

स्यार्थस्याधारः। तस्येसावयवेपरिमाणम्यमाने। द्वंद्वोनेकवद्भवति। यथायथमेकवद्भावा भवन्ति। प्रतिषिध्यते। दशदंतोष्टाः। दशनाद्यंगीकपाण
विकाः। विभाषासमीपे। अधिकरणैतावत्वस्य समीपेविभाषा द्वंद्व एकवद्भवति। उपदशंदंतोष्टं उपदशो दंतोष्टः। उपदशनाद्यंगिकपाणि
विकं। उपदशामाद्यंगिकपाणविकाः। अव्ययस्य सख्यया अव्ययीभावोपि विहितो बहुव्रीहिरपि। तत्रैकवद्भाव पक्षे अव्ययीभावो। नुप्रयुज्यते
इतरत्र बहुव्रीहिः। नपुंसकं। यस्यायमेकवद्भावो विहितः स नपुंसकलिंगमिति लिंगो भवति। द्विगुर्द्वंद्वश्च। पंचगवं। दशगवं। द्वंद्वः खल्वपि
पाणिपादं। शिरोग्रीवा। परलिंगतया वा दोषगः। अकारांतोत्र। यदोद्विगुः स्त्रियां भाष्यते। पंचपूली। दशपूली। पंचरथी। दशरथी। यावस्तेः
स्त्रियामिष्टः। पंचषट्वं। पंचषट्वी। अनोनलोपश्च वा च द्विगुः स्त्रियां। पंचतक्षं। पंचतक्षी। पात्रादिभ्यः प्रतिषेधो वक्तव्यः। पंचपात्रं। चतुर्युगं। त्रि
भुवनं। अव्ययीभावश्च। अव्ययीभावश्च समासो नपुंसकलिंगो भवति। अधिस्त्री। उपकुमारी। उन्मत्तगंगं। पूर्वपदार्थप्रधानस्यालिंगतैव
प्राप्ता। अन्यपदार्थप्रधानस्याभिधेयवल्लिंगमतइदमुच्यते। अनुक्तसमुच्चयार्थश्चकारः। पुण्यसुदिनाभ्यामह्नः क्लीबतेष्यते। पुण्याहं। सुदिनाहं।
पथः संख्याव्ययादेः क्लीबतेष्यते। त्रिपथं। चतुःपथं। सुपथं। क्रियाविशेषणानां च क्लीबतेष्यते। तत्पुरुषोऽनञ्कर्मधारयाः। तत्पुरुषोऽनञ्क
र्मधारयः। अधिकारोपथं। चतुःपथं। विपथं। सुपथं। क्रियाविशेषणानां च क्लीबतेष्यते। तत्पुरुषेत्यत्र स्वरसूत्रे प्रतिष्ठते। नञ्समासं कर्मधारयं
च वर्जयित्वा अन्यस्तत्पुरुषो नपुंसकलिंगो भवतीत्येतदधिकृतं वेदितव्यं। यदितत्र ध्वंमनुक्रमिष्यामः। वक्ष्यति। विभाषा सेनासुरेति। ब्राह्मण
सेनं। ब्राह्मणसेना। तत्पुरुष इति किं। दृढसेनो राजा। अनञिति किं। असेना। अकर्मधारय इति किं। परमसेना। संज्ञायां कंथोशीनरेषु।
संज्ञायां विषये कंथांतस्तत्पुरुषो नपुंसकलिंगो भवति सा चेत् कंथा उशीनरेषु भवति। सौशमिकंथं। आह्वरकंथं। संज्ञायामिति किं। वीरण
कंथा। उशीनरेष्विति किं। दाक्षिकंथा। परवल्लिंगता पवादप्रकरणं। उपज्ञोपक्रमं तदाद्याचिख्यासायां। उपज्ञायत इत्युपज्ञा। उपक्रम्यत
इत्युपक्रमः। उपज्ञा च उपक्रमश्च उपज्ञोपक्रमं। तत्तदंतस्तत्पुरुषो नपुंसकलिंगो भवति। तदाद्याचिख्यासायां। तयोरुपज्ञोपक्रमयोरादे
राचिख्यासायां गम्यमानायां। अख्यातुमिच्छा आचिख्यासा। यकृपज्ञेयस्योपक्रमस्याद्यस्यादिरख्यातुमिष्यते। तत एकवद्भवति। पाणि
न्युपज्ञमकालकं व्याकरणं पाणिनेरुपज्ञातेन प्रथमतः। प्रणीतमकालकं व्याकरणं। व्याडुपज्ञं दुष्करणं। आढ्योपक्रमं प्रासादः। नंदोपक्रमा

णि विभाषानि। दर्शनीयोपक्रमं सुकुमारं। उपज्ञोपक्रममिति किं। वाल्मीकिश्लोकाः। तदाद्याचिख्यासायामिति किं। देवदत्तोपज्ञो रथः
यज्ञदत्तोपक्रमो रथः। छाया बाहुल्ये। विभाषासेनासुराछायेति विभाषा वक्ष्यति नित्यार्थमिदं वचनं। छायांतस्तत्पुरुषो नपुंसकलिंगो
भवति। बाहुल्ये गम्यमाने। पूर्वपदार्थधर्मो बाहुल्यं शलभादीनां। दिक्बहुत्वं गम्यते। शलभच्छायं। इक्षुच्छायं। बाहुल्य इति किं। कुड्यच्छाया।
सभा राजाऽमनुष्यपूर्वा। सभांतस्तत्पुरुषो नपुंसकलिंगो भवति। सा चेत् सभा राजपूर्वा अमनुष्यपूर्वा च भवति। इनसभं। ईश्वरसभं। इह कस्मा
न्न भवति। राजसभा। पर्यायवचनस्यैवेष्यते। तद्धुक्तं पर्यायवचनस्यैव राजाद्यर्थमिति। अमनुष्यपूर्वा। रक्षःसभं पिशाचसभं। इह कस्मान्न
भवति। काष्ठसभा। अमनुष्यशब्दो रूढिरूपेण। रक्षःपिशाचादिष्वेव वर्तते। राजामनुष्यपूर्वेति किं। देवदत्तसभा। अशाला च। आशाला च या
सभा तदंतस्तत्पुरुषो नपुंसकलिंगो भवति। संघातवचनोत्र सभाशब्दो गृह्यते। स्त्रीसभं। दासीसंघात इत्यर्थः। अशालेति किं। अनाथसभा।
अनाथकुटीत्यर्थः। विभाषा सेना। सुराच्छायाशालानिशानां। सेनासुराच्छायाशालानिशा इत्येवमंतस्तत्पुरुषो नपुंसकलिंगो भवति वि
भाषा। ब्राह्मणसेनं ब्राह्मणसेना। यवसुरं यवसुरा। कुड्यच्छायं कुड्यच्छाया। गोशालं गोशाला। श्वनिशं श्वनिशा। परवल्लिंगं द्वंद्वतत्पुरुष
योः। समाहारद्वंद्वेन पुंसकलिंगस्य विहितत्वात्। इतरेतरयोगद्वंद्वस्येदं ग्रहणं। परस्य पदस्य लिंगं तत्र भवति द्वंद्वस्य तत्पुरुषस्य च। उत्तरपदलिंगं द्वंद्व
तत्पुरुषयोर्विधीयते। कुक्कुटमयूर्याविमे। मयूरीकुक्कुटाविमौ। तत्पुरुषस्य। अर्धं पिप्पल्याः। अर्धपिप्पली। अर्धकोशातकी। अर्धनखरजनी।
द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वक्तव्यः। द्विगुः पंचसु कपालेषु संस्कृतः। पंचकपालः। प्राप्तो जीविकां प्राप्तजीविकः। आपन्नो
जीविकां। आपन्नजीविकः। अलंपूर्वः। अलं कुमार्यै अलंकुमारिः। गतिसमासः। निष्क्रांतः कौशांब्याः निष्कौशांबिः। पूर्ववदश्ववडवौ।
अश्ववडवयोर्विभाषयैकवद्भाव उक्तः तत्रैकवद्भावादन्यत्र परवल्लिंगतायां प्राप्तायामिदमारभ्यते। अश्ववडवयोः पूर्ववल्लिंगं भवति। अ
श्वश्च वडवा चाश्ववडवौ। अयातिदेशश्चायं न निपातनं तत्र द्विवचनमतंत्रं वचनांतरेपि पूर्ववल्लिंगता भवति। अश्ववडवान्। अ
श्ववडवैरिति। हेमंतशिशिरावहोरात्रे च छंदसि। पूर्ववदिति वर्तते। हेमंतशिशिरौ अहोरात्रे इत्येतयोः छंदसि विषये पूर्ववल्लिंगं

भवति। हेमंतशिशिरौ वत्सलांप्राणामि। अहोरात्र इदं श्रमः। परवल्लिंगता यथाहोयोगः। अर्थातिदेशश्चायं न निपातनं तेन द्विवचन मतंत्रं
वचनांतरेपि पूर्ववल्लिंगता भवति। पूर्वपक्षाश्विनपः अपरपक्षांसायु एषांअहोरात्राणिकथा परवल्लिंगता यथाहोयोगः। अर्थातिदेशेन छंदसीतिकिं।
उभेहेमंतशिशिरे। अहोरात्राविमौपुण्येछंदसिलिंगव्यत्ययउक्तः। तस्यैवायंप्रपंचः॥ [illegible] कृतलवनासानां निर्देशः। रात्र्यन्त अहर
न्तेतेपुंसितथावंते। परवल्लिंगतयास्त्रीनपुंसकयोः प्राप्तयोरिदंवचनं। द्विरात्रः त्रिरात्रश्चतूरात्रः। पूर्वाह्णः। अपराह्णः। मध्याह्नः। द्व्यहः। त्र्यहः। अनु
वाकादयः पुंसीतिवक्तव्यं। अनुवाकः। शंयुवाकः। सूक्तवाकः। अपथं नपुंसकं। अपथशब्दो नपुंसकलिंगो भवति। अपथमिदं। अपथानिगाह
तेमूलः। इहकस्मान्नभवति। अपथोदेशो। पथानगरे तत्पुरुष इतिवर्तते। अर्द्धर्चाः पुंसि च। अर्द्धर्चादयः शब्दाः पुंसिनपुंसके च भाष्यंते। शब्द
स्येयाचेयाद्विलिंगता काचिद्विभेदेनापि व्यवमिष्यते। यथापद्मशंखशब्दौ निधिवचनौ पुंलिंगौ। जलजे उभयलिंगौ। भूतशब्दः। पिशाचे उभ
यलिंगः। क्रियाशब्दस्याभिधेयवल्लिंगं सैंधवशब्दो लवणेन भयलिंगः। यौगिकस्याभिधेयवल्लिंगं। सारशब्द उत्कर्षे पुंलिंगो न्यायादनपेते नपुंस
कं नैतत्सारमिति। धर्मइत्यपूर्वे पुंलिंगः तत्साधने नपुंसकं तानिधर्माणिप्रथमान्यासन्। अर्द्धर्चः। गोमयः। कषायः। कार्षापणः। कुतपः। कपाटः।
शंख। यूथ। यूष। ध्वज कबंध। पद्म। गृह। सरक। कंस। दिवस। यूप। अंधकार। दंड। कमंडलु। मंड। भूत। द्वीप। द्यूत। चक्र। धर्म। कर्मद। मोदक। शतमान।
यान। नख। चरण। पुच्छ। दाडिम। हिम। रजत। सक्तु। पिधान। पात्र। घृत। सैंधव। औषध। आढक। चषक। द्रोण। खलीन। पात्रीव। षष्टिक। वारबाण।
प्रोथ। कपित्थ। शुष्क। शील। शुल्व। सीधु। कवच। रेणु। कपट। सीकर। मुसल। सुवर्ण। यूप। चमस। वर्ण। क्षीर। कर्ष। आकाश। अष्टापद। मंगल। निधन।
निर्यास। जृंभ। वृंत। पुस्त। बुस्त। क्ष्वेडित। शृंग। शृंखल। मधु। मूल। मूलक। शराव। शाल। वप्र। विमान। मुखमुख। प्रग्रीव। शूल। वज्र। कर्पट। शिखर।
कल्क। नाह। मस्तक। वलय। कुसुम। तृण। पंक। कुंडल। किरीट। अर्बुद। अंकुश। तिमिर। आश्रम। भूषण। इष्वास। मुकुल। वसंत। तडाग। पिटक।
विटंक। माष। कोश। फलक। दिन। दैवत। पिनाक। समर। स्थाणु। अनीक। उपवास। शाक। कर्पास। चषाल। खंड। दर। बल। मल। मृणाल। हस्तसूत्र।
तांडव। गांडीव। मंडप। पटह। सौध। पार्श्व। शरीर। फल। छल। पुर। राष्ट्र। विम्ब। अम्बर। कुट्टिम। मंडल। ककुद। तोमर। तोरण। मंचक। पुंख। मध्य। बाल।
वाल्मीक। वर्ष। वस्त्र। देह। उद्यान। उद्योग। स्नेह। स्वर। संगम। निष्क। क्षेम। शूक। छत्र। पवित्र। यौवन। पालक। मूषिक। मंडल। वल्कल। कुंज। विहा

र। लोहित। विषाण। भवन। अरण्य। पुलिन। दृढ। आसन। ऐरावत। शूर्प। तीर्थ। लोमश। तमाल। लोह। दंडक। शपथ। प्रतिसर। धनुस्। मान
तंक। वितंक। मव। सहस्र। ओदन। प्रवाल। शकट। अपराह्ण। नीड। शकल। अर्द्धर्चादिः॥ [illegible] अदेशः कथनं
अन्वादेशो ऽनुकथन। इदम अन्वादेशविषयस्य अशादेशो भवत्यनुदात्तस्तृतीयादौ विभक्तौ परतः। आभ्यां छात्राभ्यां रात्रिरधीता। अथोआभ्यामह
रप्यधीतं। अस्मैछात्राय कंबलं देहि अथो अस्मै शाटकमपि देहि। अस्यछात्रस्यशोभनं शीलं। अथो अस्य प्रभूतं स्वं। आ शब्दे वचनं साकांक्ष्य
इमकाभ्यां छात्राभ्यां रात्रिरधीता। अथो आभ्यामहरप्यधीतं नेह पश्चादुच्चारणमात्रमन्वादेशः। किंतर्हि एकस्यैवाभिधेयस्य पूर्वशब्देन प्रतिपा
दितस्य द्वितीयो प्रतिपादनमन्वादेशः तेनेह न भवति। देवदत्तं भोजय इमं च यज्ञदत्तमिति। एतदस्त्रतसोस्त्रतसौ चानुदात्तौ। अन्वादेशेऽशनुदात्त
इत्यनुवर्तते। एतद अन्वादेशविषयस्य अशादेशो भवति अनुदात्तस्त्रतसोः परतः। तौ चापि त्रतसावनुदात्तौ भवतः। एतस्मिन्ग्रामे सुखं
वसामः। अथो अत्र युक्ता अधीमहे। एतस्मात् छात्रात् छंदोऽधीष्व अथो अतो व्याकरणमप्यधीष्व। सन्निपातं परं भवति। एतदो अशि आदेशे लब्धे
पुनर्वचनमनुदात्तार्थं। द्वितीयाटौस्स्वेनः। अन्वादेशेऽनुदात्त इति च वर्तते। द्वितीयायाटौसि च परत इदमेतदोरन्वादेशविषययोरेनादे
श आदेशो भवति अनुदात्तः। इदसो मंडूकप्लुतन्यायेनानुवृत्तिः। इमं छात्रं छंदोऽध्यापय अथो एनं व्याकरणमध्यापय। अनेन छात्रेण रात्रिरधि
ता। अथो एनेनाहरप्यधीतं। अनयोः छात्रयोः शोभनं शीलं। अथो एनयोः प्रभूतं स्वं। एतदस्त्वपि। एतं छात्रं छंदोऽध्यापय अथो एनं व्या
करणमप्यध्यापय। एतेन छात्रेण रात्रिरधीता। अथो एनेनाहरप्यधीतं। एतयोः छात्रयोः शोभनं शीलं। अथो एनयोः प्रभूतं स्वं। एनदि
ति नपुंसके एकवचने वक्तव्यं। प्रक्षाल्यैनत्। परिवर्त्यैनत्। इह कस्मान्न भवति अयं दंडो हरानेन। एवमातंकितं विधायाशिपयाकिंचित्
विधापर्यायांतरेण पुनरनुदुपदिश्यते सो अन्वादेशः। इह तु वस्तुनिर्देशमात्रे लक्षणपूर्वमेव विधानं॥ आर्द्धधातुके॥ आर्द्धधातुके इत्यधि
कारोऽयमा व्यस्त्रिपाचजित् इतियावत्। पद्मी। उच्यमेतु क्रमिष्यामस्तदार्द्धधातुके वेदितव्यं। वक्ष्यति हनोवधलिङि। वध्यात्। आर्द्धधातुक
इति किं। हन्यात विषयसमीक्षेयं। न परसमास्तिं तेनार्द्धधातुकविवक्षया आदेशेषु कृतेषु पश्चाद्यथाप्राप्तं प्रत्यया भवंति। भव्यं। प्रवेयं। आख्येयं।
घाटा अदो जग्धिर्ल्यप्ति किति। अदो जग्धिरादेशो भवति ल्यपि परतः तकारादौ च किति प्रत्यये। प्रजग्ध्य विजग्ध्य जग्धः जग्धवान्। इकार-

धारणार्थो नानुबंधः तेनन्तुन भवति। एवं घ्स्यादिनामपि। इह कस्मान्न भवति। अत्र अधात्स्म इति निपातनात्। जघ्धौ सिद्धे ऽन्तरंगत्वात् विकिती
ति त्युच्यते सा पपरसंतरंगाणां प्रत्याप्यभवति बाधनं तीतिकिं अघते किती ति किं अत्तव्यं। ॥लुङ्सनोर्घस्लृ॥ अदो घस्ल आ
देशो भवति लृदित्करणम् अङर्थं लुङि अघसत्। अघसतां अघसन्। सनि। जिघत्सति। जिघत्सतः। जिघत्संति। घस्लभावे अच्युपसंख्यानं
प्रात्तीति प्रसः। ॥घञपोश्च॥ घञि अपि च परत अदो घस्ल आदेशो भवति। घासः। प्रसघसः। उपसर्गे ऽदः स्थूप्॥ ॥बहुलं छन्दसि॥ छंदसि वि
षये बहुलम् अदो घस्ल आदेशो भवति। घस्तान्नूनं सग्धिश्च मे न च भवति। अतामद्य मध्यते मेरुभतं। अन्यतरस्याम् ग्रहणमेव कस्मान्न क्रियते
तदेनोऽशनार्थमपि भविष्यति कार्यं तदर्थं बहुलग्रहणं। घस्तामि सत्रोपधालोपो न भवति। ॥लिट्यन्यतरस्याम्॥ लिटि परतो ऽदो ऽन्यतरस्यां घ
स्लादेशो भवति। जघास। जक्षतुः। जक्षुः। आद। आदतुः। आदुः। ॥वेञो वयिः॥ लिट्यन्यतरस्यामिति वर्त्तते। वेञो वयिरादेशो भवति अ
न्यतरस्यां लिटि परतः। इकार उच्चारणार्थः। उवाय। ऊयतुः। ऊयुः। पक्षे। ववौ। ववतुः। ववुः। लिटि वयो य इति यकारस्य संप्रसारणं प्रतिषिध्यते। वश्चास्या
न्यतरस्यां किती ति वकारो विधीयते। ववौ ववतुः ववुः वेञ इति संप्रसारणं न भवति। ॥हनो वध लिङि॥ हन्तेर्धातोर्वध इत्ययमादेशो भवति
लिङि परतः। आर्धधातुके। वध्यात्। वध्यास्तां वध्यासुः। आकारान्तश्चायमादेशः। तत्राकारस्य लोपो भवति। तस्य स्थानिवद्भावाद्वधीदिति
हलंतलक्षणा वृद्धिर्न। हलादेर्लघोरिति न भवति। ॥लुङि च॥ लुङि च परतो हनो वध इत्ययमादेशो भवति। अवधीत्। अवधिष्टां। अवधि
षुः। योगविभाग उत्तरार्थः। आत्मनेपदेषु लिङि विकल्पो मा भूत्। ॥आत्मनेपदेष्वन्यतरस्याम्॥ पूर्वेण नित्ये प्राप्ते विकल्प उच्यते। आत्म
नेपदेषु परतो हनो लुङि अन्यतरस्यां वध इत्ययमादेशो भवति। अवधिष्ट। अवधिषातां। अवधिषत। न च भवति। आहत। आहसातां। आहसत।
॥इणो गा लुङि॥ इणो गा इत्ययमादेशो भवति लुङि परतः। आगात्। आगातां। आगुः। लुङि प्रवर्तमाने पुनर्लुङ्ग्रहणमात्मनेपदेष्व
न्यतरस्यामित्येवं तन्मा भूत्। इह विशेषेण नित्यं च भवति। आगात्। आगाम् इति भवति। इक इति वक्तव्यं। अध्यगात्। अध्यगातां। अध्यगुः।
॥णौ गमिरबोधने॥ णौ परत इणो ऽबोधनार्थस्य गमिरादेशो भवति। इकार उच्चारणार्थः। गमयति। गमयतः। गमयंति। अबोधन इति किं।
प्रत्याययति। इणवदिक इत्येव। अधिगमयति। ॥सनि च॥ सनि परत इणो ऽबोधनार्थस्य गमिरादेशो भवति। जिगमिषति। जिगमिषतः।

जिगमिषंति। अबोधन इत्येव। प्रतीषिषति। इणवदिक इत्येव। अधिजिगमिषति। योगविभाग उत्तरार्थः। इङश्चेति सन्येव यथा
स्यात्। ॥इङश्च॥ इङश्च सनि परतो गमिरादेशो भवति। अधिजिगांसते। ॥गाङ् लिटि॥ गाङादेशो भवति इङो लिटि परतः। अधिजगे। अधिजगाते।
अधिजगिरे। गाङ ङानुबंधग्रहणं विशेषणार्थं गाङ्कुटादिभ्य इत्यत्रास्य ग्रहणं यथा स्यात्। न हि स्थानिवद्भावेन गाङिति रूपं लभ्यते। ॥विभाषा
लुङ्लृङोः॥ लुङि लृङि च परत इङो विभाषा गाङादेशो भवति। आदेशपक्षे ङ्कुटादित्व इति ङित्त्वं घुमास्थागापाजहातिसां हलीति ईत्वं। अध्यगी
ष्ट। अध्यगीषातां। अध्यगीषत। न च भवति। अध्यैष्ट। अध्यैषत। लृङि खल्वपि। अध्यगीष्यत। अध्यगीष्येतां। अध्यगीष्यंत। न च भ
वति। अध्यैष्यत। अध्यैष्येतां। अध्यैष्येत। ॥णौ च संश्चङोः॥ इङो गाङ् विभाषेति। न च भवति। अध्यापिपयिषति। चङि खल्वपि। अध्यजीगपत्।
अध्यापिपत्। ॥अस्तेर्भूः॥ अस्तेर्धातोर्भू इत्ययमादेशो भवति आर्धधातुके। भविता। भवितुं। भवितव्यं। इह कस्मान्न भवति। इहासा। कृञ्चा
नुप्रयुज्यते लिटीति प्रत्याहारेण स्वेर्ग्रहणसामर्थ्यात्। तथा चोच्यते। अनुप्रयोगे ऽनुभवास्त्यथ इवं स्मरंति। कृतुर्द्विर्वचनं मनीषिण इति। ॥ब्रुवो
वचिः॥ ब्रुवो वचिरादेशो भवति आर्धधातुके। इकार उच्चारणार्थः। वक्ता वक्तुं वक्तव्यं। स्थानिवद्भावेन कर्त्रभिप्राये क्रियाफलविवक्षाया
मात्मनेपदं भवति। उच्चे वक्ष्यते। ॥चक्षिङः ख्याञ्॥ चक्षिङः ख्याञ् आदेशो भवत्यार्धधातुके। आख्याता। आख्यातुं। आख्यातव्यं। स्था
निवद्भावेन नित्यमात्मनेपदं भवति ञकारानुबंधकरणसामर्थ्यात्। क्शादिरप्ययमादेश इष्यते। अक्शा। ताऽक्शा। गंतुं अक्शा। तव्यं। वर्जने प्रति
षेधो वक्तव्यः। दुर्जनाः संचक्ष्याः वर्जनीया इत्यर्थः। हिंसायामनयोश्च प्रतिषेधो वक्तव्यः। नृचक्षाः रक्षः। नृसाः हिंसार्थो ऽत्र धातुः। असनेरप्यल्व
पि। विचक्षणः बहुलं संज्ञा। छंदसोरिति वक्तव्यो ऽत्र वधक। गात्रमिव क्षणः जिरा घर्षा व। ॥वा लिटि॥ पूर्वेण नित्ये प्राप्ते विकल्प उच्यते।
लिटि परतः। चक्षिङः ख्याञादेशो वा भवति। आचख्यौ। आचख्यतुः। आचख्युः। न च भवति। आचचक्षे। आचचक्षाते। आचचक्षिरे।
॥अजेर्व्यघञपोः॥ अजेर्धातोर्वी इत्ययमादेशो भवत्यार्धधातुके परतः। घञपौ वर्जयित्वा। प्रवायकः। प्रवयणीयं। अघञपोरिति

का॰प्र॰२
३॰

फिर। समाजः उद्रासः। अजेर्व्यतौ वीस्यिनादेशो न भवत्यार्धधातुके परतः। घञपौ यज्जयित्वा। प्रवायकः। प्रवयणीयं। अघञपोरितिकिं।
समाजः। उदाजः। अपितुः। सनजः। उरजः। समुदीरजः। पताघिलप्। दीर्घोच्चारणांकिं। प्रवीतः। वजयोः। प्रतिशेषे क्यजेयेयसंख्यानं। सनज्य
चलादावार्धधातुके विकल्प इष्यते प्रवेता प्राजिता प्रवेतुं प्राजितुं। चापो। पूर्वेणनित्ये प्राप्ते विकल्प उच्यते। पुइति स्तुवोग्रहणंयीपरक्ते
अजेर्वीरिग्हलपमादेशो भवति। प्रवयणोदंडः। प्राजनोदंडः। प्रवयणमानय। प्राजनमानय॥ ण्यक्षत्रियार्षञितो यूनिलुगणिञोः॥
ण्यारयोगोत्र प्रत्ययाउण्यंतात्क्षत्रियगोत्रात्। आर्षात्ञितअपरयोरणिञोर्युनिलुग्भवति। ण्यांताभावत्। कुर्वादिभ्योण्यस्तस्मा
धुनिइञ्‌तस्यलुक्‌कौरव्यः पिताः कौरव्यः पुत्रः। गार्ग्यः पितागार्ग्यः पुत्रः। ननु च कौरव्य शब्दस्तिकादिषुपठ्यते॥ ततः फिञाभवितव्ये।
कौरव्यायणिरिति। क्षत्रीयगोत्रस्य तत्र ग्रहणं उरभशब्दसाहचर्यात्। कुरुनादिभ्योण्य इत्यनेन विहितस्य। इदंतु ब्राह्मणगोत्रं कुर्वादिभ्यो
ण्य इतिण्यः। क्षत्रिया। कृष्यंधकवृष्णिकुरु। यस्य श्वेताए। तस्माद्युनिइञ्‌तस्यलुक्‌ श्वाफल्कः पिताः श्वाफल्कः। पुत्रः क्षत्रिय। आर्ष
ऋष्यणतस्मायुनिइञ्‌तस्यलुक्‌ वाशिष्टः पितावासिष्ठः पुत्रः। आर्षञित्। अनृष्यानंतर्ये बिदादिभ्योञ्। तस्माद्युनिइञ्। तस्यलुक्‌ वैदः
पितावैदः पुत्रः। अणः। खल्वपि। तिकादिभ्यः फिञ्। तस्माद्युनि प्राग्दीव्यतोऽण् तस्यलुक्‌। तैकायनिः पिता। तैकायनिः पुत्रः एतेभ्य
इतिकिं शिवादिभ्योऽण् तस्मात्। कराचादिभ्यो गोत्र इतिशैषिकोऽण्। तस्यलुग्भवति। अणिञोरितिकिं। दाक्षि। दाक्षिपरत्वं युवास्त्यनः
अत्राह्मणगोत्रमात्रा द्युवप्रत्ययस्योपसंख्यानं। बौधिः पिता। बौधिः पुत्रः। जाबालिः पिता। जाबालिः पुत्रः। औदुम्बरिः पिता औदुम्बरिः
पुत्रः। भांडिजंघिः पिताभांडिजंघिः। पुत्रसाल्वावयवलक्षण इञ्। तस्मात्फक्। तस्यलुक्‌ पैलादिदर्शनात्सिद्धं॥ पैलादिभ्यश्च॥ पै
लइत्येवमादिभ्यश्च युवप्रत्ययस्यलुग्भवति। पीलापाघेत्यण् तस्मादण्‌ द्व्यच इति फिञ् तस्यलुक्‌। पवैः पितापैलः। पुत्रः। अन्ये पैलादयः
इञंतास्तेभ्य इञः प्राचामिति + लुकि सिद्धे अप्राग्यार्थः। पाठः। पैल। शालंकि। सात्यकि। सात्यकामि। ऐंदिचि अदिनजि औद्रजि। अ
दनेधी। अहिबुद्धि दैवस्थानि पैंगलायनि राणायणि रौहित्यि। भौलिंगि। औदाहमानि। औज्जिहानि। तद्राजाचाणः। आंहजि ३॰

गणोयं॥ इञः प्राचामगोत्रेऽन इञन्तस्य॥ युवप्रत्ययस्यलुग्भवति। गोत्रविशेषणं प्राग्ग्रहणं न विकल्पार्थं पांनागारेः पत्यं युवा यजिञो
श्चेति फक्‌ तस्यलुक्‌ पांनागारिः। पुत्रः मांथरेषणिः पिताः मांथरेषणिः पुत्रः। प्राचामितिकिं। दाक्षिः पितादाक्षायणः पुत्रः॥ न तौल्वलि
भ्यः॥ अनंतरेणप्राप्तो लुक्‌ प्रतिषिध्यते। तौल्वल्यादिभ्यः परस्य युवप्रत्ययस्य लुग्न भवति। तौल्वलिः पिता। तौल्वलायनिः पुत्रः
तौल्वलि। तैल्वकोधारणि। पारणि। दैलीपि। दैवलि। दैवमित्रि। दैवयज्ञि। प्रावाहणि माधात्तकि। आनुहरति श्वाफल्कि। आनुमति।
आहिंसि। आसुरि। आयुधि। नैमिषि। आसिबंधकी। वैंकि। पौष्पि। पौष्कर। साहि। वैरकि। वैलकि। वैहति। वैकर्णि कारेणुपालि। कामलि।
॥तद्राजस्य बहुषु तेनैवास्त्रियां॥ तेतद्राजाः जाद्यस्तद्राजसंज्ञाः इति वक्ष्यति तस्य तद्राजसंज्ञस्य प्रत्ययस्य बहुषु वर्तमानस्य अस्त्रीलिं
गस्य लुग्भवति तेनैव चेत्तद्राजेन कृतं बहुत्वं भवति। अंगावंगाः सुह्माः पुंड्राः मगधाः। कोहभजाः। श्रीहिमताः। तद्राजस्येतिकिं औपगवाः ब
हुष्वितिकिं॥ आंगः तेनैवग्रहणं किं प्रियोवां गोयेषां त इमे प्रियवांगाः। अस्त्रियामितिकिं। आंग्यः। स्त्रियः॥ यस्कादिभ्यो गोत्रे॥ बहुषु
तेनैवास्त्रियामिति सर्वमनुवर्तते यस्क इत्येवमादिभ्यः परस्य गोत्रस्या प्रत्ययस्य बहुवर्तमानस्य अस्त्रीलिंगस्य लुग्भवति। तेनैव चेत्
गोत्रप्रत्ययेन कृतं बहुत्वं भवति प्रत्ययविधेश्चान्यत्र लौकिकस्य गोत्रस्य ग्रहणमिति अनंतरापत्येपि लुग्भवत्येवा यस्काल ह्याः बहुषि
कणं। एते पंचाशीवादिषु पच्यंते। ततः परेभ्यः भ्य इत्यण्। नसा कंबलभार अहियोग करणे उकर्मिनि जंघा यकसक्य। ततः परेभ्य
रुच्चासत्। विषपुट। उपरिमिस्यक। कोष्टुमान। कोष्टुपार। शीर्षमायापुष्करसच्छदात्। बाह्वादियानात्‌ इञ्‌ खरपशब्दो नडादिषु पठ्य
यते। तः फक्‌। पद्कावर्नकाएता यामतइञ्‌ नर्कदनशब्दात् शिवादिभ्योऽण् रामडि लापं डिकामडितापंडित। एतेभ्यश्च ह्यस्त्रा

डा. भाऊ दाजी स्मारक
DR BHAU DAJI MEMORIAL

का०प्र०२
२१

दिभ्यः। फञ्। यञञोश्च। बहुषु तेनैवास्त्रियां गोत्र इति चानुवर्त्तते। यञः अञश्च गोत्रप्रत्ययस्य बहुषु वर्त्तमानस्य लुग्भवति। गर्गादिभ्यो
यञ्। गर्गाः वत्साः। अञः खल्वपि। अनृष्यानन्तर्ये बिदादिभ्योऽञ्। बिदाः उर्वाः बहुत्व एव गार्ग्यः। बैदः। तेनैवेत्येव। प्रियगार्ग्याः प्रियबैदाः
अस्त्रियामित्येव। गार्ग्यः स्त्रियः। बैद्यः स्त्रियः गोत्र इत्येव। द्वीपादनुसमुद्रं यञ्। द्वैप्याः। उत्सादिभ्योऽञ्। औत्साः छात्राः। यञादीनां एक
द्वयोर्वा तत्पुरुषे षष्ठ्या उपसंख्यानं। गार्ग्यस्य कुलं गार्ग्यकुलं गर्गकुलं वा। गार्ग्ययोः कुलं गार्ग्यकुलं गर्गकुलं वा। एवं बैदस्य कुलं बैदकु
लं बिदकुलं वा। बैदयोः कुलं बैदकुलं बिदकुलं वा। यञादीनामिति किं। आंगकुलं। एकद्वयोरिति किं। गार्ग्याणां कुलं गर्गकुलं तत्पुरुष इति किं
गार्ग्यस्य समीपं उपगार्ग्यं षष्ठ्या इति किं। परमगार्ग्यः। अत्रिभृगुकुत्सवसिष्ठगोतमांगिरोभ्यश्च। अत्र्यादिभ्यः परस्य गोत्रप्रत्ययस्य ब
हुषु लुग्भवति। अत्रिशब्दादितश्चानिञ इति ढक्। इतरेभ्यस्त्वण्। अत्रयः। भृगवः। कुत्साः। वसिष्ठाः। गोतमाः। अंगिरसः। बहुष्वित्येव। आत्रे
योभार्गवः। तेनैवेत्येव। प्रियात्रेयाः प्रियभार्गवाः। अस्त्रियामिति किं। आत्रेय्यः स्त्रियः। बह्वच इञः प्राच्यभरतेषु। बह्वचः प्रातिपदिका
त्। यइञ् विहितः प्राच्यगोत्रे भरतगोत्रे च वर्त्तते तस्य बहुषु लुग्भवति। पन्नागारिः। मघरेषणाः भरतेषु खल्वपि। युधिष्ठिराः। अर्जुनाः।
बह्वच इति किं चैकपः। पौष्ययः प्राच्या। रतेष्विति किं बालाकयः। हास्तिदासयः। भरताः प्राच्या एव तेषां पुनर्ग्रहणं ज्ञापकार्थं। अन्यत्र प्राग्र
हणे भरतग्रहणं न भवतीति। तेन इञः प्राचामिति भरतानां युवप्रत्ययस्य लुग्न भवति। आर्जुनिः पिता। आर्जुनायनः पुत्र। न गोपवना
दिभ्यः। गोपवनादिभ्यः परस्य प्रत्ययस्य लुग्भवति बिदाद्यंतर्गणोयं तत्रा अञो गोत्रप्रत्ययस्य यञञोश्चेति लुक्प्राप्तः। प्रतिषिध्यते। गौप
वानाः। शैग्रवाः। गोपवन शिग्रु बिंदु भाजन। अश्व अवतान। श्यामाक। श्यावर्ण। एतावंत एवाष्टौ गोपवनादयः। परिशिष्टानां हरितादी
नां प्रमादपाठः तेहि यञञोर्ये बिदादिषु पठ्यंते तेभ्यश्च बहुषु लुग्भवत्येव। हरिताः किंदासाः इति। तिककितवादिभ्यो द्वंद्वे। तिकादिभ्यः कित
वादिभ्यश्च द्वंद्वे गोत्रप्रत्ययस्य बहुषु लुग्भवति। तैकायनयश्च कैतवायनश्च तिकादिभ्यः फिञ् तस्य लुक्। तिककितवाः। वांखरप
श्च भांडीरथश्च अत इञ् तस्य लुक्। वंखरभंडीरथाः औपकायनाश्च लामकायनाश्च। नडादिभ्यः। फक्। तस्य लुक् उपकलमकाः
पाकक प्रश्नारक पश्च अत इञ् तस्य लुक्। पाककनरकाः। बाकन। खयश्च श्वाशुदपरिणद्धपश्च। अत इञ्। तस्य लुक्। बकनश्व २१

श्वगुदपरिणद्धाः। उज्ज्वशब्दादत इञ्। ककुभशब्दाच्छिवाद्यण्। तयोर्लुक्। औज्ज्वपश्च काकुभाश्च उज्ज्वककुभाः। लांकपश्च शांतमुखपश्च
अत इञ् तस्य लुक्। लंकशांतमुखाः। कुरसशब्दात् तिकादिषु पठ्यते ततः फिञ्। लंकट शब्दात् इत तयोर्लुक्। कैरसायनश्च लांकटपश्च। कु
रसलंकटाः। आष्टकपश्च कापिष्टलपश्च अत इञ्। तस्य लुक्। अष्टककपिष्ठलाः। कार्ष्णाजिनपश्च कार्ष्णसुंदरपश्च। अत इञ्। तस्य लुक्।
कृष्णाजिनकृष्णसुंदराः। आग्निवेश्याश्च दासेरकपश्च। अग्निवेशशब्दात् गर्गादिभ्यो यञ्। दासेरक शब्दादत इञ् तयोर्लुक्। अग्निवेशदा
सेरकाः। उपकादिभ्योऽन्यतरस्यामद्वंद्वे। उपक इत्येवमादिभ्यः रस्य गोत्रप्रत्ययस्य बहुषु लुग्भवति। अन्यतरस्यां। द्वंद्वे चाद्वंद्वे च। अ
द्वंद्वग्रहणं द्वंद्वाधिकारनिवृत्त्यर्थं। रनिवृत्त्यर्थं। एतेषां च मध्ये त्रयो द्वंद्वास्तिककितवादिषु पठ्यंते उपकलमकाः। अष्टककपिष्ठलाः कृ
ष्णाजिनकृष्णसुंदराः इति। तेषां पूर्वयोगेनैव नित्येन लुग्भवति। अद्वंद्वे त्वनेन विकल्पः। उपकाः औपकायनाः। लमकाः। लामकायनाः। अष्टकाः
आष्टकयः कपिष्ठलाः। कापिष्ठलयः। कृष्णाजिनाः। कार्ष्णाजिनयः। कृष्णसुंदराः। कार्ष्णसुंदर इति परिशिष्टानां वद्वंद्वे च विकल्प इति। पंड
रका। अडारक। गडुक। सुपर्यक। सुपिष्ट। मयूरकर्ण। खरीजंघा। शशलावल। पतंजल। कठेरणि। कुषितक। काशकृत्स्न। निदाघ। कलशी
कंठ। दिमकंठ। कृष्णपिंगल। कर्णक। जटिलक। बधिरक। जंतुक। अनुलोम। अर्द्धपिंगलक। प्रतिलोम। प्रतान। अनाभिः। आगस्त्यकौंडिन्य
योरगस्तिकुंडिनच्। आगस्त्य कौंडिन्ययोर्गोत्रप्रत्ययोरणो यञश्च बहुषु लुग्भवति। परिशिष्टस्य च प्रकृतिभागस्य यथासंख्यं अगस्तिकुंडिन
च इत्येतावादेशौ भवतः। अगस्तयः। कुंडिनाः। चकारः। स्वरार्थः मध्योदात्तो हि कुंडिनीशब्दस्तदादेशोपि तथा स्यात्। अगस्त्यशब्दा ऋष्यणा
कुंडिनीशब्दात् गर्गादिलक्षणः यञ्। तयोर्गोत्रे लुग्वाचि तु लुकि प्रतिषिद्धे आगस्तीयाः छात्राः। इति वृद्धलक्षणश्छो भवति कौंडिन्ये लगेव भवतीति
फलाबादिभ्योगोत्र इति। तत्र विशेषोनास्ति। कौंडिनाश्छात्राः। सुपो धातुप्रातिपदिकयोः। सुपो विभक्तेर्धातुसंज्ञायाः प्रातिपदिकसंज्ञाया
श्च लुग्भवति। तदंतगतास्तद्ग्रहणेन गृह्यंते धातोस्तु यत्। पुत्रीयति। घटीयति। प्रातिपदिकस्य कष्टश्रितः। राजपुरुषः। धातुप्रातिपदिकयोर
ति किं। वृक्षस्तः। अदिप्रभृतिभ्यः शपः। अदिप्रभृतिभ्यः परस्य शपो लुग्भवति। अत्ति। हंति। बहुलं छंदसि। छंदसि विषये श
पो बहुलं लुग्भवति। अदिप्रभृतिभ्य उक्तः। ततो न भवत्यपि वृत्रं हनति। अहिः शयते अन्येभ्यश्च भवति। त्राध्वन्नो देवाः। यङोऽचि च।

का॰ प्र२
३२
यङोलुग्भवति अचि प्रत्ययेपरतः। यकारेणबहुलग्रहणमनुकृष्यतेन तुच्छंदसीतितेनछंदसिभाषायांचयङोलुग्भवति। लोलुवः। पोपुवः
सनीस्रंसो। दनीध्वंसः। बहुलग्रहणादंनत्यपिभवति। शकुनिकोलालपीति। दुंदुभिर्वावदीति॥ जुहोत्यादिभ्यः श्लुः॥ शपदनु वर्तते॥ अ
नपठः। जुहोत्यादिभ्यउत्तरस्यशपः श्लुर्भवति श्लुकिप्रकृते श्लुविधानं द्विर्वचनार्थं। जुहोति। बिभर्ति नेनेक्ति॥ बहुलंछंदसि॥ छंदसिविष
ये बहुलंशपः श्लुर्भवति। यत्रोक्तस्तत्रनभवति अन्यत्रभवति। जुहोत्यादिभ्यस्तावन्नभवति। दाति प्रियाणि धाति प्रियाणि। अन्येभ्य
श्चभवति। पूर्णांविवष्टि। जनिमाविवक्ति॥ गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु॥ लुगनुवर्तते। मघ्वुः। गाति स्था। घुपा। भूइत्येतेभ्यः
परस्मैपदेषुपरसिचः चोलुग्भवति। अगात्। अस्थात्। घु। अदात्। अधात्। अपात्। अभूत्। गायोग्रहणेइणादेशस्यग्रहणं गापतेः। या
तेश्चनभवति। अगासीत्। अपाशीत्। पः। परस्मैपदेष्वितिकिं। अगासातां ग्रामौदेवदत्तेन॥ विभाषाघ्राधेट्शाच्छासः॥ घ्राधेट्शाच्छा
सा। इत्येतेभ्यउत्तरस्यसिचः। परस्मैपदेषुविभाषालुग्भवति। धेटः। पूर्वेणप्राप्तेविभाषार्थंवचनं। परिशिष्टानामप्राप्ते। अघ्रात्। अघ्रासीत्
अधात्। आधासीत्। अशात्। अशासीत्। अच्छात्। अच्छासीत्। असात्। असासीत्। परस्मैपदेष्वित्येव। अघ्रासातां सुमनसौदेवदत्तेन।
॥तनादिभ्यस्तथासोः॥ तनादिभ्यउत्तरस्यसिचस्तथासोः परतोविभाषालुग्भवति। अतत। अतथाः। अतनिष्ट। अतनिष्ठाः। असात। अ
साथाः। असनिष्ट। असनिष्ठाः तनसनक्षणुरिलांतं। थासांसाहचर्यात्। आत्मनेपदस्यतशब्दस्यग्रहणं। परस्मैपदेनभवति अतनिष्टयूयं।
मंत्रेघसह्वरणशवृदहाद्वृच्कृगमिजनिभ्योलेः॥ मंत्रविषयेघस। ह्वर। णश। वृ। दह। आत्। वृच्। कृ। गमि। जनि। इत्येतेभ्यउत्तरस्यलेर्लुग्भवति
अघत्। अघतां। अक्षन्नमीमदंतपितरः। ह्वरोति दृकौटल्ये। माह्वर्मित्रस्यत्वां। नश। प्रणक्षस्पंसंस्य। वृङ्वृञोः सामान्येनग्रहणं। सुरुचोवेनेन
आवः। दहमान। आधक्। आकारांतग्रहणं। प्राह्णेरेण। आप्राद्यावापृथिवीअंतरिक्षं। वृज्। मानाअस्मिन्महाधनेपरावर्क्। कृ। अक्रन्कर्म
कर्मकृत। गमि। आग्मन्। जनि। अज्ञत वा अस्यदंताः। ब्राह्मणेप्रयोगोयां। मंत्रग्रहणं तुछंदसउपलक्षणार्थं॥ आमः॥ आमः परस्यलेर्लुग्भ
वति। ईहांचक्रेचक्रो ऊहांचक्रो ईक्षांचक्रे॥ अव्ययादाप्सुपः॥ अव्ययादुत्तरस्यआपः सुपश्चलुग्भवति। नात्वईभावादतोम्लपंचम्यः। अमा
देशस्तस्यसुपोभवसपंचम्याः। तस्मिन्प्रतिषिद्धेपंचम्याः श्रवणमेवभवति। उपकुंभंतिष्ठति। उपकुंभपश्य। उपमणिकंतिष्ठति ३२

उपमणिकंपश्य। अतरितिकिं। अधिस्त्री। अधिकुमारी। अपंचम्यारितिकिं। उपकुंभादानय। इ॥ तृतीयासप्तम्योर्बहुलं॥ पूर्वेणनि
त्यमम्भावेप्राप्तेवचनमिदं। तृतीयासप्तम्योर्विभक्त्योर्बहुलमम्भावोभवति अव्ययीभावे। उपकुंभेनकृतं। उपकुंभकृतं। उपकुंभेनिधेहि
उपकुंभंनिधेहि। सप्तम्याऋद्धिनदीसमाससंख्यावयवेभ्योनित्यमितिवक्तव्यं। सुमद्रं। सुमगधं। उन्मत्तगंगं। लोहितगंगं। एकविंश
तिभारद्वाजंबहुलवचनात्सिद्धं॥ लुटः प्रथमस्यडारौरसः॥ लुडादेशस्यप्रथमपुरुषस्यपरस्मैपदस्यात्मनेपदस्यडारौरस इत्येतेआ
देशाः भवंतियथासंख्याकर्तांकर्तारौकर्तारः। आत्मनेपदस्य। अध्येता। अध्येतारौ। अध्येतारः। प्रथमस्येतिकिं। कर्तासि॥ इति
श्रीजयादित्यविरचितायांकाशिकायांवृत्तौद्वितीयाध्यायस्यचतुर्थः पादः समाप्तोध्यायः॥ ॥श्रीरामचंद्रार्पणमस्तु॥ ॥छ॥

॥इतिश्रीकाशिकाप्रवृत्तौद्वितीयोध्यायसंपूर्णः॥

॥अथकाशिकाप्रवृत्तौतृतीयोध्यायः॥

का॰ प्र॰ ३
१

॥श्रीगणेशाय नमः॥ ॥प्रत्ययः॥ अधिकारोयं प्रत्ययशब्दः। संज्ञात्वेनाधिक्रियते। आपंचमाध्यायपरिसमाप्तेर्यदित ऊर्ध्वमनुक्र
मिष्यामः। प्रत्ययसंज्ञास्ते वेदितव्याः प्रकृत्युपपदोपाधिकारागमान्वर्जयित्वा वक्ष्यति तव्यत्तव्यानीयरः। कर्तव्यं करणीयं तैत्तिरीयः
मन्यप्रदेशाः। प्रत्ययलोपे प्रत्ययलक्षणमित्येवमादयः। ॥परश्च॥ अयमप्यधिकारो योगे योग उपतिष्ठते परिभाषा वा। परश्च स भव
ति धातोर्वा प्रातिपदिकाद्वा यः प्रत्ययसंज्ञः। कर्तव्यं तैत्तिरीयं चकारः। पुनरस्यैव समुच्चयार्थः। तेनो ऽणादिषु परत्वं न विकल्प्यते।
॥आद्युदात्तश्च॥ अयमप्यधिकारः परिभाषा वा। आद्युदात्तश्च स भवति यः प्रत्ययसंज्ञः। अनियतस्वरप्रसंगे अनेकाच्सु च प्रत्यये
षुदेशस्यानियमे सति नियमं निर्दिष्टमादेरुदात्तार्थे। कर्तव्यं तैत्तिरीयं ॥अनुदात्तौ सुप्पितौ॥ पूर्वस्यायमपवादः सुपः पितश्च प्रत्यया अनु
दात्ता भवन्ति। दृषदौ दृषदः पितः खल्वपि पचति पठति ॥गुप्तिज्किद्भ्यः सन्॥ गुप गोपने तिज निशाने कित निवासे एतेभ्यो धातुभ्यः
सन्प्रत्ययो भवति। प्रत्ययसंज्ञा चाधिकृतैव। जुगुप्सते तितिक्षते चिकित्सति। निंदाक्षमाव्याधिप्रतीकारेषु सन्निष्यते अन्यत्र यथाप्रा
प्तं प्रत्यया भवन्ति। गोपायति तेजयति संकेतयति गुपादिष्वनुबन्धकरणमात्मनेपदार्थं ॥मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य॥ मा
न पूजायां बध बंधने दान अवखंडने शान अवतेजने इत्येतेभ्यो धातुभ्यः सन्प्रत्ययो भवति अभ्यासस्य चेकारस्य दीर्घादेशो भवति मी
मांसते बीभत्सते दीदांसते शीशांसते। उत्तरसूत्रे वा ग्रहणं सर्वस्य शेषो विज्ञायते तेन क्वचिन्न भवति मानयति बाधयति दानयति निशानय
ति। अत्रापि सन्नर्थविशेष इष्यते मानेर्जिज्ञासायां बधेर्वैरूप्ये दानेरार्जवे शानेर्निशाने ॥धातोः कर्मणः समानकर्तृकादिच्छायां वा॥ इषि
कर्म यो धातुरिषिणैव समानकर्तृकस्तस्मादिच्छायामर्थे वा सन्प्रत्ययो भवति। कर्मत्वं समानकर्तृकत्वं च धातोरर्थद्वारकं कर्तुमिच्छति।
चिकीर्षति जिहीर्षति। धातुग्रहणं किं। सोपसर्गादुत्पत्तिर्मा भूत्। प्रकर्तुमिच्छति प्रचिकीर्षति। कर्मण इति किं। करणान्मा भूत्। गमनेनेच्छति
समानकर्तृकादिति किं। देवदत्तस्य भुजिं यज्ञदत्त इच्छति। इच्छायामिति किं। कर्तुं जानाति। वावचनाद्वाक्यमपि भवति। धातोरिति
विधानादन्नसन्नाद्धातुकसंज्ञा न भूवन्त्रि ॥आशंकायामुपसंख्यानं॥ शंके पतिष्यति कूलं श्वा मुमूर्षति। इच्छासन्नं तत्प्रतिषेधो व
क्तव्यः। चिकीर्षितुमिच्छति विशेषणं किं जुगुप्सिषते मीमांसिषते। शैषिकान्मतुबर्थाः यान्छैषिको मतुबर्थिकः। सरूपप्रत्ययो नेष्टः २

सन्नन्तान्न सनिष्यते। ॥सुप आत्मनः क्यच्॥ कर्मण इच्छायामेवेत्यनुवर्तेते। इषिकर्मण एषितुरेवात्मसंबंधिनः। सुबन्तादिच्छायामर्थे
वाक्यप्रत्ययो भवति। आत्मनः पुत्रमिच्छति पुत्रीयति सुबन्तं किं वाक्यान्मा भूत् महान्तं पुत्रमिच्छति। आत्मन इति किं परस्य पुत्रमि
च्छति ककारो नः। क्यजिति सामान्यग्रहणार्थः चकारस्तद्विघातार्थः क्यचि मान्ताव्ययप्रतिषेधो वक्तव्यः। इदमिच्छति उच्चैरिच्छति। नीचै
रिच्छति। छन्दसि परेच्छायामिति वक्तव्यं। मात्वा वृका। अघायवो विदन्। ॥काम्यच्च॥ सुबन्तात्कर्मण आत्मेच्छायां काम्यच्प्रत्ययो भवति।
आत्मनः पुत्रमिच्छति पुत्रकाम्यति वसुकाम्यति। योगविभाग उत्तरार्थ्यः क्यचोनुवृत्त्यर्थः। ककारस्येत्संज्ञा प्रयोजनाभावान्न भवति। चका
रादित्वाद्वा काम्यच्। ॥उपमानादाचारे॥ क्यजनुवर्तते न काम्यच उपमानात्कर्मणः। सुबन्तादाचारेर्थे वा क्यच् प्रत्ययो भवति। आचारक्रियायाः
प्रत्ययार्थत्वात्तदपेक्षयैवोपमानस्य कर्मता पुत्रमिवाचरति छात्रं पुत्रीयति छात्रं प्रावारीयति कंबलं। आधिकरणाच्चेति वक्तव्यं प्रासादीयति
कुट्यां पर्यंकीयति मंचके ॥कर्तुः क्यङ् सलोपश्च॥ आचार इत्यनुवर्तते उपमानात्कर्तुः सुबन्तादाचारेर्थे वा क्यङ् प्रत्ययो भवति। सकारस्य च
लोपो भवति अन्वाचयशिष्टः सलोपः तदभावेपि क्यङ् भवत्येव श्येन इवाचरति काकः श्येनायते कुमुदं पुष्करायते। सलोपविधावपि ग्र
हणं संबध्यते व्यवस्थितविभाषा च भवति। ओजायते अप्सरायते पयायते पयस्यते। ओजसोप्सरसो नित्यं पयसस्तु विभाषया। सलोप
विधौ च कर्तुरिति स्थानषष्ठी संबध्यते। तत्र लोके नियमे सति हंसायते सलोपो न भवति। आचारे गल्भक्लीबहोडेभ्यः क्विप्। अवगल्भते
अवगल्भायते। क्लीबते क्लीबायते। विहोडते। विहोडायते। सर्वप्रातिपदिकेभ्य इत्येके। अश्व इवाचरति अश्वायते गर्दभायते। अश्व
ति गर्दभति ॥भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः॥ भृश इत्येवमादिभ्यः। प्रातिपदिकेभ्यो ऽच्व्यन्तेभ्यो भुवि भवत्यर्थे क्यङ् प्रत्ययो भवति।
हलन्तानां च लोपः। अच्वेरिति प्रत्येकमपि संबध्यते किमर्थं पुनरिदमुच्यते यावता भवति योगे च्विर्विधीयते तेनोक्तार्थत्वाच्च्व्यन्तेभ्यः
क्यङ् न भविष्यति। तत्राह अप्रतिपत्त्यर्थं तर्हि प्रतिषेधः। क्रीयते आभूततद्भावविषयेभ्यो भृशादिभ्यः क्यङ् प्रत्ययः। अभृशो भवति भृ
शायते शीघ्रायते। भृश शीघ्र मंद चपल पंडित उत्सुक उन्मनस्। अभिमनस्। सुमनस्। दुर्मनस्। सरह सरेह सश्वत् वृहत् वेहत् नृपत्
शुचि अंधर ओजस् वर्चस् भृशादिः। अच्वेरिति किं। भृशीभवति ॥लोहितादिडाज्भ्यः क्यष्॥ लोहितादिभ्यो डाजन्तेभ्यश्च भवत्यर्थे

का॰ प्र॰ ३
२

स्यष् प्रत्ययो भवति। लोहितायति। लोहितायते। डाजंतेभ्यः पटपटायति। पटपटायते। लोहितडाज्भ्यः क्यष् वचनं भृशादिष्वितराणि पानीयपर्यंतेभ्यः क्यङः वअयरिपरिपटिते यत्र क्यष् भवति। वर्मायति। वर्मायते। निद्रायति निद्रायते। करुणायति। करुणायते। कृपायति कृपायते। आकृतिगणोयं तथाच कफारः। सामान्यग्रहणार्थं तु बध्यते नः स्यइति महिपविलानां। मध्येन कारांतः शब्दोस्ति क्यष् लिगिरिक्यषापियोगे डाज् भवति सेतदेव वचनं ज्ञापकं। अश्वोरिल्लु वत्तेरक्तलक्षाणे क्यष् विज्ञायते। लोहितनीलहरित मद फेनमंदलोहितादि॥ कष्टायक्रमणे॥ क्यङनुवर्तते न क्यष् शब्दाच्चतुर्थीसमर्थात् क्रमणेर्थे नार्जवे क्यङ् प्रत्ययो भवति। कष्टाय कर्मणे क्रामति कष्टायते। असपत्नमिदमुच्यते सत्र कष्टकसत्र कक्ष गहनेभ्यः। कण्वचिकीर्षामिति वक्तव्यः। कराय चिकीर्षा पाप चिकीर्षितस्मा मेतेभ्यः। क्यङ् प्रत्ययो भवति। सत्रायते कष्टायते कक्षायते कृच्छ्रायते गहनायते। करायचिकीर्षया मितीति किं। अजः कष्टं क्रामति॥ कर्मणो रोमंथतपोभ्यां वर्तिचरोः॥ रोमंथशब्दात्तपः। शब्दाच्च कर्मणो यथा क्रमं वर्तिचरोरर्थयोः। क्यङ् प्रत्ययो भवति। रोमंथं वर्तयति। रोमंथायते गौः। हनुचलन इति वक्तव्यं। इह मा भूत्। कीटो रोमंथं वर्तयति। तपसः परस्मैपदे तपश्चरति तपस्यति॥ बाष्पोष्मभ्यामुद्वमने॥ कर्मण इति वर्तते। बाष्पशब्दात् ऊष्मशब्दाच्च कर्मण उद्वमनेर्थे क्यङ् प्रत्ययो भवति। बाष्पमुद्वमति बाष्पायते। ऊष्माणमुद्वमति ऊष्मायते। फेनाच्चेति वक्तव्यं। फेनमुद्वमति फेनायते॥ शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे॥ शब्द वैर कलह अभ्र कण्व मेघ इत्येतेभ्यः करणे करोत्यर्थे क्यङ् प्रत्ययो भवति शब्दं करोति शब्दयते वैरायते कलहायते। अभ्रायते कण्वायते मेघायते। सुदिनदुर्दिननीहारेभ्यश्चेति वक्तव्यं। सुदिनायते दुर्दिनायते नीहारायते। अटाट्टाशीकाकोटापोटासोटाप्रुष्टाग्रहणं कर्तव्यं। अटायते अट्टायते शीकायते कोटायते सोटायते पोटायते पृष्टायते॥ सुखादिभ्यः कर्तृवेदनायां॥ कर्मग्रहणमनुवर्तते सुख इत्येवमादिभ्यः कर्मभ्यो वेदनायामर्थे तु भवे क्यङ् प्रत्ययो भवति वेदयितुश्चेत् कर्तुः संबंधीनि सुखादीनि भवंति। सुखं वेदयते। सुखायते दुःखायते। कर्तृग्रहणं किं सुखं वेदयति प्रसाधको देवदत्तस्य। सुख दुःख गहन कृच्छ्र अस्त्र अलीक प्रतीप करुण कृपण सोढ सुखादिः॥ नमोवरिवश्चित्रङः क्यच्॥ करण इति वर्तते नमस् वरिवस् चित्रङ इत्येतेभ्यः क्यच् प्रत्ययो भवति। करणविशेषे पूजायां नमसः पूजायां नमस्यति देवान्। वरिवसः परिचर्यायां वरिवस्यति गुरून्। चित्रङ आश्चर्ये २

डा॰ भाऊदाजीस्मारकसंग्रहः
DR. BHAU DAJI MEMORIAL

चित्रीयते ङकार आत्मनेपदार्थः॥ पुच्छभांडचीवराण्णिङ्॥ करण इति वर्तते पुच्छ भांड चीवर इत्येतेभ्यो णिङ् प्रत्ययो भवति। करणविशेषे पुच्छादुदसने पर्यसने वा उत्पुच्छयते परिपुच्छयते भांडात् समाचयने संभांडयते। चीवरादर्जने परिधाने वा संचीवरयते भिक्षुः ङकार आत्मनेपदार्थः णकारः सामान्यग्रहणार्थः णेरनिटीति॥ मुंडमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच्॥ मुंडमिश्र श्लक्ष्ण लवण व्रत वस्त्र हलि कलि कृत तूस्त इत्येतेभ्यः। करणे णिच् प्रत्ययो भवति। मुंडं करोति मुंडयति। मिश्रयति श्लक्ष्णयति लवणयति व्रतात् भोजने तन्निवृत्तौ च। पयो व्रतयति वृषलान्नं व्रतयति। वस्त्रात् समाच्छादने संवस्त्रयति। हलिं गृह्णाति हलयति कलिं गृह्णाति कलयति। हलिकल्योरदंतत्वनिपातनं सन्वद्भावप्रतिषेधार्थं। अचकलत्। अजहलत्। कृतं गृह्णाति कृतयति। तूस्तानि विहंति वितूस्तयति केशान्। विजटीकरोतीत्यर्थः॥ धातोरेकाचो हलादेः क्रियासमभिहारे यङ्॥ एकाच् यो धातुर्हलादिः क्रियासमभिहारे वर्तते तस्मात् यङ् प्रत्ययो भवति। पौनःपुन्यं भृशार्थो वा क्रियासमभिहारः पुनः पुनः पचति पापच्यते याज्यते। भृशं ज्वलति जाज्वल्यते देदीयते। धातोरिति किं सोयसर्गात् सुत्वात् प्रतिमा भूत्। शंप्रायति। एकाच इति किं। जागर्ति हलादेरिति किं। ईक्षामीक्षते। सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोति। नांग्रहणं यङ्विधावनेकाजहलाद्यर्थं। सोसूच्यते। सोसूत्र्यते। मोमूत्र्यते अटाट्यते अरार्यते। अशाश्यते प्रोर्णोनूयते। भृशं शोभते भृशं रोचते इत्यत्र नेष्यते। गतिवचनात् कुटिलो कौटिल्ये गम्यमाने नित्यं यङ् प्रत्ययो भवति मुंडं करोति। मुंडयति। मिश्रयति श्लक्ष्णयति लवणयति। व्रतात् भोजने तन्निवृत्तौ च। पयो व्रतयति वृषलान्नं व्रतयति। वस्त्रात् समाच्छादने संवस्त्रयति। हलिं गृह्णाति हलयति कलिं गृह्णाति कलयति। हलिकल्योरदंतत्वनिपातनं सन्वद्भावः प्रतिषेधार्थं। अचकलत्। अजहलत्। कृतं गृह्णाति कृतयति। तूस्तानि विहंति। वितूस्तयति केशान्। विजटीकरोतीत्यर्थः। धातोरेकाचो हलादेः क्रियासमभिहारे यङ्। एकाच् यो धातुर्हलादिः क्रियासमभिहारे वर्तते तस्मात् यङ् प्रत्ययो भवति पौनःपुन्यं भृशार्थो वा क्रियासमभिहारः पुनः पुनः पचति पापच्यते यायज्यते। भृशं ज्वलति जाज्वल्यते देदीप्यते। धातो

का॰प्र॰२ रितिकिंसोयसगीदुसतिमपि्तृ ।भरशंभ्राटति। एकाच इतिकिं ।भरशंजागर्तिहेलादेरितिकिं ।भरशमीक्षते। सूचि। सूत्री मूत्र्य घर्त्यट्

२ णोतिनांग्रहणयङ् विधानेनेकाजहलच घर्थं।सोसूच्यते।सोसूत्र्यते।मोमूत्र्यते।अटाघते।अरायते।अशाश्यते।प्रोर्णोनूयते।भ

शंशोभतेभरशंरोचतइस्तत्रनेष्यते।।नित्यंकौटिल्येगतौ।।गतिवचनाद्धातोः कौटिल्येगम्यमानेनित्यंयङ्प्रत्ययोभवति।चंक्रम्यतेदंद्रम्य

ते नित्यग्रहणंविषयनियमार्थंगतिवचनान्नित्यंकौटिल्यएवभवति।नतुक्रियासमभिहारेभरशंक्रामति ।।लुपसदचरजपजभदहदश

गृभ्योभावगर्हायां।। लुप।सद।चर।जप।जभ।दह।दश।गृइत्येतेभ्योभावगर्हायांधात्वर्थगर्हायांयङ्प्रत्ययोभवति। गर्हितंलुंपति

लोलुप्यते एवंसासद्यते चंचूर्यते।जंजप्यते।जंजभ्यते।दंदह्यते।दंदश्यते।निजेगिल्यते।भावगर्हायामितिकिं।साधुजपति।भावग्रह

णंधनगर्हायांमाभूत्।मंत्रंजपतिवृषलः।नित्यग्रहणंविषयनियमार्थमनुवर्तते।एतेभ्योनित्यंभावगर्हायामेवभवतिनतुक्रियासम

भिहारेभरशंलुंपति ।।सत्यापपाशरूपवीणातूलश्लोक।। सेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्योणिच्।सत्यादिभ्यःश्लोकपर्यंतेभ्य

श्चुरादिभ्यश्चणिच्प्रत्ययोभवतिसत्यमाचष्टेसत्यापयति।अर्थवेदसत्यानामापुग्वक्तव्यः।अर्थापयति।वेदापयति।अपुग्व

चनसामर्थ्याट्टिलोपोनभवति।पाशाद्विमोचने। विपाशयति।रूपाद्दर्शने।रूपयति।वीणयोपगायतिउपवीणयति।तूलेनानुकु

ष्णातिअनुतूलयति।श्लोकैरुपस्तौतिउपश्लोकयति।सेनयाअभियाति।अभिषेणयति।लोमान्यनुमार्ष्टिअनुलोमयति

त्वचंगृह्णातित्वचयति।अकारांतस्त्वचशब्दः।वर्मणासंनह्यतिसंवर्मयति।वर्णंगृह्णातिवर्णयति।चूर्णैरवध्वंसयतिअवचूर्णयति।चुरादिभ्यः

स्वार्थेचोरयति।चिंतयति।स्वाभाविकत्वादर्थाभिधानस्ययथास्वंप्रत्ययार्था निर्दिश्यंते ।।हेतुमति च।। हेतुःस्वतंत्रस्य कर्तुःप्रयोजकः

तदीयोव्यापारःप्रेषणान्वेषणादिलक्षणोहेतुमांस्तस्मिन्नभिधेयेधातोर्निर्दिष्टेणिच्प्रत्ययोभवति।कटंकारयति।ओदनंपाचयति

तत्करोतीत्युपसंख्यानंसूत्रयत्याद्यर्थं।सूत्रंकरोतिसूत्रयति ।।आख्यानात्कृतस्तदाचष्टइति।। निवृत्तकृल्लुक्प्रकृतिप्रत्यापत्तिःप्र

कृतिवच्चकारकं।आख्यानात्कृदंतान्निच्वक्तव्यस्तदाचष्टइत्येतस्मिन्नर्थे कृल्लुक्प्रकृत्याः प्रत्यापत्तिः प्रकृतिवच्चकारकंभवति।कं

सवधमाचष्टे कंसंघातयति।बलिबंधमाचष्टेबलिंबंधयति।राजागमनमाचष्टेराजानमागमयति।आरात्रिविवासमाचष्टे।कालात्यंतसंयोगे २

मर्यादायां।अरात्रिविवासमाचष्टेरात्रिंविवासयति।।चित्रीकरणेप्राप्तिउज्जयिन्याः प्रस्थितोमाहिष्मत्यांसूर्योद्गमनंसंभावयते

सूर्यमुद्गमयति। नक्षत्रयोगेज्ञि।पुष्ययोगंजानाति।पुष्येणयोजयति।मघाभिर्योजयति।।कंड्वादिभ्योयक्।।कंडूञ्इत्येवमादिभ्यो

यक्प्रत्ययोभवति।द्विविधाः कंड्वादयोधातवः।प्रातिपदिकानिचतत्रधात्वधिकारात्।तेभ्यएवप्रत्ययोविधीयतेनतुप्रातिपदिकेभ्यः

तथाचगुणप्रतिषेधार्थः।काएतेधातवःप्रकरणमेतत्कस्यचासंज्ञनादपि।आहचायमिदंदीर्घेमन्येधातुर्विभाषितः कंडूञः।कं

डूयति।कंडूयते।ञित्वात्कर्त्रभिप्रायेक्रियाफलइत्यात्मनेपदं कंडूञ। मंतु। हृणीङ। वल्गु। असु। मनस्। महीङ। लेट्। इरस्। इरज्।

दुवस्। मेधा। कुषुभ्। मगध। तंतस्। पंपस्। सुखदुःख। सपर। अरर। भिषज्। इषुध। चरण। भुरण। तुरण। गद्गद। एला। केला। खेला।

लिट्। लोट्। ।।गुपूधूपविच्छिपणिपनिभ्यआयः।। गुपूरक्षणे।धूपसंतापे। विच्छगतौ। पणव्यवहारेस्तुतौच। पनच। इत्येतेभ्योधातुभ्यआ

यप्रत्ययोभवति। गोपायति। धूपायति। विच्छायति। पणायति। पनायति। स्तुत्यर्थेनपणिना साहचर्यात्तदर्थः पनिः प्रत्ययमुत्पादयति। न

व्यवहारार्थः।शतस्यपणते।सहस्रस्यपणते।अनुबंधश्चकेवलेचरितार्थस्तेनायप्रत्ययांतादात्मनेपदंनभवति ।।ऋतेरीयङ्।। ऋतिः सौ

त्रो धातुर्घृणायांवर्तते ततईयङ्प्रत्ययोभवति।ङकारआत्मनेपदार्थः।ऋतीयते। ऋतीयेते। ऋतीयंते।ऋतेश्छङितिसिद्धेईयङ्वचनं

स्वापकार्थधातुविहितानाम्प्रत्ययानामामेन्नादयोनभवंतीति ।।कमेर्णिङ्।। कमेर्धातोर्णिङ्प्रत्ययोभवति। णकारोवृद्ध्यर्थः ङकार

आत्मनेपदार्थः।कामयते।कामयेते।कामयंते ।।आयादयआर्धधातुकेवा।। आर्धधातुकविषयेआर्धधातुकविवक्षायामायादयो

वाभवति। गोप्ता। गोपायिता। अर्तिता।ऋतीयिता। कमिता। कामयिता। नित्यंप्रत्ययसंगेतदुत्पत्तिरार्धधातुकविषयेविकल्प्यते।

तत्रयथायथंप्रत्ययाभवंति। गुप्तिः।गोपाया।सनाद्यंताधातवः।सन्आदिर्येषांतेसनादयः।सनादयोंतेयेषांतेसनाद्यंताः।सना

द्यंताः।समुदायाधातुसंज्ञाभवंतिप्रत्ययग्रहणपरिभाषयैवपदसंज्ञायामंतवचनेनालिंगेनप्रातिपदिकलतिपुनरिहांतवचनेनप्रतिप

त्स्यते।चिकीर्षति।पुत्रीयति।पुत्रकाम्यति ।।स्यतासीलृलुटोः।। स्वरूपमुत्सृज्यानुबंधंसामान्यमेकमेवतस्मिन्लृपरतो

धातोर्यथासंख्यंस्यतासीप्रत्ययौभवतः।करिष्यति। अकरिष्यत्। श्वःकर्ता।इदिलृरणमनुनासिकत्वायप्रतिषेधार्थं।गंता।संगंता।

॥ सिब्बहुलं लेटि ॥ धातोः सिप्प्रत्ययो भवति बहुलं लेटि परतः जोषिषत्· तारिषत्· मंदिषत्· नच भवति· पताति दिद्युत्· उद
धिं च्यावयाति ॥ कास्प्रत्ययादाममंत्रे लिटि ॥ कासृ शब्दकुत्सायां ततश्च प्रत्ययांतेभ्यश्च धातुभ्य आम्प्रत्ययो भवति लिटि परतो मंत्र
विषये· कासांचक्रे प्रत्ययांतेभ्यः लोलूयांचक्रे· अमंत्र इति किं कृष्णो नोनाव कास्यनेकाच इति वक्तव्यं चुलुंपाघर्ये· चुलुंपांचकार·
चकासांचकार· दरिद्रांचकार। आमो मित्त्वमंतत्वाद्गुणत्वं विदेस्तथो आस्कासो राम्विधानाच्च पररूपं कृतं तथा
॥ इजादेश्च गुरुमतोऽनृच्छः ॥ इजादिर्यो धातुर्गुरुमान् ऋच्छतिवर्जितस्तस्माच्च लिटि परत आम्प्रत्ययो भवति। ईह चेष्टायां ऊह वितर्के ई
हांचक्रे· ऊहांचक्रे। इजादेरिति किं। ततक्ष ररक्ष· गुरुमत इति किं· इयज· उवय· अनृच्छ इति किं· आनर्छ आनर्छुः ऊर्णोतेश्च प्र
तिषेधो वक्तव्यः। प्रोर्णुनाव। अथवा नाम्य ऊर्णोतेर्णुविद्भावोपदेशप्रसिद्धिः। प्रयोजनं आमश्च प्रतिषेधार्थमेकाचश्चेडुपग्रहात्
॥ दयायासश्च ॥ दय दानगतिरक्षणेषु अय गतौ· आस उपवेशने· एतेभ्यश्च लिटि परत आम्प्रत्ययो भवति· दयांचक्रे· पलायांचक्रे·
आसांचक्रे· ॥ उषविदजागृभ्योऽन्यतरस्यां ॥ उष दाहे· विद ज्ञाने· जागृ निद्राक्षये· एतेभ्यो लिटि परतोऽन्यतरस्यामाम्प्रत्ययो भवति·
ओषांचकार· उवोष· विदांचकार· विवेद· जागरांचकार· जजागार· विदेरंतत्वप्रतिज्ञानादामि गुणो न भवति ॥ भीह्रीभृहुवां श्लु
वच्च ॥ ञिभी भये ह्री लज्जायां डुभृञ् धारणपोषणयोः हु दानादनयोः। एतेभ्यो लिटि परत आम्प्रत्ययो भवत्यन्यतरस्यां श्लाव
वास्मिन्कार्यं भवति। किं पुनस्तत्· द्विर्वचनमित्त्वं च· बिभयांचकार· बिभाय· जिह्रयांचकार· जिह्राय· बिभरांचकार· बभार· जुहवांच
कार· जुहाव· कृञ्चानुप्रयुज्यते लिटि। आम्प्रत्ययस्य पश्चात्कृञनुप्रयुज्यते लिटि परतः कृञिति प्रत्याहारेण भ्वस्त्योर्ग्रहणं·
तत्सामर्थ्यादस्तेर्भूभावो न भवति· याचयांचकार· याचयांबभूव· याचयामास· ॥ विदांकुर्वंत्वित्यन्यतरस्यां ॥ विदांकुर्वंत्वित्येतदन्यत
रस्यां निपात्यते। किं पुनरिह निपात्यते। विदेर्लोटि आम्प्रत्ययो गुणाभावो लोटो लुक्· कृतश्च लोट्परस्यानुप्रयोगः अत्र भवंतो विदां
कुर्वंतु· विदंतु· इति प्रकरणः प्रदर्शनार्थः। नैकेवलं प्रथमपुरुषबहुवचनं किं तर्हि सर्वाण्येव लोड्वचनान्यनुप्रयुज्यंते· विदांकरोतु
विदांकुरुतात्। विदांकुरुतमिति ॥ अभ्युत्सादयांप्रजनयांचिकयांरमयामकः पावयांक्रियाद्विदामक्रन्निति छंदसि ॥ अभ्युत्सादया ४

मित्येवमादयश्छंदसि विषयेऽन्यतरस्यां निपात्यंते· सदि जनि रमीणां ण्यंतानां लुङ्याम्प्रत्ययो निपात्यते चिनोतेरपि तत्रैवाम्प्रत्ययो द्विर्व
चनं कुत्वं च। अकः इति चतुर्भिरपि प्रत्येकमनुप्रयोगः संबध्यते· पावयांक्रियादिति पवतेः पुनातेर्वा ण्यंतस्य लिङ्याम् निपात्यते क्रिया
दिति चास्यानुप्रयोगः विदामक्रन्निति विदेर्लुङि आम् निपात्यते गुणाभावश्च· अक्रन्निति चास्यानुप्रयोगः। अभ्युत्सादयामकः। प्राजी
जनदिति भाषायां। चिकयामकः अचैषीदिति भाषायां परमयामकः अरीरमदिति भाषायां· पावयांक्रियात्· पाव्यादिति भाषायां
विदामक्रन्· अवेदिषुरिति भाषायां ॥ च्लि लुङि ॥ धातोश्च्लि प्रत्ययो भवति लुङि परतः इकार उच्चारणार्थः चकारः स्वरार्थः। अस्यास्मि
न्नादिना देशान्वक्ष्यति तत्रैवोदाहरिष्यामः ॥ च्लेः सिच् ॥ च्लेः सिजादेशो भवति इकार उच्चारणार्थः चकारः स्वरार्थः अकार्षीत्· अहा
र्षीत्· आगमानुदात्तत्वं हि प्रत्ययस्वरमिव चित्स्वरमपि बाधते तेस्थानिन्यादेशो च द्विश्चकारोनुबध्यते स्पृश मृश कृष तृप दृपां
सिज्वा वक्तव्यः अस्प्राक्षीत्· अस्पार्क्षीत्· अम्राक्षीत्· अमार्क्षीत्· अमृक्षत्· अकार्षीत्· अक्राक्षीत्· अकृक्षत्· अतृपत्· अत्रा
प्सीत्· अदृपत्· अद्राप्सीत्· अदार्प्सीत् ॥ शल इगुपधादनिटः क्सः ॥ शलंतो यो धातुरिगुपधस्तस्मात्परस्य च्लेरनिटः क्सादेशो भव
ति· दुह· अधुक्षत्· लिह· अलिक्षत्· शल इति किं· अभैत्सीत्· अच्छैत्सीत्· इगुपधादिति किं· अधाक्षीत्· अनिट इति किं· अकोषीत्·
अमोषीत् ॥ श्लिष आलिंगने ॥ श्लिषेर्धातोरालिंगनक्रियावृत्तेरुत्तरस्य च्लेः क्सादेशो भवति· आलिंगनमुपगूहनं परिरंभः। तन्नियमार्थमे
तत्· आश्लिक्षत्कन्यां देवदत्तः आलिंगन इति किं· समाश्लिषज्जतुकाष्ठं। न दृशः। दृशेरिक्सः प्राप्तः। प्रतिषिध्यते· दृशेर्धातोः परस्य
च्लेः क्सादेशो न भवति। अस्मिन्प्रतिषिद्धे इरितो वेत्यङ् सिचौ भवतः अदर्शत्· अद्राक्षीत् ॥ णिश्रिद्रुस्रुभ्यः कर्तरि चङ् ॥ सिज
यथाश्च द्रु· धीयते· ण्यंतेभ्यो धातुभ्यः श्रिद्रुस्रु· इत्येतेभ्यश्च परस्य च्लेश्चङादेशो भवति कर्तृवाचिनि लुङि परतः ङकारो गुणवृद्धि
प्रतिषेधार्थः चकारश्चङीति विशेषणार्थः। अचीकरत्· अजीहरत्· अशिश्रियत्· अदुद्रुवत्· असुस्रुवत्· कर्तरीति किं· अकारयि
षातां कटौ देवदत्तेन· कमेरुपसंख्यानं आयादय आर्धधातुके वेति यदा णिङ् नास्ति तदैतदुपसंख्यानं अचकमत· णिङ्प
क्षे सन्वद्भावः अचीकमत· नाकमिष्टसुखं यांति सुयुक्तैर्वडवारथैः। अथ यत्काम्पिणो यांति ये चिकमतमानिनः

का० प्र० ३
५

[illegible] ॥ टुओश्वि गतिवृद्ध्योः एताभ्यामुत्तरस्य च्लेर्विभाषा चङादेशो भवति धेट स्तावत् अदधत् सिच्पक्षे विभाषा घ्राधेट्इति
लुक् अधात् आधासीत् श्वयतेः खल्वपि अशिश्वियत् अश्वोप्यत्र विकल्प इष्यते अश्वत् कर्तरीत्येव आधषातां गावौ वत्सेन
[illegible] ॥ गुपेः परस्य च्लेश्छन्दसि विषये विभाषा चङादेशो भवति यत्राय प्रत्ययोस्ति तत्रायं विधिः इमान्नो मित्रावरुणौ
गृहानजूगुपतं अगौप्सं अगोपिष्टं अगोपायिष्टमिति वा भाषायां तु चङं तं वर्जयित्वा शिष्टं रूपत्रयं भवति [illegible]
[illegible] ॥ ऊन परिहाणे ध्वन शब्दे इल प्रेरणे अर्द गतौ याचने च एतेभ्यो धातुभ्यो ण्यन्तेभ्यः पूर्वेण च्लेश्चङि प्राप्ते छन्दसि विषये न
भवति काममूनयीः औनिनदिति भाषायां मा त्वाग्निर्ध्वनयीत् अध्वनदिति भाषायां काममैलयीः ऐलिलदिति भाषायां मै
नमर्दयीत् आर्दिदि भाषायां अस्याति वा क्रियातिभ्योः । असुक्षेपणे वच परिभाषणे ख्या प्रकथने वक्ति आदेशो वा
एभ्यः परस्य च्लेरङादेशो भवति कर्तृवाचिनि लुङि परतः अस्यतेः पुषादि पाठादेवाङि सिद्धे पुनर्ग्रहणमात्मनेपदार्थं पर्यास्थत पर्यास्थेतां
पर्यास्थत वक्ति अवोचत् अवोचतां अवोचन् ख्याति आख्यत् आख्यतां आख्यन् कर्तरीति किं पर्यासिषातां गावौ वत्सेन
॥ [illegible] ॥ लिप उपदेहे षिच क्षरणे ह्वेञ् स्पर्द्धायां एतेभ्यश्च परस्य च्लेरङादेशो भवति । अलिपत् । असिचत् । आह्वत् । पृथग्यो
गउत्तरार्थः ॥ [illegible] ॥ पूर्वेण प्राप्ते विभाषा आरभ्यते लिपिसिचिह्वः आत्मनेपदेषु परतश्च्लेरङादेशो भवति अन्य
तरस्यां स्वरितञित इत्यात्मनेपदं अलिपत अलिप्त असिचत असिक्त आह्वत आह्वास्त ॥ [illegible] ॥
पुषादिभ्यो द्युतादिभ्यो लृदिभ्यश्च धातुभ्यः परस्य च्लेः परस्मैपदेषु परतोङादेशो भवति पुषादिर्दिवाद्यन्तर्गणो गृह्यते न भ्वादिक्र्याद्यन्तर्ग
णः पुषत् द्युतादि अद्युतत् अश्वितत् लृदिभ्यः गम्लृ अगमत् शक्लृ अशकत् परस्मैपदेष्विति किं व्यद्योतिष्ट अलोठिष्ट
॥ [illegible] ॥ सृ गतौ शासु अनुशिष्टौ ऋ गतौ इत्येतेभ्यः परस्य च्लेरङादेशो भवति सर्ति असरत् शास्ति अशिषत्
आर्त्ति आरत् पृथग्योगकरणमात्मनेपदार्थं समरंत चकारः परस्मैपदेष्वित्यनुकर्षणार्थः तच्चोत्तरत्रोपयोगं यास्यति ॥ [illegible] ॥
इरितो धातोः परस्य च्लेरङादेशो भवति भिदिर् अभिदत् अभैत्सीत् छिदिर् अछिदत् अछैत्सीत् परस्मैपद इत्येव अभित्त
अछित्त ॥ [illegible] ॥ येति वर्त्तते जॄ वयोहानौ स्तंभुः सौत्रो धातुः । स्रुचु ग्रुचु ग्लुचु गतौ ग्रुचु ग्लुचु स्तेये ५

पकरणे । ग्लुंचु षस्ज गतौ टुओश्वि गतिवृद्ध्योः एतेभ्यो धातुभ्यः परस्य च्लेर्वा अङादेशो भवति अजरत् अजारीत् अस्तभत् अ
स्तम्भीत् अस्रुचत् अस्रोचीत् अग्रुचत् अग्रोचीत् अग्लुचत् अग्लोचीत् अग्लुचत् अग्लुञ्चीत् अश्वत् अश्व
यीत् अशिश्वियत् ग्लुचु ग्लुंचु योरेकतरो पादाने पि रूपत्रयं सिद्धमर्थभेदात्तु द्वयोरुपादानं कश्चिदिच्छति ह्यनयोरुपादानसामर्थ्या
त् ग्लुंचेरनुनासिकलोपाभावो भवति अग्लुंचदिति ॥ [illegible] ॥ अस्मादस्यतेः ह इत्येतेभ्यः परस्य च्लेश्छन्दसीति किं अकासि
विषये अङादेशो भवति शकलांगुष्टकोकरत् अयोअममरत् अहरस्यानि पर्वतानारुहत् अंतरिक्षा द्विमानमारुहं छंदसीति
किं अकार्षीत् अमत अहार्षीत् अरुक्षत् ॥ [illegible] ॥ पद गतौ अस्माद्धातोः परस्य च्लेश्चिणादेशो भवति तशब्दे परतः ।
सामर्थ्यादात्मनेपदैकवचनं गृह्यते । उदपादि सस्यं समपादि भैक्षं तइति किं उदपत्सातां उदपत्सत ॥ [illegible]
[illegible] ॥ तइति वर्त्तते दीपी दीप्तौ जनी प्रादुर्भावे बुध अवगमने पूरी आप्यायने ताय संतानपालनयोः ओप्यायी
वृद्धौ एतेभ्यः परस्य च्लेस्तशब्दे परतोन्यतरस्यां चिणादेशो भवति अदीपि अदीपिष्ट अजनि अजनिष्ट अबोधि अबुद्ध अ
पूरि अपूरिष्ट अतायि अतायिष्ट अप्यायि अप्यायिष्ट ॥ [illegible] ॥ अंजंता द्धातोः परस्य च्लेः कर्मकर्तरि तनशब्दे परतश्चि
णादेशो भवति प्राप्त विभाषेयं अकारि कटः स्वयमेव अलावि केदारः स्वयमेव अलविष्ट केदारः स्वयमेव अचइति किं अभेदि काष्ठं
स्वयमेव कर्मकर्तरीति किं अकारि कटो देवदत्तेन ॥ [illegible] ॥ दुह प्रपूरणे अस्मादुत्तरस्य च्लेश्चिणादेशो भवत्यन्यतरस्यां अदोहि गौः स्व
यमेव अदुग्ध गौः स्वयमेव कर्मकर्तरीत्येव अदोहि गौर्गोपालकेन ॥ [illegible] ॥ रुधि आवरणे अस्मादुत्तरस्य च्लेः कर्मकर्तरि चिणा
देशो न भवति अन्ववारुद्ध गौः स्वयमेव कर्मकर्तरीत्येव अन्ववारोधि गौर्गोपालकेन ॥ [illegible] ॥ नेति वर्त्तते तप संतापे अस्मादुत्तर
स्य च्लेश्चिणादेशो न भवति कर्मकर्तर्यनुतापे च अनुतापः पश्चात्तापः तस्य ग्रहणमकर्मकर्त्रर्थं तत्र हि भावकर्मणोरपि प्रतिषेधो भवति ।
अतप्त तपस्तापसः अन्ववातप्त पापेन कर्मणा ॥ [illegible] ॥ धातोरुत्तरस्य च्लेश्चिणादेशो भवति भावकर्मणि तशब्दे परतः
भावे तावत् आशायि भवता कर्मणि खल्वपि अकारि कटो देवदत्तेन अहारि भारो यज्ञदत्तेन चिण्ग्रहणं विस्पष्टार्थः [illegible]

॥ पुक्षेपक्॥ भावकर्मवाचीनिसार्वधातुकेपरतोधातोर्यक्प्रत्ययोभवति॰ आस्यतेभवता॰ शय्यतेभवता॰ कर्मणि॰ क्रियतेकटः गम्
तेग्रामः। ककारोगुणवृद्धिप्रतिषेधार्थः यग्विधानेकर्मकर्तर्युपसंख्यानंविप्रतिषेधाधकः शयोवलीयस्त्वां क्रियतेकटः स्वयमेवपच्य
ते॰ ओदनः स्वयमेव ॥ कर्तरिशप्॥ कर्तृवाचिनिसार्वधातुकेपरतोः शप्प्रत्ययोभवति॰ पकारः स्वरार्थः शकारः सार्वधातुकार्थः भव
तिपचति॥ देवादिभ्यः श्यन्॥ दिवइत्येवमादिभ्योधातुभ्यः शन्प्रत्ययोभवतिः शयोपवादः नकारः स्वरार्थः शकारः सार्वधातुकार्थः भवति
पचति॰॥ देवादिभ्यः श्यन्॥ दिवइत्येवमादिभ्योधातुभ्यः शन्प्रत्ययोभवतिः शयोपवादः नकारः स्वरार्थःशकारः सार्वधातुकार्थःदिव्यति
सिव्यतिः॥ वाभ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः॥ टुभ्राश्भ्लाश्दीप्तौभ्रमु अनवस्थाने भ्रमुचलने॰ द्वयोरपिग्रहणं॰ कमुपादवि
क्षेपेः क्लमुग्लानौत्रसीउद्वेगे त्रुटीछेदने॰ लषकांतौ॰ एतेभ्योवाश्यन्प्रश्रहीतौ॰ भ्रमुअनवस्थाने॰ भ्रमुचलने॰ द्वयोरपिग्रहणं क्रमुपाद
विक्षेपेः क्लमुग्लानौत्रसीउद्वेगेत्रुटीछेदनेलषकांतौ एतेभ्योवाश्यन्प्रत्ययोभवतिभ्राशते॰ भ्लाशते॰ भ्लाशते॰ भ्लाश्यते॰भ्रमणिभ्रा
म्यति॰ क्रामति॰ काम्यति॰ क्लामति॰ क्लाम्यति॰ त्रसति॰ त्रस्यति॰ त्रुटति॰ त्रुपति॰ लषति॰ लष्यतिः॥ यसोनुपसर्गात्॥ यसुप्रयत्नेदैवादिकः
तस्मान्नित्यंश्यनिप्राप्तेअनुपसर्गाद्विकल्पउच्यते॰ यसोनुपसर्गाद्वाश्यन्प्रत्ययोभवति॰ यस्यति॰ संयसतिः॥ स्वादिभ्यःश्नुः॥ षुञ्अ
अभिषवे॰ इत्येवमादिभ्योधातुभ्यः श्नुप्रत्ययोभवति॰ शयोपवादः सुनोति॰सिनोति॥ श्रुवःश्रृच॥ श्रुवःश्नुप्रत्ययोभवति॰ अश्नोति॰
तत्संनियोगेनश्रुवः श्रइत्ययमादेशोभवति श्रृणुतः श्रृण्वंति॥ अक्षोन्यतरस्यां॥ अक्षूव्याप्तौभौवादिकः अस्मादन्यतरस्यांश्नु
प्रत्ययोभवति॰ अक्ष्णोति॥ तनूकरणेतक्षः॥ तक्षत्वक्षूतनुकरणे॰ अस्मात्तनूकरणे॰ वर्तमानाद्न्यतरस्यांश्नुप्रत्ययोभवति॰
अनेकार्थत्वाद्धातूनां विशेषणेनदानं॰ तक्षतिकाष्ठं॰ तक्ष्णोतिकाष्ठं॰ तनूकरणइतिकिं॰ संतक्षतिवाग्भिः॥ रुधादिभ्यःश्नम्॥
रुधिरआवरणे इत्येवमादिभ्योधातुभ्यः श्नम्प्रत्ययोभवतिशयोपवादः मकारोदेशविध्यर्थः शकारः श्नान्नलोप इतिविशेषणार्थः
रुणद्धि॰ भिनत्तिः॥ तनादिकृञ्भ्यउः॥ तनुविस्तारइत्येवमादिभ्योधातुभ्यः कृञ् श्चउप्रत्ययोभवति॰शयोपवादः तनोतिःसनो
ति॰ क्षणोति॰ कृञः खल्वपि॰ करोति॰ तनादिपाठादेवउप्रत्ययेसिद्धेकरोतेरुपादानंनियमार्थं॰ अन्यत्तनादिकार्यंमाभूदिति॰ ६

तनादिभ्यस्तथासोःरितिविभाषासिचोलुग्भवति॰ अतत॰ अतथाः॥ धिन्विकृण्व्योरच॥ इविधिविजिविप्रीणनार्थः
कृविहिंसाकरणयोः इत्येतयोर्द्धात्वोःउप्रत्ययोभवतिसकारश्चान्तादेशः धिनोति॰ कृणोति॰ अतोलोपस्यस्थानिवद्भावाद्गु
णोनभवति॰॥ क्र्यादिभ्यःश्ना॥ डुक्रीञ् द्रव्यविनिमयइत्येवमादिभ्योधातुभ्यः श्नाप्रत्ययोभवति॰ कृणोति॰ अतोलोपस्य
स्थानिवद्भावाद्गुणोनभवति॥ क्र्यादिभ्यःश्ना॥ डुक्रीञ् द्रव्यविनिमयइत्येवमादिभ्योधातुभ्यः श्नाप्रत्ययोभवति॰ शयोपवादः
शकारःसार्वधातुकसंज्ञार्थः क्रीणाति॰ प्रीणाति॥ स्तंभुस्तुंभुस्कंभुस्कुंभुस्कुञ्भ्यःश्नुश्च॥ आद्याश्चत्वारोधातवः सौत्राः
स्कुञ् आप्रवणे॰ एतेभ्यः आप्रत्ययोभवतिश्नुश्च॰ स्तभ्नोति॰ स्तभ्नाति॰ स्तुभ्नाति॰ स्तुभ्नोति॰ स्कभ्नाति॰ स्कभ्नोति॰ स्कुभ्ना
ति॰ स्कुभ्नोति॰ स्कुनोतिउहिलप्रतिलाना। सौत्राणामपि॰ धातूनांसर्वथलिंविज्ञायतेनैतादिकरणविषयत्वमेव॥ हलःश्नः
शानज्झौ॥ हलउत्तरस्यश्नप्रत्ययस्यशानजादेशोभवति॰ हौपरतः मुषाण॰ पुषाण॰ हलइतिकिं॰ क्रीणीहि॰ हाविति किं मुष्णाति
श्नइतिस्थानिर्देशअदिशसंप्रसयार्थः इतरथाहिप्रत्ययांतरमेसर्वविषयंविज्ञायेत॥ छंदसिशायजपि॥ छंदसिविषये
श्नःशायजादेशोभवति॰ गृभाय जपि॰ गृभायहि द्रुपामधुशानच्खल्वपि॰ वधानपशुं॥ व्यत्ययोबहुलं॥ यथायथंविक
रणाः शवादयोविहितास्तेषांछंदसिविषयेबहुलंव्यत्ययोभवति॰ व्यतिगमनंव्यत्ययोव्यतिहारः विषयांतरेविधानं
क्वचिद्विकरणताकं चित्रिविकरणताच।अंडाशुशास्यत्तेदंति॰ भिनत्तिप्राप्ते॰ सचममरति॰ नम्रियतइतिप्राप्ते॰ द्विविकरणताः
इंद्रोवस्तोननेषतुन्नपावितिप्रासे॰ त्रिविकरणताः इंद्रोगमुजात॰ रुषेमच्छन्नं॰ तीर्याम्मितिप्राप्ते॰ बहुलग्रहणं सर्वविधिव्यभिचारार्थं
सुप्तिङुपग्रहलिंगनराणांकालहलचस्वरकर्तृयडयंच॰ व्यत्ययमिच्छतिशास्त्रकृदेषांसोपिहिसिध्यतिबाहुलकेन॥ लिङ्याशिष्यङ्॥
आशीर्विषयेपालिङ्तस्मिन्परतरत्स्वंछंदसिविषयेअङ्प्रत्ययोभवति॰ शयोपवादः छंदस्युभययेतिलिङः सर्वधातुकसं
ज्ञाप्यस्ति॰ स्थागागमिवचिविदिशकिरुहयः प्रयोजनं॰ स्था॰ उपस्थेयं॰ गाः सत्यमुपगेयं॰ गमि॰ गमेमजानतोगृहान्॰ वचि॰ मं

अंबोचेमाग्नये विहि विदेवमेनां मनतिप्रविष्टां शाकिभ्रतं चरिष्यामि लब्धकेयं रुहि स्वर्गलोकमारुहेयं हशोरग्न यत्रुब्यः
पितरंचदर्शो मातरंच ॥कर्मवत्कर्मणा तुल्यक्रियः॥ कर्मणि क्रिया कर्म कर्मस्थया क्रियया तुल्य क्रियः कर्ता कर्मवद्भवति यस्मिन्क
र्मणि कर्तभूतेपितद्वक्रियालक्ष्यते यथा कर्मणि सकर्तकिम्मि भवति कर्माश्रयाणि कर्माणि प्रपद्यते कर्तरीशावितिकर्तग्रहणमि
हानुवृत्तं प्रथमया चविपरिणम्यमे परात्मने पद चिण् चिरावङ्गावाः प्रयोजनं भिद्यते काष्ठं स्वयमेव अभेदि काष्ठं स्वयमेव कारिष्य
तेकटः स्वयमेव यत्कर्मणिस्यादमममियथास्यात् भिद्यते कुसूलेनेति अकर्मकाणां भावेलः सिध्यति किमाशिष्य ङितादि
लकारकोनिर्देशः तत्र लानु वर्ततेलं तिस्य कर्ता कर्मवद्भवतीति कुसूलादि तियान भवति कर्मणेति किं करणाधिकरणाभ्यां तुल्य क्रिय
स्यमाभूत् साध्वसिश्छिनत्ति साधुस्थाली पचति धात्वधिकारात्समाने धातौ कर्मवद्भावः इह न भवति पचत्योदनं देवदत्तः राध्य
त्योदनः स्वयमेवेति कर्मस्थभावकानां कर्मस्थक्रियाणां च कर्ता कर्मवद्भवति न कर्तृस्थभावकानां न कर्तृस्थक्रियाणां कर्मस्थः पच
तेभावः कर्मस्था च भिदेः क्रिया मासासिभावः कर्तृस्थानवगमेः क्रिया ॥तपस्तपः कर्मकस्यैव॥ तपसंतापे अस्य कर्ता कर्मवद्भव
ति सचतपः कर्मकस्यैव नान्य कर्मकस्य क्रियाभेदाद्धियमेतत् उपवासादीनि तपांसि तापसं तपंति दुःखयंतीत्यर्थः स तापस
स्वर्गास्थिभूतः स्वर्गपतयेत्तप्यते अर्जयतीत्यर्थः पूर्वेणाप्राप्तः कर्मवद्भावो विधीयते तप्यते तपस्तापसः अतप्त तपस्तापसः तपः
कर्मकस्यैवेति किं उत्तपति सुवर्णं सुवर्णकारः ॥न दुहस्नुनमां यक्चिणौ॥ दुहस्नुनम् इत्येतेषां कर्मकर्तरि यक्चिणौ कर्मवद्भावा यद्दिष्टौ
न भवतः दुहेरनेन यक्प्रतिषिध्यते चिण् दुहश्चेति पूर्वमेव विभाषितः दुग्धे गौः स्वयमेव अदुग्ध गौः स्वयमेव अदोहि गौः स्व
यमेव प्रस्नुते गौः स्वयमेव प्रास्नोष्ट गौः स्वयमेव नमते दंडः स्वयमेव अनंस्त दंडः स्वयमेव यक्चिणोः प्रतिषेधाणि ग्रंथिग्रन्थ्यात्मने
पदाकर्मकाणामुपसंख्यानं कारयति कटं देवदत्तः कारयते कटः स्वयमेव अचीकरत कटं देवदत्तः अचीकरत कटः स्वयमेव उदपुच्छत गौः
स्वयमेव ग्रथ्नाति ग्रंथं देवदत्तः ग्रथ्नीते ग्रंथः स्वयमेव अग्रंथिष्ट ग्रंथः स्वयमेव ग्रथ्नाति श्लोकं देवदत्तः ग्रथ्नीते श्लोकः स्वयमेव
अग्रंथिष्ट श्लोकः स्वयमेव ब्रवीति श्लोकं देवदत्तः ब्रूते श्लोकः स्वयमेव अवोचत श्लोकं देवदत्तः अवोचत श्लोकः स्वयमेव आत्मनेपद
विधाने कर्मकाणां हंति माणवकं देवदत्तः आहते माणवकः ॥ स्वयमेव आवधिष्ट माणवकः स्वयमेव आहते धापिकुपति सैंधवाः

स्वयमेव अकुपत सैंधवाः स्वयमेव ॥कुषिरजोः प्राचां श्यन्परस्मैपदं च॥ कुषनिष्कर्षे रंजरागे अनयोर्धात्वोः कर्मकर्तरि
प्राचामाचार्याणां मतेन श्यन्प्रत्ययो भवति परस्मैपदं च यगात्मनेपदयोरपवादौ कुष्यति पादः स्वयमेव प्राचांग्रहणं विकल्पार्थं
कुष्यते रज्यते व्यवस्थितविभाषा मे यं ते न लिङ्लुङोः स्यादिविषये च न भवतः चुकुषे पादः स्वयमेव रजे वस्त्रं स्वयमेव कोषी
षीष्ट पादः स्वयमेव रंसीष्ट वस्त्रं स्वयमेव कोषिष्यते पादः स्वयमेव रंक्ष्यते वस्त्रं स्वयमेव अकोषि पादः स्वयमेव अरंजि वस्त्रं
स्वयमेव ॥धातोः॥ धातोरित्ययमधिकारो वेदितव्यः आ तृतीयाध्याय परिसमाप्तेर्यदित ऊर्ध्वमनुक्रमिष्यामो धातोरित्येवं त
द्वेदितव्यं वक्ष्यति व्यतव्यत्तानिपर इति कर्तव्यं करणीयं धातुग्रहणमनर्थकं षड्विधो धात्वधिकारात् कृदुपपदसंज्ञार्थं तु अस्मि
न्धात्वधिकारे तेयथा स्यातां पूर्वत्र माभूतामिति अर्द्ध धातुकसंज्ञार्थं च द्वितीयं धातुग्रहणं कर्तव्यं धातोरित्येवं विहितस्य यथा
स्यातां इह माभूत् लुसांल्लु मिरिति ॥तत्रोपपदं सप्तमीस्थं॥ तत्रैतस्मिन्धात्वधिकारे यत्सप्तमी निर्दिष्टं तदुपपदसंज्ञं भवति वक्ष्यति
कर्मण्यणः कुंभकारः नगरकारः स्थग्रहणं सूत्रेषु सप्तमी निर्दिष्टप्रतिपत्त्यर्थं इतरथा हि सप्तमी श्रूयते यत्र तत्रैव स्यात् स्तंबेरमः कर्ण
जप इति यत्र श्रयत्सप्तमी श्रुतिरस्ति समम्यांजनेर्ड इति उपसरजो मंदुरज इति स्थग्रहणात्सर्वत्र भवति गुरुसंज्ञाकरणमन्वर्थसं
ज्ञार्थं अन्वर्थ संज्ञाविज्ञाने सति समर्थपरिभाषाव्यापारार्थं यस्य कुंभं करोति कटमिति प्रत्ययो न भवति उपपदप्रदेशाः उपपदमति
ङिति एवमादयः ॥कृदतिङ्॥ अस्मिन्धात्वधिकारे तिङ्वर्जितः प्रत्ययः कृत्संज्ञको भवति कर्तव्यं करणीयं अतिङिति किं चीयात् स्त
यात् कृत्प्रदेशाः कृत्तद्धितसमासाश्चेत्येवमादयः ॥वासरूपोऽस्त्रियां॥ स्मिन्धात्वधिकारे असमानरूपाः प्रत्ययो पवादो वा बाध
को भवति स्मधिकार विहितप्रत्ययं यत इत्वा ण्वुल्तृचावुत्सर्गौ इगुपधज्ञाप्रीकिरः कः प्रत्यय धाहस्तद्विषये ण्वुल्तृचावपि भवतः
विक्षेपकः विक्षेप्ता विक्षिपः असरूप इति किं कर्मण्यण् पवादो स्वसर्गः आतोनुपसर्गे कः प्रत्यय वादः सानिसंबाधकर्ण्ये न भवति गोदः
कंबलदः नानुबंधकृतमसारूप्यं अस्त्रियामिति किं स्त्रियां क्तिन्नुत्सर्गे अप्रत्ययादित्यपवादः स बाधको भवति चिकीर्षा
जिहीर्षा ॥कृत्याः प्राङ्ण्वुलः॥ ण्वुल्तृचाविति वक्ष्यति प्रागेतस्मात् ण्वुल्संशब्दनाद्यानित ऊर्ध्वमनुक्रमिष्यामः कृत्यसंज्ञ

का॰ अ॰ ३
८

कास्ते वेदितव्यः तत्रैवोदाहरिष्यामः कृत्यप्रदेशाः कृत्यैरधिकार्थवचने कृत्यानां कर्तरि चेत्येवमादयः ॥ तव्यत्तव्यानीयरः ॥ धातोरिति वर्त्तते धातोस्तव्यत् तव्य अनीयर् इत्येते प्रत्यया भवंति तकाररेफौ स्वरार्थौ कर्तव्यं कर्तव्यं करणीयं वसेस्तव्यत् कर्तरि णिच्च वास्तव्यः केलीमर उपसंख्यानं पचेलिमा माषाः भिदेलिमानि काष्ठानि कर्मकर्तरि चायमिष्यते ॥ अचो यत् ॥ अजंताद्धातोर्यत्प्रत्ययो भवति तकारो यतो नाव इति स्वरार्थः गेयं पेयं चेयं जेयं अच्ग्रहणं किं यावता हलंतास्य तं वस्यति अजंतभूतः पूर्वे यथा स्यात् दित्स्यं धित्स्यं तकिशसि चति यति जनिनामुपसंख्यानं तक्यं तक्यं शसि शस्यं चतिः चत्यं यतिः यत्यं जनि जन्यं हनो वा वध च वध्यं घात्यं ॥ पोरदुपधात् ॥ पवर्गांताद्धातोरकारोपधाद्यत्प्रत्ययो भवति णयतोऽपवादः शप् शप्यं लभ् लभ्यं पोरिति किं वाक्यं वाक्यं अदुपधादिति किं कोप्यं गोप्यं तपरकरणं तत्कालार्थं आप्यं ॥ शकिसहोश्च ॥ शक्लृ षह मर्षणे अनयोर्धात्वोर्यत्प्रत्ययो भवति शक्यं सह्यं ॥ गदमदचरयमश्चानुपसर्गे ॥ गद व्यक्तायां वाचि मदी हर्षे चर प्रतिभक्षणयोः यम उपरमे एतेभ्यश्चानुपसर्गेभ्यो यत्प्रत्ययो भवति गद्यं मद्यं चर्यं यम्यं अनुपसर्ग इति किं प्रगाद्यं प्रमाद्यं यमेः पूर्वेणैव सिद्धे नियमार्थं वचनं ॥ चरेराङि चागुरौ ॥ आचर्यो देशः अगुराविति किं अन्वार्य उपनेता ॥ अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु ॥ अवद्यपण्यवर्या इत्येते शब्दा निपात्यंते गर्ह्य पणितव्य अनिरोध इत्येतेष्वर्थेषु यथासंख्यं अवद्यमिति निपात्यते गर्ह्ये चेत् तद्भवति अवद्यं पापं अनुद्यमन्यत् वक्तुमित्यर्थः पण्यमिति निपात्यते पणितव्यं चेत्तद्भवति पण्यः कंबलः पण्या गौः पाण्यमन्यत् वर्येति स्त्रियां नियात्यते अनिरोधश्चेद्भवति अनिरोधोऽप्रतिबंधः शतेन वर्या सहस्रेण वर्या वृत्यान्या स्त्रीलिंगनिर्देशः किमर्थः धार्या ऋत्विजः ॥ वह्यं करणं ॥ वहेर्धातोः करणे यत्प्रत्ययो भवति निपात्यते वहत्यनेनेति वह्यं शकटं करणमिति किं वाह्यमन्यत् ॥ अर्यः स्वामिवैश्ययोः ॥ ऋ गतौ अस्मात्स्वामि प्राप्ते स्वामिवैश्ययोरभिधेययोर्यत्प्रत्ययो निपात्यते अर्यः स्वामी अर्यो वैश्यः यतो नाव इत्युदात्तत्वे प्राप्ते स्वामिन्यंतोदा ८

DR. BHAU DAJI MEMORIAL

त्तत्वं वक्तव्यं स्वामिवैश्ययोरिति किं आर्यो ब्राह्मणः ॥ उपसर्या काल्या प्रजने ॥ उपसर्येति निपात्यते काल्या चेत्प्रजने भवति उपपूर्वात्सर्त्तेर्यत्प्रत्ययः प्राप्तकाला काल्या प्रजनः प्रजननं प्रथमगर्भग्रहणं गर्भग्रहणे प्राप्तकाला उपसर्या गौः उपसर्या वडवा काल्या प्रजन इति किं उपसार्या शरदि मथुरा ॥ अजर्यं संगतं ॥ अजर्यमिति निपात्यते संगतं चेद्भवति जीर्यतेर्नञ्पूर्वात्संगते संगमने कर्तरि यत्प्रत्ययो निपात्यते न जीर्यतीत्यजर्यं अजर्यमार्यसंगतं अजर्यं नोस्तु संगतं संगतमिति किं अजरिता कंबलः ॥ वदः सुपि क्यप् च ॥ अनुपसर्ग इति वर्त्तते वदेर्धातोः सुबंत उपपदे अनुपसर्गे क्यप् प्रत्ययो भवति चकाराद्यत् च ब्रह्मोद्यं ब्रह्मवद्यं सत्योद्यं सत्यवद्यं सुपीति किं वाद्यं अनुपसर्ग इत्येव अवाद्यं ॥ भुवो भावे ॥ सुप्यनुपसर्ग इत्यनुवर्त्तते भाव इति च भवतेर्धातोः सुबंत उपपदे अनुपसर्गे भावे क्यप् प्रत्ययो भवति यस्तु नानुवर्त्तते ब्रह्मभूयं गतः ब्रह्मत्वं गतः भावग्रहणमुत्तरार्थं इहासिद्धे भव्यं अनुपसर्ग इत्येव प्रभव्यं ॥ हनस्त च ॥ सुप्यनुपसर्ग इति च वर्त्तते भाव इति च हंतेर्धातोः सुबंत उपपदे अनुपसर्गे भावे क्यप् प्रत्ययो भवति तकारश्चांतादेशः ब्रह्महत्या अश्वहत्या सुपीत्येव घातो वर्त्तते ण्यत् तु भावेऽनभिधानात् अनुपसर्ग इत्येव प्रघातो वर्त्तते ॥ एतिस्तुशास्वृदृजुषः क्यप् ॥ सुप्यनुपसर्गे भावे इति निवृत्तं सामान्येन विधानमेतत् एतिस्तुशास्वृदृजुषृ इत्येतेभ्यः क्यप् प्रत्ययो भवति इत्यः स्तुत्यः शिष्यः वृत्यः आदृत्यः जुष्यः क्यपीति वर्त्तमाने पुनः क्यब्ग्रहणं बाधकबाधनार्थं ओरावश्यके ण्यतं बाधित्वा क्यबेव भवति अवश्यस्तुत्यः वृग्रहणे वृङो ग्रहणमिष्यते न वृञः वार्या ऋत्विजः शंसिदुहिगुहिभ्यो वेति वक्तव्यं शस्यं शंस्यं दुह्यं दोह्यं गुह्यं गोह्यं आङ्पूर्वादंजेः संज्ञायामुपसंख्यानं आज्यं घृतं कथमुपेयं एत्तेरुपेनेयं ॥ ऋदुपधाच्चाकॢपिचृतेः ॥ ऋकारोपधाद्धातोः क्यप् प्रत्ययो भवति वृतु वर्त्तने वृत्यं वृधु वृद्धौ वृध्यं अकॢपिचृतेरिति किं कल्प्यं चर्त्यं तपरकरणं किं कॄत संशब्दने णयदेव भवति कीर्त्यं ॥ ईशृ जपहृवसृज्यादि तच्य णिजस्त्यं पाणिसृज्यास्त्रिजनुः समवसर्पाद्वि समवसर्ग्या ॥ ई च खनः ॥ खनेर्धातोः क्यप् प्रत्ययो भवति ईकारश्चांतादेशः खेयं दीर्घनिर्देशः प्रश्लेषार्थः तत्र द्वितीय इकारो यं विभाषेत्यात्वबाधनार्थः ॥ भृञोऽसंज्ञायां ॥ भृञो धातोरसंज्ञायां विषये क्यप् प्रत्ययो भवति भृत्याः कर्मकराः भर्त्तव्या इत्यर्थः असंज्ञायामिति किं भार्या नाम क्षत्रियाः संभृत्या द्विभाषा संभृत्याः संभार्याः संज्ञायां पुंसि दृष्टत्वान्न ते भार्या प्रसिद्ध्यति ॥

का॰ प्र॰ ३
१

स्त्रियांभावाधिकारोस्तितेनभार्याप्रसिद्ध्यति ॥ मृजेर्विभाषा ॥ जेर्हलंतोविभाषाक्यप्प्रत्ययोभवति कृषुपधत्वात्प्राप्तविभाषेयं
परिमृज्यः परिमार्ग्यः ॥ राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः ॥ राजसूय सूर्य मृषोद्य रुच्य कुप्य कृष्टपच्य अव्यथ्य
इत्येतेशब्दाः क्यपिनिपात्यंते राज्ञासोतव्यः राजावा इहसूयतराजसूयः क्रतुः सुसतिभ्यां क्यप॰ सर्तेर्हलं सुवतेर्वा रुडागमः सरति सु
वतिवासूर्यः मृषापूर्वस्यवदतेः पक्षेयतिप्राप्तेनित्यंक्यबनिपात्यते मृषोद्यं रोचतेसौरुच्यः कर्तरिक्यप् गुपेरादिकत्वंचसंज्ञायांक्यपंगो
प्यमन्यत् कृष्टेपच्यंते कृष्टपच्याः कर्मकर्तरिनिपातः नव्यथते अव्यथ्यः ॥ भिद्योद्ध्यौनदे ॥ भिदेरुज्झेश्चक्यबनिपात्यतेनदेऽभिधे
ये उज्झेर्धत्वंच भिनत्तिकूलंभिद्यः उज्झत्युदकंउद्ध्यः नदइतिकिं भेत्ता उज्झिता ॥ पुष्यसिध्यौनक्षत्रे ॥ पुष्यः सिध्यइत्यधिकर
णेक्यबनिपात्यतेनक्षत्रेभिधेये पुष्यन्त्यस्मिन्नर्था इतिपुष्यः सिद्ध्यन्त्यस्मिन्निति सिध्यः नक्षत्रइतिकिं पोषणं सेधनं ॥ विपूयविनीय
जित्यामुंजकल्कहलिषु ॥ विपूय विनीय जित्य इत्येतेशब्दानिपात्यंते यथासंख्यंमुंजकल्कहलिइत्येतेष्वर्थेषुवाच्येषु विपूर्वात्पवते
र्नयतेश्च तथाजयतेर्यतिप्राप्तेकर्मणिक्यबिपात्यते विपूयोमुंजः विपाव्यमन्यत् विनीयः कल्कः विनेयमन्यत् जित्योहलिः जेयम
न्यत् ॥ प्रत्यपिभ्यांग्रहेश्छंदसि ॥ प्रतिअपिइत्येवंपूर्वाद्ग्रहेः क्यप्प्रत्ययोभवति छंदसिविषये मत्तस्य नप्रतिगृह्यं तस्मान्नापिगृह्यं छं
दसीतिकिं प्रतिग्राह्यं अपिग्राह्यं ॥ पदास्वैरिबाह्यापक्ष्येषुच ॥ परेस्वैरिणिबाह्यायां पक्ष्ये चार्थे ग्रहेर्धातोः क्यप्प्रत्ययोभवति पदे
तावत् प्रगृह्यंपदं यस्यसंज्ञा विहिता अवगृह्यंपदंयस्यावग्रहः क्रियते अस्वैरी परतंत्रः गृह्यकाइमे गृहीतकाइत्यर्थः बाह्यायां
ग्रामगृह्यासेना नगरगृह्यासेना ग्रामनगराभ्यांबहिर्भूतेत्यर्थः स्त्रीलिंगनिर्देशादन्यत्रनभवति पक्ष्येभवः पक्षः वासुदेवगृह्याः
अर्जुनगृह्याः तत्पक्षआश्रिताइत्यर्थः ॥ विभाषाकृवृषोः ॥ कृञोवृषश्चविभाषाक्यप्प्रत्ययोभवति करोतेर्ण्यतिप्राप्तेवर्षतेर्ऋदुपध
त्वाद्यतिप्राप्तेविभाषारभ्यते कृत्यं कार्यं वृष्यं वर्ष्यं ॥ युग्यंचपत्रे ॥ युग्यमितिनिपात्यतेपत्रंचेत्तद्भवति पतत्यनेनेतिपत्रंवाहनं
युज्यते युग्योगौः युग्योश्वः युग्योहस्ती युजेः क्यप् कुत्वंचनिपात्यते पत्रइतिकिं योग्यमन्यत् ॥ अमावस्यदन्यतरस्यां ॥ अमाशब्दः
सहार्थेवर्तते तस्मिन्नुपपदेवसेर्धातोः कालेधिकरणेण्यत्प्रत्ययोभवति तत्रान्यतरस्यांवृद्ध्यभावोनिपात्यते सहवसतोस्मिन्का १

लेसूर्याचंद्रमसाविति अमावास्या आमावास्या एकदेशविकृतस्यानन्यत्वात् अमावास्यायामेतत्राप्यमावास्याशब्दस्यापिग्रहणं
भवति अमावसोरहंण्यतोर्निपातयाम्यवृद्धितां तथैकवृत्तिः तातयोः स्वरश्चमेप्रसिद्ध्यति ॥ छंदसिनिष्टर्क्यदेवहूयप्रणीयोन्नी
योच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि ॥ निष्टर्क्यादयः शब्दाश्छं
दसिविषयेनिपात्यंते यदिह लक्षणेनानुपपन्नंतत्सर्वंनिपातनात्सिद्धं निष्टर्क्य इतिकृतीछेदने इत्यस्मान्निःपूर्वात्क्यपिप्राप्तेण्यत आ
द्यंतविपर्ययश्चनिसश्चषत्वंनिपात्यते निष्टर्क्यंचिन्वीत पशुकामः देवशब्दउपपदेह्वयतेर्जुहोतेर्वाक्यप् दीर्घश्चतुगभावः देवहूयः प्र
पूर्वात्उन्नयतेः क्यप् प्रणीयः उन्नीयः उत्पूर्वाच्छिषेः क्यप् उच्छिष्यं मृङ् प्राणत्यागे स्तृञ् आच्छादने ध्वृ हूर्छने एतेभ्यो यत्प्रत्ययः
मर्यः स्तर्यांस्त्रियामेवंविनाततनं ध्वर्यः खनेर्यत् खन्यः एतस्मादेवण्यत् खान्यः देवशब्दउपपदे यजेर्यदि देवयज्या स्त्रीलिंगेनिपा
तनं आङ्पूर्वात्पृच्छेः क्यप् आपृच्छ्यः प्रतिपूर्वात्सीव्यतेः क्यप्षत्वंच प्रतिषीव्यः ब्रह्मण्युपपदे वदेर्ण्यत् ब्रह्मवाद्यः भाव्यः स्ताव्यः
भवतेः स्तौतेर्ण्यत् आवादेशश्चभवति उपपूर्वस्यचिनोतेर्ण्यत् आयादेशः उपचाय्यपृडं पृडित्युत्तरपदे निपातनमेतत् हिरण्यइतिव
क्तव्यं हिरण्यादन्यत्र उपचेयपृडमेव निष्टर्क्येव्यत्ययंविदधात्विसः षत्वंनिपातनात् ण्यदायादेश इत्येतावुपचाय्येनिपातितौ ण्यदेक
स्माच्चतुर्भ्यः क्यप् चतुर्भ्यश्च यतो विधिः ण्यदेकस्मात् यशब्दौ कपौ ण्यद्विधिश्चतुः ॥ ऋहलोर्ण्यत् ॥ पंचम्यर्थेषष्ठीः ऋवर्णांताद्धातो
र्हलंताच्चण्यत्प्रत्ययोभवति कार्यं हार्यं धार्यं वाक्यं पाक्यं ॥ ओरावश्यके ॥ अवश्यंभाव आवश्यकं उवर्णांताद्धातोर्ण्यत्प्रत्ययोभ
वतिस्यादावश्यकेद्योत्ये यतोपवादः लाव्यं पाव्यं अवश्यकइतिकिं लव्यं पव्यं आवश्यके धात्वसइति चेत्स्वरसमासानुपपत्तिः अवश्यलाव्यं
अवश्यपाव्यमिति नैषदोषः मयूरव्यंसकादित्वात्समासः उत्तरपदप्रकृतिस्वरेयत्नं करिष्यते ॥ आसुयुवपिरपिलपित्रपिचमश्च
श्च ॥ आङ्पूर्वात्सुनोतेः युवपिरपिलपित्रपिचम् इत्येतेभ्यश्च ण्यत्प्रत्ययोभवति यतोपवादः आसाव्यं याव्यं वाप्यं राप्यं लाप्यं
अपत्राप्यं आचाम्यं अनुक्तसमुच्चयार्थश्चकारः दभि दाभ्यं ॥ आनाय्योनित्ये ॥ अनाय्यइतिनिपात्यते अनित्येभिधेये नयते
रावपूर्वस्यायादेशो निपात्यते आनाय्यो दक्षिणाग्निः सहि रेखा तस्मादनित्यविशेषे दक्षिणाग्नावेवावतिष्ठते स

का०प्र०३
७०

स्यत्वानित्यत्वं नित्यमजागरणात् यश्च गार्हपत्यादानीयते दक्षिणाग्निरग्न्याधेयं नसर्वस्य भवति निपातनं नदक्षिणा
ग्निमात्रेतस्य हि यो निर्विकल्पस्य तेवैश्यकुलाद्वित्तवतो भ्राष्ट्राद्वा गार्हपत्याद् इति अनाय्योऽनित्य इति च दक्षिणाग्नौ रूढं भवति
मेकयोनौतु तं विद्यादानेयो ह्यन्यथा भवेत् ॥ प्रणाय्योऽसंमतौ ॥ अभिधाना संमति रसम्मतिस्संमतिः संननं संनतिः सं
मतता प्रज्ञा प्रणाय्य इति निपात्यते असंमताभिधेये । प्रणाय्यश्चौरः । असंमताविति किं प्रणेयोऽन्यः यद्येवं कथमेतत् ज्येष्ठाय
पुत्राय पिता ब्रह्म प्रब्रूयात् प्रणाय्यायांतेवासिने नान्यस्मै कस्मैचनेति संमतिरभिलाषोप्युच्यते तदभावेन निष्कामतया असंमतिं
तेवासी भवति तस्मै निष्कामाय मोक्षायं यतमानायांतेवासिने प्रणाय्याय ब्रह्म ब्रूयादिति युज्यते ॥ पाय्यसांनाय्यनिकाय्य
धाय्यामानहविर्निवाससामिधेनिषु ॥ पाय्यादयः शब्दा निपात्यंते यथासंख्यं मानहविर्निवाससामिधेन्योऽभिधेयासु पा
य्य इति माङो ण्यत्प्रत्यय आदेः पत्वं च निपात्यते माने । पाय्यं मानं मेयमन्यत् । द्रुस्यिपते ण्यदायादेशावुपसर्गदीर्घत्वं च निपात्यते सा
नाय्यं हविः सन्नेयमन्यत् रूढिश्चापि ह विधिविशेषस्य तथा अपि हि ते निपूर्वात् चिनोते ण्यदायादेशावादिकुत्वं च निपात्यते निकाय्यो निवा
सः निचेयमन्यत् धाय्येति धौतो ण्यत्प्रत्ययो निपात्यते सामिधेनी चेद्भवति धाय्या सामिधेनी धेयमन्यत् सामिधेनी शब्दश्च ऋग्वि
शेषस्य वाचकः तत्र च धाय्येति न सर्वा सामिधेन्युच्यते किं तर्हि काचिदेव रूढिशब्दोऽयं तथा च सामिधेन्यामपि दृश्यते धाय्याः शंसति
अग्निर्नेता त्वं सोम क्रतुभिरिति ॥ क्रतौ कुण्डपाय्यसंचाय्यौ ॥ कुण्डपाय्यसंचाय्यसंचाय्य इत्येतौ शब्दौ निपात्येते क्रतावभिधेये कुण्डशब्दे तृतीयांत उपपदे पिबतेर्धातोरधि
करणे यत्प्रत्ययो निपात्यते युक् च कुण्डेन पीयतेऽस्मिन् सोम इति कुण्डपाय्यः क्रतुः पतोना क इति त्वरः संपूर्वाच्चिनोते ण्यदायादेशौ निपा

७०

त्येते संचीयतेऽसौ संचाय्यः क्रतुः क्रतावितिकिं कुण्डपानं संचेयः ॥ अग्नौ परिचाय्योपचाय्यसमूह्याः ॥ परिचाय्यउपचाय्यसमूह्य
इत्येते शब्दा निपात्यंते अग्नावभिधेये परिपूर्वादुपपूर्वाच्च चिनोतेर्ण्यदायादेशौ निपात्येते परिचाय्यः उपचाय्यः सम्पूर्वाद्वहेः संप्रसा
रणं दीर्घत्वं च निपात्यते समूह्यं चिन्वीत पशुकामः अग्नावितिकिं परिचेयं उपचेयं संवाह्यं ॥ चित्याग्निचित्ये च ॥ चित्यशब्दोऽग्नि
चित्याशब्दश्च निपात्यते चीयतेऽसौ चित्योऽग्निः अग्निचयनमेवाग्निचित्या भावे यकारप्रत्ययस्तुक् च निपात्यते तेनांतोदात्तत्वं भवति अग्नावि
चित्ये च चेयमन्यत् ॥ ण्वुल्तृचौ ॥ धातोरितिवर्तते सर्वधातुभ्यो ण्वुल्तृचौ प्रत्ययौ भवतः कारकः कर्ता हारकः हर्ता विकारः
सामान्यग्रहणाविघातार्थस्तु श्लंदसि भुरिष्टमेव यस्थितिः ॥ नंदिग्रहिपचादिभ्यो ल्युणिन्यचः ॥ आदिशब्दः प्रत्येकमभिसंबध्यते
त्रिभ्यो गणेभ्यस्त्रयः प्रत्यया यथासंख्यं भवंति नंद्यादिभ्यो ल्युः ग्रह्यादिभ्यो णिनिः पचादिभ्योऽच् नंदिग्रहिपचादयश्च न धातुपाठ
संनिविष्टा गृह्यंते किं तर्हि नंदनरमणइत्येवमादिषु प्रातिपदिकगणेषु अपोद्धृत्य प्रकृतयो निर्दिश्यंते नंदिवाशिमदिदूषिसाधिव
र्द्धिशोभिरोचिभ्यो ण्यंतेभ्यः ॥ संज्ञायां नंदनः वाशनः मदनः दूषणः साधनः वर्द्धनः शोभनः रोचनः शोभनः रोचनः सहितपिदमः
संज्ञायां सहनः तपनः मदनः जल्पनः रमणः । संक्रंदनः संकर्षणः संहर्षणः जनार्दनः मधुसूदनः यवनः विभीषणः लवणः
निपातनात् त्वं चित्तविनाशनः कुलदमनः इति नंद्यादिः ॥ ग्राही उत्साही उद्दासी उद्भासी स्थायी मंत्री संमर्दी रक्षश्रुवयशनो
निरक्षी निश्रावी निवापी निशायी याच्या हसंव्याहृप्रजदभसां प्रतिषिद्धानां अयाची अव्याहारी असंव्याहारी अव्राजी
अवादी अवासी अचामचित्तकर्तृकाणां प्रतिषिद्धानामित्येव अकारी अहारी अहारी अविनीयी अविशायी वि
शायी विषयी विषइदेशे अभिभावी भूते अभिभावि अपराधी उपरोधी परिभावी परिभवी इति ग्रह्यादिः पच वच वपि वद
चल पत नदट् भषट् प्लवट् चरट् गरट् तरट् चोरट् अर मर सय सूददेवट् सेव कोप मेष मेघ नर्त व्रण दर्श सर्प
जारभर श्वपच पचादिराकृतिगणः ॥ इगुपधज्ञाप्रीकिरःकः ॥ इगुपधेभ्यो धातुभ्यो जानातेः प्रीणातेः किरतेश्च कप्रत्ययो भवति
विक्षिपः विलिखः बुधः कृशः जानातीति ज्ञः प्रीणातीति प्रियः किरतीति किरः इगुपधेष्वेव पचादिषु द्रष्टव्याः ॥ आत

श्चोपसर्गे॥ आकारांतेभ्यो धातुभ्य उपसर्गे उपपदे क प्रत्ययो भवति॰ एग प्रत्ययस्यापवादः प्रस्थः प्रस्नः सुग्लः सुम्लः॥ पाघ्रा
ध्मा धेट् दृशः शः॥ पाघ्राध्माधेट्दृश इत्येतेभ्यो धातुभ्यः श प्रत्ययो भवति॰ उत्पिबः विपिबः घ्राः उज्जिघ्रः विजिघ्रः ध्माः उद्धमः विधमः
धेट्॰ उद्धयः विधयः दृशः उत्पश्यः विपश्यः उपसर्ग इति किं विभाषानुवर्तयति॰ पश्यतीति पश्यः जिघ्रतेः संज्ञायां प्रतिषेधः व्याघ्रः॥
॥अनुपसर्गाल्लिंपविंदधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च॥ अनुपसर्गेभ्यो लिंपादिभ्यः श प्रत्ययो भवति॰ लिंपतीति लिं
पः विंदतीति विंदः धारयतीति धारयः पारयतीति पारयः वेदयतीति वेदयः उदेजयतीत्युदेजयः चेतयतीति चेतयः साति:
सौत्रो धातुः सातयः सहयः अनुपसर्गादिति किं प्रलिपः नौ लिंपेरिति वक्तव्यं निलिंपा नाम देवाः गवादिषु विंदेः संज्ञायां गोविंदः अर
विंदः॥ ददातिदधात्योर्विभाषा॥ ददातेर्दधातेश्च विभाषा श प्रत्ययो भवति॰ ददः दधः शयः भावः अनुपसर्गादित्येव॰ प्रदः प्रधः
ज्वलितिकसंतेभ्यो णः॥ इति शब्द आद्यर्थे वर्तते ज्वलदाद्याविर्भावमारिभ्यो धातुभ्यः कसगतापर्यंतेभ्यो विभाषा ण प्र
त्ययो भवति॰ अचोऽपवादः ज्वलः ज्वालः चलः चालः अनुपसर्गादित्येव प्रज्वलः तनोतेर्णे उपसंख्यानं अवतनोतीत्यवतानः
॥श्याद्व्यधास्रुसंस्र्वतीणवसावहृलिहश्लिषश्वसश्च॥ अनुपसर्गादिति निवृत्तं विभाषेति च॰ श्यैङ् आकारांतेभ्यो धातुभ्यः
व्यध आस्रु संस्रु अतीण् अवस अवहृ लिह श्लिष श्वस इत्येतेभ्यश्च ण प्रत्ययो भवति॰ श्यापतेराकारांतत्वादेव सिद्धे प्रत्यये
यवनं बाधकबाधनार्थः उपसर्गे किं बधित्वा अयमेव भवति॰ अवश्यायः प्रतिश्यायः आतः दायः धायः व्याधः आस्रावः अस्रावः
अवसायः अवहारः लेहः श्लेषः श्वासः॥ दुन्योरनुपसर्गे॥ दुनोतेर्नयतेश्चानुपसर्गात् ण प्रत्ययो भवति॰ दुनोतीति दावः नयती
ति नायः अनुपसर्ग इति किं प्रदवः प्रणयः॥ विभाषा ग्रहः॥ ग्रहेर्धातोर्विभाषा ण प्रत्ययो भवति॰ अचोऽपवादः ग्रहः ग्राहः व्यवस्थि
तविभाषा चेयं॰ जलचरे ग्राहः एव॰ ज्योतिषि ग्रहः एव॰ भवतेश्चेति वक्तव्यं भवतीति भावः भवः॥ गेहे कः॥ ग्रहेर्धातोः क प्रत्ययो
भवति॰ गेहे कर्तरि गेहे वेश्मः तात्स्थ्यात् दाराश्च गृह्णंतीति गृहाः दाराः गृहाणि वेश्मानि॥ शिल्पिनि ष्वुन्॥ धातोः ष्वुन् प्रत्ययो
भवति॰ शिल्पिनि कर्तरि नृतिखनि॰ रंजिभ्यः परिगणनं कर्तव्यं नृती गात्रविनामे नर्तकः खनु अवदारणे॰ खनकः खनकी॰ रज
नकी॰ रंज रागे॰ रंजेरनुनासिकलोपश्च॰ रजकः रजकी॥ गस्थकन्॥ गायतेर्धातोस्थकन् प्रत्ययो भवति॰ शिल्पिनि कर्तरि ११

गाथकः॥ ण्युट् च॥ चकारेण गायतिरनुकृष्यते॰ गायतेर्धातोर्ण्युट् प्रत्ययो भवति॰ शिल्पिनि कर्तरि॰ गायनः गायनी॰ योगवि
भाग उत्तरार्थः॥ हश्च व्रीहिकालयोः॥ चकारेण ल्युडनुकृष्यते॰ जहातेर्धातोर्जिहीतेश्च ण्युट् प्रत्ययो भवति व्रीहौ कर्तरि काले च हा
यना नाम व्रीहयो भवंति॰ जहत्युदकमिति कृत्वा॰ काले हायनो नाम संवत्सरः आहातिभावानिति कृत्वा॥ प्रुसृल्वः समभिहारे वुन्॥
प्रुङ् प्रुङ् गतौ॰ सृगतौ॰ लूञ् छेदने इत्येतेभ्यो धातुभ्यः समभिहारे वुन् प्रत्ययो भवति॰ प्रवकः समभिहारग्रहणे नात्र साधुकारित्व
लक्षते॰ साधुकारिणि वुन्विधानं सकृदपि यः सुष्ठु करोति तत्र भवति॰ बहुशोऽपि यो दुष्टं करोति तत्र न भवति॥ आशिषि च॥
आशिषि गम्यमानायां धातुमात्राद्वुन् प्रत्ययो भवति॰ जीवतात्॰ जीवकः॰ नंदतात्॰ नंदकः भवतात्॰ भवकः आशीः प्रार्थनाविशेषः
स च क्रियाविषयः अमुष्याः क्रियायाः कर्ताभिवेदितेवमाशास्यते॥ ॥इति काशिकायां वृत्तौ तृतीयस्याध्यायस्य प्रथमः पादः
॥कर्मण्यण्॥ त्रिविधं कर्म निर्वर्त्यं विकार्यं प्राप्यं च सर्वत्र कर्मण्युपपदे धातोरण् प्रत्ययो भवति॰ निर्वर्त्ये॰ कुंभकारः नगरकारः॥
विकार्ये काण्डलावः शरलावः प्राप्ये॰ वेदाध्यायः चर्चापाठः ग्रामं गच्छति॰ आदित्यं पश्यति हिमवंतं शृणोति इत्यत्र न भवति॰ अनभिधा
नात्॥ शीलिकामिभक्ष्याचरिभ्यो णः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यं॰ मांसं शीलयति॰ मांसशीलः मांसशीला॰ मांसकामः मां
सकामा॰ मांसभक्षः मांसभक्षा॰ कल्याणाचारः कल्याणाचारा इक्षिक्षमिभ्यां चेति वक्तव्यं सुखप्रतीक्षः सुखप्रतीक्षा बहुक्षमः
बहुक्षमा॥ ह्वावामश्च॥ ह्वेञ् स्पर्धायां शब्दे च॰ वेञ् तंतुसंताने॰ माङ् माने॰ इत्येतेभ्यः कर्मण्युपपदे॰ अण् प्रत्ययो भवति॰
क प्रत्ययस्यापवादः स्वर्गह्वायः तंतुवायः धान्यमायः॥ आतोऽनुपसर्गे कः॥ आकारांतेभ्यो धातुभ्योऽनुपसर्गेभ्यः कर्मण्यु
पपदे क प्रत्ययो भवति॰ अणोऽपवादः गोदः कंबलदः पार्ष्णित्रं अंगुलित्रं अनुपसर्ग इति किं गोसंदायः वडवासंदायः॥ सुपि स्थः॥
सुबंत उपपदे तिष्ठतेर्धातोः क प्रत्ययो भवति॰ समस्थः विषमस्थः अत्र योगविभागः कर्तव्यः सुप्याकारांतेभ्यो धातुभ्यः
क प्रत्ययो भवति द्वाभ्यां पिबतीति द्विपः पादपः स्थः स्थश्च॥ सुपि कप्रत्ययो भवति॰ किमर्थमिदं कर्तरि कृत्योगः॰ अनेन भावे॰

यथास्यात् अरखूनानुस्थानं आखुस्थः इत उत्तरं कर्मणीति सुपीति च द्वयमप्यनुवर्तते तत्र सकर्मकेषु धातुषु कर्मणि सेतदुपतिष्ठते सत्र सुपीति ॥ तुंदशोकयोः परिमृजापनुदोः ॥ तुंदशोकयोः कर्मणोरुपपदयोः परिमृजापनुदोर्धात्वोः कप्रत्ययो भवति तुंदपरिमृज आस्ते शोकापनुदः पुत्रो जातः आलस्यसुखाहरणयोरिति वक्तव्यं अलसस्तुंदपरिमृज इत्युच्यते तुंदपरिमार्ज एवान्यः सुखस्याहर्ता शोकापनुदः शोकापनोद एवान्यः ॥ प्रकरणे मूलविभुजादिभ्य उपसंख्यानं ॥ मूलानि विभुजतीति मूलविभुजो रथः नखानुमुचंतीति नखमुचानि धनूंषि काकगुहास्तिलाः कौ मोदते कुमुदं ॥ प्रे दाज्ञः ॥ सोपसर्गार्थ आरंभः ददातेर्जानातेश्च धात्वोः प्रेणोपसृष्टात्कर्मण्युपपदे कप्रत्ययो भवति आणोपवादः सर्वप्रदः पथिप्रज्ञः प्र इति किं गोसंदायः ॥ समि ख्यः ॥ सोपसर्गार्थ आरंभः संपूर्वात् ख्या इत्येतस्माद्धातोः कर्मण्युपपदे कप्रत्ययो भवति गां संचष्टे गोसंख्यः पशुसंख्यः ॥ गापोष्टक् ॥ कर्मण्यनुपसर्ग इत्यनुवर्तते गायतेः पिबतेश्च धात्वोः कर्मण्युपपदे अनुपसर्गे टक्प्रत्ययो भवति कस्यापवादः शक्रं गायति शक्रगः सामगः शक्रगी सामगी सुराशीध्वोः पिबतेरिति वक्तव्यं सुरापः सीधुपः सुरापी सीधुपी सुराशीध्वोरिति किं क्षीरपा ब्राह्मणी पिबतेरिति किं सुरां पातीति सुरापः अनुपसर्ग इत्येव शक्रसंगायः सामसंगायः ॥ बहुलं छंदसीति वक्तव्यं ॥ या ब्राह्मणी सुरापी भवति नैनां देवाः पतिलोकं नयंति या ब्राह्मणी सुरापी भवति नैनां देवाः पतिलोकं नयंति ॥ हरतेरनुद्यमनेऽच् ॥ हरतेर्धातोरनुद्यमनेऽर्थे वर्तमानात्कर्मण्युपपदे अच्प्रत्ययो भवति अणोपवादः उद्यमनमुत्क्षेपणं अंशहरः रिक्थहरः अनुद्यमन इति किं भारहारः अच्प्रकरणे शक्तिलांगलांकुशयष्टितोमरघटघटीधनुष्षु ग्रहेरुपसंख्यानं शक्तिग्रहः लांगलग्रहः अंकुशग्रहः तोमरग्रहः घटग्रहः घटीग्रहः धनुर्ग्रहः सूत्रे च धार्यर्थे सूत्रग्रहः सूत्रं धारयतीत्यर्थः सूत्रग्राह एवान्यः ॥ वयसि च ॥ वयसि गम्यमाने हरतेर्धातोः कर्मण्युपपदे अच्प्रत्ययो भवति अणोपवादः उद्यमनार्थ आरंभः कालकृता शरीरावस्था यौवनादि वय उच्यते यदुद्यमानं क्रियमाणं संभाव्यमानं वा भवयोगमवगमयति तत्रायं विधिः अस्थिहरः

श्वा कवचहरः क्षत्रियकुमारः ॥ आङि ताच्छील्ये ॥ आङ्पूर्वाद्धरतेः कर्मण्युपपदे अच्प्रत्ययो भवति ताच्छील्ये गम्यमाने ताच्छील्यं तत्स्वभावता पुष्पाहारः फलाहारः पुष्पाहरणे स्वाभाविकी फलनिरपेक्षा प्रवृत्तिरस्येत्यर्थः ताच्छील्य इति किं भारमाहरतीति भाराहारः ॥ अर्हः ॥ अर्ह पूजायां अस्माद्धातोः कर्मण्युपपदे अच्प्रत्ययो भवति अणोपवादः स्त्रियां विशेषः पूजार्हा ब्राह्मणी गंधार्हा माल्यार्हा ॥ स्तंबकर्णयोरमिजपोः ॥ स्तंबकर्ण इत्येतयोः सुबंतयोरुपपदयोर्यथासंख्यं रमिजपोर्धात्वोरच्प्रत्ययो भवति रमेरकर्मकत्वाज्जपेः शब्दकर्मकत्वात्कर्म न संभवतीति सुपीत्येतदिहाभिसंबध्यते हस्तिसूचकयोरिति वक्तव्यं स्तंबे रमते स्तंबेरमो हस्ती कर्णे जपतीति कर्णेजपः सूचकः हस्तिसूचकयोरिति किं स्तंबे रंता कर्णे जपिता शमकः ॥ शमि धातोः संज्ञायां ॥ शम्युपपदे धातुमात्रात्संज्ञायां विषये अच्प्रत्ययो भवति शंकरः शंभवः शंवदः धातुग्रहणं किं यावता धातोरिति वर्तत एव शमि संज्ञायां धातुग्रहणं कृञो हेत्वादिषु प्रतिषेधार्थं शंकरा परिव्राजिका शंकरा नाम शकुनिका तच्छीला वा ॥ अधिकरणे शेतेः ॥ सुपीति संबध्यते शेतेर्धातोरधिकरणे सुबंत उपपदे अच्प्रत्ययो भवति खे शेते खशयः गर्तशयः पार्श्वादिषूपसंख्यानं पार्श्वाभ्यां शेते पार्श्वशयः दिग्धसहपूर्वाच्च दिग्धेन सह शेते दिग्धसहशयः उत्तानादिषु कर्तृषु उत्तानः शेते उत्तानशयः अवमूर्धा शेते अवमूर्धशयः गिरौ डश्छंदसि गिरौ शेते गिरिशः ॥ चरेष्टः ॥ अधिकरण इति वर्तते चरेर्धातोरधिकरणे सुबंत उपपदे टप्रत्ययो भवति कुरुषु चरतीति कुरुचरः मद्रचरः कुरुचरी मद्रचरी प्रत्ययांतकरणं ङीबर्थं ॥ भिक्षासेनादायेषु च ॥ अनधिकरणार्थ आरंभः भिक्षा सेना आदाय इत्येतेषूपपदेषु चरेर्धातोष्टप्रत्ययो भवति भिक्षाचरः सेनाचरः आदायचरः ॥ पुरोऽग्रतोऽग्रेषु सर्तेः ॥ पुरस् अग्रतस् अग्रे इत्येतेषूपपदेषु सर्तेर्धातोष्टप्रत्ययो भवति पुरः सरतीति पुरःसरः अग्रतःसरः अग्रेसरः ॥ पूर्वे कर्तरि ॥ पूर्वशब्दे कर्तृवाचिन्युपपदे सर्तेर्धातोष्टप्रत्ययो भवति पूर्वः सरतीति पूर्वसरः कर्तरीति किं पूर्वं देशं सरतीति पूर्वसारः ॥ कृञो हेतुताच्छील्यानुलोम्येषु ॥ कर्मण्युपपदे करोतेर्धातोष्टप्रत्ययो भवति हेतौ ताच्छील्ये आनुलोम्ये च गम्यमाने हेतुरैकांतिकं कारणं ताच्छील्यं तत्स्वभावता आनुलोम्यमनुकूलता हेतौ तावत् शोककरी कन्या यशस्करी विद्या कुलकरं धनं ताच्छील्ये श्राद्धकरः अर्थकरः आनुलोम्ये प्रैषकरः वचनकरः एतेष्विति किं कुंभकारो नगरकारः ॥ दिवाविभा

निशा प्रभाभास्कारांतानंतादिबहुनांदिकिंलिपिलिविबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजंघाबाह्वहर्यत्तद्धनुररुष्षु कर्मणि
सुपीति च द्वयमप्यनुवर्तते तत्र यथायोगं संबंधः। दिवादिषूपपदेषु करोतेर्धातोष्टप्रत्ययो भवती अहेत्वर्थ आरंभे दिवाशब्दो
ऽधिकरणवचनः सुपि स्थस्य विशेषणं दिवा करोति प्राणिनश्चेष्टायुक्तानिति दिवाकरः विभां करोतीति विभाकरः निशाकरः प्रभा
करः भास्करः सकारस्य निपातनाद्विसर्जनीयजिह्वामूलीयौ न भवतः कारकरः अंतकरः अनंतकरः आदिकरः बहुकरः नां
दिकरः किंकरः लिपिकरः लिबिकरः बलिकरः भक्तिकरः कर्तृकरः चित्रकरः क्षेत्रकरः संख्या एककरः द्विकरः त्रिकरः जंघाकरः बाहुकरः
अहस्करः यत्करः तत्करः धनुःकरः अरुष्करः किंयत्तद्बहुषु द्वजो विधानं किंकरा यत्करा तत्करा बहुकरा अथवा अजादिषु पाठः॥
करिष्यते कर्मणि भृतौ कर्मणीति स्वरूपग्रहणं कर्मशब्द उपपदे कर्मवाचिनि करोतेष्टप्रत्ययो भव भृतौ गम्यमानायां भृतिर्वेतनं
कर्मनिर्वेशः कर्म करोतीति कर्मकरः भृताविति किं कर्मकारः न शब्दश्लोककलहगाथावैरचाटुसूत्रमंत्रपदेषु शब्दादिषूपपदेषु करोतेष्ट
प्रत्ययो न भवति हेत्वादिषु प्राप्तः प्रतिषिध्यते शब्दकारः श्लोककारः कलहकारः गाथाकारः वैरकारः चाटुकारः सूत्रकारः मंत्रकारः
पदकारः स्तंबशकृतोरिन् स्तंबशकृत् इत्येतयोः कर्मणोरुपपदयोः इन्प्रत्ययो भवति व्रीहिवत्सयोरिति चेत् स्तंबकरी व्रीहिः
शकृत्करिर्वत्सः व्रीहिवत्सयोरिति किं स्तंबकारः शकृत्कारः हरतेर्दृतिनाथयोः पशौ दृतिनाथ इत्येतयोः कर्मणोरुपपदयोर्हरतेर्धातोः
पशौ कर्तरि इन्प्रत्ययो भवति दृतिहरिः नाथहरिः पशुः पशाविति किं दृतिहारो नाथहारः। फलेग्रहिरात्मंभरिश्च फलेग्रहिः आत्मंभरि
रित्येतौ शब्दौ निपात्येते उपपदस्य एकारांतत्वं इन्प्रत्ययश्च ग्रहेर्निपात्यते फलानि गृह्णातीति फलेग्रहिर्वृक्षः आत्मशब्दस्योपपदस्य नुमा
गम इन्प्रत्ययस्य आज्जो निपात्यते आत्मानं बिभर्तीति आत्मंभरिः अनुक्तसमुच्चयार्थश्चकारः कुक्षिंभरिः उदरंभरिः छंदसि वनसनरक्षि
मथां वनसन संभक्तौ रक्ष पालने मथ विलोडने एतेभ्यः कर्मण्युपपदे छंदसि विषये इन्प्रत्ययो भवति ब्रह्मवनिं त्वा क्षत्रवनिं गोसनिं
पोपथिरक्षिष्यानौ हविर्मथीनां॥ एजेः खश्॥ एजृ कंपने इत्यस्माण्ण्यंतात् कर्मण्युपपदे खश्प्रत्ययो भवति खकारो मुमर्थः शकारः सा
र्वधातुकसंज्ञार्थः अंगमेजयति अंगमेजयः जनमेजयः खश्प्रकरणे वातशुनीतिलशर्धेष्वजधेट्तुदजहातीनामुपसंख्यानं वात
मजा मृगाः शुनिंधयः तिलंतुदः शर्धंजहा माषाः॥ नासिकास्तनयोर्ध्माधेटोः नासिकास्तनयोः कर्मणोरुपपदयोर्ध्माधेटोर्धा
त्वोः खश्प्रत्ययो भवति यथासंख्यमत्र नेष्यते स्तने धेटः स्तनंधयः नासिकायां तु ध्मश्च धेटश्च नासिकंधमः नासिकंधयः॥

तथैतन्नासिकास्तनयोरिति लक्षणव्यभिचारचिह्नात्स्त्र्यजस्या पूर्वनिपातनाल्लभ्यते धेटष्टित्वात् स्त्रियां ङीप्रत्ययो भवति
स्तनंधयी नाडीमुष्ट्योश्च नाडीमुष्टि इत्येतयोः कर्मणोरुपपदयोर्ध्माधेटोः खश्प्रत्ययो भवति अत्रापि व्यंतस्यापूर्वनिपातो लक्ष
णव्यभिचारचिह्नं तेन संख्यातानुदेशो न भवति नाडींधमः मुष्टिंधमः नाडिंधयः मुष्टिंधयः अनुक्तसमुच्चयार्थश्चकारः घटींधमः
घटींधयः खरिंधमः खरिंधयः वातंधमः वातंधय उदि कूले रुजिवहोः रुजोभंगे वह प्रापणे एताभ्यां मुन्दधिभ्यां कूले कर्मण्युप
पदे खश्प्रत्ययो भवति कूलमुद्रुजतीति कूलमुद्रुजो रथः कूलमुद्वहः वहाभ्रे लिहः वहाभ्र इत्येतयोः कर्मणोरुपपदयोर्लिहेर्धातोः
खश्प्रत्ययो भवती वहंलीति वहंलिहो गौः अभ्रंलिहो वायुः परिमाणे पचः परिमाणं प्रस्थादि तस्मिन्कर्मण्युपपदे पचेः खश्प्रत्ययो भ
वति प्रस्थंपचति प्रस्थंपचा स्थाली द्रोणंपचा खारिंपचः कटाहः मितनखे च मितनख इत्येतयोः कर्मणोरुपपदयोः पचेः खश्प्रत्ययो
भवती अपरिमाणार्थ आरंभः मितं पचति मितंपचा ब्राह्मणी नखंपचा यवागूः विध्वरुषोस्तुदः विधु अरुस् इत्येतयोः कर्मणोरु
पपदयोस्तुदेर्धातोः खश्प्रत्ययो भवति विधुंतुदः अरुंतुदः॥ असूर्यललाटयोर्दृशितपोः॥ असूर्यललाट इत्येतयोः कर्मणोरु
पपदयोर्यथासंख्यं दृशितपोर्धात्वोः खश्प्रत्ययो भवती असूर्यंपश्या राजदाराः ललाटंतप आदित्यः असूर्य इति चासमर्थसमासोयं
दृशिना नञः संबंधात् सूर्यं न पश्यंतीति गुप्तिपरं चैतत् एवं नाम गुप्ता यदपरिहार्यदर्शनमपि सूर्यं न पश्यंतीति उग्रंपश्येरंमद
पाणिंधमाश्च उग्रंपश्य इरंमद पाणिंधम इत्येते शब्दा निपात्यंते उग्रं पश्यतीति उग्रंपश्यः इरया माद्यति इरंमदः पाणयो ध्मायंते येषु
ति पाणिंधमाः पंथानः॥ प्रियवशे वदः खच्॥ प्रियवश इत्येतयोः कर्मणोरुपपदयोर्वदेर्धातोः खच्प्रत्ययो भवति प्रियं वदतीति प्रियं
वदः वशंवदः चकारः खचि ह्रस्व इति विशेषणार्थः खकारो मुमर्थः प्रत्ययांतरकरणमुत्तरार्थं खचप्रकरणे गमेः सुप्युपसंख्यानं मतंगमो हस्ती
मतंगमा हस्तिनी विहायसो विह च विहायसा गच्छतीति विहंगमः खच्च डिद्वा वक्तव्यः विहंगः विहंगमः डे च विहायसो विहादेशो वक्तव्यः
विहगः॥ द्विषत्परयोस्तापेः॥ द्विषत्परयोः कर्मणोरुपपदयोस्तापेर्धातोः खच्प्रत्ययो भवति तदा हेतुरादिः तपसंतापे अस्माद्धेतु
द्वयोरपि ग्रहणं द्विषंतं तापयतीति द्विषंतपः परंतपः द्विषत्परयोरिति द्विषत्कारको निर्देशः तेन स्त्रियां न भवति द्विषतीं ताप
यतीति द्विषतीतापः॥ वाचि यमो व्रते॥ वाक्शब्दे कर्मण्युपपदे यमेर्धातोः खच्प्रत्ययो भवति व्रते गम्यमाने व्रत इति शास्त्रि·

तोनियम उच्यते· याचंयम आस्तं अतइतिकिं याम्यामः पूः सर्वयो द्वारिसहो पुरसर्व इत्येतयोः कर्मणि रुपपदयोर्यथासंख्यं दा
रिसहोडुत्वोः खच्प्रत्ययोभवति· पुरंदारयतीपुरंदरः सर्वंसहोराजा· भगेच दारेरितिवक्तव्यं· भगंदरः सर्वकूलाभ्रकरीषेषुकषः
सर्वकूल अभ्रकरी· षइत्येतेषु कर्मस्तूपपदेषु कषेर्धातोः खच्प्रत्ययोभवति· सर्वंकषतिसर्वंकषः खलः कूलंकषानदी· अभ्रंकषो
गिरिः करिषंकषावात्या· मेघर्तिभयेषु कृञः ॥ मेघर्तिभय इत्येतेषु कर्मस्तूपपदेषु कृञः खच्प्रत्ययोभवति· मेघंकरः ऋतिंकरः भयंकरः
उपपदविधौ भयादिग्रहणं· तदंतविधिं प्रयोजयति· अभयंकरः क्षेमप्रियमद्रेऽण्च· क्षेमप्रियमद्र इत्येतेषु कर्मस्तूपपदेषु करोतेरण्
प्रत्ययोभवति· चकारात् खच्च· क्षेमकारः क्षेमंकरः प्रियकारः प्रियंकरः मद्रकारः मद्रंकरः वेतिवक्तव्ये ऽण्ग्रहणं हेत्वादिषु टप्रतिषेधा
र्थं· आशितेभुवः करणभावयोः अत्रसुपिनुपातिष्ठते· आशितशब्देसुबंत उपपदे भवतेर्धातोः करणेभावेचार्थे खच्प्रत्ययो भवती· अ
शितोभवत्यनेन आशितंभव ओदनः भावे असितस्यभवनमाशितंभवंवर्तते ॥ संज्ञायांभृतृवृजिधारिसहितपिदमः ॥
कर्मणीतिच सुपीतिचमहत्तं संज्ञाचशाद्धयासंभवंसंबध्यते· भृ· तृ· वृ· जि· धारि· सहि· तपि· दम इत्येतेभ्योधातुभ्यः संज्ञायांविषये
खच्प्रत्ययोभवती· विश्वंभरा· वसुंधरा· रथंतरंसाम· पतिंवराकन्या· शत्रुंजयोहस्ति· युगंधरः पर्वतः शत्रुंसहः शत्रुंतपः अरिंदमः
संज्ञायामितिकिं कुटुंबभारः ॥ गमश्च ॥ गमेर्धातोः सुप्युपपदे संज्ञायांविषये खच्प्रत्ययोभवति· सुतंगमोनाम· यस्यपुत्रः सौतं
गमिः· योगविभाग उत्तरार्थः ॥ अंतात्यंताध्वदूरपारसर्वानंतेषुडः ॥ संज्ञायामिति नानुवर्तते· अंत अत्यंत अध्व दूर पार सर्व अनंत
इत्येतेषु कर्मस्तूपपदेषु गमेर्डप्रत्ययोभवति· अंतगः अत्यंतगः अध्वगः दूरगः पारगः सर्वगः अनंतगः डकारष्टिलोपार्थः डित्यभस्या
प्यनुबंधकरणसामर्थ्यादिति· डप्रकरणे सर्वत्रपन्नयोरुपसंख्यानं· सर्वत्रगः पन्नगः उरसोलोपश्च· उरसागच्छतिउरगः सुदुरोर
धिकरणे सुखेन गच्छत्यस्मिन्निति सुगः दुर्गः ॥ निरोदेशे ॥ निर्गोदेशः अपरआहडप्रकरणेऽन्येष्वपि दृश्यत इति स्त्र्यागारगः ग्रामगः
गुरुतल्पगः ॥ आशिषिहनः ॥ डइतिवर्तते आशिषि गम्यमानायां हंतेर्धातोः कर्मण्युपपदे डप्रत्ययोभवति· तिमिंवध्यात्
मिरः शत्रुहः आशीर्षीति किं शत्रुघातः दाराबाहनोऽणंतस्यचटः संज्ञायां· दाराउपपदे आङ्पूर्वाद्धंतेरण्प्रत्ययोभवति·

अंतस्यचटकारआदेशोभवति· संज्ञायांविषये· दाआहंतिदार्वाघाटः ॥ चारौ च ॥ आङ्पूर्वाद्धंतेश्चारावुपपदे अण्प्रत्ययः अं
तस्यचाटकारादेशः· चार्वाघाटः चार्वाघातः ॥ कर्मणिसमि च ॥ कर्मण्युपपदे संपूर्वाद्धंतेरण्प्रत्ययः अंतस्यचाटकारादेशः व
र्णान्संहंतिवर्णसंघाटः वर्णसंघातः पदसंघाटः पदसंघातः ॥ अपेक्लेशतमसोः ॥ कर्मणोरुपपदयोर्डप्रत्ययोभवति क्लेशाप
हः पुत्रः तमोपहः सूर्यः अनाशिरर्थ आरंभः ॥ कुमारशीर्षयोर्णिनिः ॥ कुमारशीर्षयोः कर्मणोरुपपदयोर्हंतेर्धातोर्णिनिप्रत्ययो
भवती· कुमारघाती· शीर्षघाती· निपातनाच्छिरसः शीर्षभावः ॥ लक्षणे जायापत्योष्टक् ॥ हंतेर्धातोर्जायापत्योः कर्मणोरुपपद
योर्लक्षणवति कर्तरि टक्प्रत्ययोभवति· जायाघ्नो ब्राह्मणः पतिघ्नी वृषली· अथवा लक्षणे द्योत्ये टक्प्रत्ययः ॥ अमनुष्यकर्तृके च ॥
अमनुष्यकर्तृके धात्वर्थे वर्तमानाद्धंतेर्धातोः कर्मण्युपपदे टक्प्रत्ययोभवती· जायाघ्नस्तिलकालकः पतिघ्नी पाणिरेखा· श्ले
ष्मघ्नं तैलं श्लेष्मघ्नं मधु· अमनुष्यकर्तृक इतिकिं· आखुघातः शूद्रः इहकस्मान्न भवती· चोरघातोहस्ति· ब्रह्मसुलोचबहुलमितिव
हुलवचनादृप्राप्तविष्यति ॥ शक्तौ हस्तिकपाटयोः ॥ शक्तौ गम्यमानायां हस्तिकपाटयोः कर्मणोरुपपदयोर्हंतेर्धातोष्टक्प्रत्ययोभव
ति· मनुष्यकर्तृकार्थोयमारंभः हस्तिनं हंतुं समर्थः हस्तिघ्नो मनुष्यः कवाटघ्नश्चोरः शक्ताविति किं विषेणहस्तिनं हंतिहस्तिघातः ॥
पाणिघताडघौ शिल्पिनि ॥ पाणिघताडघ इत्येतौ शब्दौ निपात्येते शिल्पिनि कर्तरि वाच्ये· पाणिताड इत्येतयोः कर्मणोरुपपद
योर्हंतेर्धातोष्टक्प्रत्ययोभवति· तस्मिंश्च टिलोपो घत्वं च निपात्यते· पाणिघः ताडघः शिल्पिनीतिकिं· पाणिघातः ताडघातः रा
जघ उपसंख्यानं राजानं हंति राजघः ॥ आढ्यसुभगस्थूलपलितनग्नांधप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन् ॥ आढ्यादिषु
कर्मस्तूपपदेषु च्व्यर्थेष्वच्व्यंतेषु करोतेः करणे ख्युन् प्रत्ययोभवति· च्वेर्विकल्पेन विधानाद्द्विविधाश्च्व्यर्थाश्च्व्यंता अच्व्यंताश्च तत्रच्व्यं
ताः पर्युदस्यंते· अनाढ्यमाढ्यं कुर्वन्त्यनेन साढ्यंकरणं· सुभगंकरणं· स्थूलंकरणं· पलितंकरणं· नग्नंकरणं· अंधंकरणं प्रियंकरणं·
च्व्यर्थेष्विति किं· आढ्यं तैलेन कुर्वंति· आढ्यमप्संजयंतीत्यर्थः प्रकृतेरविवक्षायामाभूतप्रादुर्भावेमिमलुदाहरणं·

भवति॰ अख्याविति किं अघं कुकल्यिनेन॰ ननु च ख्युना मुक्ते ख्युग्भवति तत्वं ख्युटः ख्युनं च विशेषो नास्ति किं प्रतिषेधे
न॰ एवं तर्हि प्रतिषेधसामर्थ्यात् ख्युसति ख्युच् अपि बाध्यते तेन ख्युचोप्यभावः ततः प्रतिषेधः उत्तरार्थं च प्रतिषेधः क्रियते॥
॥कर्तरि भुवः खिष्णुच् खुकञौ॥ आढ्यादिषु सुबंतेषु च्व्यर्थेष्वच्व्यंतेषूपपदेषु भवतेर्धातोः कर्तरि कारके खिष्णुच् खुक
ञौ प्रत्ययौ भवतः॰ अघं भविष्णुः आढ्यंभावुकः सुभगंभविष्णुः सुभगंभावुकः स्थूलंभविष्णुः स्थूलंभावुकः पलितंभवि
ष्णुः पलितंभावुकः नग्नंभविष्णुः नग्नंभावुकः अंधंभविष्णुः अंधंभविष्णुः अंधंभविष्णुकः प्रियंभविष्णुः प्रियंभावु
कः कर्तरीति किं करणे मा भूत्॰ च्व्यर्थेष्विति किं॰ आढ्यो भविता॰ अच्वाविति किं॰ आढ्यीभविता॰ उदात्तत्वाद्भुवः सिद्धमिकारादि
त्वमिष्णुच च॰ नञ्स्वरसिद्ध्यर्थमिकारादित्वमिष्यते॥ स्पृशोऽनुदके क्विन्॥ स्पृशेर्धातोः अनुदके सुबंत उपपदे क्विन्प्रत्ययो
भवति॰ ननु च कर्मकत्वात् स्पृशेः कर्मण्युपपदत्वं प्राप्नोति॰ नैष दोषः कर्तरीति प्रकृतत्वात् सुबधार्तिष्यते तत्कर्तुः प्रत्ययार्थं
विज्ञास्यते सुबंतमात्र उपपदे कर्त्रभिचपोलभ्यते॰ घृतं स्पृशतीति घृतस्पृक्॰ मंत्रेण स्पृशतीति मंत्रस्पृक्॰ अनुदक इति किं॰
उदकस्पर्शः नकारः क्विन्प्रत्ययस्य कुरिति विशेषणार्थः॥ ऋत्विग्दधृक्स्रग्दिगुष्णिगंचुयुजिक्रुंचां च॥ ऋत्विगादयः पंच शब्दाः क्वि
न्प्रत्ययांता निपात्यंते॰ अपरे त्रयो धातवो निर्दिश्यंते॰ ऋतुशब्द उपपदे यजेर्धातोः क्विन्प्रत्ययो भवति॰ ऋतौ यजति ऋतुं वा यज
ति ऋतुप्रयुक्तो वा यजति॰ ऋत्विक्॰ रूढिरेषा यथाकथंचिदनुगंतव्या॰ धृषेः क्विन्प्रत्ययः द्विर्वचनमंतोदात्तत्वं च निपात्यते॰ सृजेः
कर्मणि क्विन् अमागमश्च निपात्यते॰ दधृक्॰ स्रक्॰ दिशेः कर्मणि क्विन्प्रत्ययो निपात्यते॰ दिशंति तामिति दिक्॰ उत्पूर्वात् स्निहेः
क्विन्प्रत्यय उपसर्गांतलोपः षत्वं च निपात्यते॰ उष्णिक्॰ अंचु युजि क्रुंच इत्येतेषां क्विन्प्रत्ययो भवति॰ निपातनैः सह निर्देशा
दशापि किं चिह लाक्षणिकमस्ति॰ अंचेः सुबंतमात्र उपपदे क्विन्॰ प्राङ्॰ प्रत्यङ्॰ उदङ्॰ युजेः क्रुंचेश्च केवलात्॰ युङ्॰ युंजौ॰ युंजः
सोपपदात् तत्त्व द्वित्वादिना क्विप्॰ अश्वयुक्॰ क्रुङ्॰ क्रुंचौ॰ क्रुंचः नलोपः कस्मान्न भवति निपातनैः सह निर्देशात्॥ त्यदादि
ष्वदृशोऽनालोचने कञ्च॥ दृशेर्धातोः अनालोचनेऽर्थे वर्तमानात् त्यदादिषूपपदेषु कञ्प्रत्ययो भवति॰ चकारात् क्विन् च॰ तादृक्॰

तादृशः यादृक् यादृशः यादृक् यादृशः कञो ञकारो विशेषणार्थः टक्॰ टञ् क्विनिति॰ अनालोचन इति किं॰ तं पश्यति तद्दर्शः ता
दृगादयो हि रूढिशब्दाः नैषामत्र दर्शनक्रिया विद्यते॰ समानान्ययोश्चेति वक्तव्यं॰ सदृक्॰ सदृशः अन्यादृक् अन्यादृशः दृशेः क्सो
वक्तव्यः तादृक्षः यादृक्षः सदृक्षः अन्यादृक्षः॥ सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेपि क्विप्॥ सुपीति वर्त
ते॰ कर्मग्रहणं तु स्पृशोनुदके क्विन्नित्यतः प्रभृति निवृत्तं॰ सदादिभ्यो धातुभ्यः सुबंत उपपदे उपसर्गेप्यनुपसर्गेपि क्विप्प्रत्य
यो भवति॰ उपसर्गग्रहणं ज्ञापनार्थं अन्यत्र सुब्ग्रहणे उपसर्गग्रहणं न भवतीति वह॰ सुपि स्थ इति सरति॰ द्विषत्साह बर्हिस्सते
रादादिकस्य ग्रहणं न सुवतेस्तौदादिकस्य॰ युजिर् योगे युज समाधौ द्वयोरपि ग्रहणं॰ विद ज्ञाने विद विद विचारणे विद सत्तायां त्रयाणा
मपि ग्रहणं न लाभार्थस्य विदेः अकारस्याविवक्षितत्वात्॰ शुचिषत्॰ अंतरिक्षसत्॰ उपसत्॰ संसत्॰ सूः॰ अंडसूः॰ शतसूः॰
द्विषः मित्रद्विट्॰ प्रद्विट्॰ द्रुह मित्रध्रुक्॰ दुह गोधुक्॰ युज अश्वयुक्॰ विद वेदवित्॰ ब्रह्मवित्॰ निवित्॰ भिद काष्ठभित्॰ प्रभित्॰
छिद॰ रज्जुच्छित्॰ प्रच्छित्॰ जि॰ शत्रुजित्॰ प्रजित्॰ नी॰ सेनानीः प्रणीः अग्रणीः ग्रामणीः कथमत्र णत्वं सत्यग्रामाग्रणीरिति नि
पातनात्॰ नयतेः पूर्वपदात्संज्ञायामगः इति णत्वं॰ राज॰ विराट्॰ सम्राट्॰ मोराजि समः क्वाविति मत्वं॰ अन्येभ्योपि दृश्यत इति सामान्ये
न क्विब्वक्ष्यते तस्यैवायं प्रपंचः॥ भजो ण्विः॥ उपसर्गे सुपीति वर्तते॰ भजेर्धातोः सुबंत उपपदे ण्विप्रत्ययो भवति॰ अर्द्धं भजते
अर्द्धभाक्॰ भागभाक्॰ उपसर्गेपि॰ प्रभाक्॥ छंदसि सहः॥ उपसर्गे सुपीति च छंदसि विषये सहेर्धातोः सुबंत उपपदे ण्विप्रत्ययो भ
वति॰ तुराषाट्॥ वहश्च॥ वहेर्धातोः सुप्युपपदे छंदसि विषये ण्विप्रत्ययो भवति॰ प्रष्ठवाट्॰ दित्यवाट्॰ योगविभाग उत्तरार्थः॥ क
व्यपुरीषपुरीष्येषु ञ्युट्॥ कव्यपुरीषपुरीष्य इत्येतेषूपपदेषु छंदसि विषये वहेर्धातोः ञ्युट्प्रत्ययो भवति॰ कव्यवाहनः पितॄणां॰
पुरीषवाहनः पुरीष्यवाहनः॥ हव्येऽनंतःपादं॥ हव्यशब्द उपपदे छंदसि विषये वहेर्धातोः ञ्युट्प्रत्ययो भवति॰ अनंतःपादं चे
द्वहिर्वर्तते॰ अग्निश्च हव्यवाहनः अनंतःपादमिति किं॰ हव्यवाडग्निरजरः पिता नः॥ जनसनखनक्रमगमो विट्॥ छंदसि
उपसर्गे सुपीति वर्तते॰ जन जनने॰ जनी प्रादुर्भावे द्वयोरपि ग्रहणं॰ तथा षण दाने॰ वन षण संभक्ताविति॰ जनादिभ्यो धातुभ्य॰

का॰ प्र॰ ३
१६

छंदसि विषये विट् प्रत्ययो भवति· टकारः सामान्यग्रहणाविघातार्थो वेरपृक्तस्येति· विशेषणार्थश्च विड्वनोरनुनासिकस्यादिति·
अब्जाः गोजाः गोषा इंद्रो नृषा असि· बिसखा· कूपखा क्रम· दधिक्राः गन· अग्रेगा नेतॄणां ॥ अदोऽनन्ने ॥ छंदसीति निवृत्तं·
अदेर्धातोः अनन्ने सुप्युपपदे विट् प्रत्ययो भवति· आममत्ति आमात्· सस्यात्· अनन्न इति किं· अन्नादः ॥ क्रव्ये च ॥ क्रव्यशब्द उपपदे
अदेर्धातोर्विट् प्रत्ययो भवति· क्रव्यमत्ति क्रव्यात्· पूर्वेणैव सिद्धे वचनमसरूपबाधनार्थं तेनाण् न भवति· कथं तर्हि क्रव्यादः
कृतविकृतशब्द उपपदे अण् तस्य व्यवयवोपहारादित्वात् क्रव्यभावः कृतविकृत पक्वमांसभक्षः क्रव्याद उच्यते· आममांसभक्षकः क्र
व्यादिति ॥ दुहः कब्घश्च ॥ दुहेर्धातोः सुप्युपपदे कप्रत्ययो भवति घकारश्चांतादेशः कामदुघा धेनुः धर्मदुघा ॥ मंत्रे श्वेत
वहोक्थशस्पुरोडाशो ण्विन् ॥ श्वेतवह उक्थशस् पुरोडाश इत्येतेभ्यो ण्विन् प्रत्ययो भवति मंत्रविषये धातूपपदसमुदायाण्विनि
पात्यते· अलाक्षणिककार्यसिध्यर्थं प्रत्ययस्तु विधीयत एव· श्वेतशब्दे कर्तृवाचिन्युपपदे वहेर्धातोः कर्मणि कारके ण्विन् प्रत्ययो भव
ति· श्वेता एनं वहंति श्वेतवाः इंद्रः उक्थशब्दे कर्मणि करणे वा उपपदे शंसतेर्ण्विन् प्रत्ययो भवति· नलोपश्च· उक्थानि उक्थैर्वा शंसति·
उक्थशाः यजमानः दाशृदाने इत्यस्य पुरः पूर्वस्य डत्वं कर्मणि प्रत्ययः पुरो दाशंत एनमिति पुरोडाः श्वेतवाहादीनां डस्पदस्येति वक्त
व्यं· श्वेतवोभ्यां· श्वेतवोभिः पदस्येति किं· श्वेतवाहौ श्वेतवाहः ॥ अवे यजः ॥ अवे उपपदे यजेर्धातोर्ण्विन् प्रत्ययो भवति मंत्रे
त्वं यज्ञे वरुणस्यावया असि· योगविभाग उत्तरार्थः ॥ विजुपे छंदसि ॥ उपे उपपदे यजेर्धातोश्छंदसि विषये विच् प्रत्ययो भवति।
उपयड्भिरूर्ध्वं यजति· तदुपयजा सुपपन्नं संग्रहणं ब्राह्मणार्थं· विकरणं सामान्यग्रहणाविघातार्थं मिरिज्यते यावता न्येभ्योपि दृश्य
त इति· यजेरपि विच् सिद्धः नियमार्थमेतत् उपेयजश्छंदस्येव न भाषायामिति ॥ आतो मनिन्क्वनिब्वनिपश्च ॥ छंदसीति वर्त
ते· सुप्युपसर्गेपीति च· आकारांतेभ्यो धातुभ्यश्छंदसि विषये मनिन् क्वनिप् वनिप् इत्येते प्रत्यया भवंति चकाराद्विच्· सुदामा· अ
श्वत्थामा· क्वनिप्· सुधी· धीवा सुपीवा वनिप्· भूरिदावा· घृतयावा· विच्खल्वपि· कीलालपा· शुभंयाः रायस्पोषदाः ॥ अन्ये
भ्योपि दृश्यंते ॥ छंदसीति निवृत्तं· अन्येभ्योपि धातुभ्यो अनाकारांतेभ्यो मनिन् क्वनिप् वनिप् इत्येते प्रत्यया भवंति· १६

विच्च· मनिन्· सुशर्मा· क्वनिप्· प्रातरित्वा· प्रातरित्वानौ· प्रातरित्वानः वनिप्· विजावा· अग्रेगावा· विच्खल्वपि रेडसि पर्णं नयेः
अपिशब्दः सर्वविधिव्यभिचारार्थः निरुपपदादपि भवति· धीवा· पीवा दृशिग्रहणं प्रयोगानुसरणार्थं ॥ क्विप् च ॥ सर्वधातुभ्यः सोपपदे
भ्यो निरुपपदेभ्यश्छंदसि भाषायां च क्विप् प्रत्ययो भवति· उखायाः स्रंसते उखास्रत्· पर्णध्वत्· वाहाद्भ्रश्यति वाहाभ्रट् ॥ स्थः क च ॥
सुप्युपसर्गेमिति वर्तते स्थाइत्येतस्माद्धातोः सुप्युपपदे कप्रत्ययो भवति· क्विप् किमर्थमिदं यावता सुपिस्थ इति कः सिद्धः अन्येभ्यो
पि दृश्यत इति क्विप् बाधकबाधनार्थं पुनर्वचनं· शमिधातोः संज्ञायामित्यंच साधते शंस्थः शंस्था ॥ सुप्यजातौ णिनिस्ताच्छील्ये ॥
अजातिवाचिनि सुबंत उपपदे ताच्छील्ये गम्यमाने धातोर्णिनि प्रत्ययो भवति· उष्णभोजी· आजाताविति किं ब्राह्मणानामंत्रयिता·
ताच्छील्य इति किं· उष्णं भुंक्ते कदाचित्· सुपीति वर्तमाने पुनः सुब्ग्रहणमुपसर्गनिवृत्त्यर्थं उत्प्रतिभ्यामाङि सर्तेरुपसंख्यानं· उदासा
रिण्यः साधुकारिणिव· साधुकारी· साधुदायी· ब्रह्मणि वदः ब्रह्मवादिनो वदंति ॥ कर्तर्युपमाने ॥ कर्तृवाचिनि उपमाने उपपदे धातोर्णि
नि प्रत्ययो भवति· उपपदकर्ता प्रत्ययार्थस्य कर्तुरुपमानं उष्ट्र इव क्रोशति उष्ट्रक्रोशी· ध्वांक्षविरावी अताच्छील्यार्थ आरंभः ज्ञात्वर्थो
वा· कर्तरीति किं· अपूपानिव भक्षयति माषान्· उपमान इति किं· उष्ट्रः क्रोशति ॥ व्रते ॥ व्रत इति शास्त्रितो नियम उच्यते· व्रते गम्य
माने सुबंत उपपदे धातोर्णिनि प्रत्ययो भवति· समुदायोपाधिश्चायं धातूपपदप्रत्ययसमुदायेन चेद्व्रतं गम्यत इति· स्थंडिलशायी·
अश्राद्धभोजी कामचारप्राप्तौ नियमः सति शयने स्थंडिल एव शेते नान्यत्र सति भोजने अश्राद्धमेव भुंक्ते न श्राद्धमिति· व्रत इति किं·
स्थंडिले शेते देवदत्तः अताच्छील्यार्थ आरंभः ज्ञात्वर्थो वा ॥ बहुलमाभीक्ष्ण्ये ॥ आभीक्ष्ण्ये गम्यमाने सुबंत उपपदे धातोर्बहुलं
णिनि प्रत्ययो भवति· आभीक्ष्ण्यं पौनःपुन्यं तात्पर्यमासेवा ताच्छील्यादन्यत्· काषायपायिणो गांधाराः· क्षीरपायिण उशी
नराः सौवीरपायिणो वाह्लीकाः बहुलग्रहणात् कुल्माषखादः इत्यत्र न भवति ॥ मनः ॥ सुपीति वर्तते· मन्यतेर्धातोः सुबंत
उपपदे णिनि प्रत्ययो भवति· दर्शनीयमानी· शोभनमानी· बहुलग्रहणानुवृत्तेर्मन्यते श्रीहीणं· न मनुते· उत्तरसूत्रेहिरवश्य

सर्येचिकरणकृतोविशेषस्यात्॥आत्ममाने खश्च॥आत्मनोमननमात्ममानः आत्ममानेवर्त्तमानान्मन्यतेइति
सुप्युपपदेखश्प्रत्ययोभवति चकारात्णिनिश्च यदा प्रत्ययार्थःकर्त्ता आत्मानमेव दर्शनीयत्वादिनागुणेनयुक्तंमन्यतेतदायं
विधिःदर्शनीयम्मन्यमानं मन्यतेदर्शनीयंमन्यः दर्शनीयमानी पंडितंमन्यः पंडितमानी आत्ममानइतिकिं दर्शनीयमा
नीदेवदत्तोयज्ञदत्तस्य॥भूते॥भूतइत्यधिकारोयमनेनाकेउतितिप्यावत् यदित ऊर्ध्वमनुक्रमिष्यामः भूतइत्येवंतद्वेदितव्यं
धात्वधिकाराच्चधात्वर्थेभूतइतिविज्ञायते वक्ष्यति करणेयजः अग्निष्टोमेनेष्टवानग्निष्टोमयाजी भूतइतिकिं अ
ग्निष्टोमेनयजति॥करणेयजः॥णिनिरनुवर्तते नखश् यजेर्धातोःकरणउपपदेणिनिप्रत्ययोभवति अग्निष्टोम
याजी वाजपेययाजी अग्निष्टोमःफलभावयोनांकरणंभवति॥कर्मणिहनः॥कर्मण्युपपदेहंतेर्धातोर्णिनिप्रत्ययोभवति
कुत्से पितृव्यघाती मातुलघाती कुत्सितग्रहणंकर्त्तव्यमिहमाभूत् चौरंहतवान्॥ब्रह्मभ्रूणवृत्रेषुक्विप्॥कर्मणीतिवर्त
ते ब्रह्मादिषुकर्मसूपपदेषुहंतेर्धातोःक्विप्प्रत्ययोभवति ब्रह्महा भ्रूणहा वृत्रहा किमर्थमिदमुच्यते यावतासर्वधातुभ्यः
क्विब्विहितएव ब्रह्मादिषुहंतेःक्विब्वचनंनियमार्थं चतुर्विधश्चात्रनियमइष्यते ब्रह्मादिष्वेवहंतेःनान्यस्मिन्नुपपदे
पुरुषंहतवानिति ब्रह्मादिषुहंतेरेवनान्यस्मात् ब्रह्मअधीतवानिति ब्रह्मादिषुहंतेर्भूतेक्विबेवनान्यःप्रत्ययः तथाच तान्क
न्यस्मिन्काले ब्रह्मणंहंतिहनिष्यतीति तदेतदस्माद्बहुलग्रहणस्य पुरस्तादपकर्षाल्लभ्यते॥बहुलंछंदसि॥
पूर्वेणनियमादप्राप्तःक्विब्विधीयते छंदसिविषयेउपपदांतरेपिहंतेर्धातोर्बहुलंक्विप्प्रत्ययोभवति मातृहा पितृहा नच
भवति पितृघातः॥सुकर्मपापमंत्रपुण्येषुकृञः॥कर्मणीतिवर्तते तत्संभवात्सुशब्दंवर्जयित्वापरिशिष्टानांविशेषणंस्वा
दिषुकर्मसूपपदेषुकरोतेर्धातोःक्विप्प्रत्ययोभवति सुकृत् कर्मकृत् पापकृत् मंत्रकृत् पुण्यकृत् अयमपिनिय
मार्थआरंभः त्रिविधश्चात्रनियमइष्यते धातुनियमंवर्जयित्वा कालोपपदप्रत्ययविषयः धातोरनियतत्वादन्यस्मिन्नप्य
सहभवतिशास्त्रकृत् भाष्यकृत्॥सोमेसुञः॥कर्मणीत्येव सोमेकर्मण्युपपदेसुनोतेर्धातोःक्विप्प्रत्ययोभवति सोमसुत्

सोमसुतौ सोमसुतः।अयमपिनियमार्थआरंभःततः।चतुर्विधश्चात्रनियमइष्यते कालधातूपपदप्रत्ययविषयः॥अ
ग्नौचेः॥कर्मणीत्येव अग्नौकर्मण्युपपदेचिनोतेर्धातोःक्विप्प्रत्ययोभवति अग्निचित् अग्निचितौ अग्निचितः अत्रापिपू
र्ववच्चतुर्विधोनियमइष्यते॥कर्मण्यग्न्याख्यायां॥चेःकर्मणीति वर्ततेकर्मण्युपपदेचिनोतेर्धातोःकर्मण्येवकारकेक्वि
प्प्रत्ययोभवति अग्न्याख्यायां धातूपपदप्रत्ययसमुदायेनचेदग्न्याख्यागम्यते श्येनइवचीयते श्येनचित् आख्याग्रहणं
रूढिसंप्रत्ययार्थं अन्यथाहिष्टकाचयउच्यते श्येनचिदिति॥कर्मणीनिविक्रियः॥कर्मण्युपपदेविपूर्वात्क्रीणातेर्धातोरिनिप्र
त्ययोभवति कर्मणीतिवर्तमानेपुनःकर्मग्रहणंकर्तुःकुत्सानिमित्तेकर्मणियथास्यात्कर्ममात्रेमाभूत् सोमविक्रयी घृतविक्रयी
तैलविक्रयी इहनभवतिधान्यविक्रायः॥दृशेःक्वनिप्॥कर्मणीत्येव दृशधातोःकर्मण्युपपदेक्वनिप्प्रत्ययोभवति मेरुदृश्वा
परलोकदृश्वा अन्येभ्योपिदृश्यंतइति क्वनिपिसिद्धेपुनर्वचनंप्रत्ययांतरनिरासार्थः॥राजनियुधिकृञः॥कर्मणीत्येव राज
नशब्दे कर्मण्युपपदेयुध्यतेःकरोतेश्चधात्वोः क्वनिप्प्रत्ययोभवति ननुचयुध्यतिरकर्मकः अंतर्भावितण्यर्थःसकर्मको
भवति राजयुध्वा सहकृत्वा॥~~राजसि~~ नंयोधितवानित्यर्थः राजकृत्वा॥सहेच॥सहशब्देचोपपदेयुधेःकृञश्चधात्वोः
क्वनिप्प्रत्ययोभवति असत्वबाधित्वान्नोपपदंकर्मणाविशेष्यते सहयुध्वा सहकृत्वा॥सप्तम्यांजनेर्डः॥सप्तम्यंतउपपदेजने
र्धातोर्डप्रत्ययोभवति उपसरेजातवान् उपसरजः मंदुरजः॥पंचम्यामजातौ॥पंचम्यंतउपपदेजातिवर्जितेजनेर्धातोर्डप्रत्य
योभवति बुद्धिजः संस्कारजः खेदजदुःखं अजाताविति किं अश्वाज्जातः हस्तिनोज्जातः॥उपसर्गेचसंज्ञायां॥उपसर्गेचोप
पदेसंज्ञायांविषयेजनधातोर्डप्रत्ययोभवति समुदायोपाधिःसंज्ञा अथेमामानवीःप्रजाः॥अनौकर्मणि॥अनुपूर्वाज्जनेर्धातोः
कर्मण्युपपदेडप्रत्ययोभवति पुमांसमनुजाता पुमनुजा स्त्रियमनुजातः स्त्र्यनुजः॥अन्येष्वपिदृश्यते॥अन्येष्वप्युपपदेषुका
रकेषुचजनेर्धातोर्डप्रत्ययोभवति दृश्यते सप्तम्यामित्युक्तं असप्तम्यामपिदृश्यतइत्यर्थः नजातः अजः द्विजाताः द्विजाः पंच
माज्जातायिकृत्वंजातारपिदृश्यते अनुजातः अनुजः अपिशब्दःसर्वोपाधिव्यभिचारार्थः तेनधात्वंतरादपिभवतिप्र

का॰प्र॰३ कांतरेषु परितः खात्वापरिखा आखाः ॥ निष्ठा ॥ क्तक्तवतू निष्ठा इत्युक्तं तयोर्विषये संज्ञकः प्रत्ययो भूते भवति कृतः कृतवान्
१८ भुक्तः भुक्तवान् निष्ठायामितरेतराश्रयत्वादप्रसिद्धिः संज्ञया हि क्तक्तवतू भाव्येते सतोश्च तयोः संज्ञया भवितव्यं नैष दोषः भा
विनी संज्ञा विज्ञायते सक्तो भवति यस्योत्पन्नस्य निष्ठेति संज्ञा भवतीति सामर्थ्यात् क्तक्तवतोर्विधानमेतत् आदिकर्म
णि निष्ठा वक्तव्या प्रकृतः कटं देवदत्तः प्रकृतवान् कटं देवदत्तः ॥ सुयजोर्ङ्वनिप् ॥ सुनोतेर्यजतेश्च धातोर्ङ्वनिप् प्रत्ययो भवति
सुत्वा सुत्वानौ सुत्वानः यज्वा यज्वानौ यज्वानः ॥ जीर्यतेरतृन् ॥ भूत इत्येव जीर्यतेर्धातोर्भूते ऽतृन् प्रत्ययो भवति जरन्
जरंतौ जरंतः वासरूपेण निष्ठा जीर्णः जीर्णवान् इति ॥ छंदसि लिट् ॥ भूत इत्येव छंदसि विषये भूते लिट् प्रत्ययो भवति अहं
सूर्यमुभयतो ददर्श अहं द्यावापृथिवी आततान ननु च छंदसि लुङ् लिङ इति सामान्येन लिट् विहित एव धातुसंबंधे स विधि
र्यं तु विशेषेण ॥ लिटः कानज्वा ॥ छंदसि लिटः कानच् आदेशो वा भवति योग्निं चिक्यानः वरुणं सुषुवाणः न च भवति अहं
द्यावापृथिवी आततान लिटो ग्रहणं किं नपूर्वस्यैव प्रकृतस्यादेशविधाने विभक्तिविपरिणामो भविष्यति किरामाजस्य यथा
स्यात् यो ऽपि परोक्षे ऽपि विहितस्तस्याप्ययमादेशो भवति ॥ क्वसुश्च ॥ छंदसीति वर्तते लिटः क्वसुरादेशो भवति जक्षिवान् पपि
वान् न च भवति अहं सूर्यमुभयतो ददर्श योगविभाग उत्तरार्थः ॥ भाषायां सदवसश्रुवः ॥ सद वस श्रु इत्येतेभ्यो धातुभ्यः परस्य
लिटो भाषायां विषये वा क्वसुरादेशो भवति आदेशविधानादेव लिडपि तद्विषयो ऽनुमीयते उपसेदिवान्कौत्सः पाणिनिं उपास
दत् उपासीदत् उपससाद अनूषिवान्कौत्सः पाणिनिं अन्ववात्सीत् अन्ववसत् अनूवास उपशुश्रुवान्कौत्सः पाणिनिं
उपाश्रौषीत् उपाशृणोत् उपशुश्राव लुङ् लङ् लिटः विषये ऽपि पुरस्तादनुवृत्तेर्भवति ॥ उपेयिवाननाश्वाननूचानश्च ॥ उपेयि
वान् अनाश्वान् अनूचानः इत्येते शब्दा निपात्यंते उपपूर्वादिणः क्वसुर्द्विर्वचनं अभ्यासदीर्घत्वं तत्सामर्थ्यादेकादेशप्रति
बंधः तत्र वस्वेकाजाद्घसामिति प्रतिषिद्धः स पुनरिट् प्रतिप्रसूयते तेनाजादौ न भवति उपेयुषः न चात्रोपसर्गस्तंत्रं अन्योपस
र्गपूर्वान्निरुपसर्गाच्च भवत्येव समीयिवान् ईयिवान् वा च वा नानुवृत्तेश्च भूतमेतल्लुङादयो भवंति उपागात् उपैत् उपेयाय १८

अश्नातेर्नञ्पूर्वात्क्वसुर्निपात्यते इडभावश्च अनाश्वान् नाशीत् नाश्नात् नाश न चेरनुपूर्वात्कर्तरि कानच् निपात्य
ते अनूचानः अन्ववोचत् अन्वब्रवीत् अनूवाच ॥ लङ् ॥ भूते ऽर्थे वर्तमानाद्धातोर्लङ् प्रत्ययो भवति अकार्षीत् स
वसेल्लुङ् रात्रिशेषे जागरणसंततौ कभवानुषितः अमुत्रावात्सं ॥ अनद्यतने लङ् ॥ भूत इत्येव अनद्यतन इति बहुव्री
हिनिर्देशः अविद्यमानाद्यतने भूते ऽर्थे वर्तमानाद्धातोर्लङ् प्रत्ययो भवति अकरोत् अहरत् बहुव्रीहिनिर्देशः किं अद्य
ह्यो वाभुक्ष्महीति व्यामिश्रे माभूत् परोक्षे च लोकविज्ञाते प्रयोक्तुर्दर्शनविषये लङ् वक्तव्यः अरुणद्यवनः साकेतं अरुणद्यव
नो मध्यमिकां ॥ अभिज्ञावचने लृट् ॥ अभिज्ञा स्मृतिः तद्वचन उपपदे ऽनद्यतने लृट् प्रत्ययो भवति लङो ऽपवादः अभि
जानासि देवदत्त काश्मीरेषु वत्स्यामः अभिजानासि देवदत्त मगधेषु वत्स्यामः वचनग्रहणं पर्यायार्थं अभिजानासि स्मरसि
बुध्यसे चेतयसे इति ॥ न यदि ॥ यच्छब्दसहिते केवले च विभाषा लृट् प्रत्ययो भवति साकांक्षश्चेत्प्रयोक्ता भवति लक्ष्यलक्षणयोः
संबंधे प्रयोक्तुराकांक्षा भवति अभिजानासि देवदत्त काश्मीरेषु वत्स्यामस्तत्रौदनं भोक्ष्यामहे अभिजानासि देवदत्त का
श्मीरेष्ववसाम तत्रौदनमभुंक्ष्महि यदि रवत्स्यपि अभिजानासि देवदत्त यत्काश्मीरेषु वत्स्यामस्तत्रौदनं भोक्ष्यामहि
अभिजानासि देवदत्त यत्काश्मीरेष्ववसाम तत्रौदनमभुंज्महि वासो लक्षणं भोजनं लक्ष्यं ॥ परोक्षे लिट् ॥ भूते ऽनद्यतन
इति च वर्तते तस्य विशेषणं परोक्षग्रहणं भूतानद्यतने परोक्षे ऽर्थे वर्तमानाद्धातोर्लिट् प्रत्ययो भवति ननु च धात्वर्थः सर्वः
परोक्ष एव सत्यमेतदस्ति लोके तत्रापि प्रत्यक्षाभिमानः स यत्र नास्ति तत्परोक्षमित्युच्यते चकार जहार उत्तमविषये ऽपि चि
त्तव्याक्षेपात्परोक्षता भवत्येव तद्यथा सुप्तो ऽहं किल विललाप मत्तो ऽहं किल विचचार असंतापः क्वेयमपि लिट् वक्तव्यः कलिं
गेषु स्थितो ऽसि नाहं कलिंगान्जगाम नाहं दाक्षिणात्यान्प्रविवेश ॥ हशश्वतोर्लङ् च ॥ भूतानद्यतने परोक्षे लिटि प्राप्ते ह
शश्वतोरुपपदयोर्लङ् प्रत्ययो भवति चकाराल्लिट् च इति हाकरोत् इति ह चकार शश्वदकरोत् शश्वच्चकार ॥ प्रश्ने च

सन्नकाले॥ भूतानद्यतनपरोक्षइतिवर्तते तस्यविशेषणं तत्र प्रष्टव्यः प्रश्नः आसन्नकाले पृच्छ्यमाने भूतानद्यतन
परोक्षेऽर्थे वर्तमानाद्धातोर्लङ्लिटौ प्रत्ययौ भवतः कश्चित्कंचित्पृच्छति अगच्छद्देवदत्तः जगाम देवदत्तः अयजद्देवदत्तः इया
जदेवदत्तः प्रश्नइतिकिं देवदत्तोजगाम आसन्नकालइतिकिं भवंतं पृच्छामि जघानकंसंकिलवासुदेवः लट्स्मे॥
भूतानद्यतनपरोक्षइतिवर्तते स्मशब्द उपपदे भूतानद्यतनेऽर्थे वर्तमानाद्धातोः स्मशब्द उपपदे लट् प्रत्ययो भवति एवं स्म
पिताब्रवीति इतिस्मोपाध्यायः कथयति॥ ननौपृष्टप्रतिवचने॥ अनद्यतनपरोक्षेतिनिवृत्तं भूतसामान्ये विधिरयं न
नुशब्द उपपदे प्रश्नपूर्वके प्रतिवचने गम्यमाने भूतेलट् प्रत्ययो भवति अकार्षीः कटं देवदत्तः ननु करोमि भोः॥ अहो
चत्तत्र किंचिद्देवदत्तः ननुब्रवीमि भोः पृष्टप्रतिवचन इतिकिं नन्वकार्षीन्माणवकः॥ नन्वोर्विभाषा॥ भूतइत्येव नशब्द
उ॥ ...चोपपदे पृष्टप्रतिवचने भूतेऽर्थे वर्तमानाद्धातोर्विभाषा लट् प्रत्ययो भवति अकार्षीः कटं देवदत्तः नकरोमि भोः नाकार्षं
अहंनुकरोमि अहंनकार्षं॥ पुरिलुङ्चास्मे॥ अनद्यतनग्रहणनिवृत्तं इत्यस्यानुवर्ततेः पुराशब्द उपपदे स्मवर्जिते भू
तानद्यतनेऽर्थे विभाषालुङ् प्रत्ययो भवति लट् चताभ्यां मुक्ते पक्षे यथाविषयमन्येपि प्रत्यया भवंति वसंतीह पुराछात्राः अ
वात्सुरिह पुराछात्राः अवसन्निह पुराछात्राः ऊषुरिह पुराछात्राः अस्मइतिकिं नलेनेस्म पुराधीयते॥ वर्तमाने लट्॥ प्रारब्धोपरिसमाप्तश्च
वर्तमानेऽर्थे वर्तमानाद्धातोर्लट् प्रत्ययो भवति॥ लटः शतृशानचावप्रथमासमानाधिकरणे॥ लटः शतृशानचा
वेतावादेशौ भवतः अप्रथमांतेन चेत्तस्य सामानाधिकरण्यं भवति पचंतं देवदत्तं पश्य पचमानं पश्य पचतापच
मानेन कृतं अप्रथमानाधिकरणइतिकिं देवदत्तः पचति लडितिवर्तमाने पुनर्लड्ग्रहणमधिकविधानार्थं क्वचित्प्रथमा
समानाधिकरणेपि भवति सन् ब्राह्मणः अस्तिब्राह्मणः विद्यमानोविद्यते जुह्वत् जुहोति अधीयानः अधीते माङ्या
क्रोशे मापचन् मापचमानः केचिद्विभाषाग्रहणमिहानुवर्तयंति नन्वोर्विभाषेत्यतः सा च व्यवस्थितविभाषा तत्र यथा
दर्शनं प्रयोगानेतव्याः॥ संबोधने च॥ प्रथमासमानाधिकरणार्थ आरंभः संबोधनविषये लटः शतृशानचावादेशौ भवतः

हेपचन् हेपचमान लप्रयोगानेत॥ लक्षणहेत्वोः क्रियायाः॥ लक्ष्यतेचिह्न्यते येन तल्लक्षणं जनकोहेतुः धात्वर्थवि
शेषणं चैतत् लक्षणहेत्वोश्चार्थे वर्तमानाद्धातोः परस्य लटः शतृशानचावादेशौ भवतः तौ चेल्लक्षणहेतु क्रियाविषयौ
भवः शयाना भुंजते यवनाः तिष्ठंतोनुशासति गणकाः हेतौ अर्जन्वसति अधीयानो वसति लक्षणहेत्वोरितिकिं पच
तिचपठतिच क्रियाया इतिकिं द्रव्यगुणयोर्माभूत् यः कंपते सोश्वत्थः यदुत्प्लवते तल्लघुयन्निषीदति तद्गुरु लक्षणहेत्वो
रितिनिर्देशः पूर्वनिपातव्यभिचारिलिंगं॥ तौसत्॥ तौ शतृशानचौ सत्संज्ञौ भवतः तौग्रहणमुपाध्यसंसर्गार्थं शतृशा
नज्मात्रस्य संज्ञा भवति ब्राह्मणस्य कुर्वन् ब्राह्मणस्य कुर्वाणः ब्राह्मणस्य करिष्यन् ब्राह्मणस्य करिष्यमाणः सत्संज्ञा
पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन इतिषष्ठीसमासप्रतिषेधार्था॥ पूङ्यजोःशानन्॥ पूङोयजेश्च धात्वोः शानन् प्रत्ययो भवति पवमानः य
जमानः यदि प्रत्ययाः शानच आदयो नलादेशाः कथं सोमं पवमानः न ड्माण्ड्रानइति षष्ठी प्रतिषेध इति त्न्निति प्रत्याहारः
लटः शतृशानचित्यतः प्रभृत्यानिष्ठोनकारात् द्विषः शतुर्वावचनं चोरस्य द्विषन् चोरं द्विषन्॥ ताच्छील्यवयोवचनशक्ति
षु चानश्॥ ताच्छील्यं तत्स्वभावता वयः शरीरावस्था यौवनादिः शक्तिः सामर्थ्यं ताच्छील्यादिषु गम्यमानेषु धातोश्चा
नश् प्रत्ययो भवति ताच्छील्ये तावत् कतीह मुंडयमानाः कतीह भूषयमाणाः वयोवचने कतीह कवचं पर्यस्यमानाः
कतीह शिखंडं वहमानाः शक्तौ कतीह निघ्नानाः कतीह पचमानाः॥ इङ्धार्योः शत्रकृच्छ्रिणि॥ इङो धारेश्च धात्वोः
शतृ प्रत्ययो भवति अकृच्छ्रिणि कर्तरि अकृच्छ्रः सुखसाध्यो यस्य कर्तुर्धात्वर्थः सोकृच्छ्री तस्मिन् अधीयन् पारायणं
धारयन्नुपनिषदं अकृच्छ्रिणीतिकिं कृच्छ्रेणाधीते कृच्छ्रेण धारयति॥ द्विषोऽमित्रे॥ अमित्रः शत्रुः अमित्रे कर्तरि
द्विषो धातोः शतृ प्रत्ययो भवति द्विषन् द्विषंतौ द्विषंतः अमित्र इतिकिं द्वेष्टि पतिं भार्या॥ सुञो यज्ञसंयोगे॥ यज्ञेन सं
योगो यज्ञसंयोगः यज्ञसंयोगविषये वर्तमानात्सुनोतेर्धातोः शतृ प्रत्ययो भवति सर्वे सुन्वंतः सर्वे यजमानाः सत्रिण
उच्यंते संयोगग्रहणं प्रधानभूतकर्तृसंप्रत्ययार्थं याजकेषुमाभूदिति यज्ञसंयोग इतिकिं सुनोतिसुरां॥ अर्हः प्रशंसायां॥

प्रशंसा स्तुतिः प्रशंसायां विषयेअर्हतेर्द्धातोः शतृप्रत्ययोभवति· अर्हन्निह भवान्विद्यां· अर्हन्निह भवान्पूजां· प्रशंसा
यामिति किं· अर्हतिचोरोवधं ॥ आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु ॥ भ्राजभासेति क्विपं वक्ष्यति आङ् तस्मात्कि
पूसंशब्दनाघानितःपूर्वमनुक्रमिष्यामः प्रत्ययांतेतच्छीलादिषुकर्तृवाचिषुवेदितव्याः अभिविधौचायमाकारः तेनाक्वि
योप्ययमर्थनिर्देशः तदितिधात्वर्थः शीलादिविशेषणत्वेननिर्दिश्यते तच्छीलोयः स्वभावतः फलनिरपेक्षस्तत्रप्रवर्तते
तद्धर्मातिराचारः स्वधर्मोयमिमापमितिप्रवर्तते· पिनापिशीलेनतत्साधुकरोति ·धात्वर्थसाधुकरोति· उत्तरत्रैवोदाहरिष्या
मः ॥ तृन् ॥ सर्वधातुभ्यस्तृन्प्रत्ययोभवति· तच्छीलादिषु· नकारः स्वरार्थः तच्छीले तारवत्· कर्ताकटान्· वदिताजनाप
वादान्· तद्धर्मणि मुंडयितारः अविश्रायमानाभवंति· वधूमूढां· अन्नमपहर्तारः आकरकाभवंति· श्राद्धे सिद्धेउन्नेतारः
स्तौत्स्वलायनाभवंति पुत्रेजाते· तत्साधुकारिणि· कर्ताकटं· गंताखेटं· तृन्विधावृत्विक्षुचानुपसर्गस्य· होता· पोता· अनु
पसर्गस्येतिकिं· उद्गाता· प्रतिहर्ता· तृजेवभवति· स्वरेविशेषः नयतेः षुक्· नेष्टा· त्विषेर्देवतायामकारश्चोपधाया अ
निट्त्वं· त्वष्टा· क्षदेश्चयुक्ते· क्षत्ता· क्वचिदधिकृतउच्यते· छंदसितृच् क्षत्तृभ्यः संग्रहीतृभ्यः स्वरेविशेषः ॥ अलंकृञ्नि
राकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचरइष्णुच् ॥ अलंकृञ् निराकृञ् प्रजनः उत्पच· उत्पतः उन्मदः
रुचि· अपत्रप· वृतु· वृधु· सह· चर· इत्येतेभ्योधातुभ्यस्तच्छीलादिषु· कर्तृषु· इष्णुच्प्रत्ययोभवति· अलंकरिष्णुः निराकरि
ष्णुः प्रजनिष्णुः उत्पचिष्णुः उत्पतिष्णुः उन्मदिष्णुः रोचिष्णुः अपत्रपिष्णुः वर्तिष्णुः वर्धिष्णुः सहिष्णुः चरिष्णुः ॥ णेश्छंदसि
एपंताद्धातोः छंदसिविषये तच्छीलादिषु कर्तृषु इष्णुच्प्रत्ययोभवति· दृषदंधारयिष्णवः वीरुधंपारयिष्णुवः ॥ भु
वश्च ॥ भवतेर्द्धातोश्छंदसिविषयेतच्छीलादिषु· कर्तृषु इष्णुचप्रत्ययोभवति· भविष्णुः योगविभागउत्तरार्थः चकारानुकृ
ष्टस्यार्थः भ्राजिष्णुनालोहितचंदनेन ॥ ग्लाजिस्थश्चग्स्नुः ॥ छंदसीतिनिवृत्तं· ग्लाजिस्थाइत्येतेभ्योधातुभ्यश्चका
राद्भुवश्चतच्छीलादिषु· कर्तृषुग्स्नुप्रत्ययोभवति· ग्लास्नुः जिष्णुः स्थास्नुः भूष्णुः गित्वायंप्रत्ययोनकित्· तेनस्थ· इकारो

[illegible] BHAU DAJI MEMORIAL

नभवति· क्ङितिचेत्यत्रगकारोपिचर्त्वभूतो· निर्दिश्यते तेनगुणोनभवति· भुवः कितीत्यत्रापिचतेनभुवइडानभव
ति· क्सोगित्वान्नस्यईकारः क्ङितोरितिशासनात् गुणाभावस्त्विदुरस्मार्थः भुवोनिट्ठंकगोरितोः दंशेश्छंदस्युपसंख्यानं
दंक्ष्णवः पशवः ॥ त्रसिगृधिधृषिक्षिपेःक्नुः ॥ त्रस्यादिभ्योधातुभ्यस्तच्छीलादिषुकर्तृषु क्नुप्रत्ययोभवति· त्रस्नुः
गृध्नुः धृष्णुः क्षिप्नुः ॥ शमित्यष्टाभ्योघिनुण् ॥ इतिशब्दआद्यर्थे· शमादिभ्योधातुभ्यस्तच्छीलादिषुकर्तृषु· घिनुण्
प्रत्ययोभवति· शमउपशमइत्यत· आरभ्य· मदीहर्षइत्येवंमंतः शमादिर्दिवादिगणः घकारउत्तरत्रकुत्वार्थः उकारउ
च्चारणार्थः· शमी· तमी· दमी· श्रमी· भ्रमी· क्षमी· क्लमी· प्रमादी· प्रमादी· उन्मादी· अष्टाभ्यइतिकिं· असिता ॥ संपृचानुरु
धाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविविचत्यजरज
भजातिचरापचरामुषाभ्याहनश्च ॥ घिनुण्ग्नुवर्तते· संपृचादिभ्योधातुभ्यस्तच्छीलादिषुकर्तृषुघिनुण्प्रत्ययोभवति· पृ
चोसंपर्के इतिरुधादिर्गृह्यते नत्वदादिः लुग्विकरणत्वात् परिदेविर्तौवादिकः देवृदेवने· क्षिपप्रेरणे· दिवादिर्असानाभ्ये
नगृह्यते· युजसमाधौ· दिवादिः युजिर्योगे रुधादिः द्वयोरपिग्रहणं रंजरागइत्यस्य निपातनाद्नुनासिकलोपः संपर्की
अनुरोधी· आयामी· आयासीसरिसारिसंसर्गी· परिदेवी· संज्वारी· परिक्षेपी· परिरावीपरिवादी· परिदाही· परिमोही·
दोषी· द्वेषी· द्रोही· दोही· योगी· आक्रीडी· विवेकी· त्यागी· रागी· भागी· अतिचारी· अपचारी· आमोषी· अभ्याघाती·
वौकषलसकत्थस्रंभः कषहिंसार्थः लसश्लेषणक्रीडनयोः कत्थश्लाघायां स्रंभुविश्वासेइत्येतेभ्योधातुभ्योविशब्द
उपपदेतच्छीलादिषुकर्तृषुघिनुण्प्रत्ययोभवति· विकाषी· विलासी· विकत्थी· विस्रंभी· ॥ अपेचलषः ॥ अपेचो
पपदेलषेर्द्धातोस्तच्छीलादिषुकर्तृषुघिनुण्प्रत्ययोभवति· चकाराद्वेश्च· आलाषी· विलाषी· ॥ प्रेलपसृद्रु
मथवदवसः ॥ प्रउपपदेलपादिभ्योधातुभ्यस्तच्छीलादिषुकर्तृषुघिनुण्प्रत्ययोभवति· प्रलापी· प्रलापी·

प्रसारी॰प्रद्रावी॰प्रमाथी॰प्रवादी॰प्रवादी॰प्रवासी॰वसनिवासे॰इत्येतस्यग्रहणंनाच्छादने॰इत्यस्य लुग्विकरणत्वात्॥ निंद
हिंस॰क्लिश॰खाद॰विनाश॰परिक्षिप॰परिरट॰परिवादि॰व्याभाषासूयो वुञ्॥ निंदादिभ्योधातुभ्यस्तच्छीलादिषुकर्तृषु वुञ्
प्रत्ययोभवति पंचम्यर्थेप्रथमा क्लिश उपतापे क्लिशू विबाधने॰ द्वयोरपिग्रहणं॰ निंदकः हिंसकः क्लेशकः खादकः विनाश
कः परिक्षेपकः परिरटकः परिवादकः व्याभाषकः असूयकः ण्वुलेव सिद्धे वुञ्विधानंज्ञापकंतच्छीलादिषु॰ वासरू
पन्यायेनतृजादयोनभवंति॰ देविक्रुशोश्चोपसर्गे॥ देवयतेः क्रोशतेश्चधातोरुपसर्गउपपदेतच्छीलादिषुकर्तृषुवुञ्
प्रत्ययोभवति॰ आदेवकः परिदेवकः व्याक्रोशकः परिक्रोशकः उपसर्गइतिकिं॰ देवयिता॰ क्रोष्टा॰॥ चलनशब्दार्थादकर्मकाद्युच॥ चलनार्थेभ्यः शब्दार्थेभ्योकर्मकेभ्यश्च धातुभ्यस्तच्छीलादिषुकर्तृषु युच्प्रत्ययोभवति॰ चलनः कंपनः शब्दा
र्थेभ्यः शब्दनः रवणः अकर्मकादितिकिं पठिताविद्यां॥ अनुदात्तेतश्चहलादेः॥ अनुदात्तेतोधातोर्हलादेस्तच्छी
लादिषुकर्तृषुयुच्प्रत्ययोभवति॰ वर्तनः वर्धनः अनुदात्तेत इतिकिं॰ भविता॰ हलादेरितिकिं॰ एधिता॰ आनत्रहणंकिं॥
॥जुगुप्सनः मीमांसनः॥ अकर्मकादित्येव॰ वसितावस्त्रं॰ जुचंक्रम्य॰दंद्रम्य॰सृगृधिज्वलशुचलषपतपदः॥ जुप्रभृति
भ्योधातुभ्यस्तच्छीलादिषुकर्तृषु युच्प्रत्ययोभवति॰ जुरितिसौत्रोधातुः जवनः चंक्रमणः दंद्रमणः सरणः गर्धनः
ज्वलनः शोचनः लषणः पतनः पदनः चलनार्थमिदंपदंश्चग्रहणमिहसकर्मकार्थे॰ ज्ञापकार्थे॰ यदिग्रहणमन्ये॰ वर्णयंति॰
ताच्छीलिकेषुप्रत्ययेषुवासरूपविधिर्नास्तीति॰ तेनअलंकृञस्तृन् नभवति॰ अलंकर्तेति॰ तथाहिपदेरुकञा विशेष
विहितं नसामान्यविहितोयुज सरूपत्वात्समाविशो देवकामिने॰ तद्विधाने नज्ञापकार्थं युज्पुनर्विधीयते प्रापिकं॰ वेदंज्ञापकं
कचित्समावेशः इष्यतएव गंतावेदं॰ विकस्वनः॥ क्रुधमंडार्थेभ्यश्च॥ क्रुधकोपे॰ मडिभूषायां॰ एतदर्थेभ्योधातुभ्य
स्तच्छीलादिषुकर्तृषुयुच्प्रत्ययोभवती॰ क्रोधनः रोषणः मंडार्थेभ्यः मंडनः भूषणः॥ नयः॥ यकारांताद्धातोस्तच्छी
लादिषुकर्तृषुयुच्प्रत्ययोनभवति॰ क्नूयिता॰ क्ष्मायिता॰ प्रतिषिद्ध्यते॰ क्नूयिता॰ क्ष्मायिता॰॥ सूददीपदीक्षश्च॥ सूददी॰ २१

परीक्षइत्येतेभ्यश्चधातुभ्यो युच्प्रत्ययोनभवति तच्छीलादिषुकर्तृषु॰ अनुदात्तेतइति॰ प्राप्तः प्रतिषिध्यते॰ सूदिता॰
दीपिता॰ दीक्षिता॰ ननुचादीपेविशिष्यविहितो रप्रत्ययोनमिकंपीतिसएवबाधकोभविष्यति॰ किंप्रतिषेधेन॰ वासरूपेण
युजपिप्राप्नोति॰ ताच्छीलिकेषुवासरूपविधिर्नास्तीति॰ प्रातिपदिकमेतद्धि त्युक्तंतथाचसमावेशोदृश्यते॰ कम्रायुवतिः
कमनायुवतिः कंप्राशास्या॰ कंपनाशास्या॰ सूदेर्युचिप्रतिषिद्धे कथंमधुसूदनोरिपुसूदनः अनित्योयंप्रतिषेधइति॰ योग
विभागाद्विज्ञायते॰ अथवानंद्यादिषुमधुसूदनादयोद्रष्टव्याः॥ लषपतपदस्थाभूवृषहनकमगमशॄभ्यउकञ्॥
लषादिभ्योधातुभ्यस्तच्छीलादिषुकर्तृषुउकञ्प्रत्ययोभवति॰ अपलाषुकं वृषलसंगतः प्रपातुकागर्भाभवंति॰ उपपा
दुकंसत्वं॰ उपस्थायुकाएनंपशवोभवंति॰ प्रभावुकमन्नंभवति॰ प्रवर्षुकः पर्जन्यः आघातुकं पाकलिकस्यमत्रं॰ कामुका
एनंस्त्रियोभवंति॰ आगामुकंवाराणसींरक्षआहुः किंशारुकं तीक्ष्णमाहुः॥ जल्पभिक्षकुट्टलुंटवृङःषाकन्॥ जल्पादि
भ्योधातुभ्यस्तच्छीलादिषुकर्तृषुषाकन्प्रत्ययोभवति॰ षकारोङीषर्थः जल्पाकः भिक्षाकः कुट्टाकः लुंटाकः वराकः वराकी॥
॥प्रजोरिनिः॥ प्रपूर्वाज्जवतेरिनिप्रत्ययोभवति॰ तच्छीलादिषुकर्तृषु प्रजवी॰ प्रजविनौ॰ प्रजविनः॥ जिदृक्षिविश्री
इवमाव्यथाभ्यमपरिभूप्रसूभ्यश्च॥ विजये॰ दृङ्॰ आदरे॰ क्षिक्षयेक्षिनिवासगत्योरिति॰ द्वयोरपिग्रहणं॰ प्रसइतिपूर्वे
णइत्यस्यग्रहणं॰ जिप्रभृतिभ्योधातुभ्यस्तच्छीलादिषु॰ कर्तृषुइनिप्रत्ययोभवति॰ जयी॰ दरी॰ क्षयी॰ विश्रयी॰ अत्ययी॰
वमीअव्यथी॰ अभ्यमी॰ परिभवी॰ प्रसवी॰॥ स्पृहिगृहिपतिदयिनिद्रातंद्राश्रद्धाभ्यआलुच्॥ स्पृह इप्सायां॰ ग्रह
ग्रहणे॰ पतगतौ॰ चुरादावदंतोस्यच्यते॰ दयदानगतिरक्षणेषु॰ द्राकुत्सायांगतौ॰ निपूर्वस्तत्पूर्वश्च॰ तदोनकारांत॰ तावनिपा
त्यते॰ दुधाञ्॰ श्रत्पूर्वः एतेभ्यस्तच्छीलादिषुकर्तृषुआलुच्प्रत्ययोभवति॰ स्पृहयालुः ग्रहयालुः पतयालुः दयालुः निद्रा
लुः तंद्रालुः श्रद्धालुः आलुचिप्रत्ययेशीङ्ग्रहणंकर्तव्यं॰ शयालुः॥ दाधेट्सिशदसदोरुः॥ दाधेट्शिसदसदइत्येते॰
भ्योधातुभ्यस्तच्छीलादिषुकर्तृषुरुः प्रत्ययोभवति॰ दारुः धारुः सामोत्तरं॰ नलोकाव्ययनिष्ठेति॰ उकारप्रश्लेषान्नषष्ठी॰

नभवति॰ सैरः॰ शङ्कुः॰ सङ्कुः॥ सृघस्यदः क्मरच्॥ सृघस्॰ अद इत्येतेभ्यो धातुभ्यस्तच्छीलादिषु कर्तृष्वरच् प्रत्ययो
भवति॰ सृमरः॰ घस्मरः अद्मरः॥ भंजभासमिदो घुरच्॥ भंजभासमिद इत्येतेभ्यो धातुभ्यस्तच्छीलादिषु कर्तृषु घु
रच् प्रत्ययो भवति॰ भंगुरं काष्ठं भासुरं ज्योतिः मेदुरः पशुः भंजेः कर्मकर्तरि प्रत्ययः स्वभावात्॥ विदिभिदिच्छिदेः कुरच्
ज्ञानार्थस्य विदेर्ग्रहणं नलाभार्थस्य स्वभावात्॰ विदादिभ्यो धातुभ्यः कुरच् प्रत्ययो भवति तच्छीलादिषु कर्तृषु॰ विदु
रः भिदुरं काष्ठं॰ छिदुरा रज्जुः भिदिछिदोः कर्मकर्तरि प्रत्ययः॥ इण्नशजिसर्तिभ्यः क्वरप्॥ इण्नशजिसृ इत्येतेभ्यो
धातुभ्यः क्वरप् प्रत्ययो भवति॰ इत्वरः नश्वरः जित्वरः॥ गत्वरश्च॥ गत्वर इति निपात्यते तच्छीलादिषु कर्तृषु॰ गमेरनुनासि
कलोपः क्वरप् च प्रत्ययो भवति॰ गत्वरः॥ जागरूकः॥ जागर्तेरूक प्रत्ययो भवति तच्छीलादिषु कर्तृषु॰ जागरूकः॥ यज
जपदशां यङः॥ यजजपदश इत्येतेषां यङंतानां तच्छीलादिषु कर्तृषु ऊकः प्रत्ययो भवति॰ यायजूकः जंजपूकः दंदशू
कः॥ नमिकंपिस्म्यजसकमहिंसदीपो रः॥ नमिकंपिस्मि॰ अजस कम हिंस दीप इत्येतेभ्यो धातुभ्यस्तच्छीलादिषु कर्तृ
षु रप्रत्ययो भवति॰ नम्रं काष्ठं कंप्रा शाखा स्मेरं सुखं॰ अजस्रं कम्रा युवति हिंस्रं रक्षः दीप्रं काष्ठं॰ अजस्रमिति जसः
मोक्षणे॰ नञ्पूर्वो रप्रत्ययांतः क्रियासातत्ये वर्तते॥ सनाशंसभिक्ष उः॥ सन्प्रत्ययो गृह्यते न सनिरुद्धातुः तेन सनं
तेभ्यो धातुभ्य आशंसतेर्भिक्षेश्च तच्छीलादिषु कर्तृषु उप्रत्ययो भवति॰ चिकीर्षुः जिहीर्षुः आशंसुः भिक्षुः आङः
शासु इच्छायामित्यस्येदं ग्रहणं न शंसेः स्तुत्यर्थस्य॥ विंदुरिच्छुः॥ विदेर्नुमागमः इषेश्छत्वमुकारश्च निपात्यते तच्छीला
दिषु कर्तृषु चेदनशालो विंदुः एषणशील इच्छुः॥ क्याच्छंदसि॥ क्य इति क्यच् क्यङ् क्यषां सामान्येन ग्रहणं क्यां
ताद्धातोश्छंदसि विषये तच्छीलादिषु कर्तृषु उप्रत्ययो भवति॰ मित्रयुः संस्वेदयुः सुम्नयुः॥ आदृगमहनजनः किकि
नौ लिट् च॥ आकारांतेभ्य ऋकारांतेभ्यो गमहनजनेभ्यश्च धातुभ्यस्तच्छीलादिषु कर्तृषु छंदसि विषये किकिनौ प्रत्ययौ भवतः लि
ड्वच्च तौ भवतः आदिति तकारो मुखसुखार्थः न त्वयं तपरः मा भूदाः दपि परस्तपर इति ऋकारे तत्कालग्रहणं॰ पपिः सोमं

ददिर्गाः ऋकारांतेभ्यः मित्रावरुणौ ततुरिः दूरे ह्यध्वा जगुरिः गम॰ जग्मियुवा॰ हन॰ जघ्निर्वृत्रं॰ जन॰ जज्ञिर्वीजं दधिः खिपजं
न्यः॰ अथ किं वत्वं किमर्थं भावतात इसंयोगाल्लिड् कित् इति सिद्धमेव॥ ऋच्छत्यृतामिति लिटि गुणः प्रतिषेधविषये आर
भ्यते तस्यापि बाधनार्थं कित्वं किकिनावुत्सर्गश्छंदसि सदादिभ्यो दर्शनात्॰ सेदिः नेमिः भाषायां धाञ्कृसृजनिगमिनमिभ्यः
किः दधिः चक्रिः सस्रिः जज्ञिः जग्मिः नेमिः सहिवहिचलिपतिभ्यो यङंतेभ्यः किकिनौ वक्तव्यौ॰ सासहिः वावहिः चाचलिः
॥ स्वपितृषोर्नजिङ्॥ छंदसीति निवृत्तं न स्वपेस्तृषेश्च॰ धात्वोस्तच्छीलादिषु कर्तृषु नजिङ् प्रत्ययो भवति॰ स्वप्नक्॰ स्व
प्नजौ॰ स्वप्नजः तृष्णक्॰ तृष्णजौ॰ तृष्णजः॥ धृषेश्चेति वक्तव्यं॥ धृष्णक्॰ शृवंद्योरारुः॥ शॄ हिंसायां॰ वदि अभि॰ वादेन
स्तुत्योः इत्यो॰ इत्येताभ्यां॰ धातुभ्यां तच्छीलादिषु कर्तृषु आरुः प्रत्ययो भवति॰ शरारुः वंदारुः॥ भियः क्रुक्लुकनौ॥ भि
भये॰ अस्माद्धातोस्तच्छीलादिषु कर्तृषु क्रुक्लुकनौ प्रत्ययौ भवतः भीरुः भीलुकः॥ भियः क्रुकन्नपि वक्तव्यः भीरुकः॥ स्थे
शभासपिसकसो वरच्॥ ष्ठा गतिनिवृत्तौ॰ ईश ऐश्वर्ये॰ भासृ दीप्तौ॰ पिसृ पेसृ गतौ॰ कस गतौ॰ इत्येतेभ्यो धातुभ्यस्तच्छीलादि
षु कर्तृषु वरच् प्रत्ययो भवति॰ स्थावरः ईश्वरः भास्वरः पेस्वरः कस्वरः कस्वरः॥ यश्च यङः॥ या प्रापणे॰ अस्माद्यङंताद्धातोः
तच्छीलादिषु कर्तृषु वरच् प्रत्ययो भवति॰ यायावरः॥ भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप्॥ भ्राजादिभ्यो धातुभ्यस्त
च्छीलादिषु कर्तृषु क्विप् प्रत्ययो भवति॰ विभ्राट्॰ विभ्राजौ॰ विभ्राजः भाः भासौ॰ भासः धुः धुरौ॰ धुरः विद्युत्॰ विद्युतौ॰ विद्युतः तुर्क्
लुर्जौ॰ लुर्जः॰ पुः॰ पुरौ॰ पुरः जवतेर्दीर्घश्च निपात्यते॰ जूः जुवौ॰ जुवः ग्रावस्तुत्॰ ग्रावस्तुतौ॰ ग्रावस्तुतः किमर्थमिदमुच्यते॰
यावता अन्येभ्योपि दृश्यंते क्विबिति सिद्ध एव क्विप्॰ ताच्छीलिकैर्बाध्येत वासरूपविधिश्च नास्ति किं॰ अथ तु प्रातिकं बाधनं
न तस्यैवायं प्रपंचः अन्येभ्योपि दृश्यंते॰ क्विबेति सिद्ध एव क्विप्॰ ताच्छीलिकैर्बाध्येत वासरूपविधिश्च नास्ति किं अथ
तु प्रापिकं बाधनं न तस्यैवायं प्रपंचः॥ अन्येभ्योपि दृश्यते॥ अन्येभ्योपि धातुभ्यस्तच्छीलादिषु कर्तृषु क्विप् दृश्यते॰ क
प॰ भित्॰ दृशिग्रहणं विध्यंतरोपसंग्रहार्थं क्वचिद्दीर्घः क्वचिद्द्विर्वचनं क्वचित्संप्रसारणं क्वचिदसंप्रसारणं तथा चाह॰ क

वचिप्रछ्यायतस्तुकटप्रुजुश्रीणांदीर्घोऽसंप्रसारणंचभवति· वच· वाक् प्रछ· शब्दप्राट्· स्तु· आयतस्तूः आयतस्तुः कटप्रूः
कटप्रूः जुसौत्रोयंधातुः जूः श्रिञ् श्रीः जुग्रहणेननार्थः भ्राजादिसूत्रेणगृहीतत्वात्· द्युतिगमिजुहोतीनांद्वेच· दिद्युत् जगत्·
जुहोतेर्दीर्घश्च· जुहूः ह्रस्वयउलस्य द्रुस्योद्वेच· दद्रुत्· ध्यायतेःसंप्रसारणंच· धीः ।।भुवः संज्ञान्तरयोः।। तच्छीलादिषु कर्तृष्विति·
निवृत्तं· भवतेर्द्धातोःसंज्ञायामंतरेचगम्यमानेक्विप्प्रत्ययोभवति· मित्रभूर्नामकश्चित्· अंतरे· प्रतिभूःधनिकाधमर्णयोर्योंतर
तिष्ठति· सप्रतिभूरुच्यते ।। विप्रसंभ्योड्वसंज्ञायां ।। भुवइतिवर्तते· विप्रसंम् इत्येवंपूर्वाद्भवतेर्डुप्रत्ययोभवति· नचेत्संज्ञागम्य
ते· विभुः। सर्वगतः प्रभुः स्वामी· संभुर्जनिता· असंज्ञायामितिकिं· विभूर्नामकश्चित्· डुप्रकरणेमितद्र्वादिभ्यउपसंख्यानं· मितं
द्रवतीति· मितद्रुः· शंभुः ।। कर्मणिष्ट्रन् ।। धयतेर्द्धातेर्वाधातोःकर्मणिकारकेष्ट्रन्प्रत्ययोभवति· षकारोङीषर्थः धयंतितांध
ति· भेषज्यार्थमितिवाधात्रीस्तनदायिनी· आमलकीचोच्यते ।। दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे ।।
दाप् लवने· णीञ्प्रापणे· शसुहिंसायां· शसुस्तुतौचद्वयोरपिग्रहणं· युमिश्रणे· रुजादिलोकेयोगे· ष्टुञ् स्तुतौ· तुदव्यथने· षि
ञ्बंधने· षिचिरक्षरणे· मिहसेचने· पत्लृगतौ· दशदशने· णहबंधने· इत्येतेभ्योधातुभ्यः करणेकारके· ष्ट्रन्प्रत्ययोभवति· दा
तितेनदात्रं· नी· नयंतितेननेत्रं· शसु· शस्त्रं· तोत्रं· योक्त्रं· स्तोत्रं· तोत्रं· सेत्रं· सेक्त्रं· मेढ्रं· पत्रं· दंष्ट्रा· अजादित्वाट्टाप्· नह· नद्ध्रीः
दशेरनुनासिकलोपाभावनिर्देशोज्ञापनार्थः क्वितोन्यस्मिन्नपिप्रत्यये लोपोभवतीति तेनक्वुन्यपिभवति दशनं ।। हलसू
करयोः पुवः ।। पूङ्पूञोरविशेषेणग्रहणं पवतेर्वाधातोःकरणेकारकेष्ट्रन्प्रत्ययोभवति तच्चेत्करणंहलसूकरयोरवयवोभवति·
हलस्यपवित्रं· सूकरस्यपोत्रं· मुखमित्यर्थः ।। अर्तिलूधूसूखनसहचर इत्रः ।। ऋगतौ· लूञ्छेदने· धूविधूनने· षूप्रेरणे· खनु अव
दारणे· षहमर्षणे· चरगत्यर्थः इत्येतेभ्योधातुभ्यः करणेकारके इत्रः प्रत्ययोभवति· अरित्रं· लवित्रं· धवित्रं· सवित्रं· खनित्रं· स
हित्रं· चरित्रं ।। पुवः संज्ञायां ।। पूङ्पूञोःसामान्येनग्रहणं पुवोधातोः करणेकारके इत्रप्रत्ययोभवति· ऋषिदेवतयोर्यथा
संख्यंसंबंधः ऋषौकरणेदेवतायांकर्तरीतिवक्ष्यतेनेनपवित्रोयमृषिः देवतायां अग्निः पवित्रं समान्पुनातु· वायुः सोमः २३

सूर्यइंद्रः पवित्रंतेमापुनंतु ।। ञीतः क्तः ।। ञिशब्दइद्यस्येतिञीत् तस्मात्ञीतोधातोर्वर्तमानेक्तः प्रत्ययोभवति· भूतेनिष्ठा
विहितावर्तमानेनप्राप्नोतीत्यनेनविधीयते· ञिमिदा· मिन्नः ञिक्ष्विदा· क्ष्विण्णः ञिधृषा धृष्टः ।। मतिबुद्धिपूजार्थेभ्यश्च ।। मतिरि
च्छा· बुद्धिर्ज्ञानं· पूजासत्कारः एवमर्थेभ्योधातुभ्योवर्तमानेक्तप्रत्ययोभवति· राज्ञांमतः राज्ञांइष्टः राज्ञांबुद्धः राज्ञांपूजितः राज्ञा
मर्चितः चकारोनुक्तसमुच्चयार्थस्तेन शीलितोरक्षितः क्षांतः आक्रुष्टोजुष्टइत्यपि· रुष्टश्चरुषितश्च तथोभावभिव्याहृतइत्यपि·
हृष्टतुष्टौतथाकांतस्तथोभौसंयतोद्यतौ· कष्टंभविष्यतीत्याहुरमृतं पूर्ववत्स्मृतः कष्टशब्दोभविष्यत्काले अमृतशब्दः
पूर्ववत्· वर्तमानइत्यर्थः तथासुसःशपितः आशितः लिप्तइत्येवमादयोवर्तमानेद्रष्टव्याः ।। ।।इतिकाशिकायांवृत्तौ तृती
याध्यायस्यद्वितीयःपादःसमाप्तः।। उणादयोबहुलं ।। ।।वर्तमानइत्येव· संज्ञायामितिचवर्तते· वर्तमानेधात्वर्थे संज्ञा
यांविषयेउणादयः प्रत्ययाबहुलंभवंति यतोविहितास्ततोन्यत्रापिभवंति· क्वचिदविहिताएवप्रयोगतउन्नीयंते तेष्वबाधा
ञिमिस्वदिसाध्यशूभ्यउण्· कारुः वायुः पायुः जायुः मायुः स्वादुः साधुः आशुः बाहुलकंप्रकृतेस्तनुदृष्टेः प्रायसमुच्चयनादपि
तेषां· कार्यसशेषविधेश्चतदुक्तं नैगमरूढिभवंहिसुसाधु· नामचधातुजमाहनिरुक्ते व्याकरणेशकटस्यचतोकं· यन्नपदार्थवि
शेषसमुत्थंप्रत्ययतः प्रकृतेश्चतदूह्यं संज्ञासुधातुरूपाणि प्रत्ययाश्चततः परे कार्याद्विद्यादनुबंधमेतच्छास्त्रमुणादिषु ।। भू
तेपिदृश्यंते ।। पूर्वत्रवर्तमानाधिकारादिदमुच्यते· भूतेपिकालेउणादयः प्रत्ययादृश्यंते· वृत्तंतदितिवर्त्म· चरितंतदितिच
र्म· भसितंतदितिभस्म· इतिग्रहणंप्रयोगानुसरणार्थं ।। भविष्यतिगम्यादयः ।। भविष्यतिकालेगम्यादयः शब्दाः साधवोभव
ति· प्रत्ययस्यैवभविष्यत्कालताविधीयते· नप्रकृतेः गमीग्रामं· आगामी· भावी· प्रस्थायी· प्रतिरोधी· प्रतियोधी· प्रतिबोधी·
प्रतियायी· प्रतियोगी· अनद्यतनउपसंख्यानं श्वोगमीग्रामं ।। यावत्पुरानिपातयोर्लट् ।। भविष्यतीत्येव· यावत्पुराइत्येतयोर्नि
पातयोरुपपदयोर्भविष्यतिकालेधातोर्लट्प्रत्ययोभवति· यावद्भुंक्ते· पुराभुंक्ते· निपातयोरितिकिं· यावद्दास्यति तावद्भोक्ष्यते·

करणभूतया पुरा व्रजिष्यति॰ ॥ विभाषा कदाकर्ह्योः ॥ भविष्यतीत्येव॰ कदा कर्हि इत्येतयोरुपपदयोर्भविष्यति काले धातो
र्विभाषा लट् प्रत्ययो भवति॰ कदा भुंक्ते॰ कदा भोक्ष्यते॰ कदा भोक्ता॰ कर्हि भुंक्ते॰ कर्हि भोक्ष्यते॰ कर्हि भोक्ता॰ किंवृत्ते लिप्सायां
भविष्यतीत्येव॰ विभाषेति वर्तते॰ किमो वृत्तं॰ किंवृत्तं॰ वृत्तग्रहणेन तद्विभक्त्यंतं प्रतीयात् डतरडतमौ चेति परिसंख्यानं समर्थ्य
ते किंवृत्त उपपदे लिप्सायां गम्यमानायां भविष्यकाले धातोर्विभाषा लट् प्रत्ययो भवति॰ लब्धुमिच्छा लिप्सा प्रार्थना अभिला
षः कं भवंतो भोजयंति॰ कं भवंतो भोजयिष्यंति॰ कं भवंतो भोजयितारः बुभुक्षमाणः पृच्छति कतरो भवतो भिक्षां ददाति॰ दास्य
ति दाता वा॰ लिप्सायामिति किं॥ कः पाटलिपुत्रं गमिष्यति॥ ॥ लिप्स्यमानसिद्धौ च॥ भविष्यतीत्येव विभाषेति च॰ लिप्स्यमा
नात्सिद्धिर्लिप्स्यमानसिद्धिस्तस्यां गम्यमानायां भविष्यति काले॰ धातोर्विभाषा लट् प्रत्ययो भवति॰ अकिंवृत्तार्थोयमारंभः
यो भक्तं ददाति स स्वर्गं गच्छति॰ यो भक्तं दास्यति स स्वर्गं गमिष्यति॰ यो भक्तं दाता स स्वर्गं गंता॰ लिप्स्यमानादन्नात्स्वर्गसिद्धिमाचक्षा
णो दातारं प्रोत्साहयति॥ ॥ लोडर्थलक्षणे च॥ भविष्यतीत्येव विभाषेति च॰ लोडर्थः प्रैषादिः स लक्ष्यते येन॰ धात्वर्थेन स लोड
र्थलक्षणो धात्वर्थः तस्मिन्वर्तमानाद्धातोर्भविष्यति काले विभाषा लट् प्रत्ययो भवति॰ उपाध्यायश्चेदागच्छति॰ उपाध्यायश्चेदाग
मिष्यति॰ उपाध्यायश्चेदागंता अथ त्वं छंदोधीष्व॰ अथ त्वं व्याकरणमधीष्व॰ उपाध्यायागमनमध्ययनप्रैषस्य लक्षणं॥ ॥ लिङ्
चोर्ध्वमौहूर्तिके॥ भविष्यति विभाषा लोडर्थलक्षण इति वर्तते ऊर्ध्वमौहूर्तिके॰ भविष्यति काले॰ लोडर्थलक्षणे॰ धात्वर्थे वर्तमाना
द्धातोर्लिङ् प्रत्ययो भवति॰ चकाराल्लट् च विभाषा॰ ऊर्ध्वं मुहूर्तात् भवतु ऊर्ध्वमौहूर्तिकः॥ निपातनात्समासः उत्तरपदवृद्धिश्च॰ भविष्यत
श्चैतद्विशेषणं ऊर्ध्वं मुहूर्तादुपरि मुहूर्तात् भवत ऊर्ध्वमौहूर्तिकः निपातनात्समासः उत्तरपदवृद्धिश्च भविष्यतश्चैतद्विशेषणं ऊर्ध्वं मु
हूर्तादुपरि मुहूर्तस्य उपाध्यायश्चेदागच्छेदुपाध्यायश्चेदागच्छति॰ उपाध्यायश्चेदागमिष्यति॰ उपाध्यायश्चेदागंता॰ अथ त्वं छंदोधीष्व॰
अथ त्वं व्याकरणमधीष्व॥ ॥ तुमुन्ण्वुलौ क्रियायां क्रियार्थायां॥ भविष्यतीत्येव॰ क्रियायां क्रियार्थायामुपपदे धातोर्भविष्यति॰
काले तुमुन्ण्वुलौ प्रत्ययौ भवतः भोक्तुं व्रजति॰ भोजको व्रजति॰ भुजिक्रियार्था व्रजिरत्रोपपदं क्रियायामिति किं॥ भिक्षिष्य इत्यस्य
जटाः॰ क्रियार्थायामिति किं॰ धावतस्ते पतिष्यति दंडः॰ अथ किमर्थं ण्वुल् विधीयते सामान्येन विहित एव सोस्मिन्नपि विषये भविष्यति॰ २४

लृटा क्रियार्थोपपदेन बाध्यते॰ वासरूपविधिना सोपि भविष्यति॰ एवं तर्ह्येतेन ज्ञाप्यते क्रियायां क्रियार्थायामुपपदे वासरू
पेण तृजादयो न भवंतीति॰ तेन कर्ता व्रजति॰ विक्षिपो व्रजतीत्येवमादि निवर्त्यते॰ भविष्यतीत्येवमादय इति प्रत्यया ये चात्र ये विहि
तास्ते भाववचना भविष्यति काले क्रियार्थायां क्रियायामुपपदे भवंति किमर्थमिदमुच्यते यावता विहिता एव ते क्रियार्थोपपद
विहितेनास्मिन्विषये तुमुना बाध्येरन्॰ वासरूपविधिश्च नास्ति क्तल्युट्॰ अथ वचनग्रहणं किमर्थं बाधका यथा स्युः कथं च ते वाच
कास्युरिति॰ पाकः प्रकृत्या येन विशेषणेन विहिताः यदि ताः परतस्तथैव भवंति नान्यथा सामंजस्येनेति॰ पाकाय व्रजति त्यागाय व्रजति॰
भूतये व्रजति॰ संपत्तये व्रजति॰ पुष्टये व्रजति॥ ॥ अण्कर्मणि च॥ भविष्यतीत्येव चकारः सन्नियोगार्थः क्रियायां च क्रियार्थायां
कर्मण्युपपदे भविष्यति काले वर्तमानाद्धातोरण् प्रत्ययो भवति॰ कर्मण्यणिति सामान्येन विहितोप्ययं वासरूपविधेरभावात्पु
ला बाधितः पुनरण् विधीयते॰ सोपवादत्वात्स ण्वुलं बाधते परत्वाच्च काद्दीन्॰ तेनायमाद्विषयेपि भवत्येव॰ कांडलावो व्रजति॰ शरला॰
व्रजति गोदायो व्रजति॥ ॥ लृट् शेषे च॥ भविष्यतीत्येव॰ शेषः क्रियार्थोपपदादन्यः शेषे शुद्धे भविष्यति काले चकारात् क्रियायां वा
क्रियायां चोपपदे भविष्यति काले वर्तमानाद्धातोर्लृट् प्रत्ययो भवति॰ करिष्यामीति व्रजति॰ हरिष्यामीति व्रजति॰ शेषे खल्वपि॰ करि
ष्यति हरिष्यति॥ ॥ लृटः सद्वा॥ भविष्यतीत्येव॰ लृटः स्थाने सत्संज्ञकौ शतृशानचौ भविष्यति काले वा आदेशौ भवतः व्यवस्थित
विभाषा चेयं तेन यथा लटः शतृशानचौ तथास्यापि भवतः॰ अप्रथमासमानाधिकरणादिषु नित्यं॰ अन्यत्र विकल्पः करिष्यंतं देव
दत्तं पश्य॰ करिष्यमाणं पश्य॰ हे करिष्यन्॰ करिष्यति॰ करिष्यमाणः॥ ॥ अनद्यतने लुट्॥ भविष्यतीत्येव॰ भविष्यत्यनद्यतनेर्थे वर्त
मानाद्धातोर्लुट् प्रत्ययो भवति॰ लृटोपवादः॰ श्वः कर्त्ता॰ श्वो भोक्ता॰ अनद्यतन इति बहुव्रीहिनिर्देशः॰ तेन व्यामिश्रे न भवति॰ अद्य
श्वो वा गमिष्यतीति॰ परिदेवने श्वस्तनी भविष्यदर्थे वक्तव्या॰ इयं तु कदा गंता या एवं पादौ निदधाति॰ अयं तु कदाध्येता॰ य एवम
नभियुक्तः॥ ॥ पदरुजविशस्पृशो घञ्॥ भविष्यतीतीति निवृत्तं॰ पदादिभ्यो धातुभ्यो घञ् प्रत्ययो भवति॰ पद्यतेसौ पादः॰ रुज
त्यसौ रोगः॰ विशत्यसौ वेशः॰ स्पृश उपताप इति च वक्तव्यं॰ स्पृशतीति स्पर्श उपतापः॰ अतोन्यत्र पचाद्यच् भवति॰ स्पर्शो देवदत्तस्य

रेविशेष ॥ सृ स्थिरे ॥ सर्त्तेर्धातोः स्थिरे कर्त्तरि घञ् प्रत्ययो भवति · स्थिर इति कालांतरस्थायी पदार्थ उच्यते · सचरांतिभृन्
कालांतरं सरतीति धात्वर्थस्य कर्तृता विवक्ष्यते · चंदनसारः खदिरसारः स्थिर इति किं सर्त्तासारः ॥ व्याधिमत्स्यबलेषु चेति वक्त-
व्यं · अतीसारो व्याधिः विसारो मत्स्यः सारो बलं ॥ भावे ॥ भावे चार्थे धातोर्घञ् प्रत्ययो भवति · पाकः त्यागः रागः · क्रियासामा-
न्यवाचिभवति · स्तेनार्थनिर्देशः क्रियमाणः सर्वधातुविषयः कृतो भवति धात्वर्थश्च धातुनैवोच्यते · यस्तस्य सिद्धता
नाम धर्मस्तत्र घञादयः प्रत्यया विधीयंते · पुंल्लिंगैकवचनं चात्र न तंत्रं लिंगांतरे वचनांतरे च प्रत्यया भवंत्येव · पक्तिः पच-
नं पाकौ पाका इति ॥ अकर्त्तरि च कारके संज्ञायां ॥ कर्तृवर्जिते ऽन्यस्मिन्कारके संज्ञायां विषये धातोर्घञ् प्रत्ययो भवति · प्रा-
स्यंति तमिति प्रासः प्रसीव्यंति तमिति प्रसेवः आहरंति तस्मादित्याहारः मधुराहारः तत्तिलाहारः अकर्त्तरीति किं मिषत्य-
सौ मेषः संज्ञायामिति किं कर्त्तव्यः कटः · चकारः संज्ञाव्यभिचारार्थः को भवता दायो दत्तः को भवता लाभो लब्धः कारकग्रहणं
पर्युदासेन कर्त्रर्थं तत्क्रियते प्रसज्यप्रतिषेधे हि समासो ऽस्तीति ह्याचार्यमाहं च उपदेशो ऽशितीति इत उत्तरं भावे ऽकर्त्तरि च का-
रके संज्ञायामिति च द्वयमनुवर्त्तते ॥ परिमाणाख्यायां सर्वेभ्यः ॥ परिमाणाख्यायां गम्यमानायां सर्वेभ्यो धातुभ्यो घञ् प्रत्ययो
भवति · एकस्तंडुलनिश्चायः द्वौ शूर्पनिष्पावौ द्वौ कारौ त्रयः काराः सर्वग्रहणमपो विबाधनार्थं पुरस्तादपवादा विधिन्यायेनेत्यप-
मेव बाधेत · परिमाणाख्यायामिति किं निश्चयः आख्याग्रहणं रूढिनिरासार्थं तेन संख्यापि गृह्यते · अनुक्रमणमनयोर्विषयेऽस्मि-
प्रत्ययास्तु न बाध्यंते · एका तिलोच्छितिः द्वे प्रसृती ॥ दारजारौ कर्त्तरि णिलुक् च ॥ दारयंतीति दाराः जरयंतीति जाराः ॥ इङश्च ॥
इङश्च धातोर्घञ् प्रत्ययो भवति · अचोपवादः अध्यायः उपाध्यायः अपादाने स्त्रियामुपसंख्यानं तदंताच्च वा ङीष् उपाध्याया ·
उपाध्यायी स्त्री · शृ वायुवर्णनिवृतेषु शारो वायुः शारो वर्णः गौरिवाकृतनीशारः प्रायेण शिशिरे कृशः ॥ उपसर्गे रुवः ॥
उपसर्ग उपपदे रौतेर्धातोर्घञ् प्रत्ययो भवति अपोपवादः संरावः उपरावः उपसर्ग इति किं रवः ॥ समि युद्रुदुवः ॥ सम्युपपदे यु-
द्रु दु इत्येतेभ्यो धातुभ्यो घञ् प्रत्ययो भवति · संयावः संद्रावः संदावः समीति किं प्रयवः ॥ श्रिणीभुवोऽनुपसर्गे ॥ श्रिणीभू इत्ये- २५

तेभ्यो धातुभ्यो ऽनुपसर्गेभ्यो घञ् प्रत्ययो भवति · अजयोरपवादः श्रायः नायः भावः अनुपसर्ग इति किं अश्रयः प्रभवः
कथं प्रभावो राज्ञः प्रकृष्टो भावः प्रभाव इति प्रादिसमासो भविष्यति · कथं नययोरायः कृत्यल्युटो बहुलमिति भविष्यति ॥ वौ
क्षुश्रुवः ॥ वावुपपदे क्षु श्रु इत्येताभ्यां धातुभ्यां घञ् प्रत्ययो भवति · अपोपवादः विक्षावः विश्रावः वाविति किं क्षवः श्रवः
अवोदोर्नियः ॥ अव उत् इत्येतयोरुपपदयोर्नयतेर्धातोर्घञ् प्रत्ययो भवति · अवनायः उन्नायः कथमुन्नयः पदार्थानां कृ-
त्यल्युटो बहुलमिति भविष्यति ॥ प्रे द्रुस्तुस्रुवः ॥ प्र उपपदे द्रु स्तु स्रु इत्येतेभ्यो धातुभ्यो घञ् प्रत्ययो भवति · प्रद्रावः प्रस्तावः
प्रस्रावः प्रेति किं · द्रवः स्तवः स्रवः ॥ निरभ्योः पूल्वोः ॥ पू इति पूङ् पूञोः सामान्यग्रहणं · लूञ् छेदने · यथासंख्यमुपसर्गसंबंधः
निरभिपूर्वयोः पूल्वोर्घञ् प्रत्ययो भवति · निष्पावः अभिलावः निरभ्योरिति किं पवः लवः ॥ उन्न्योर्ग्रः ॥ गृ शब्दे गृ निगरणे
द्वयोरपि ग्रहणं · उन्न्योरुपपदयोर्गृ इत्येतस्माद्धातोर्घञ् प्रत्ययो भवति · उद्गारः समुद्रस्य · निगारो देवदत्तस्य उन्न्योरिति किं गरः
॥ कॄ धान्ये ॥ उन्न्योरिति वर्त्तते कॄ इत्येतस्माद्धातोरुन्न्योरुपपदयोर्घञ् प्रत्ययो भवति · धान्यविषयश्चेद्धात्वर्थो भवति निक्षे-
पार्थस्य किरतेर्ग्रहणं · न हिंसार्थस्यानभिधानात् उत्कारो धान्यस्य · धान्य इति किं भैक्ष्योत्करः पुष्पनिकरः ॥ यज्ञे समि स्तुवः ॥
यज्ञविषये प्रयोगे संपूर्वात् स्तौतेर्घञ् प्रत्ययो भवति · संस्तावश्छंदोगानां समेत्य स्तुवंति यस्मिन्देशे छंदोगाः स देशः संस्ताव
इत्युच्यते · यज्ञ इति किं · संस्तवश्छात्रयोः ॥ प्रे स्त्रोऽयज्ञे ॥ स्तृञ् आच्छादने · अस्माद्धातोः प्रशब्द उपपदे घञ् प्रत्ययो भवति ·
न चेद्यज्ञविषयः प्रयोगो भवति · शंखप्रस्तारः मणिप्रस्तारः अयज्ञ इति किं बर्हिष्प्रस्तरः ॥ प्रथने वावशब्दे ॥ स्तृ इति वर्त्तते ·
प्रथने गम्यमाने विपूर्वात् स्तृणातेर्घञ् प्रत्ययो भवति न चेत् प्रथनं शब्दविषयं भवति · प्रथनं विस्तीर्णता पटस्य विस्ता-
रः · प्रथन इति किं तृणविस्तरः · अशब्द इति किं विस्तरो वचसां ॥ छंदोनाम्नि च ॥ वौ स्त्र इति वर्त्तते विपूर्वात् स्तृणाते-
र्धातोः छंदोनाम्नि घञ् प्रत्ययो भवति · वत्सं विस्तारं छंदः गायत्र्यादयो विशेषाः छंदःसु प्रसिद्धास्तं नामग्र-
हणात् · विष्टारपंक्तिः छंदः बृहती छंदः विष्टारपंक्तिश्छंदः अथ छंदसो नाम न भवति तच्छब्दस्य नेष्यते अप्रत्ययेन

नवर्तते छंदोनाम्नीत्यविकरणसहस्रेषा ॥ उदि ग्रहः ॥ उदुपपदे ग्रहेर्धातोर्घञ्प्रत्ययो भवति अपोपवादः उद्ग्राहः छंद
सि तु निष्ठ्याद्दियाप्यते स्तुयुधमननिपातनयोः उद्ग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन् ॥ समि मुष्टौ ॥ ग्रह इति वर्तते सं
स्युपपदे ग्रहेर्धातोर्घञ्प्रत्ययो भवति मुष्टिविषयश्चेद्धात्वर्थो भवति मुष्टिरंगुलीसंनिवेशः अहो मल्लस्य संग्राहः । अहो मुष्टि
कस्य संग्राहः दृढमुष्टितारव्यायते मुष्टाविति किं संग्रहो धान्यस्य ॥ परिन्योर्नीणोर्द्यूताभ्रेषयोः ॥ परिशब्दे निशब्दे चो
पपदयोर्यथासंख्यं नीय इणश्च धात्वोर्घञ्प्रत्ययो भवति अचोपवादः द्यूताभ्रेषयोर्विषययोः यथासंख्येनैव संबंधः द्यूतविष
यश्चेन्नयत्यर्थो भवति अभ्रेषविषयश्चेदिणर्थः पदार्थानामनपचारो यथाप्राप्तस्य करणमभ्रेषः एतेनात् परिणायेन शा
रीन् हंति सममंतान्नयेनेन अभ्येषे न्यायोऽयं न्यायः घृताभ्रेषयोरिति किं परिणयो विवाहः न्ययं गतः पापः ॥ परावनुपात्यय
इणः ॥ परिशब्द उपपदे इणो धातोरनुपात्यये गम्यमाने घञ्प्रत्ययो भवति क्रमप्राप्तस्यानतिपातोऽनुपात्ययः परिपाटी पर्य
यो भयपर्यायः अनुपात्यय इति किं कालस्य पर्ययः अतिपात इत्यर्थः ॥ व्युपयोः शेतेः पर्याये ॥ विउप इत्येतयोरुपपदयोः
पर्याये गम्यमाने शेतेर्धातोर्घञ्प्रत्ययो भवति भवविशायो मम विशायः तव राजोपशायः तव राजानमुपशयितुं पर्याय इत्यर्थः
पर्याय इति किं विशयः उपशयः ॥ हस्तादाने चेरस्तेये ॥ हस्तादाने गम्यमाने चिनोतेर्धातोर्घञ्प्रत्ययो भवति न चेत्स्तेयं चौर्यं भवति
हस्तादानग्रहणेन प्रत्यासन्निराद्येयस्य लक्ष्यते पुष्पप्रचायः फलप्रचायः हस्तादान इति किं वृक्षशिखरे फलप्रचयं करोति
अस्तेय इति किं पुष्पप्रचयश्चौर्येण उच्चयस्य प्रतिषेधो वक्तव्यः ॥ निवासचितिशरीरोपसमाधानेष्वादेश्च कः ॥ चेरित्येव
निवसंत्यस्मिन्निति निवासः चीयतेऽसौ चितिः पाणिपादादिसमुदायः शरीरं राशीकरणमुपसमाधानं एतेष्वर्थेषु चिनोतेर्धातोर्घञ्प्रत्ययो
भवति आदेश्च ककारादेशो भवति निवासे तावत् चिखल्लिनिकायः चितौ आकायमग्निं चिन्वीत शरीरे अनित्यः कायः
उपसमाधाने महानगोमयनिकायः एतेष्विति किं चयः इह कस्मान्न भवति महान् काष्ठनिचयः बहुलमत्र विवक्षितं नोप
समाधानं ॥ संघे चानौत्तराधर्ये ॥ चेरिति वर्तते प्राणिनां समुदायः संघः स च द्वाभ्यां प्रकाराभ्यां भवति एकधर्मसमावेशेन

Dr. BHAU DAJI MEMORIAL

औत्तराधर्येण च तत्रौत्तराधर्यपर्युदासादितरो गृह्यते संघेऽभिधेये चिनोतेर्धातोर्घञ्प्रत्ययो भवति आदेश्च कारस्य ककारः
भिक्षुनिकायः ब्राह्मणनिकायः वैयाकरणनिकायः अनौत्तराधर्य इति किं सूकरनिचयः प्राणिविषयत्वात्संघस्येह न भवति
स्थूलास्थूलसमुच्चयः प्रमाणसमुच्चयः ॥ कर्मव्यतिहारे णच्स्त्रियां ॥ कर्मव्यतिहारः क्रियाव्यतिहारः परस्परकरणं कर्मव्यतिहारे
गम्यमाने धातोर्णच्प्रत्ययो भवति स्त्रीलिंगे भावे वाच्ये चकारो विशेषणार्थः णचः स्त्रियामञिति व्यावक्रोशी व्यावलेखी
व्यावहासी वर्तते स्त्रियामिति किं व्यतीपाको वर्तते बाधकविषयेऽपि क्वचिदिष्यते व्यावचोरी व्यावचर्ची वर्तते इह न भवति
व्यतीहा व्यतीहा वर्तते व्यात्युक्षी वर्तते इति भवति तद्रेतदं विप्रं कथं भवति कृत्यल्युटो बहुलमिति लभ्यते ॥ अभिविधौ
भाव इनुण् ॥ अभिविधिरभिव्याप्तिः क्रियागुणाभ्यां कार्त्स्न्येन संबंधः अभिविधौ गम्यमाने धातोर्भावे इनुण्प्रत्ययो भवति सां
कूटिनं वर्तते सांराविणं सांद्राविणं अभिविधाविति किं संरावः संद्रावः भाव इति वर्तमाने पुनर्भावग्रहणं स्यात् संनिधानि
रासार्थं स्वार्थे तु अण् भावे नाइष्यते संकूटनं वर्तते तत्कथं कृत्यल्युटो बहुलमिति ॥ आक्रोशेऽवन्योर्ग्रहः ॥ इह ननुवृत्तिसामर्थ्याद्
घञनुवर्तते नानंतर इनुण् अवनि इत्येतयोरुपपदयोर्ग्रहेर्धातोर्घञ्प्रत्ययो भवति आक्रोशे गम्यमाने आक्रोशः शपनं
अवग्राहो हंत ते वृषल भूयात् निग्राहो हंत ते वृषल भूयात् आक्रोश इति किं अवग्रहः पदस्य निग्रहश्चोरस्य ॥ प्रे लिप्सायां ॥
ग्रह इति वर्तते प्रशब्द उपपदे ग्रहेर्धातोर्घञ्प्रत्ययो भवति लिप्सायां गम्यमानायां लब्धुमिच्छा लिप्सा पात्रप्रग्राहेण चरति भिक्षुः पिंडपातार्थी स्रुव
प्रग्राहेण चरति विप्रो दक्षिणार्थी लिप्सायामिति किं प्रग्रहो देवदत्तस्य ॥ परौ यज्ञे ॥ ग्रह इत्येव परिशब्द उपपदे ग्रहेर्धातोर्घ
ञ्प्रत्ययो भवति यज्ञविषयं चेत्प्रत्ययांतस्याभिधेयं भवति उत्तरपरिग्राहः अधरपरिग्राहः यज्ञ इति किं परिग्रहो देवदत्तस्य
॥ नौ वृ धान्ये ॥ वृ इति वृञ्वृङोः सामान्येन ग्रहणं निशब्द उपपदे एतस्माद्धातोर्धान्यविशेषेऽभिधेये घञ्प्रत्ययो भवति
अपोपवादः नीवारा नाम व्रीहयो भवंति धान्य इति किं निवरा कन्या ॥ उदि श्रयतियौतिपूद्रुवः ॥ उच्छब्द उपपदे श्रयत्या
दिभ्यो धातुभ्यो घञ्प्रत्ययो भवति अजपोरपवादः उच्छ्रायः उद्यावः उत्पावः कथं पतनांताः समुच्छ्रयाः वक्ष्यमाणं विभा

का० प्र० ३
२७

प्रत्यङ्गसिंहावलोकनन्यायेन संबध्यते ॥ विभाषाङिरुप्लुवोः ॥ आङ्युपपदे रौतेः प्लवतेश्च धात्वोर्विभाषा घञ् प्रत्ययो भव
ति। आरावः आरवः आप्लावः आप्लवः ॥ अवे ग्रहो वर्षप्रतिबन्धे ॥ विभाषेति वर्तते। अवे उपपदे ग्रहेर्धातोर्विभाषा घञ् प्रत्य
यो भवति वर्षप्रतिबन्धे अभिधेये। अपोपवादः प्राप्तकालस्य वर्षस्य कुतश्चिन्निमित्तात् प्रतिबन्धो वर्षप्रतिबन्धः अवग्राहो देवस्य
अवग्रहो देवस्य। वर्षप्रतिबन्ध इति किम्। अवग्रहः पदस्य ॥ प्रे वणिजाम् ॥ विभाषेत्येव। प्रशब्द उपपदे ग्रहेर्धातोर्विभाषा घञ् प्रत्य
यो भवति प्रत्ययान्तश्चेद्वणिजां संबन्धी भवति। वणिक्संबन्धेन च तुलासूत्रं लक्ष्यते। ननु वणिजस्तत्र तुला प्रगृह्यते
येन सूत्रेण तत्तस्य शब्दार्थः तुलाप्रग्राहेण चरति। वणिग्गन्योऽपि तुलाप्रग्रहेण वा। वणिजामिति किम्। प्रग्रहो देवदत्तस्य ॥ रश्मौ च ॥
विभाषा ग्रह इति च वर्तते। प्रशब्द उपपदे ग्रहेर्धातोर्विभाषा घञ् प्रत्ययो भवति रश्मिश्चेत्प्रत्ययान्तेनाभिधीयते। रथादियुक्तानामश्वा
दीनां संयमनार्था रज्जुस्तत्र रश्मिरिति गृह्यते। प्रग्राहः प्रग्रहः ॥ वृणोतेराच्छादने ॥ विभाषा प्र इति च वर्तते। प्रशब्द उपपदे वृणोतेर्धातो
र्विभाषा घञ् प्रत्ययो भवति प्रत्ययान्तेन चेदाच्छादनविशेष उच्यते। प्रावारः प्रवारः प्रवारः। आच्छादन इति किम्। प्रवरो गौः ॥ परौ भु
वोऽवज्ञाने ॥ विभाषेत्येव। परिशब्द उपपदे भवतेर्धातोर्विभाषा घञ् प्रत्ययो भवति अवज्ञाने गम्यमाने। अवज्ञानमसत्कारः। परिभावः
परिभवः। अवज्ञान इति किम्। सर्वतो भवनं परिभवः ॥ एरच् ॥ भावे अकर्तरि च कारक इति प्रकृतमनुवर्तते। तेयादरक्षस्त्युग्नो बहुल
मिति। इवर्णान्ताद्धातोर्भावे अकर्तरि च कारके संज्ञायामच् प्रत्ययो भवति। घञोऽपवादः। चकारो विशेषणार्थः। यायवजल्काजविस्त्रकाण
मिति। चयः जयः नयः क्षयः। अचि भयादीनामुपसंख्यानं नपुंसके क्तादिनिवृत्त्यर्थम्। भयं। वर्षं। जयः सर्वेषि हलिपक्वौ। ऊर्वेरित्युने
जवः पंचोद्दनसवः ॥ ऋदोरप् ॥ ऋकारान्तेभ्य उवर्णान्तेभ्यश्च धातुभ्योऽप् प्रत्ययो भवति। घञोऽपवादः। कृ करः शॄ शरः गॄ गरः उवर्णा
न्तेभ्यः युपवः क्षुलवः क्षुञ् स्तवः पूङ् पूयाः पवः ऋकारो गुरुत्वसुखार्थः ॥ ग्रहवृदृनिश्चिगमश्च ॥ ग्रहादिभ्यो धातुभ्यो प्रत्ययो भ
वति। घञोऽपवादः। निश्चिनोतेस्तु अचोऽपवादः। ग्रहः वरः दरः निश्चयः गमः। निश्चयग्रहणं स्वरार्थं। वशिरण्योरुपसंख्यानम्। वशः रणः
घञर्थे कविधानं स्थास्नापाव्यधिहनियुध्यर्थम्। प्रतिष्ठन्तेऽस्मिन्निति प्रस्थः पर्वतस्य। प्रस्नान्त्यस्मिन्निति प्रस्नः। प्रपिबन्त्यस्यामिति प्रपा। २७

आविध्यन्त्यनेनेत्याविधः। विहन्यन्ते अस्मिन्निति विघ्नः। आयुध्यन्तेऽनेनेत्यायुधम् ॥ उपसर्गेऽदः ॥ अपि सेवः उपसर्गे उपपदे
अदेर्धातोरप् प्रत्ययो भवति। घञोऽपवादः। प्रघसः संघसः। उपसर्ग इति किम्। घासः ॥ नौ ण च ॥ निशब्द उपपदे अदेर्धातोर्णप्रत्ययो भवति
चकारादप्। न्यादः निघसः ॥ व्यधजपोरनुपसर्गे ॥ व्यधजप इत्येतयोरनुपसर्गयोर्धात्वोरप् प्रत्ययो भवति। घञोऽपवादः। व्यधः जपः
अनुपसर्ग इति किम्। आव्याधः उपजापः ॥ स्वनहसोर्वा ॥ अनुपसर्ग इत्येव। स्वनहसोरनुपसर्गयोर्धात्वोर्वाऽप् प्रत्ययो भवति। घञो
पवादः। स्वनः स्वानः हसः हासः। अनुपसर्ग इत्येव। प्रस्वानः प्रहासः ॥ यमः समुपनिविषु च ॥ अनुपसर्गे वेति च वर्तते। समु
प नि वि इत्येतेषूपपदेषु अनुपसर्गे च यमेर्धातोर्वाऽप् प्रत्ययो भवति। घञोऽपवादः। संयमः संयामः उपयमः उपयामः नियमः नियामः
वियमः वियामः। अनुपसर्गात् खल्वपि। यमः यामः ॥ नौ गदनदपठस्वनः ॥ वेत्येव। निशब्द उपपदे गद नद पठ स्वन इत्येतेभ्यो धातुभ्यो
वाऽप् प्रत्ययो भवति। घञोऽपवादः। निगदः निगादः निनदः निनादः निपठः निपाठः निस्वनः निस्वानः ॥ क्वणो वीणायां च ॥ नौ वा
नुपसर्ग इति चानुवर्तते। क्वणतेर्धातोर्निशब्द उपपदे अनुपसर्गे च वीणायां च विषये वाऽप् प्रत्ययो भवति। घञोऽपवादः। सोपसर्गार्थमिदं वीणा
ग्रहणम्। निक्वणः निक्वाणः। अनुपसर्गात् क्वणः क्वाणः। वीणायां खल्वपि कल्याणप्रक्वणा वीणा कल्याणप्रक्वाणा। एतेष्विति किम्।
अतिक्वाणो वर्तते ॥ नित्यं पणः परिमाणे ॥ पणव्यवहारे अस्माद्धातोर्नित्यमप् प्रत्ययो भवति परिमाणे गम्यमाने। नित्यग्रहणं
विकल्पनिवृत्त्यर्थम्। मूलकपणः शाकपणः। संव्यवहाराय मूलकादीनां यः परिमितो मुष्टिर्बध्यते तस्येदमभिधानम्। परिमाण
इति किम्। पाणः ॥ मदोऽनुपसर्गे ॥ मदेर्धातोरनुपसर्गादप् प्रत्ययो भवति। घञोऽपवादः। विद्यामदः कुलमदः धनमदः। अनुपसर्ग इति
किम्। उन्मादः प्रमादः ॥ प्रमदसंमदौ हर्षे ॥ प्रमद संमद इत्येतौ शब्दौ निपात्येते हर्षेऽभिधेये। कन्यानां प्रमदः कोकिलानां संमदः। हर्ष इति किम्। प्र
मादः संमादः। प्रसंख्यामिति नोक्तं निपातनं रूप्यर्थं ॥ समुदोरजः पशुषु ॥ समुदोरुपपदयोरजेर्धातोः पशुविषये धात्वर्थे अप् प्रत्ययो
भवति। घञोऽपवादः। अज गतिक्षेपणयोरिति पठ्यते। ससंपूर्वः समुदाये वर्तते उत्पूर्वश्च प्रेरणे वर्तते। समजः पशूनां समुदाय
इत्यर्थः। उदजः पशूनां प्रेरणमित्यर्थः। पशुष्विति किम्। समाजो ब्राह्मणानाम्। उदाजः क्षत्रियाणाम् ॥ अक्षेषु ग्लहः ॥ ग्लह इति निपात्यते।

अक्षविषयश्चेद्धात्वर्थो भवति ग्रहेरप्रसिद्धग्लहत्वार्थं निपातनं· अक्षस्य ग्लहः अक्षेष्विति किं ग्रहः पात्रस्य· अन्ये त्व
हिं कस्य संतरमाङ्गलेष्वजंप्रकल्पहारं तिग्लहः ॥ प्रजनेसर्तेः ॥ सर्तेर्धातोः प्रजने विषये अप्प्रत्ययो भवति· घञोपवादः प्रजनः
प्रथमं गर्भग्रहणं गवामुपसरः पशूनामुपसरः स्त्रीगवीषु पुंगवानां गर्भाधानाय प्रथममुपसरणमुच्यते· ह्वः संप्रसारणं च न्यभ्यु
पविषु ॥ नि अभि उप वि इत्येतेषूपपदेषु ह्वयतेर्धातोः संप्रसारणमप्प्रत्ययो भवति· घञोपवादः निहवः अभिहवः उपहवः विह
वः ॥ ह्वयतेरिति किं प्रह्वायः ॥ आङि युद्धे ॥ आङ्युपपदे युद्धेऽभिधेये ह्वयतेर्धातोः संप्रसारणमप्प्रत्ययो भवति· आहूयंतेऽस्मिन्नि
त्याहवः संग्रामः युद्ध इति किं· आह्वायः ॥ निपानमाहावः ॥ इत्येवं आङ्पूर्वस्य ह्वयतेः संप्रसारणमप्प्रत्ययो वृद्धिश्च निपात्यते·
निपानं चेदभिधेयं भवति· निपिबंत्यस्मिन्निति निपानं उदकाधार उच्यते· आहावः आङ्पूर्वस्य ह्वयतेः संप्रसारणमप्प्रत्ययो
वृद्धिश्च निपात्यते निपानं चेदभिधेयं भवति· निपिबंत्यस्मिन्निति निपानं उदकाधार उच्यते· आहावः पशूनां कूपसमीपे उदका
धारः तत्र निपानाय पशव आहूयंते· निपानमिति किं· आह्वायः ॥ भावेऽनुपसर्गस्य ॥ अनुपसर्गस्य ह्वयतेर्धातोर्भावेऽभिधेये संप्रसा
रणमप्प्रत्ययो भवति· हवः हवे हवे सुहवं शूरमिंद्रं· अनुपसर्गस्येति किं· आह्वायः भावग्रहणमकर्तरि च कारक इत्यस्य निरासार्थं
हनश्च वधः ॥ भावेऽनुपसर्गस्येति वर्तते· हंतेर्धातोरनुपसर्गाद्भावे अप्प्रत्ययो भवति· तत्संनियोगेन च वधादेशः स चांतोदात्तः तत्रो
दात्तनिवृत्तिस्वरेणाप्प्रत्ययस्योदात्तत्वं वधः चौराणां वधो दस्यूनां भाव इत्येव घातः अनुपसर्ग इत्येव आघातो विघातः
चकारो भिन्नक्रमत्वादादेशेन संबध्यते किं तर्हि भिन्नेन प्रत्ययेन· अभ्यय श्चापरः प्राप्नोति· तेन घञपि भवति· घातो वर्तते ॥ मूर्तौ
घनः ॥ हन इत्येव· मूर्तिः काठिन्यं· मूर्तावभिधेयायां हंतेर्धातोरप्प्रत्ययो भवति· घनशब्दश्चादेशः अभ्रघनः दधिघनः कथं घनं
दधीति धनशब्देन धर्मी भण्यते ॥ अंतर्घनो देशे ॥ हन इत्येव· अंतःपूर्वाद्धंतेर्धातोर्देशेऽभिधेये अप्प्रत्ययो भवति· घनादेशश्च·
अंतर्घनः संज्ञीभूतो वाहीकेषु देशविशेष उच्यते· अन्ये त्वकारं पठंति अंतर्घणो देश इति तदनिष्टप्रयोगेव· देश इति किं अंतर्घातोऽन्यः
॥ अगारैकदेशे प्रघणः ॥ प्रघाणश्च ॥ हन इत्येव· प्रपूर्वस्य हंतेर्धातोरगारैकदेशे वाच्ये प्रघणः प्रघाण इति द्वौ शब्दौ निपात्येते·

प्रघणः प्रघाणः द्वारप्रकोष्ठको वाह्य उच्यते· अगारैकदेश इति किं प्रघातोऽन्यः ॥ उद्घनोऽत्याधानं ॥ उत्पूर्वस्य हंतेर्धातोरुद्घन
इति निपात्यते अत्याधानं चेद्भवति· उद्घनः यस्मिन्काष्ठे स्थापयित्वा अन्यानि काष्ठानि तक्ष्यंते तदभिधीयते उद्घातोऽन्यः ॥ अपघ
नोंगं ॥ अपपूर्वस्य हंतेर्धातोरपघन इति निपात्यते· अंगं चेद्भवति· अपघनः अंगावयवैकदेशो न सर्वः किं तर्हि पाणिः पादश्चा
भिधीयते· अपघातोऽन्यः ॥ करणेऽयोविद्रुषु ॥ हन इति वर्तते· अयस् वि द्रु इत्येतेषूपपदेषु हंतेर्धातोः करणे कारके अप्प्रत्ययो भवति·
घनादेशश्च· अयो हन्यतेऽनेनेति अयोघनः विघनः द्रुघनः द्रुघण इति केचिदुदाहरंति· कथं णत्वं· अरिहणादिषु प्रक्षेपात्·
पूर्वपदात्संज्ञायामग इति वा ॥ स्तंबे क च ॥ करणे हन इति वर्तते· स्तंबशब्द उपपदे हंतेर्धातोः करणे कारके कप्रत्ययो भवति·
चकाराद्घश्च तत्र च घनादेशः स्तंबघ्नः स्तंबघनः स्त्रियां स्तंबघ्ना स्तंबघना इतीष्यते· करण इत्येव· स्तंबघातः ॥ परौ घः ॥ ह
न इति वर्तते· करण इति च· परिशब्द उपपदे हंतेर्धातोः करणे कारके अप्प्रत्ययो भवति· घनशब्दश्चादेशः परिहन्यतेऽनेनेति
परिघः नालिघः ॥ उपघ्न आश्रये ॥ हन इति वर्तते· उपपूर्वस्य हंतेर्धातोरप्प्रत्ययो भवति· उपधालोपश्च निपात्यते· आ
श्रयेऽभिधेये· आश्रयशब्दः सामीप्यं प्रत्यासत्तिं लक्षयति· पर्वतोपघ्नः ग्रामोपघ्नः उपघातोऽन्यः ॥ संघोद्घौ गणप्रशंसयोः ॥ ह
न इति वर्तते· सम् उद् इत्येतयोरुपपदयोर्हंतेर्धातोरप्प्रत्ययो भवति· टिलोपो घत्वं च निपात्यते· गणे संघः पशूनां उद्घो मनुष्याणां यथा
संख्यं गणेऽभिधेये प्रशंसायां गम्यमानायां गणप्रशंसयोरिति किं· संघातः उद्घातः ॥ निघो निमितं ॥ हन इति वर्तते· निघ
इति हंतेः टिलोपो घत्वं च निपात्यते· निमितं चेदभिधेयं भवति· समंतान्मितं निमितं समारोहपरिणाहं· निघा वृक्षाः·
निघाः शालयः निमितमिति किं· निघातः ॥ ड्वितः क्त्रिः ॥ भावे अकर्तरि च कारक इति वर्तते· डुइत्यस्यासौ ड्वित् तस्मात् ड्वि
तो धातोः क्त्रिः प्रत्ययो भवति· क्त्रेर्मम्नित्यमिति केवलो न प्रयुज्यते· डुपचष् पाके· पाकेन निर्वृत्तं पक्त्रिमं· डुवप् बीजसंताने·
उप्त्रिमं· डुकृञ् कृत्रिमं ॥ ट्वितोऽथुच् ॥ टु इत्यस्य तस्मात् भावे अकर्तरि च कारक इति वर्तते· ट्वितो धातोरथुच् प्रत्ययो भवति· टुवे
पृ· वेपथुः टुओश्वि· श्वयथुः टुक्षु· क्षवथुः दुदु· दवथुः ॥ यजयाचयतविच्छप्रच्छरक्षो नङ् ॥ भावे अकर्तरि च कारक इति वर्तते·

यजादिभ्यो धातुभ्यो नङ् प्रत्ययो भवति ङकार इद्वृद्ध्यगुणप्रतिषेधार्थः यज्ञः याच्ञा पलः विश्नः प्रश्नः रक्ष्णः प्रच्छेरसंप्र
सारणं ज्ञापकात् प्रश्ने चासन्नकाल इति ॥ स्वपो नन् ॥ भावे अकर्तरि च कारके इति वर्तते स्वपेर्धातोर्नन् प्रत्ययो भवति स्वप्नः नकारः
स्वरार्थः ॥ उपसर्गे घोः किः ॥ भावे कर्तरि च कारके इति वर्तते त्वपेर्धातोर्नन् प्रत्ययो भवति स्वप्नः नकारः स्वरार्थः ॥ उपसर्गे
घोः किः ॥ भावे कर्तरि च कारके इति वर्तते उपसर्ग उपपदे घुसंज्ञकेभ्यो धातुभ्यः किः प्रत्ययो भवति किकार आतो लोपार्थः
प्रदिः प्राधिः निधिः विधिः अंतर्द्धिः ॥ कर्मण्यधिकरणे च ॥ घोः किरित्येव कर्मण्युपपदे घुसंज्ञकेभ्यो धातुभ्यो अधिकरणे
कारके किः प्रत्ययो भवति जलं धीयते स्मिन्निति जलधिः शराधिः बालधिः अधिकरणग्रहणमर्थांतरनिरासार्थं चकारः प्रत्य
यानुकर्षणार्थः ॥ स्त्रियां क्तिन् ॥ भावे अकर्तरि च कारके इति वर्तते स्त्रीलिंगे भावादौ धातोः क्तिन् प्रत्ययो भवति घञजपामपवादः
कृतिः चितिः हृतिः क्तिन्नाबादिभ्यो वक्तव्यः आबादयः प्रयोगतोनुसर्तव्याः आप्तिः राद्धिः दीप्तिः स्रस्तिः ध्वस्तिः लब्धिः श्रुयजि
स्तुभ्यः करणे श्रूयते येनेति श्रुतिः इष्टिः स्तुतिः ग्लाम्लाज्याहाभ्यो निः ग्लानिः म्लानिः ज्यानिः हानिः ॠकारल्वादिभ्यः क्तिन्
निष्ठावद्भवतीति वक्तव्यं कीर्णिः गीर्णिः शीर्णिः लूनिः दूनिः धूनिः संपदादिभ्यः क्विप् संपत् प्रतिपत् विपत् क्तिन्नपीष्य
ते संपत्तिः प्रतिपत्तिः विपत्तिः ॥ स्थागापापचो भावे ॥ स्त्रियामिति वर्तते स्थादिभ्यो धातुभ्यः स्त्रीलिंगे भावे क्तिन् प्रत्ययो
भवति अङोपवादस्य बाधकः आस्थितिः उपगीतिः संपीतिः भावग्रहणमर्थांतरनिरासार्थं कथनवस्था संस्थेति व्यवस्थायाम
संज्ञायामिति ज्ञापकात् नात्यंतापवाधो भवति ॥ मंत्रे वृषेषपचमनविदभूवीरा उदात्तः ॥ भावे स्त्रियामिति वर्तते मंत्रवि
षये वृषादिभ्यो धातुभ्यः क्तिन् प्रत्ययो भवति उदात्तः प्रकृतिप्रत्यययोः प्रथमांतयोर्विभक्तिविपरिणामेन संबंधः तस्मादेवं
कर्तवै विज्ञायते वृष्टिः इष्टिः पक्तिः मतिः वित्तिः भूतिः वीतिः रातिः सर्वत्र सामान्येन विहित एव क्तिन् उदात्तार्थमिदं वचनं
इषेस्तु इच्छेति निपातनं वक्ष्यति ततः क्तिन्नपि विधीयते मंत्रादन्यत्र आदिरुदात्तः ॥ ऊतियूतिजूतिसातिहेतिकीर्तयश्च ॥
मंत्र इति नानुवर्तते उदात्तः भावे स्त्रियामिति वर्तते ऊत्यादयः शब्दा निपात्यन्ते अवतेर्ज्वरत्वरेत्युपधावकारयोरूठ

ऊङ् ऊतिः स्वरार्थं वचनं यौतेर्जवतेश्च यूतिः जूतिः दीर्घत्वं च निपात्यते स्यतेः सातिः इत्त्वाभावो निपात्यते सनोतेर्वाजि
नसनरवनानि स्यात् सेः कृते स्वरार्थं निपातनं हंतेर्हिनोतेर्वा हेतिः कीर्तयतेः कीर्तिः ॥ व्रजयजोर्भावे क्यप् ॥ उदात्तः स्त्रिया
मित्येव व्रजयजोर्धात्वोः स्त्रीलिंगे भावे क्यप् निपात्यते स चोदात्तः क्तिनोपवादः व्रज्या इज्या इत्या पितकरणमुत्तरत्र तुगर्थं
संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः ॥ भाव इति निवृत्तं स्त्रियामुदात्त इति वर्तते वृद्ध्यैकार्याधिकारः
समजादिभ्यो धातुभ्यः स्त्रियां संज्ञायां विषये क्यप् प्रत्ययो भवति स चोदात्तः समजंत्यस्यामिति समज्या निषद्या निपत्या मन्या
विद्या सुत्या शय्या भृत्या इत्या कथं तदुक्तं स्त्रियां भावाधिकारोस्ति तेन कार्यं प्रसिद्ध्यतीति भावाधिकारो भावव्यापारो
वाच्यत्वेन विवक्षितो न तु शास्त्रीयो धिकारः ॥ कृञः श च ॥ करोतेर्धातोः स्त्रियां शप्रत्ययो भवति चकारात् क्यपो योगविभागोत्र
कर्तव्यः क्तिन्नपि यथा स्यात् क्रिया कृत्या कृतिः ॥ इच्छा ॥ इषेर्धातोर्भावे स्त्रियां शप्रत्ययो भवति यगभावश्च निपात्यते क्तिनो
पवादः एषणाभिधा परिचर्या मृगयापरिसर्पटीपानामुपसंख्यानं जागर्तेरकारो वा जागर्या जागरा ॥ अ प्रत्ययात् ॥ प्रत्ययां
तेभ्यो धातुभ्यः स्त्रियां भावे अकारः प्रत्ययो भवति क्तिनोपवादः चिकीर्षा जिहीर्षा पुत्रीया पुत्रकाम्या लोलूया कंडूया
॥ गुरोश्च हलः ॥ हलंतो यो धातुर्गुरुमान् तस्मात् स्त्रियामकारः प्रत्ययो भवति कुंडा ईहा ऊहा गुरोरिति किं सलोपा कद्रयाः
॥ षिद्भिदादिभ्योङ् ॥ स्त्रियामित्येव षिद्भ्यो धातुभ्यो भिदादिभ्यश्च स्त्रियामङ् प्रत्ययो भवति गरा पदित्तु तानिहादिषु निक
ष्यप्रत्ययोनिर्दिश्यंते जृष् जराः त्रपूष् त्रपा भिदादिभ्यः खल्वपि भिदा छिदा विदा क्षिपा गुहा पैषिष्योः श्रद्धा मेधा
गोधा हारा कारा क्षिपा तारा धारा रेखा लेखा चूडा पीडा वपा वसा मृजा क्रपेः संप्रसारणं च कृपा भिदाविदारणे
भित्तिरन्या छिदाद्वैधीकरणे छित्तिरन्या आराशस्त्र्यां अर्तिरन्या धाराप्रपातने धृतिरन्या ॥ चिंतिपूजिकथिकुंबिचर्चश्च ॥ चिति
स्मृत्यां पूज पूजायां कथ वाक्यप्रबंधे कुबि आच्छादने चर्च अध्ययने चुरादिः एतेभ्यो धातुभ्यः स्त्रियां युचि प्राप्ते अङ् प्रत्ययो भवति
क्तिनोपवादः प्रदा उपदा उपधा अंतरित्युपसर्गवद्वृत्तिः श्रद्धा अंतर्द्धा ॥ ण्यासश्रंथो युच् ॥ स्त्रियामित्येव रोपंतेभ्यो धातुभ्य

का॰प्र॰
३०

आसश्रंथरस्येताभ्यांयुच्प्रत्ययोभवति॰ अकारस्यापवादः॰ कारणा॰ हारणा॰ आसना॰ श्रथेनानक्थमास्याश्रहल्लोण्वीरिति॰
रायश्चविष्यति॰ वासरूपप्रतिषेधश्चस्त्रीप्रकरणविषयस्यैवोत्सर्गविधावस्य॰ अधिः कादिर्ग्रह्यतेश्रंथविमोचन॰ प्रतिश्रंथीरिति
नचुरादिः॰ श्रंथ॰ ग्रंथसंदर्भे॰ इतिएवेत्वेकेनैवसिद्धत्वात्॰ घट्टिवंदिविदिभ्य॰ उपसंख्यानं॰ घट्टना॰ वंदना॰ वेदना॰ घट्टेस्तौ॰ चादि
कस्यग्रहणा॰ घुट्चलनइतितिचौरादिकस्यएवौइत्येनसिद्धत्वात्॥ इषेरनिच्छार्थस्य युच्वक्तव्यः॰ अन्वेषणा॰ अध्येषणा॰ परेर्वा
त्वर्वेवना॰ परिष्टिः॥ रोगाख्यायांण्वुल्बहुलं॥ स्त्रियामितिवर्तते॥ धातोर्ण्वुल्प्रत्ययोभवतिरोगाख्यायांबहुलं॰ क्तिनादि
नामपवादः॥ आख्याग्रहणेरोगस्यचेत्प्रत्ययांतःसंज्ञाभवति॰ बहुलग्रहणंव्यभिचारार्थं॰ प्रच्छर्दिका॰ आवालिका॰ विचर्चिका
क्वचिन्नभवति॰ शिरोर्तिः॰ धात्वर्थनिर्देशेण्वुल्वक्तव्यः॰ आसिका॰ शायिकावर्तते॰ इक्श्तिपौधातुनिर्देशे॰ छिदिः॰ तिदिः॰ पचतिः॰ पठतिः
वर्णात्कारः निर्देशइतिप्रकृते॰ अकारः॰ इकारः॰ रादिफः॰ रेफः॰ मत्वर्थाच्छः॰ मत्वर्थीयः॰ अजादिस्त्यः॰ इञ्॰ आजिः॰ आतिः॰ इकृष्यादिभ्यः॰
कृषिः॰ किरिः॰ गिरिः॥ संज्ञायां॥ स्त्रियामितिवर्तते॰ संज्ञायांविषयेधातोर्ण्वुल्प्रत्ययोभवति॰ उद्दालकपुष्पभंजिका॰ वरणपुष्पप्रचा
यिका॰ अभ्यूषखादिका॰ आचोषखादिका॰ तालभंजिका॰ शालभंजिका॥ विभाषाख्यानपरिप्रश्नयोरिञ्च॥ इञ्निर्देशः॰ पक्षाख्या
ख्यानंसत्रेत्याचूरस्यइर्यनिपात्य॰ परिप्रश्ने॰ आख्यानेचगम्यमाने॰ धातोरिञ्प्रत्ययोभवतिचकाराण्वुल्च॰ विभाषाग्रहणादन्यो
पियः प्राप्तः सोपिभवति॰ कांकारिमकार्षीः॰ कंकारिकांकारिकां॰ कांकृत्यां॰ कांकृतिं॰ सर्वाः कारिकाः सर्वाः क्रियाः सर्वाः कृत्याः सर्वाः
कृतीः॰ कांगणिमजीगणः॰ कांगणिकां॰ कांगणनां॰ कांगणितिं॰ कांपाठिमपाठीः॰ कांपाठिकां॰ पठितिमितीइच्छंत्यं॰ आख्यानपरिप्रश्नयोरितिकिं॰ कृतिः॰ कृतिः॥ पर्या
यार्हर्णोत्पत्तिषुण्वुच्॥ स्त्रियामित्येव॰ पर्यायः॰ परिपाटी॰ क्रमः॰ अर्हणमर्हः॰ तद्योग्यता॰ ऋणंयत्परस्मैधार्यते॰ उत्पत्तिर्जन्म॰ एतेष्व
र्थेषुगम्यमानेषुधातोर्ण्वुच्प्रत्ययोभवति॥ भवतआसिका॰ भवतः शायिका॰ भवतोग्रामगामिका॰ अर्हे॰ अर्हति॰ भवानिक्षुभक्षि
कां॰ पयः पायिकां॰ ऋणे॰ इक्षुभक्षिकांमेधारयसि॰ ओदनभोजिकां॰ पयः पायिकां॰ उत्पत्तौ॰ इक्षुभक्षिकामेउदपादि॰ ओदनभोजि
का॰ पयः पायिका॰ विभाषेत्येव॰ चिकीर्षोत्पद्यते॰ ण्वुलिप्रकृतेप्रत्ययांतरकरणंस्वरार्थं॥ आक्रोशेनञ्यनिः॥ स्त्रियामित्येव॰
विभाषेतिनिवृत्तं॰ आक्रोशः॰ शपनं॰ आक्रोशेगम्यमाने॰ नञ्युपपदेस्त्रियांधातोरनिः प्रत्ययोभवति॰ क्तिन्नादीनामपवादः॥ अकर ३०

णिस्तेवृषलभूयात्॰ अप्रयाणिः॰ आक्रोशइतिकिं॰ अकृतिः॰ स्तस्यपटस्य॰ अजीतिःकिं॰ कृतिस्तेवृषल॥ कृत्यल्युटोबहुलं॥ भावेअक
र्तरिचकारकइतिनिवृत्तं॰ स्त्रियामितिच॥ कृत्यसंज्ञिकाः प्रत्ययाः ल्युट्च बहुलमर्थेषुभवंति॰ यत्रोक्ताः ततोन्यत्रापिभवंति॰ भावकर्मणो
कृत्याउक्तास्तेकारकांतरेपिभवंति॰ स्नानीयंचूर्णं॰ दानीयोब्राह्मणः॰ करणाधिकरणयोर्भावेस्योल्युडन्यत्रापिभवति॰ अवसेचनं॰ अवस्रा
वणं॰ राजभोजनाः शालयः॰ राजाच्छादनानिवासांसि॰ प्रस्कंदनंप्रपतनं॰ बहुलग्रहणादन्येपिकृतः प्राप्तमभिधेयंव्यभिचरंति॰ वसेरन्
अवचाराभ्यांक्रीयतेपादहारकः॰ गलेचुप्यतेगलेचोपकः॥ नपुंसकेभावेक्तः॥ नपुंसकलिंगेभावेक्तः॥ प्रत्ययोभवति॰ हसितंछात्रस्य
भुक्तंजल्पितंशयितमासितं॥ ल्युट्च॥ भावेल्युट्प्रत्ययोभवति॰ धातोर्नपुंसकेलिंगे॰ हसनंछात्रस्यशोभनं॰ जल्पनं॰ जल्पनं॰ शयनं॰ आ
सनं॰ योगविभागउत्तरार्थः॥ कर्मणिचयेनसंस्पर्शात्कर्तुःशरीरसुखं॥ येनकर्मणासंस्पृश्यमानस्यकर्तुःशरीरकमसुखमुत्पद्यतेतस्मिन्नु
पपदेकर्मणिधातोर्नपुंसकेलिंगेभावेल्युट्प्रत्ययोभवति॰ पूर्वेणैवसिद्धेप्रत्ययेनित्यसमासार्थंवचनं॰ उपपदसमासोहिनित्यसमासः॰
पयःपानंसुखं॰ ओदनभोजनंसुखं॰ कर्मणीतिकिं॰ तूलिकायाउत्थानंसुखं॰ संस्पर्शादितिकिं॰ अग्निकुंडस्योपासनंसुखं॰ कर्तुरितिकिं॰
गुरोःस्नापनंसुखं॰ स्नापयतेनशिरः कृतात्किंतर्हिकर्म॰ शरीरग्रहणंकिं॰ पुत्रस्यपरिष्वंजनंसुखं॰ मानसीप्रीतिरियं॰ सुखमितिकिं॰ कंटकानांमर्द
नंदुःखं॰ सर्वत्रासमासः॰ प्रकृत्याद्रियते॥ करणाधिकरणयोश्च॥ करणेअधिकरणेचकारकेअभिधेयेधातोर्ल्युट्प्रत्ययोभवति॰ इध्मप्र
श्चनः॰ पलाशशातनः॰ अधिकरणे॰ गोदोहनी॰ सक्तुधानी॥ पुंसिसंज्ञायांघःप्रायेण॥ करणाधिकरणयोरित्येव॰ पुल्लिंगयोः करणाधि
करणयोःरभिधेययोर्धातोर्घः प्रत्ययोभवति॰ समुदायेनचेत्संज्ञागम्यते॰ प्रायग्रहणमकात्स्न्यार्थं॰ दंतच्छदः॰ उरश्छदः॰ पटः॰ अधिकरणेख
ल्वापि॰ एत्यतस्मिन्कुर्वतीत्याकारः॰ आलयः॰ पुंसीतिकिं॰ प्रसाधनं॰ संज्ञायामितिकिं॰ प्रहरणोदंडः॰ घकारःछादेर्घेइतिविशेषणार्थः॥ गोचरसंच
रवहव्रजव्यजापणनिगमाश्च॥ गोचरादयः शब्दाघप्रत्ययांतानिपात्यंते॰ पूर्वस्मिन्नेवार्थेहलश्चेतिघञं॰ वक्ष्यतितस्यापवादः॥ गावश्च
रंत्यस्मिन्निति॰ गोचरोदेशः॰ संचरंतेतेनसंचरः॰ वहत्यनेनवहः॰ व्रजंतितेनव्रजः॰ व्यजंतितेनव्यजः॰ निपातनाद्विभावोनभवति॰ एत्याक्रि
न्नायमनेतइत्यापणः॰ निगच्छंतितस्मिन्निति॰ निगमः॰ चकारोनुक्तसमुच्चयार्थः॰ कषः॰ निकषः॥ अवेतृस्त्रोर्घञ्॥ अवेउपपदेतरते
स्तृणातेश्चधातोः करणाधिकरणयोः संज्ञायांघञ्प्रत्ययोभवति॰ घकारोधञ्डित्स्वरार्थः॰ घकारउत्तरत्रकुत्वार्थः॰ अवतारः॰ अवस्तारः॰ क

यमवतारोनवाः नहीयंसंज्ञा॰ प्रायेण ग्रहणानुवृत्तेरसंज्ञायामपि भवति ॥ हलश्च ॥ पुंसिसंज्ञायां करणाधिकरणयोरिति चसर्व
मनुवर्तते

Dr. BRAU DAUI MEMORIAL

काशिकावृत्ति अध्याय

का० ४
१

॥श्रीगणेशायनमः॥ ॥ङ्याप्प्रातिपदिकात्॥ अधिकारोयम्॥ यदित ऊर्द्ध्वमनुक्रमिष्यामः॥ आपञ्चमा
ध्यायपरिसमाप्तेः ङ्याप्प्रातिपदिकादित्येवं तद्वेदितव्यं॥ स्वादिषु कप्प्रत्ययपर्यंतेषु प्रकृतिरधिक्रियते॥ ङी
प् ङीष् ङीनां सामान्येन ग्रहणं ङीति॥ टाप् डाप् चापां आविति॥ प्रातिपदिकमुक्तमर्थवत्कृत्तद्धितसमा
साश्चेति॥ तेषां समाहारनिर्देशो ङ्याप्प्रातिपदिकादिति॥ यद्यपि च प्रत्ययपरत्वेन पारिशेष्यादियं
च प्रकृतिर्लभ्यते॥ तथापि रुद्धा वृद्धा वर्णस्वरद्यचूलक्षणप्रत्ययविधौ तत्संप्रत्ययार्थं ङ्याप्प्रातिपदि
कग्रहणं कर्त्तव्यं॥ इतरथा हि समर्थविशेषणमेतत्स्यात्॥ १॥ अथ ङ्याब्ग्रहणं किं॥ न प्रातिपदिकग्रहणेन
लिंगलिंगविशिष्टस्यापि ग्रहणं भवतीत्येव सिद्धं॥ नैतदिति॥ स्वरूपविधिविषया परिभाषेयं प्रातिपदि
कस्वरूपग्रहणे सति लिंगविशिष्टग्रहणं भवतीति॥ तथा च पुवाखलतिपलितवलितवलिन जरतीभि
रिति न्यायकमस्यास्तादृशमेव॥ किंच तदंतात्तद्धितविधानार्थं ङ्या[illegible]हणं॥ कालितरा॥ हरिणीतरा॥
खट्वातरा॥ मलातरेति॥ विप्रतिषेधात्तद्धितबलीयस्त्वं स्यात्॥ २॥ स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्य
स्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्॥ ङ्याप्प्रातिपदिकादित्यधिकृतं॥ ङ्याप्प्रातिपदिकात्स्वादयः प्रत्यया भ
वंति॥ उकारादयोनुबंधा यथायोगमुच्चारणार्थाः॥ टकारः सुडिति प्रत्याहारार्थः॥ संख्याकर्मादयश्च स्वा
दीनामर्थाः शास्त्रांतरेण विहिताः॥ तेन सहास्यैकवाक्यता ज्ञातव्या॥ कुमारी गौरी शार्ङ्गरवी॥ ङीप्
ङीनां क्रमेणोदाहरणं॥ कुमारी॥ कुमार्यौ॥ कुमार्यः॥ एवं गौरी शार्ङ्गरवी चोदाहार्ये॥ आप् खट्वापि खट्वा
बहुराजा॥ कारीषगंध्या॥ टाप् डाप् चापां क्रमेणोदाहरणं॥ खट्वा॥ खट्वे॥ एवं बहुराजा कारीषगंध्ये

चोदाहार्ये॥ एवं प्रातिपदिकात्॥ दृषत्॥ दृषद्॥ दृषदौ॥ दृषदः॥ १॥ स्त्रियाम्॥ अधिकारोयम्॥ यदित ऊर्द्ध्व
मनुक्रमिष्यामः॥ स्त्रियामित्येवं तद्वेदितव्यं॥ ङ्याप्प्रातिपदिकादिति सर्वाधिकारेपि प्रातिपदिकमात्रमत्र प्र
करणे संबध्यते॥ कुत एतत्॥ ङ्यापोरनेनैव विधानात्॥ स्त्रियामित्युच्यते॥ केयं स्त्री नाम॥ सामान्यविशेषाः
स्त्रीत्वाति पदिकमात्रमत्र प्रकरणे संबध्यते॥ कुत एतत्॥ ङ्यापोरनेनैव विधानात्॥ स्त्रियामित्युच्यते॥ केयं स्त्री
त्वादयो गोत्वादय इव बहुप्रकाराः व्यक्तयः क्वचिदाश्रयविशेषाभावादुपदेशव्यंग्या भवंति॥ यथात्र स्त्रीत्वा
दयः॥ स्त्रीत्वं च प्रत्ययार्थः प्रकृत्यर्थविशेषणं चेत्युभयथापि प्रयुज्यते स्त्रियामभिधेयायां स्त्रियां वा यत्प्रा
तिपदिकं वर्त्तत इति॥ वक्ष्यति॥ अजाद्यतष्टाप्॥ अजा॥ देवदत्ता॥ स्त्रियामिति किं॥ अजो देवदत्ता॥ स्त्रिया
मिति किं॥ अजो देवदत्तः॥ ३॥ अजाद्यतष्टाप्॥ अजादिभ्यः प्रातिपदिकेभ्योऽकारांताच्च प्रातिपदिकात्स्त्रि
यां टाप् प्रत्ययो भवति॥ पकारः स्वरसामान्यार्थः॥ टकारः सामान्यग्रहणविघातार्थः॥ अजा॥ एडका॥ को
किला॥ चटका॥ अश्वा॥ खट्वा॥ देवदत्ता॥ तपरकरणं तत्कालार्थं शुभंयाः॥ कीलालपा॥ ब्राह्मणी ह
स्वाभ्य इति सलोपः स्यात्॥ अजादिग्रहणं तु क्वचिज्जातिलक्षणे ङीषि प्राप्ते क्वचित्तु पुष्पफलोत्तरपदल
क्षणे क्वचित्तु वयोङीपि क्वचिद्दिलक्षणे हि लंतानां त्वप्राप्त एव कस्मिंश्चिट्टाब्विधीयते॥ शूद्रा चामहत्
पूर्वा जातिरिति पठ्यते॥ तस्यायमर्थः॥ शूद्रशब्दष्टापृष्टापमुत्पादयति श्चेद्भवति॥ शूद्रा॥ पुंयोगे ङीषैव
भवितव्यं॥ शूद्रस्य भार्या शूद्री॥ महत्पूर्वस्य प्रतिषेधः॥ महाशूद्री॥ महाशूद्रशब्दो ह्याभीरजातिवच
नस्तत्र तदंतविधिना टाप् प्राप्तः प्रतिषिध्यते॥ ग्रहणवता प्रातिपदिकेन तदंतविधिर्नेति॥ कथं तदंतवि

धि॥एतेंदेवज्ञापकंभवत्यस्मिन्प्रकरणेतदंतविधिरिति॥तेनातिधीवरी॥अतिपीवरी॥अतिभवती॥अतिम
हतीतिसिद्धंभवति॥अजाएडका॥चटका॥अश्वा॥मूषिकेतिजातिः॥बाला॥होडा॥पाका॥वत्सा॥मंदा॥विला
तेतिवयः॥पूर्वापहाणा॥अपरापहाणा॥टित्॥निपातनाणत्वंसंभस्त्राजिनशणपिण्डेभ्यः फलात्॥संफ
ला॥भस्त्रफला॥अजिनफला॥शणफला॥पिण्डफला॥फलाद्विगौबहुव्रीहौत्रिफलीसंहतिः॥सत्प्राक्कांडप्रां
तशतैकेभ्यःपुष्पात्॥सत्पुष्पा॥प्राक्पुष्पा॥काण्डपुष्पा॥प्रांतपुष्पा॥शतपुष्पा॥एकपुष्पा॥पाककर्णपर्णपुष्प
तिङीषोपवादः॥शूद्राचामहत्पूर्वाजातिः॥कुञ्चा॥उष्णिहा॥देवविशा॥हलंताः॥ज्येष्ठा॥कनिष्ठामध्यमा॥
पुंयोगः॥कोकिलाजातिः॥मूलान्नञः॥अमूला॥४॥ऋन्नेभ्योङीप्॥ऋकारांतेभ्योनकारांतेभ्यश्चप्रातिपदि
केभ्यःस्त्रियांङीप्प्रत्ययोभवति॥ङकारःसामान्यग्रहणार्थः॥पकारःसामान्यग्रहणविघातार्थः॥कर्त्री॥ह
र्त्री॥दंडिनी॥छत्रिणी॥५॥उगितश्च॥उकृद्यत्रसंभवतियथाकथंचितदुगिच्छब्दरूपंतदंतात्स्त्रियांङीप्प्रत्य
योभवति॥भवती॥पचती॥यजंती॥धातोरुगितः॥प्रतिषेधोवक्तव्यः॥उखास्रत्॥पर्णध्वत्॥अञ्चते
श्चोपसंख्यानं॥प्राची॥प्रतीची॥६॥वनोरच॥वन्नंतात्प्रातिपदिकात्स्त्रियांङीप्प्रत्ययोभवति॥रेफश्चां
तादेशः॥धीवरी॥पीवरी॥शर्वरी॥परलोकदृश्वरी॥अत्रोभ्यइत्येवङीपिसिद्धेतत्सन्नियोगेनरेफविधानार्थं
वचनंवनोनहशः॥प्राप्तोङीप्रावुभावपिप्रतिषिध्येते॥सहयुध्वाब्राह्मणी॥७॥पादोन्यतरस्यां॥पादइति
कृतसमासांतःपादशब्दोनिर्दिश्यतेपादंतात्प्रातिपदिकादन्यतरस्यांस्त्रियांङीप्प्रत्ययोभवति द्विपात् द्वि
पदी॥त्रिपात्॥त्रिपदी॥चतुष्पात्॥चतुष्पदी॥८॥टाबृचि॥पादइत्येव॥साचइत्यभिधेयनिर्देशः॥ऋग्विवाच्या

यांपादंतात्प्रातिपदिकात्स्त्रियांटाप्प्रत्ययोभवति॥ङीपोपवादः॥द्विपदा॥ऋक्॥त्रिपदाऋक्॥चतुष्पादा
ऋक्॥ऋचीतिकिं॥द्विपदीदेवता॥९॥नषट्स्वस्रादिभ्यः॥षट्संज्ञकेभ्यः॥स्वस्रादिभ्यश्चप्रातिपदिकेभ्यः
स्त्रीप्रत्ययोनभवति॥योयःप्राप्नोतिसर्वःप्रतिषिध्यते॥पंचब्राह्मण्यः॥सप्त॥नव॥दश॥स्वस्रादिभ्यः॥स्वसादु
हिता॥ननांदायाता॥माता॥तिस्रः॥चतस्रः॥षट्संज्ञकानामंतेलुप्तेटाबुत्पत्तिःकस्मान्नस्यात्॥प्रत्याहाराच्चाप
सिद्धं॥दोषस्तिलेतस्मान्नोभौ १० मनः॥मन्नंतात्प्रातिपदिकात्ङीप्प्रत्ययोनभवति॥ऋन्नेभ्योङीप्प्राप्तोम
नइतिसूत्रेणप्रतिषिध्यते॥दामानौ॥दामानः॥पामा॥पामानौ॥पामानः॥अणिनस्मअहणान्यर्थवताचानर्थके
नचतदंतविधिंप्रयोजयंति॥सीमासीमानौस्सीमानः॥अतिमहिमा॥अतिमहिमानौ॥अतिमहिमानः॥११॥
अनोबहुव्रीहेः॥अन्नंताद्बहुव्रीहेःस्त्रियांङीप्प्रत्ययोनभवति॥अनुपधालोपीबहुव्रीहिरिहोदाहरणंउ
पधालोपिनोहिविकल्पंवक्ष्यति॥सुपर्वासुपर्वाणौ॥सुपर्वाणः॥सुशर्मा॥सुशर्माणौ॥सुशर्माणः॥बहुव्रीहे
रितिकिं॥अतिक्रांताराजानमतिराजी॥१२॥डाबुभाभ्यामन्यतरस्याम्॥डाप्प्रत्ययोभवतिउभाभ्यामन्नंतात्प्राति
पदिकादनंताच्चबहुव्रीहेरन्यतरस्यां॥पामा॥पामे॥पामाः॥सीमा॥सीमे॥सीमाः॥नचभवति॥पामानः॥सीमानः॥ब
हुव्रीहौ॥बहुराजा॥बहुराजे॥बहुराजाः॥बहुतक्षा॥बहुतक्षे॥बहुतक्षाः॥नचभवति॥बहुराजानः॥बहुतक्षा
णः॥अन्यतरस्यांग्रहणंकिमर्थं॥बहुव्रीहौवनोरचेत्यस्यापिविकल्पोयथास्यात॥बहुधीवा॥बहुधीवरी॥ब
हुपीवा॥बहुपीवरी॥१३॥अनुपसर्ज्जनात्॥अधिकारोयं॥उत्तरसूत्रेषूपसर्ज्जनप्रतिषेधंकरोति॥यदित
ऊर्द्धमनुक्रमिष्यामोअनुपसर्ज्जनादित्येवंतद्वेदितव्यं॥वक्ष्यति॥टिड्ढाणञ्॥इति॥कुरुचरी॥मद्रचरी॥अ

नुपसर्ज्जनादितिकिं। बहुकुरुचरा॥बहुमद्रचरा॥मथुरा॥जातेरितिङीप्॥कुक्कुटीसूकरी॥अनुपसर्ज्जनादि
तिकिं॥बहुकुक्कुटा। बहुशूकरा॥मधुरा॥कथंपुमरुपसर्ज्जनात्प्रत्ययप्रसंगः॥तदंतविधिनाज्ञापितंचैतदस्यप्र
करणेतदंतविधिरिति॥तथाचप्रधानेनतदंतविधिर्भवति॥कुंभकारी।नगरकारी॥नवाणितिकूडुःहणंतद्धि
तोप्यणस्ति॥१४॥टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयपृठक्ठञ्कञ्क्वरपख्युनाम्॥अतइतिसर्वत्रानुवर्त्तते॥तत्सतिसं
भवेविशेषणंभवति॥टिदादिभ्यःप्रातिपदिकेभ्यःस्त्रियांङीप्प्रत्ययोभवति॥टापोपवादः टित्तस्तावत्।कुरुच
री॥मद्रचरी॥इहकस्मान्नभवति॥पवमाना॥यजमाना॥ट्यनुबंधकत्वाद्दृढ्दु।ल्युडादिषुकरणसामर्थ्यात्
इतरत्रतुटेरेत्वंफलम्॥पविताविद्येतिआगमटित्वमनिमित्तंद्यद्यूलोतुर्छेतितिलिंगात्।ठसौपर्णेयी। वैनतेयी
निरनुबंधकोटशब्दःस्त्रियांनास्तीतिनिरनुबंधकपरिभाषानप्रवर्त्तते॥अण्।कुंभकारी॥नगरकारी॥औपग
वी॥णेपिक्वचिदणकृतंकार्यंभवति॥चौरी। तापसी। दण्डा॥मौष्टेत्यत्रनभवति।अञ्।औत्सी।औदपानी।शार्ङ्ग
रवाद्यञइतिपुनरञोग्रहणंजातिलक्षणंङीषंबाधितुंद्वयसच्॥ऊरुद्वयसी। दघ्नच्॥ऊरुदघ्नी॥जानुदघ्नी
नाभिदघ्नी॥मात्रच्॥ऊरुमात्री॥जानुमात्री॥तयप्॥पंचतयी।ठक्।आक्षिकी।शालाकिकी॥ठञ्।लावणिकी॥
ठक्ठञोर्द्वंद्वेनग्रहणंठनादिनिवृत्त्यर्थं॥कञ्। यादृशी॥तादृशी॥क्वरप्। इत्वरीनश्वरी॥ख्युन्॥आढ्यंकरणी
सुभगंकरणी॥नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानं॥स्त्रैणी।पौंस्नी॥शाक्तीकी। याष्टीकी तरुणीतलु
नी॥यञश्च॥ङीबित्येव॥यञंताच्चप्रातिपदिकात्स्त्रियांङीप्प्रत्ययोभवति। गार्गी।वात्सी॥अपत्यग्रहणंकर्त्त ३
व्यमिहमाभूत्॥द्वीपादनुसमुद्रंयञ्॥द्वैप्या॥पृथग्योगकरणमुत्तरार्थं॥१६॥प्राचांष्फतद्धितः॥यञइत्येव

प्राचामाचार्याणांमतेनयञंतात्स्त्रियांष्फप्रत्ययोभवतिसचतद्धितसंज्ञः॥षकारोङीषर्थःप्रत्ययद्वयेनेहस्त्रीत्वं
व्यज्यते॥तद्धितग्रहणंप्रातिपदिकसंज्ञार्थं गार्ग्यायणी॥वात्स्यायनी॥अन्येषांगार्गीवात्सी॥सर्वत्रग्रहणमुत्त
रसूत्रादिहानुवर्त्यते॥बाधकबाधनार्थं॥अवट्याच्चायंवक्ष्यति। तमपिबाधित्वाप्राचांष्फएवयथास्यात्॥आ
वट्यायनी॥१७॥सर्वत्रलोहितादिकतन्तेभ्यः॥यञइत्येवपूर्वेणविकल्पेप्राप्तेनित्यार्थंवचनं॥सर्वत्रलोहिता
दिर्यःकतंतपर्यंतेभ्योयञंतेभ्यःस्त्रियांष्फप्रत्ययोभवतिकतशब्दःस्वतन्त्रंयत्प्रातिपादिकत्तदवधित्वेनपरिगृह्य
ते॥कपिशब्दात्परः।कपिकतेति॥नप्रातिपदिकावयवः कुरुकतेति॥लौहित्यायनी।शांसित्यायनी। बाभ्रव्याय
णी॥कण्वात्तुशकलःपूर्वः कतादुत्तरइष्यते। पूर्वोत्तरौतदंतादीष्फाणौतत्रप्रयोजनं। प्रातिपदिकेष्वन्यथा
पाठः।सएवव्यवस्थापयितव्यइतिमन्यते। कतंतेभ्यःइति॥बहुव्रीहितत्पुरुषयोरेकशेषस्तथाकण्वादिभ्योगोत्र
इतितन्त्रतत्सरूपत्वात्संग्रहीतामध्ययातीशाकलशाकलशब्दोयञंतःप्रत्ययद्वयमपिप्रतिपद्यतेशाकल्या
यनी। शाकल्यस्येमेछात्राः।शाकल्यस्येमेछात्राः। शाकलाः॥१८॥कौरव्यमांडूकाभ्यांच॥कौरव्यमाण्डूकइत्येता
भ्यांस्त्रियांष्फप्रत्ययोभवति॥कुर्वादिभ्योण्यःतेठक्मण्डूकादित्यणिचयथाक्रमंटाप्ङीपोरपवादः कौरव्या
यणी॥मांडूकायनी॥कथंकौरवीसेना। तस्येदंविवक्षायामेपिकृतंभविष्यति॥कौरव्यमाण्डूकयोरासुरेरुपसंख्या
नं॥आसुरायणी॥शैषिकेष्वर्थेषुइञश्चेत्यणिप्राप्तेछप्रत्ययईष्यतेआसुरीयःकल्पः॥१९॥वयसिप्रथमे
कालकृतशरीरावस्थायौवनादिर्वयः॥प्रथमेवयसियत्प्रातिपदिकंश्रुत्यावर्त्तते॥ह्रतःस्त्रियांङीप्प्रत्ययोभ
वति॥कुमारी। किशोरी। प्रथमइतिकिं। स्थविराबृद्धा॥अतइत्येवशिशुः।वयस्यचरमइतिवक्तव्यं। वधूटी। चिरं

का०४ टी॥द्वितीयवयोवचनाविंनोप्राप्तयोवनास्यभिधीयते॥कथंकन्या।कन्यायाः॥कनीनचेतिज्ञापकात्॥कथंद्वि
४ र्षा॥त्रिवर्षा।उत्तानशया॥लोहितपादिकेतिनैतावयःश्रुतयः॥२०॥द्विगोः॥द्विगुसंज्ञकात्प्रातिपदिकात्स्त्रियांङी
प्प्रत्ययोभवति॥पंचपूली।दशपूली॥कथंत्रिफला॥अजादिषुद्रष्टव्यं॥२१॥अपरिमाणबिस्ताचितकंबल्ये
भ्योनतद्धितलुकि॥पूर्वेणङीप्प्राप्तःप्रतिषिध्यते॥अपरिमाणान्ताद्द्विगोर्बिस्ताचितकम्बल्यान्ताच्चतद्धितलुकि
सतिङीप्प्रत्ययोनभवति॥बिस्तादीनांपरिमाणार्थंग्रहणं॥सर्वतोमानंपरिमाणं॥अपरिमाणान्तात्तावत्॥पंच
भिरश्वैःक्रिता पंचाश्वा।दशाश्वा॥तेनक्रीतंठक्॥अध्यर्द्धपूर्वद्विगोर्लुगसंज्ञायामितिलुक्॥कालःसंख्याचनपरि
माणंद्विवर्षा।त्रिवर्षा॥द्वाभ्यांशताभ्यांक्रीताद्विशता।त्रिशता॥बिस्तादिभ्यः॥द्विबिस्ता॥त्रिबिस्ता॥द्व्याचिता
त्र्याचिता॥द्विकम्बल्या॥त्रिकंबल्या अपरिमाणेतिकिं॥द्व्याढकी।त्र्याढकी॥तद्धितलुकीतिकिं॥समाहारेपंचा
श्वी॥दशाश्वी॥२२॥काण्डान्तात्क्षेत्रे॥काण्डशब्दान्ताद्द्विगोस्तद्धितलुकिसतिक्षेत्रेवाच्येङीप्प्रत्ययोनभवति
द्वेकाण्डेप्रमाणमस्याक्षेत्रभक्तेःप्रमाणेद्वयसजितिविहितस्यप्रमाणेलोद्विगोनित्यमितिलुकिकृतेद्विकाण्डाक्षे
त्रभक्तिः॥त्रिकाण्डा॥काण्डशब्दस्यापरिमाणवाचित्वात्॥पूर्वेणैवप्रतिषेधेसिद्धेक्षेत्रनियमार्थंवचनं इहमाभूत्
द्विकाण्डीरज्जुरितिप्रमाणविशेषकाण्डं॥२३॥पुरुषात्प्रमाणेन्यतरस्याम्॥द्विगोस्तद्धितलुकीत्येव॥प्रमाणेयः
पुरुषशब्दस्तदन्तात्द्विगोस्तद्धितलुकिसति॥अन्यतरस्यान्ङीप्प्रत्ययोभवति॥द्वौपुरुषौप्रमाणमस्याः
परिखायाःद्विपुरुषा॥द्विपुरुषी॥त्रिपुरुषा॥त्रिपुरुषी॥परिमाणान्तत्वान्नित्येप्रतिषेधेप्राप्तेविकल्पार्थंवचनं ४
प्रमाणइतिकिं॥द्वाभ्यांपुरुषाभ्यांक्रीताद्विपुरुषा॥त्रिपुरुषा॥तद्धितलुकीत्येव॥समाहारेपंचपुरुषी॥१४॥बहुव्री

हेरूधसोङीप्॥ऊधस्शब्दान्ताद्बहुव्रीहेःस्त्रियांङीप्प्रत्ययोभवति॥ऊधसोनङितिसमासान्तःकृते॥अनो
बहुव्रीहेरितिडाप्प्रतिषेधयोःप्राप्तयोरिदमुच्यते॥कुण्डोध्नी॥घटोध्नी॥बहुव्रीहेरितिकिं॥प्राप्तानुधःप्राप्तोधा॥
अनउपधालोपिनइत्यस्यापिङीपोयमुत्तरत्रानुवृत्तेर्बाधइष्यते॥समासान्तश्चस्त्रियामेवेहनभवति॥महोधाः
पर्जन्यइति॥२५॥संख्याव्ययादेर्ङीप्॥पूर्वेणङीष्प्राप्तेङीविधीयते॥संख्यादेरव्ययादेश्चबहुव्रीहेरूधःश
ब्दान्तात्ङीप्प्रत्ययोभवति॥संख्यादेस्तावत्॥द्व्यूध्नी॥त्र्यूध्नी॥अव्ययादेः॥अत्यूध्नी॥निरूध्नी॥आदिग्रहणंकिं
द्विविधोध्नी॥त्रिविधोध्नीत्यत्रापियथास्यात्॥२६॥दामहायनान्ताच्च॥ऊधसइतिनिवृत्तं॥संख्याग्रहणमनुव
र्तते॥नाव्ययग्रहणं॥संख्यादेर्बहुव्रीहेर्दामशब्दान्ताद्धायनशब्दान्ताच्चस्त्रियांङीप्प्रत्ययोभवति॥दामान्तात्डाप्
प्रतिषेधविकल्पयोःप्राप्तयोर्नित्यार्थंवचनं॥द्विदाम्नी॥त्रिदाम्नी॥हायनान्तात्टापिप्राप्तेद्विहायनी॥त्रिहायणी॥चतुर्हा
यणी॥हायनोवयसिस्मृतः॥तेनेहनभवति॥द्विहायनाशाला॥त्रिहायना॥चतुर्हायना॥णत्वमपित्रिचतुर्भ्यांहाय
नस्येतिवयस्येवस्मर्यते॥२७॥अनउपधालोपिनोन्यतरस्याम्॥बहुव्रीहेरित्येव॥अन्नन्तोयोबहुव्रीहिरुपधाल्लो
पीतस्मादन्यतरस्यामङीप्प्रत्ययोभवति॥ङीयामुक्तेडाप्प्रतिषेधोभवतः किमर्थंतर्हीदमुच्यते ननुपक्षएव
डापप्रतिषेधौङीपः अनुपधालोपिनोङीप्प्रतिषेधार्थंवचनं॥बहुराजा॥बहुराज्ञी॥बहुराजे॥बहुतक्षा॥बहुतक्ष्णी
बहुतक्षे॥अनइतिकिं॥बहुमत्स्या॥उपधालोपिनःकिम्॥सुपर्वा॥सुपर्वे॥सुपार्वाणौ॥सुपर्वाणः॥डापप्रतिषेधावेवा
भवतः॥२८॥नित्यंसंज्ञाछंदसोः॥अन्नन्ताद्बहुव्रीहेरुपधालोपिनःसंज्ञायाविषयेछंदसिचनित्यंङीप्प्रत्ययो
भवति॥विकल्पस्यापवादः॥सुराज्ञी॥अतिराज्ञीनामग्रामः॥छंदसि॥गौःपंचदाम्नी॥एकदाम्नी॥द्विदाम्नी॥एकमूर्द्धी

का॰४ समानमूर्द्धी॥२९॥ केवलमामकभागधेयपापापरसमानार्य्यकृतसुमंगलभेषजाच्च॥ संज्ञाछंदसोरित्येवं के
५ वलादिभ्यः प्रातिपदिकेभ्यः संज्ञायां छंदसि च विषये स्त्रियां ङीप्प्रत्ययो भवति॥ केवली केवलेति भाषायां
मामकी॥ मामकेति भाषायां॥ मित्रावरुणयोर्भागधेयी भागधेयेति भाषायां॥ पापीत्वीयम्॥ पापेति भाषायां
उतापराभ्यो मघवा विजिग्ये। अपरान्य इति भाषायां। समानी प्रवणी॥ समानेति भाषायाम॥ आर्यकृता आर्यकृ
तेति भाषायाम्। सुमंगली। सुमङ्गलेति भाषायां। भेषजी॥ भेषजेति भाषायां॥ ३॰॥ रात्रेश्चाजसौ॥ जाविषयाद
न्यत्र संज्ञायां छंदसि च रात्रिशब्दाच्च ङीप्प्रत्ययो भवति। यागन्त्रीस्त्वष्टारात्रीभिः। अजसाविति किं। यास्ता रात्रय। अ
जसादिष्विति वक्तव्यं। रात्रिं सहोषित्वा। कथं तिपिरपटलैरवगुंठिता रात्र्यः ङीषयं। बह्वादित्वलक्षणस्तत्र हि पठ्य
ते। कृदिकारादक्तिनः। सर्वतोक्तिन्नर्थादित्येक इति॥ ३१॥ अंतर्वत्पतिवतोर्नुक्॥ प्रकृतिर्निपात्यते॥ नुगागमस्तु
विधीयते। अंतर्वत्पतिवतोर्नुग्भवति। ङीप्प्रत्ययस्तु नकारांतत्वादेव सिद्धः। निपातनसामर्थ्याच्च विशेषवृत्तिर्भव
ति। अंतर्वत्पतिवदिति गर्भभर्तृसंयोगे। इह न भवति। अंतरस्यां शालायां विद्यते। पतिमती पृथिवी अन्तर्वदिति मतु
ब्नियात्यते वत्त्वं सिद्धं। पतिवदिति। वत्त्वं निपात्यते मतुसिद्धः। अन्तर्वत्नी गर्भिणी। पतिवत्नी जीवपतिः। अन्तर्वत्प
तिवतोस्तु मतुवत्त्वे निपातनात्। गर्भिण्यां जीवतिपत्यां च वा छंदसि तु नुग्विधिः। सांतर्वत्नी देवानुपैत् सांतर्वती देवा
नुपैत्। पतिवत्नी तरुणवत्सा। पतिवती तरुणवत्सा॥ ३२॥ पत्युर्नो यज्ञसंयोगे॥ पतिशब्दस्य नकारोन्तादेशः स्त्रि
यां विधीयते॥ ङीप्प्रत्ययस्तु ऋकारांतत्वादेव सिद्धः॥ यज्ञसंयोगे यज्ञेन संयोगो यज्ञसंयोगः। तत्साधनत्वा ९
त्फलग्रहीतृत्वाद्वा यजमानस्य पत्नी॥ पत्नी वा वंय्यच्छ। यज्ञसंयोग इति किं। ग्रामस्य पतिरियं ब्राह्मणी। कथं वृ

षलस्य पत्नी। उपमानाद्भविष्यति। विभाषा सपूर्वस्य। पत्युर्न इति वर्त्तते। पतिशब्दांतस्य प्रातिपदिकस्य सपूर्वस्या
नुपसर्ज्जनस्य स्त्रियां विभाषा नकारादेशो भवति। ङीप्तु लभ्यत एव। वृद्धपतिः। वृद्धपत्नी स्थूलपतिः। स्थूलपत्नी।
अप्राप्तविषये यमयज्ञसंयोगत्वात् सपूर्वस्येति किं। पतिरियम्ब्राह्मणी ग्रामस्य॥ ३५॥ नित्यं सपत्न्यादिषु॥ सपत्न्या
दिषु नित्यं पत्युर्नकारादेशो भवति। ङीप्तु लभ्यत एव। पूर्वेण विकल्पे प्राप्ते वचनं। नित्यग्रहणं विस्पष्टार्थं समानः
पतिरस्याः सपत्नी। एकपत्नी समानादिष्विति वक्तव्ये समानस्य सभावार्थं वचनं समान। एक। वीर। पिंड। भ्रातृ। पुत्र
दासाच्छंदसि॥ ३९॥ पूतक्रतोरैच॥ पूतक्रतोरैच॥ पूतक्रतुशब्दस्य स्त्रियामैकारान्तादेशो भवति ङीप्प्रत्ययः। पूत
क्रतोः स्त्री पूतक्रतायी। त्रय एते योगाः पुंयोगप्रकरणे द्रष्टव्याः। यया हि पूताः क्रतवः पूतक्रतुः सा भवति॥ ३६॥
वृषाकप्यग्निकुसितकुसीदानामुदात्तः॥ वृषाकप्यादीनामुदात्त ऐकारादेशो भवति स्त्रियां ङीप्प्रत्ययः। वृषाकपि
शब्दो मध्योदात्त उदात्तत्वं प्रयोजयति। अग्न्यादिषु पुनरंतोदात्तेषु रूढानि बद्धवादेव सिद्धं। वृषाकपेः स्त्री वृषाकपा
यी। अग्नायी। कुसितायी। कुसिदायी। पुंयोग इत्येव। वृषाकपिः स्त्री॥ ३७॥ मनोरौ वा॥ ऐ उदात्त इति वर्त्तते म
नुशब्दात् स्त्रियां ङीप्प्रत्ययो भवति। औकारश्चांतादेश ऐकारश्चोदात्तः। वाग्रहणेन द्वावपि विकल्पेते। तेन त्रैरूप्यं भवति
मनोः स्त्री मनायी। मनावी मनुः। मनुशब्द आद्युदात्तः॥ ३८॥ वर्णादनुदात्तात्तोपधात्तो नः॥ वेति वर्त्तते। वर्णवाचि
नः प्रातिपदिकादनुदात्तात्तकारोपधाद्वा ङीप्प्रत्ययो भवति तकारस्य नकारादेशो भवति। एता। एनी। श्येता। श्येनी।
हरिता। हरिणी। सर्व एते आद्युदात्ताः वर्णानां तणतिनितांतानामिति वचनात्। वर्णादिति किं। प्रकृता। प्रहृता। ग
तिस्वरेणाद्युदात्तः। अनुदात्तादिति किं। श्वेता। घृतादित्वादंतोदात्तः। तोपधादिति किं। अन्यतो ङीषं वक्ष्यति। अन

का०४ इत्येव॥शितिब्रह्मणी॥ पिशंगादुपसंख्यानं। पिशंगी॥असितपलितयोः प्रतिषेधः॥असिता॥पलिता॥छंदसिक्
६ मित्येक। असिक्नी। पलिक्नी भाषायामपीष्यते। गतोगणस्तूर्णमसिक्निकानां॥३९॥अन्यतोङीष्। वेतिनिवृत्तं।व
र्णादनुदात्तादितिवर्त्तते। तोपधापेक्षमन्यत्वं वर्णवाचिनः प्रातिपदिकादनुदात्तांतात्स्त्रियांङीष्प्रत्ययोभवति
स्वरेविशेषः। सारंगीकल्माषी। शबली। वर्णादित्येव। खट्वा। अनुदात्तादित्येव॥ कृष्णा। कपिला॥४०॥षिद्गौरा
दिभ्यश्च॥ङीषनुवर्त्तते। षिद्भ्यः प्रातिपदिकेभ्योगौरादिभ्यश्चस्त्रियांङीष्प्रत्ययोभवति। शिल्पिनिष्वुन्। नर्त्तकी। खन
की। खनकी। रजकी। गौरादिभ्यः॥गौरी। मही। गौर। मत्स्य। मनुष्य। शृंग। हय। गवय। रुष्य। पुट। द्रुण। द्रोण। हरि
ण। कण। पटर। उकण। आमलक। कुवल। बदर। बिंब। तर्कार। शर्कार। पुष्कर। शिखंड। सुषम। सलंद। गडुज
आनंद। स्वपाट। सुपाट। आढक। अश्वकछ। शष्कुल। सूर्मसत्व। सूर्यापृष। मष॥धातुक। सल्लक। मालत। मा
लक। वेतस॥अतसः पृस। उमोभद्र। मह। मठ। छेदश्वेत। तक्षत्। अनडुही॥अनड्वाही॥एषणःकरणे। देह। देहन॥
काकादन। गवादन। तेजनारजन॥लवण। पान। मध। गौतम। अयस्थूण। भौरिकि। भौलिकि। भौलिकि। भौलिंगि। औद्ग्रा
हमानि। आलिंगि। आपिच्छिक। आरटरोट। नट॥नाट। मूलाट। शातन। पावन॥अधिकरणएतेअधिकार। आग्रहा
यणी। प्रत्यवरोहिणी॥सेवन। सुमंगलात्संज्ञायां। सुंदर। मंडल। पट। पिंड। विकच। कुर्द। गूर्द। पाद। लोफाद। कंदर
कंदल। तरुण। तलुन। बृहत्। महत्। सौधर्म। रोहिणीनक्षत्रं। रेवतीनक्षत्रे। विलक। बिल्वकोतिष्कलपुष्कल। कल्याणि
णिवचने। पप्पलादयश्च॥पिप्पली। हरीतकी। कोशातकी। शमी। करीरी। पृथिवी। क्रोष्टृ। मातामहापितामह। माता ६
महपितामहयोर्मातरिपितरिचेतिपित्रादेवसिद्धेर्ज्ञापनार्थंवचनं॥अनित्यःषिल्लक्षणोङीषितितेनदंष्ट्रेत्यकपचनंभवति

॥४१॥जानपद॥कुंड॥गोणस्थलभाजनागकालनीलकुशकामुककबरात्स्वमंत्राणीवपनाकृत्रिमाश्राणास्थौ
ल्यवर्णनाछादनायोविकारमैथुनेच्छाकेशवशेषु॥जानपदादीभ्यएकादशभ्यः प्रातिपदिकेभ्यएकादशस्वेषुवृत्त्यादि
ष्वर्थेषुयथासंख्यंङीष्प्रत्ययोभवति॥जानपदीभवतिवृत्तिश्चेद्भवति॥जानपदीअन्या॥स्वरेविशेषः॥उत्सादिपाठा
दन्यिकृतेङीपाद्युदात्तत्वंभवति॥कुंडीभवतिअमत्रंचेत्॥कुंडान्या॥गोणीभवत्यावपनंचेत्॥गोणान्या॥स्थलीभ
वति॥अकृत्रिमाचेत्॥स्थलान्या॥भाजीभवतिश्राणाचेत्॥पंक्त्यर्थः॥भाजादन्या॥नागीभवति॥स्थौल्यंचेत्॥नागा
न्या॥नागशब्दोगुणवचनःस्थौल्येङीषमुत्पादयति॥अन्यत्रगुणएवटापं॥जातिवचनात्तुजातिलक्षणोङीषेवभवति
नागी॥कालीभवति॥अनाछादनंचेत्॥नीलाअन्या॥नचसर्वस्मिन्ननाछादनइष्यतेकिंतर्हि॥नीलादोषधौप्राणि
निच॥नीलीओषधिः॥नीलीगौः॥नीलीवडवा॥संज्ञायांवा॥नीली॥नीला॥कुशीभवत्ययोविकारश्चेत्॥कुशा॥अन्या॥
कामुकीभवतिमैथुनेच्छाचेत्॥कामुकान्यासीदंत्यस्मिन्जातिगुणक्रियाइतिसत्वंद्रव्यं॥तच्चयोनिविशतेमर्वेतिस
गुणः॥यानिविशतिसगुणइत्येतावत्युच्यमानेक्रियाजात्योर्गुणत्वप्रसंगान्नसत्वइतिविशेषणं॥एवमपिसन्तागुणःस्या
त्॥सहिद्रव्यगुणकर्मसुत्रिष्वपिसमवैतितदर्थंद्रव्यएवेत्यवधारणं द्रष्टव्यं एवेत्यवधारणंद्रष्टव्यं॥एवमपिद्रव्य
त्वजातिगुणःस्यात्सत्वेनिवेशोनानत्रैवचनिवेशा॥दन्यतश्चाह॥अपैतीति॥ततःसत्वादपैतिअपगच्छतिपृथ
ग्भवतीत्यर्थः॥यथाआम्रफलेश्यामतापूर्वमुपैतुरक्ततायांतत्रजातायामपैतिच॥द्रव्यत्वजातिस्तुसर्वदाद्रव्येनिवर्त
तेनापैति॥यहंकच्चित्स्यानततद्रव्यंनस्यात्॥पृथाजातीयेषुजात्याचोरषुद्रव्येषुदृश्यतेसगुणः॥नचैवंरूपागोत्वादिजा
तिः॥आश्रयोनिष्पाद्यः॥यथापाकनिक्षिप्तपूर्वघटादिषुरक्तगणः॥अक्रियाजःअनुत्पाद्यः॥यथातेजःपरमाणुषुसद्वरक्त

Dr. BHAU DAJI

का॰४ तागुणः॥ यउक्तलक्षणोपेतः सत्वप्रकृतिर्नभवतिद्रव्यरवभावोनाभवतिमगुणइ॒॑र्मः मैथुनेच्छावतीभर्तेनेच्छा
७ मात्रंकबरीभवतिकेशवेशश्वेतकबरान्या॥४२॥ शोणात्प्राचाम॥ शोणशब्दात्प्राचामाचार्य्याणांमतेनस्त्रियां
ङीष्प्रत्ययोभवति॥ शोणी। शोणा। वडवा॥४३॥ वोतोगुणवचनात्॥ गुणमुक्तवानगुणवचनः। गुणवचनात्प्रा
तिपदिकात्उकारांतात्स्त्रियांवाङीष्प्रत्ययोभवति। पटुः। पट्वी। दुमृदुः मृद्वी। उतइतिकिं शुचिरियंब्राम्हणी। गुण
वचनादितिकिं॥ आखुः। वसुशब्दाद्गुणवचनातङीष्। आद्युदात्तार्थं। वस्वी। खरुसंयोगोपधात्प्रतिषेधोवक्तव्यः
खरुरियंब्राम्हणी। पांडुरियंब्राम्हणी॥ सत्वेनिविशतेपैतिपृथग्जातिषुदृश्यते॥ आधेयश्चाक्रियाजश्चसोसन्त्व
प्रकृतिर्गुणः॥४४॥ बह्वादिभ्यश्च॥ बह्वइत्येवमादिभ्यः प्रातिपदिकेभ्यस्त्रियांवाङीष्प्रत्ययोभवति। बह्वः। बह्वी।
बह्व। पद्धति। अंकति। अंचति। अंहति। वहति। शकटि। शक्ति। शस्त्रि। शारि। वारि। गिनि। अहि। कपि। मुनि। यष्टि। इतः
प्राण्यंगात्। कृदिकारादक्तिनः। सर्वतोक्तिन्नर्थादित्येके। चंडा। अराल। कमल। अलकपाणि। विकट। विशाल। वि
शंकट। भरुजा। ध्वज। चंद्रभागान्नद्यां। कल्याण। उदार। अहन। बह्वशब्दोगुणवचनएवतस्येहपाठउत्तरार्थः॥४५॥
नित्यं नित्यंछंदसि॥ बह्वादिभ्यश्छंदसिविषयेस्त्रियांङीष्प्रत्ययोभवति। बह्वीषुहित्वाप्रपिबन्। बह्वीनामपधीभवति। नित्य
ग्रहणमुत्तरार्थं॥४६॥ भुवश्च॥ छंदसिविषयेस्त्रियांभुवोनित्यंङीष्प्रत्ययोभवति। विभ्वी। असे प्रभ्वीच संभ्वी
च। इहकस्मान्नभवति स्वयंभूः उतइतितपरकरणमनुवर्त्तते। ह्रस्वादेवेयंपंचमी। भुवइतिसौत्रोनिर्देशः
॥४७॥ पुंयोगादाख्यायां॥ पुंसायोगःपुंयोगः। पुंयोगाद्धेतोर्यत्प्रातिपदिकंस्त्रियांवर्त्तते। पुंसआख्याभूतंतस्मातङी
षत्ययोभवति॥ गया कस्यस्त्रीगणकी। महामात्री। प्रष्टीप्रचरी। पुंसिशब्दस्यप्रवृत्तिनिमित्तस्यसंभवात् पुंसश

ब्दाएतेतद्योगात्स्त्रियांवर्त्तंते॥ पुंयोगादितिकिं। देवदत्ता। यज्ञदत्ता। आख्याग्रहणंकिं। परिसृष्टा। प्रजाता। पुंयोगादेनेश
ब्दाःस्त्रियांवर्त्तते। नतुपुमांसमाचष्टे। गोपालिकादीनांप्रतिषेधः। गोपालकस्यस्त्रीगोपालिका। सूर्य्याद्देवतायांचा
पूवक्तव्यः। सूर्यस्यस्त्रीदेवतासूर्या। देवतायामितिकिं सूरी॥४८॥ इंद्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवन
यवनमातुलाचार्याणामानुक॥ इंद्रादिभ्यःप्रातिपदिकेभ्यःस्त्रियांङीष्प्रत्ययोभवति। आनुकचागमः। एषामत्रपुंयो
गएष्यतेतेषामानुगागममात्रंविधीयते। प्रत्ययस्तुपूर्वेणैवसिद्धः। अन्येषांतूभयंविधीयते॥ प्रत्ययस्तुपूर्वइंद्राणी
नी। भवानी। शर्वाणी। रुद्राणी। मृडाणी। हिमारण्ययोर्महत्वे महद्धिमं हिमानी। महदरण्यमरण्यानी। यवाद्दोषे। दुष्टाय
वानी। यवनाल्लिप्यां यवनानीलिपिः। उपाध्यायमातुलाभ्यांवा। उपाध्यायी। उपाध्यायानी। मातुली। मातुलानी। आ
चार्य्यादणत्वंच। आचार्य्याणी। अ॰। आर्य्यक्षत्रियाभ्यांवा। आर्य्याणी। आर्य्या। क्षत्रियाणी। क्षत्रिया। विनापुंयोग
नस्वार्थएवायंविधिः। पुंयोगेचङीषेवभवितव्यं। आर्यी। क्षत्रियी। मुद्गलाछंदसिलिच्चरथीरभून्मुद्गलानीगविष्टा
॥४९॥ क्रीतात्करणपूर्वात्॥ करणपूर्वमस्मिन्नितिकरणपूर्वंप्रातिपदिकं॥ क्रीतशब्दांतात्प्रातिपदिकात्करणपू
र्वात्स्त्रियांङीष्प्रत्ययोभवति। वस्त्रेणक्रीता। दुःक्रीता। इहकस्मान्नभवति। साहितस्यधनक्रीताप्राणेभ्योपिगरीय
सीति। टाबंतेनसमासः। अतइतिचानुवर्त्तते। गतिकारकोपपदानांकृद्भिःसहसमासवचनंप्राक्सुबुत्पत्तेरिति
बहुलंतदुच्यते। कर्तृकरणेकृताबहुलमिति॥५०॥ क्तादल्पाख्यायां॥ करणपूर्वादित्येव। करणपूर्वात्प्रा
तिपदिकात्क्तांतादल्पाख्यायांङीष्प्रत्ययोभवति। अल्पाख्यायामिति। समुदायोपाधिः। अभ्रविलिप्तीद्यौःसू
यविलिप्ती। पात्री। अल्पसंयत्यर्थः। अल्पाख्यायामितिकिं। चंदनानुलिप्ताब्राम्हणी॥५१॥ बहुव्रीहेश्चांतोदात्तात्

क्तादित्येव। यदा बहुव्रीहिर्यान्तोदात्तः क्तान्तस्तस्मात्स्त्रियां ङीष्प्रत्ययो भवति। स्वांगपूर्वपदो बहुव्रीहिरिहोदाहरणं
अस्वांगपूर्वपदाद्विकल्पं वक्ष्यति। शंखभिन्नी। ऊरुभिन्नी। गलकोत्कृत्ती। केशलूनी। बहुव्रीहेरिति किं। पादपति
त। अंतोदात्तादित्येव। वस्त्रछन्ना। वसनछन्ना। अंतोदात्ताज्जातप्रतिषेधः। दन्तजाता स्तनजाता। पाणिगृहीत्यादी
नामर्थविशेषे। पाणिगृहीतीभार्या। यस्यास्तु कथंचित्पाणिर्गृह्यते पाणिगृहीता सा भवति। अबहुनञ्सुकालसु
खादिपूर्वादिति वक्तव्यं। बहुकृता। नञ् अकृता। सु। सुकृता। काल। मासजाता। संवत्सरजाता। सुखादिः सुखया
ता। दुःखयाता। जातिकालसुखादिभ्योनाछादनादित्यादिना बहुव्रीहेरन्तोदात्तत्वं॥ ५२॥ अस्वाङ्गपूर्वपदाद्वा
॥ अन्तोदात्तात्क्तान्तादित्यनुवर्त्तते। अस्वांगपूर्वपदादन्तोदात्तात्क्तान्ताद्बहुव्रीहेः स्त्रियां वा ङीष्प्रत्ययो भवति
पूर्वेण नित्ये प्राप्ते विकल्प उच्यते। शार्ङ्गजग्धी। शार्ङ्गजग्धा। पलाण्डुभक्षिती पलाण्डुभक्षिता। सुरापीती सुरापीता।
अस्वांगपूर्वपदादिति किं। शंखभिन्नी। ऊरुभिन्नी। अंतोदात्तादित्येव। वस्त्रछन्ना वसनछन्ना। बहुलं संज्ञाछंदसोरि
ति वक्तव्यं। प्रवृद्धविलूनी। प्रवृद्धावासो विलूना चेति नायं बहुव्रीहि॥ ५३॥ स्वाङ्गाच्चोपसर्जनादसंयोगोपधा
त्॥ बहुव्रीहेः क्तान्तादन्तोदात्तादिति सर्वं निवृत्तं। वा ग्रहणमनुवर्त्तते। स्वांगं यदुपसर्जनमसंयोगोपधं तदन्तात्प्रा
तिपदिकात्स्त्रियां वा ङीष्प्रत्ययो भवति। चंद्रमुखी चंद्रमुखा। अतिकेशान्। अतिकेशी। अतिकेशा। स्वांगादिति किं। बहुयवा
उपसर्जनादिति किं। शिखा। असंयोगोपधादिति किम्। सुगुल्फा। सुपार्श्वा। अंगगात्रकंठेभ्य इति वक्तव्यम्
मृदंगी। मृदंगा। सुगात्री स्निग्धकंठी। स्निग्धकण्ठा। अद्रवं मूर्त्तिमत्स्वांगं प्राणिस्थमविकारजं। अतत्स्थं तत्र दृष्टं च
तेन चेत्तत्तथा युतं॥ ५४॥ नासिकोदरौष्ठजंघादन्तकर्णशृङ्गाच्च। स्वाङ्गाच्चोपसर्जनादित्येव। बहुज्लक्षणस

योगोपधलक्षणे च प्रतिषेधे वचनं। सहनञ्विद्यमानलक्षणस्तु प्रतिषेधो भवत्येव। नासिकाद्यन्तात्प्रातिप
दिकात्स्त्रियां वा ङीष्प्रत्ययो भवति। तुङ्गनासिकी। तुङ्गनासिका। तिलोदरी तिलोदरा। बिम्बोष्ठी बिम्बोष्ठा। दीर्घ
जंघी दीर्घजंघा। समदन्ती। समदंता। चारुकर्णी। चारुकर्णा। तीक्ष्णशृङ्गी। तीक्ष्णशृङ्गा। पुच्छाच्चेति वक्तव्यं। कल्याणपु
च्छी। कल्याणपुच्छा। कबरमणिविषशरेभ्यो नित्यं। कबरपुच्छी। मणिपुच्छी। विषपुच्छी। शरपुच्छी। उपमानात्पक्षाच्च
पुच्छाच्च। उलूकपक्षी सेना। उलूकपुच्छी शाला॥ ५५॥ न क्रोडादिबह्वचः॥ स्वाङ्गादिति ङीष्प्राप्तः प्रतिषिध्यते। क्रोडा
द्यन्तात् बह्वजन्ताच्च प्रातिपदिकात्स्त्रियां ङीष्प्रत्ययो न भवति॥ कल्याणक्रोडा कल्याणनखा॥ कल्याणखुरा। कल्याण
वाला। कल्याणशफा। कल्याणगुदा। कल्याणघोणा। क्रोडादिराकृतिगणः। सुभगा। सुगला। बह्वचः खल्वपि
पृथुजघना। महाललाटा॥ ५६॥ सहनञ्विद्यमानपूर्वाच्च॥ स्वांगाच्चोपसर्जनादिति। नासिकोदरौष्ठजंघेति च प्राप्तङी
ष्प्रतिषिध्यते। सह। नञ्। विद्यमान इत्येवं। पूर्वात्प्रातिपदिकात्स्त्रियां ङीष्प्रत्ययो न भवति। सकेशा अकेशा। विद्यमानके
शा। सनासिका। अनासिका। विद्यमाना नासिका॥ ५७॥ नखमुखात्संज्ञायां॥ नखमुखात्प्रातिपदिकात्संज्ञायां विष
ये ङीष्प्रत्ययो भवति। शूर्पणखा वज्रणखा। गौरमुखा। कालमुखा। उष्ट्रमुख। संज्ञायामिति किं। ताम्रनखी। कन्या चं
द्रामुखी॥ ५८॥ दीर्घजिह्वी च छन्दसि॥ दीर्घजिह्वीति छंदसि विषये निपात्यते। संयोगोपधत्वादप्राप्तो ङीष्विधीय
ते। दीर्घजिह्वी वै देवानां हव्यमलेट्॥ चकारः संज्ञानुकर्षणार्थः। दीर्घजिह्वा कन्या। निपातनं नित्यार्थम्॥ ५९॥ दिक्
पूर्वपदान्ङीप्॥ स्वांगाच्चोपसर्जनादित्येव मादिविधिप्रतिषेधविषयः सर्वोप्यपेक्ष्यते। यत्र ङीष्विहितस्तत्र तदपवा
दः ङीप्। दिक्पूर्वपदात्प्रातिपदिकात् ङीप्प्रत्ययो भवति स्वरविशेषः। प्राङ्मुखी। प्राङ्मुखा। प्राङ्नासिकी। प्राङ्नासिका।

दृहनभवति। प्राग्गुल्फा। प्राक्क्रोडा। प्राग्जघनेति॥६०॥वाहः॥ ङीषेवसमर्थ्यतेनङीप् वहेरयंण्विप्रत्ययांतस्या
निर्द्देशः। सामर्थ्यात्तदंतविज्ञानं। वाहंतात्प्रातिपदिकात्स्त्रियांङीष्प्रत्ययोभवति। दित्यौही। प्रष्ठौही। मार्ग्नाध्राय॥६१
॥सख्यशिश्वी॥ भाषायामितिकिं। सखासप्तपदीभव॥अशिश्वस्त्रीतिअशिश्वी। भाषायामितिकिम्। सखासप्तपदी
भव। अशिश्विमिवमामयंशशरुरभिमन्यते। अवीरामिवमामयंशशरुरभिमन्यते॥६२॥जातेरस्त्रीविषयादयोपधा
त्॥ जातिवाचियत्प्रातिपदिकन्नचस्त्रियामेवनिपतमस्त्रीविषयं। अपकारोपधञ्च। तस्मात्स्त्रियांङीष्प्रत्ययोभवति
आकृतिग्रहणा। जातिर्लिंगानांचनसर्वभाक्। सकृदाख्याननिर्ग्राह्यागोत्रंचचरणैःसह। कुक्कुटी। सूकरी। ब्राह्मणी
वृषली। नाडायनी। चारायणी। कैठी। बह्वृची। जातेरितिकिं। मुण्डा। अस्त्रीविषयादितिकिं। मक्षिका। अपकारोप
धादितिकिम्। क्षत्रियायोपधप्रतिषेधे। हयगवयमूकयमत्स्यमनुष्याणामप्रतिषेधः। हयी। गवयी। गवयी। मुकयी। मत्सी
मनुषी॥६३॥ नककर्णपुष्पफलमूलवालोत्तरपदाच्च। पाकाद्युत्तरपदाज्जातिवाचिनः। प्रातिपदिकात्स्त्रियांङीष्प्रत्य
योभवति। स्त्रीविषयत्वादेषांपूर्वेणाप्राप्तःप्रत्ययोविधीयते। ओदनपाकी। शङ्कुकर्णी। शालपर्णी। शंखपुष्पी। दास
फली। दर्भमूली। गोवाली। पुष्पफलमूलोत्कदातयतोनेष्यतेतदजादिषुपठ्यंते। सत्प्राक्काण्डप्रांतशतैकेभ्यःपुष्पा
त्। संभस्त्राजिनशणपिंडेभ्यःफलात्। मूलान्नञइति॥६४॥इतोमनुष्यजाते॥इकारांतात्प्राश्चापरजातिलक्षणमुक्तं
भाष्यं। प्रादुर्भावविनाशाभ्यांसत्वस्ययुगपद्गुणैः। असर्वलिंगांबह्वर्थांतांजातिकवयोतिपदिकान्मनुष्यजातिवाचि
नःस्त्रियांङीष्प्रत्ययोभवति। अवन्ती। औन्ती। दाक्षी। प्लाक्षी। इतइतिकिं। विट्। दरत्। मनुष्यग्रहणयोपधादपि
यथास्यात्। औदमेयी। इञउपसंख्यानमजात्यर्थं। सौतङ्गमी। मौनचित्ती। सुतङ्गमादिभ्यश्चातुरर्थिकइञ्। नेञ्ञा ९

ति॥६५॥ ऊङुतः॥ मनुष्यजातिरितिवर्त्तते॥उकारांतान्मनुष्यजातिवाचिनःप्रातिपदिकात्स्त्रियामूङ्प्रत्ययोभव
ति॥कुरूः। ब्रह्मबन्धूः। जीवबन्धूः। ङकारोनोङ्धात्वोरितिविशेषणार्थः। दीर्घोच्चारणंकयोबाधनार्थं। अयोपधादि
त्येतदत्रापेक्ष्यते। अध्वर्युर्ब्राह्मणी। अप्राणिजातेश्चारज्ज्वादीनामितिवक्तव्यं। अलाबूः। कर्कन्धूः। प्राणिग्रहणंकिं
कृकवाकुः। अरज्ज्वादीनामितिकिम्। रज्जुः हनुः॥६६॥बाह्वंतात्संज्ञायां॥ बाहुशब्दांतात्प्रातिपदिकात्संज्ञायामविष
येस्त्रियामूङ्प्रत्ययोभवति। भद्रबाहूः। जालबाहूः। संज्ञायामितिकिं। वृत्तौबाहूअस्याःवृत्तबाहुः॥६७॥पंगोश्च॥ पंगु
शब्दात्स्त्रियामूङ्प्रत्ययोभवति। पंगूः। श्वशुरस्योकाराकारलोपश्चवक्तव्यः। श्वश्रूः॥६८॥ऊरूत्तरपदादौपम्ये
॥ऊरूत्तरपदात्प्रातिपदिकादौपम्येगम्यमानेस्त्रियामूङ्प्रत्ययोभवति। कदलीस्तम्भोरूः। नागनासोरूः। औपम्य
इतिकिं। वृत्तोरुःस्त्री॥६९॥संहितशफलक्षणवामादेश्च॥ संहित शफ लक्षण वामइत्येवमादेःप्रातिपदिकादूरूत्त
रपदात्स्त्रियामूङ्प्रत्ययोभवति। अनौपम्यार्थआरंभः संहितोरूः। शफोरूः। लक्षणोरूः। वामोरूः। सहितसहाभ्यां
चेतिवक्तव्यम्। सहितोरूः। सहोरूः॥७०॥कद्रुकमण्डल्वोश्छन्दसि॥कद्रुशब्दात्कमण्डलुशब्दाच्चछन्दसिविषयेस्त्रिया
मूङ्प्रत्ययोभवति। कद्रूश्चवैसुपर्णीचमास्मकमण्डलूंशूद्रायदद्यात्। छन्दसिइतिकिं। कद्रुःकमंडलुः। गुग्गुलुम
धु। जतुपजयालूनामितिवक्तव्यं। गुग्गुलूः। मधूः। जतूः। पतयालूः॥७१॥संज्ञायाम्॥ कद्रुकमंडलुशब्दाभ्यांसं
ज्ञायांविषयेस्त्रियामूङ्प्रत्ययोभवति। अछंदोर्थंवचनं। कद्रूः कमण्डलूः॥७२॥शार्ङ्गरवाद्यञोङीन्॥ शार्ङ्गरवा
दिभ्योऽञंतेभ्यश्चप्रातिपदिकेभ्यःस्त्रियांङीन्प्रत्ययोभवति। शार्ङ्गरवी। कापटवी। अञंतेभ्य। वैदी। और्वी। जातिग्र
हणंचेत्यनुवर्त्तते। तेनजातिलक्षणोङीष्अनेनबाध्यतेनपुंयोगलक्षणः। वैदस्यस्त्रीवैदी। शार्ङ्गरवा। कापटव

का॰४ गोतम। गौग्गुलव। ब्राम्हण। एतेअणंताः कामंडलेयः। ब्राम्हणकृतयः। आनिंधयः। आतिंथयः। आशांकयः। एतेढ
१० गंताः। वात्स्यायनः। मौञ्जायनः। एतौफगंतौ॥ इतिजाती। वैकर्णेयोढगंतः। कार्यशेन्योयञ्न्तो। एहिपर्य्यहिकृ
दिकारांतौ। आस्मरथ्योयञंतः। औदयानः। उदयानशब्दः शुंडिकाद्यणन्तः प्रयोजयति। अराल। चंडाल। वतण्डः
जातिः। भोगवद्गौरिमतोः संज्ञायां। वादिषुनित्यं ह्रस्वार्थं। नृनरयोर्वृद्धिश्च अत्रयथा योगं ङीवादिषु प्राप्तेषु ङीविधी
यते॥ ७३॥ यङश्चाप्॥ यङंतात्प्रातिपदिकात्स्त्रियां चाप् प्रत्ययो भवति। ष्यङ् यङश्च सामान्यग्रहणमेतत्। आंब
ष्ठ्या। सौवीर्य्या कौसल्या। ष्यङः। कारीषगंध्या। वाराह्या। बालाक्या षाञ्चः। षात्परयोपन्त दंताच्चापूर्वकेभ्यः। शार्कराक्ष्या। पौतिमाष्या। गौकक्ष्या। उत्तरसूत्रे चकारोनुक्तसमुच्चयार्थः तेनचाप् भविष्यति॥ ७४॥ आवट्याच्च॥ अवटशब्दोग
र्गादिः। तस्माद्यञि कृते ङीपि प्राप्ते वचनमेतत्। आवट्याच्चस्त्रियां चाप् प्रत्ययो भवति। आवट्या। प्राचां ष्फ एव। सर्वत्रग्रह
णात्। आवट्यायनी॥ ७५॥ तद्धिताः॥ अधिकारोयम्। आपञ्चमाध्यायपरिसमाप्तेर्यानितऊर्द्ध्वमनुक्रमिष्यामस्त
द्धितसंज्ञास्तेवेदितव्याः। वक्ष्यति। सूनस्तिः। पूर्वतिः। बहुवचनमनुक्तनद्धितपरिग्रहार्थं। पृथिव्योञाञौ। अव्ययश्चात्
डिमञित्येवमादिलब्धं भवति। तद्धितप्रदेशाः कृत्तद्धितसमासाश्चेत्येवमादयः॥ ७६॥ यूनस्तिः॥ युवशब्दात्प्रातिपदि
कात्स्त्रियांतिः प्रत्ययो भवति॥ सचतद्धितसंज्ञो भवति। ङीपोपवादः। युवतिः॥ ७७॥ अणिञोरनार्षयोर्गुरूपोत्तमयोः
ष्यङ्गोत्रे॥ गोत्रे यावणिञौ विहितावनार्षौ तदंतयोः प्रातिपदिकयोर्गुरूपोत्तमयोः स्त्रियां ष्यङादेशो भवति। निर्द्दिश्य
मानस्यादेशा भवंतीत्यणिञोरेवविज्ञायते। नमुसमुदायस्य। ङकारः सामान्यग्रहणार्थः। षकारस्तदविधानार्थः। १०
यङश्चाविति। उत्तमशब्दः स्वभावात्त्रिप्रभृतीनामन्त्यमक्षरमाह। उत्तमस्यसमीपमुपोत्तमं। गुरुरुपोत्तमं यस्यतद्गु

रूपोत्तमं प्रातिपदिकं। करीषस्येवगंधोस्य करीषगंधिः। कुमुदगंधिः। तस्यापत्यमित्यण्। तस्य ष्यङादेशः कारीषगंध्या
कौमुदगंध्या वराहस्यापत्यं। अतइञ्। वाराहिः। तस्य ष्यङादेशः वालाक्या। अणिञोरितिकिम्। आर्त्तभागस्याप
त्यं विदादित्वादञ्। आर्त्तभागी। गुरूपोत्तमादिकं सर्वमस्ति नत्वाणिञौ। टिड्ढाणञितिङीवेवभवति। अनार्षयोरिति
किं। वाशिष्ठी वैश्वामित्री। गुरूपोत्तमयोरितिकिं। औपगवी। कापटवी। गोत्रइतिकिं। तत्रजाता। आहिच्छत्री। कान्यकुब्जी।
७८॥ गोत्रावयवात्॥ अणिञोरित्येव॥ गोत्रावयवा। गोत्राभिमताः। कुलाख्याः। पुणिक। भुणिक। मुखर। प्रभृ
तयस्तेभ्यो गोत्रे विहितयोरणिञोः स्त्रियां ष्यङादेशो भवति। अगुरूपोत्तमार्थ आरंभः। पौणिक्या। भौणिक्या। मौखर्य्या
येषां त्वनंतरापत्येपीष्यते देवदत्ता। याज्ञदत्त्येति। तेक्रौड्यादिषुद्रष्टव्या॥ ७९॥ क्रौड्यादिभ्यश्च। क्रौडिइत्येवमादि
भ्यश्चस्त्रियां ष्यङादेशो भवति। अगुरूपोत्तमार्थ आरंभः। अनणिञार्थश्च। क्रौड्या। लाड्या। कौडी। लाडि। व्याडि। आपिश
लि। आपिक्षिति। चौपयत। चैटयत। सैकयत। वैल्वयत। सौधातकि। सूतयुवत्यां। भोजक्षत्रिये। भौलिकि। शाल्मलि
शालास्थलि। कापिष्ठलि। गौलक्ष्या॥ ८०॥ दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धिभ्योन्यतरस्याम्॥ दैवय
ज्ञि। शौचिवृक्षि। सात्यमुग्रि। काण्ठेविद्धि। इत्येतेषामन्यतरस्यां ष्यङ् प्रत्ययो भवति। इञंता एते गोत्रग्रहणं वानुवर्त्त
ते। तेनोभयत्रविभाषेयं। गोत्रे पूर्वेण ष्यङादेशः प्राप्तो विकल्प्यते। पत्यगोत्रत्वनंतरापत्ये विधीयते। तेनमुक्तो इतोम
नुष्यजातेरितिङीषवाभवति। दैवयज्ञ्या दैवयज्ञी। शौचिवृक्ष्या। शौचिवृक्षी। सात्यमुग्र्या। सात्यमुग्री। काण्ठेविद्ध्या
काण्ठेविद्धी॥ ८१॥ समर्थानां प्रथमाद्वा॥ त्रयमप्यधिक्रियते। समर्थानामितिच। प्रथमादितिच। वेतिच। स्वार्थिकप्रत्य
यावधिश्चायमधिकारः। प्राग्दिशोविभक्तिरिति यावत्स्वार्थिकेषु त्वस्योपयोगो नास्ति विकल्पोपितत्रानवस्थितः। केचिन्नि

त्यमेवभवति। लक्षणवाक्यानि। तस्यापत्यंतेनरक्तंरागात्। तत्रभवःइत्येवमादीनिभविष्यंति। तेषुसामर्थ्येसतिप्रथ
मनिर्दिष्टाद्वैविकल्पेनप्रत्ययोभवतीतिवेदितव्यं। समर्थानामितिनिर्द्धारणेषष्ठी। समर्थानांमध्येप्रथमंप्रत्ययप्रकृति
त्वेननिर्द्धार्य्यते। तस्येतिसामान्यंविशेषलक्षणार्थंतदीयंप्राथम्यंविशेषणंविज्ञायते। उपगोरपत्यं। औपगवः।
समर्थानामितिकिं कंबलउपगोरपत्यंदेवदत्तस्य। प्रथमादितिकिं। षष्ठ्यान्ताद्यथास्यात्। प्रथमान्तान्माभूत्। वाग्रहणं
किम्। वाक्यमपियथास्यात्। उपगोरपत्यमितिक्व। यद्येवंसमासवृत्तिस्तद्धितवृत्त्याबाध्येत। उपगवपत्यमितिनेषदो
षः। पूर्वसूत्रादन्यतरस्यांग्रहणमनुवर्त्ततेतेनतदपिभविष्यति॥८२॥ प्राग्दीव्यतोऽण्॥ तेनदीव्यतीतिवक्ष्यति॥ तदेक
देशोदीव्यतशब्दोऽवधित्वेनगृह्यते। प्राग्दीव्यत्संशब्दनात्स्यानितऊर्द्ध्वमनुक्रमिष्यामःअण्प्रत्ययस्तत्रभवतीतिवे
दितव्यं। अधिकारःपरिभाषाविधिर्वेतिच्छिषपिदर्शनेषपवादविषयंपरिहृत्याणप्रवर्त्तते। वक्ष्यति। तस्यपत्यम्
औपगवः। कापटवः॥८३॥ अश्वपत्यादिभ्यश्च॥ अश्वपत्यादिभ्यःप्रातिपदिकेभ्यःप्राग्दीव्यतीयेष्वर्थेष्वण्प्रत्ययोभ
वतिपत्युत्तरपदात्ण्यंवक्ष्यति। तस्यापवादः। आश्वपतं। शातपतं। धानपतं। गाणपतं। राष्ट्रपतं। कौलपतं। गार्हपतं
पाशुपतं। पाशुपतं। प्राणपतं। क्षैत्रपतं॥८४॥ दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः॥ प्राग्दीव्यतइत्येवदिति अदिति
आदित्यम्। पत्युत्तरपदाच्च। प्रातिपदिकात्प्राग्दीव्यतीयेष्वर्थेषुण्यःप्रत्ययोभवति। दैत्यः। आदित्यः। आदित्यं। पत्युत्त
रपदात्। प्राजापत्यं। सैनापत्यं। यमाच्चेतिवक्तव्यं। याम्यं। वाङ्मति। पितृमतोश्छंदस्युपसंख्यानंवाच्यं। मात्यं। पैतृमत्यं।
पृथिव्याञाञौ। पार्थिवा। पार्थिवी। देवस्ययञञौ। पार्थिवा। पार्थिवी। देवस्ययञञौदैव्यंदैवं। बहिषष्टिलोपश्च। बा ११
ह्यः। ईकक्। बाहीकः। ईकञ्छंदसि। बाहीकः। स्वरेविशेषः। टिलोपवचनमव्ययानांभमात्रेटिलोपइत्यस्यानित्यत्वज्ञा

पनार्थं। आरातीयः। स्थाम्नोऽकारः। अश्वत्थामः। लोम्नोपत्येषुबहुषु। उडुलोमाः। शारलोमाः। बहुष्वितिकिं। औडुलोमिः
शारलोमिः। सर्वत्रगोरजादिप्रत्ययप्रसंगेयत्। गव्यं। अजादिप्रत्ययप्रसंगइतिकिं। गोभ्योहेतुभ्यआगतं। गोरूप्यं
गोमयं। ण्यादयोर्थविशेषलक्षणादपवादात्पूर्वविप्रतिषेधनादितरपत्यंदैत्यः। वनस्पतीनांसमूहोवानस्पत्यं। कथं
दैनेयः। दितिशब्दात्कृदिकारादक्तिनःसर्वतोक्तिन्नर्थादित्येकइतिङीपंकृत्वास्त्रीभ्योढक्क्रियते। लिंगविशिष्टपरि
भाषावानित्या॥८५॥ उत्सादिभ्योऽञ्॥ प्राग्दीव्यतइत्येव। उत्सादिभ्यःप्राग्दीव्यतीयेष्वर्थेष्वञ्प्रत्ययोभवति। अणस्त
दपवादानांचबाधकः। औत्सः। औदपानः। उत्स। उदपान। विकर। विनद। महानद। महाप्राण। तरुण। तलुन। बष्कया
स। धेनु। पृथिवी। पंक्ति। जगती। त्रिष्टुप्। अनुष्टुप्। जनपद। भरत। उशीनर। ग्रीष्म। कुलमील्। उदस्थान। देशपृषद
श। भल्लकीय। रथंतर। मध्यंदिन। बृहत्। महत्। सत्वंतु। सत्वच्छब्दोमतुबन्तः आगतनुम्कोगृह्यते। सत्वंल्लिति। कुरु
पंचाल। इंद्रावसान। उष्णिक्। ककुभ। सुपर्ण। देव। ग्रीष्मादछंदसीतिवक्तव्यं इहमाभूत्। ग्रैष्मीत्रिष्टुप्। छंदश्च
हस्वत्वंगृह्यतेनवेदः॥८६॥ स्त्रीपुंसाभ्यांनञ्स्नञौभवनात्॥ धान्यानांभवनइतिवक्ष्यति। तस्यप्रागित्यनेनैवसंबंधः।
प्राग्भवनसंशब्दनाद्येर्थास्तेषुस्त्रीशब्दात्पुंसशब्दाच्चयथाक्रमंनञ्स्नञौप्रत्ययोभवतः। स्त्रीषुभवंस्त्रैणं। पौंस्नं। स्त्री
णांसमूहःस्त्रैणंपौंस्नं। स्त्रीभ्यआगतंस्त्रैणंपौंस्नं। स्त्रीभ्योहितं। स्त्रैणंपौंस्नं। स्त्रियाःपुंवदितिज्ञापकादत्यर्थेनभवति। यो
गापेक्षंचज्ञापकमिति। योगापेक्षंचज्ञापकमिति। स्त्रीवदित्यपिसिद्धं॥८७॥ द्विगोर्लुगनपत्ये॥ प्राग्दीव्यतइतिवर्त्तते
नभवनादिति। द्विगोरितिपष्ठी। द्विगोर्य्यःसंबंधीनिमित्तत्वेनतद्धितःप्राग्दीव्यतीयोऽपत्यप्रत्ययंवर्जयित्वा। तस्यलुग्भव
तितद्धितार्थोपदेतिद्विगुर्विहितःसएवनिमित्तत्वेनसंबंधी। संस्कृतंभआद्यर्थेविवक्षितेद्विगुः। अणस्तस्यलुक्

का०४ पंचकपालः॥ दशकपालः द्वौवेदावधीतेद्विवेदः त्रिवेदः अनपत्यइतिकिं। द्वैवेदन्तिः त्रैवेदन्तिर्द्विगुनिप्राग्दीव्य
१२ त इत्येवं द्वैपारायणिकः द्विगुनिमित्तविज्ञानादिह नभवति। पञ्चकपालस्येदं पांचकपालं दाशकपालं अथयाद्वि
गोरेवायंलुग्विधीयते। द्विगोरितिस्थानषष्ठीननुप्रत्ययादर्शनस्यैषासंज्ञा सत्यमेतत् उपचारेणतुलक्षणयाद्विगु
निमित्तोत्पन्नःप्रत्ययएवद्विगुःतस्यलुक। तर्हिद्विगुनिमित्तकोपिप्रत्ययोगुणकल्पनयाकस्मान्नद्विगुरित्युच्यतेपा
ञ्चकपालमिति। नतस्यद्विगुर्हिनिमित्तं। इतरस्तुद्विगुत्वस्यैवनिमित्तमित्यस्तिविशेषः यद्येवमिहकथं। पञ्चकपालो
संस्कृतः पञ्चकपालइतिनैवात्रतद्धितउत्पद्यते। वाक्यमेवाभवति। त्रेधा हि माध्यं। पञ्चकपालेषुसंस्कृतः पञ्च
कपालसंस्कृतः पंचकपालइतित्रयाणांशब्दानांसमानार्थयोरेकेनविग्रहः अपरस्मादुत्पत्तिर्भविष्यति। अथेह
कस्मान्नभवति। पञ्चभ्योगर्गेभ्यआगतंपंचगर्गरूप्यं। पंचगार्ग्यमयमिति। वेत्यनुवर्त्तते। साचव्यवस्थितविभाषा
विज्ञायते॥८८॥ गोत्रेलुगचि॥ प्राग्दीव्यतइत्येव॥ यस्कादिभ्योगोत्रइतिप्रकरणेनयेषांगोत्रप्रत्ययानांलुगुक्तस्तथा
मजादौप्राग्दीव्यतीयेप्रत्ययेप्रतिषिध्यते। गर्गाणांछात्राःगार्गीयाः वात्सीयाः आत्रेयीयाः खारपायणीयाः गोत्रइति
किं। कुवलस्येदंकौवलं वादरं अचीतिकिं। गर्गेभ्यआगतंगर्गरूप्यं। गर्गमयं प्राग्दीव्यतइत्येव। गर्गेभ्योहितं गर्गी
यं प गोत्रस्यबहुषुलोपिनोबहुवचनान्तस्यप्रवृत्तोद्वेकयोरलुक॥ विदानामपत्यंयुवा। युवानोवैदः वैदौ वैदाः वैदश
ब्दाद्तइञिकृतेतस्यबइञःण्यक्षत्रियार्षञितःइतिलुकिरूपं। एकवचनद्विवचनान्तस्यचप्रवृत्तोबहुषुलोपः पूर्वैवैदस्य
वैदयोर्वापिसंबहवोमाणवकाःविदाः नत्वत्राञ्बहुष्वसन्नः॥८९॥ यूनिलुक॥ प्राग्दीव्यतइतिवर्त्तते। अचीतिच। प्राग्दी १२
व्यतीयेऽजादौप्रत्ययेविवक्षितेबुद्धिस्थे। अनुत्पन्नएवयुवप्रत्ययस्यलुग्भवतितस्यनिवृत्तेसतियोयतःप्राप्नोतिसततोभवति

फण्टाहृतस्यापत्यंफाण्टाहृतिः तस्यापत्यंयुवाफाण्टाहृतिमिमताभ्यांणफिञौ। फाण्टाहृतः तस्यछात्राइतिमिमताभ्याणफि
ञौ। फाण्टाहृतः तस्यछात्राइतिविवक्षितेर्थेबुद्धिस्थेयुवप्रत्ययस्यलुग्भवतितस्मिन्निवृत्तेइञन्तंप्रकृतिरूपंसंपन्नंतस्मादि
ञश्चेत्यणभवति। फाण्टाहृताः भगवित्तस्यापत्यंभागवित्तिः तस्यापत्यंयुवा। वृद्धाट्ठक्सौवीरेषुबहुलमितिठक भागवि
त्तिकः तस्यछात्राः पूर्ववत्युवप्रत्ययनिवृत्तेऽणाभागवित्ताः तिकस्यापत्यंतिकादिभ्यःफिञ् तैकायनिः तस्यापत्यं
युवा। फेश्छचेतिछः तैकायनीयस्तस्यछात्रा युवप्रत्ययेनिवृत्ते वृद्धाच्छः तैकायनीयाः कपिंजलादस्यापत्यंकापिंजला
दिस्तस्यापत्यंयुवा। कुर्वादिभ्योण्यः कापिंजलाद्यः तस्यछात्राण्येनिवृत्तेइञश्चेत्यण कापिञ्जलादाः ग्लुचुकस्या
पत्यंप्राचामवृद्धात्फिन्बहुलमिति। ग्लुचुकायनिस्तस्यापत्यंयुवा। प्राग्दीव्यतोण ग्लौचुकायनस्तस्यछात्रा युवप्रत्य
येनिवृत्तेसएवाण ग्लौचुकायनाः अचीत्येव। फाण्टाहृतरूप्यं फाण्टाहृतमयं प्राग्दीव्यतइत्येव। भागवित्तिकायाहि
तं। भागवित्तीकीयम॥९०॥ फक्फिञोरन्यतरस्यां॥ पूर्वेणनित्येलुकिप्राप्तेविकल्पउच्यते। फक्फिञोर्युवप्रत्यययोःप्रा य
ग्दीव्यतीयेजादौप्रत्ययेविवक्षितेऽन्यतरस्यांलुग्भवति। गर्गादिभ्योयञिकृतेयञिञोश्चेतिफक। गार्ग्यायणः तस्यछा
त्राःगार्गीयाः गार्ग्यायणीयाः वात्सीयाः वात्स्यायनीयाः फिञः खल्वपि। यस्कस्यापत्यं। शिवादिभ्योणयास्कस्तस्यापत्यं
युवा अणोद्व्यचःइतिफिञ यास्कायनिस्तस्यछात्राः यास्कीयाः यास्कायनीयाः॥९१॥ तस्यापत्यं॥ अर्थनिर्देशोयंपूर्वोत्तरै
श्चप्रत्ययैरभिसंबध्यते। तस्येतिषष्ठीसमर्थादपत्यमित्येतस्मिन्नर्थेयथाविहितंप्रत्ययोभवति। प्रकृत्यर्थविशिष्टःप्रत्यया
र्थः अपत्यमात्रञ्चेहप्रत्ययार्थः। लिंगवचनादिकमन्यत्सर्वमविवक्षितं। उपगोरपत्यंऔपगवः आश्वपतः दैत्यः औत्सः
स्त्रैणः पौंस्नः तस्येदमित्यपत्येपिबाधनार्थंकृतंभवेत् उत्सर्गःशेषएवासौवृद्धान्यस्यप्रयोजनं। भानोरपत्यंभानवः

का०४ शामगवः॥ ९१॥ एको गोत्रे॥ अपत्यंपौत्रप्रभृतिगोत्रंतस्मिनविवक्षितेभेदेनप्रत्ययत्यायोत्पत्तिप्रसंगेनियमः क्रियते। गोत्रएव
१२ प्रत्ययोभवति। सर्वेपत्येनयुज्यंते। अपतनादपत्यंयोपिव्यवहितेनजनितःसोपिप्रथमप्रकृतेरपत्यंभवत्येव। गर्गस्यापत्यं
गार्गिः। गार्गेरपत्यंगार्ग्यः। तत्पुत्रोपिगार्ग्यः। सर्वस्मिनव्यवहितेनजनितेपिगोत्रापत्येगर्गशब्दात्पत्रेवभवति प्रत्ययोनियम्य
ते। अथवागोत्रापत्येविवक्षितेएकएवशब्दःप्रथमप्रकृतिःप्रत्ययमुत्पादयतिप्रकृतिर्नियम्यते। गार्ग्यः। नाडायनः। गोत्राद्यून्य
स्त्रियाम्। अयमपिनियमः। यून्यपत्येविवक्षितेगोत्रादेवप्रत्ययोभवतिनपरमप्रकृत्यनंतरयुवभ्यः। गार्ग्यस्यापत्यंयुवागार्ग्याय
णः। वात्स्यायनः। दाक्षायणः। प्लाक्षायणः। औपगविः। नाडायनिः। अस्त्रियामितिकिं। दाक्षी। प्लाक्षी। किंपुनरत्रप्रतिषिध्यते। य
दिनियमःस्त्रियामितिकिं। दाक्षी। प्लाक्षी। किंपुनरत्रप्रतिषिध्यते। यदिनियमः। स्त्रियामनियमप्राप्नोति। अथयुवप्रत्ययः।
स्त्रियांगोत्रप्रत्ययनाभिधानन्नप्राप्नोति। गोत्रसंज्ञायाः। युवसंज्ञया बाधितत्वात् तस्माद्योगविभागःकर्त्तव्यः तस्माद्गोत्राद्यूनिप्र
त्ययोभवति। ततोस्त्रियांयूनियदुक्तंतत्स्त्रियामनभवति। युवसंज्ञैवप्रतिषिध्यतेतेनस्त्रीगोत्रप्रत्ययेनाभिधास्यते॥ ९४॥ अत
इञ्॥ तस्यापत्यमित्येव। अकारान्तात्प्रातिपदिकादिञ्प्रत्ययोभवति। अणोपवादः। दक्षस्यापत्यंदाक्षिः। तपरकरणंकिं। शुभंयाः। कीला
लपाः। इत्यतोमाभूत। कथंप्रदायतांदाशरथायमैथिलीशेषविवक्षायाभविष्यति॥ ९५॥ बाह्वादिभ्यश्च॥ बाहुइत्येवमादिभ्यः।
शब्देभ्योपत्यइञ्प्रत्ययोभवति। बाहविः। औपबाहविः। अनकारार्थआरंभः। क्वचिद्बाधकबाधनार्थः। बाहु। उपबाहु। निवा
कु। चुपकु। उपबिंदु। चूडाखलीका। बालाका। भगला। छगला। ध्रुवका। सुमित्रा। दुर्मित्रा। पुष्करसत्। अनुहरत्। देवश १३
र्मन्। अग्निशर्मन्। कुनामन्। सुनामन्। पंचन्। सप्तन्। अमितौजसःसलोपश्च। सुदत्त। उपधन। इदंव। शिरस। माष। रूण।
शिरावत्। क्षेत्रवद्धिन्। शृंगरुतोदिन्। स्वरनादिन्। नगरमर्द्दिन्। प्राकारमर्द्दिन्। लोमशा। अजीगर्त्त। युधिष्ठिरार्जुन। साम्बगद॥

प्रद्युम्न। राम। उदंकसंज्ञायां। संभूयोंभसोःसलोपश्च। बाह्वादिप्रभृतिषुयेषांदर्शनंगोत्रभावेलौकिकेततोन्यत्रतेषांप्रतिषे
धः। बाहुर्नामकश्चित्तस्यापत्यंबाहवः। + तत्संबंधिनांचतत्सदृशात्प्रतिषेधः। संज्ञास्वश्वसुरस्यापत्यंश्वाशुरिः। चकारोनुक्त
समुच्चयार्थः। आकृतिगणतामस्यबोधयतिः। जांघिः। ऐंद्रिशर्म्मिः। आजधनविः। औदुलोमिः॥ ९६॥ सुधातुरकङ्चसुधातृ
शब्दादपत्यइञ्प्रत्ययोभवति। तत्सन्नियोगेनचतस्याकङादेशोभवति। सुधातुरपत्यंसौधातकिः। व्यासवरुडनिषाद
चंडालबिम्बानामितिकर्त्तव्यं। वैयासकिः। वारुडकिः। नैषादकिः। चाण्डालकिः। बैम्बकिः॥ गोत्रेकुञ्जादिभ्यश्च्फञ्॥ तस्या
पत्यमित्येव। गोत्रसंज्ञकेपत्येवाच्ये। कुञ्जादिभ्यश्च्फञ्प्रत्ययोभवति। इञोपवादः। चकारोविशेषणार्थः। व्रातच्फञोरस्त्रि
यामिति। ञकारोवृद्ध्यर्थः। कौञ्जायन्यः। कौञ्जायन्यौ। कौञ्जायनाः। ब्राध्नायन्यः। ब्राध्नायन्यौ। ब्राध्नायनाः। गोत्रइतिकिं। कुञ्ज
स्यापत्यमनंतरंकौञ्जिः। एकवचनद्विवचनयोःसतिशिष्टत्वात्ञितरेणैवभवितव्यं। बहुवचनेतुकौञ्जायनाइतिपरमपिञि
त्स्वरंत्यक्त्वाचित्स्वरएवेष्यते। गोत्राधिकारश्चशिवादिभ्योणितियावत्। कुञ्ज। ब्रध्न। शाव। भस्मन्। गणलोमन्। शाकट्
शाव। -उडा -उभंडाविपाश। स्कंध। स्कंभ॥ ९८॥ नडादिभ्यःफक्॥ नडइत्येवमादिभ्यःप्रातिपदिकेभ्योगोत्रापत्येफक्प्र
त्ययोभवति। नाडायनः। चारायणः गोत्रईवनादिः। शलंकुशलंकंवेत्यत्रपठ्यते। शालंकायनः। पैलादिषुचशालंकि
शब्दःपठ्यते। शालंकिःपिता। शालंकिःपुत्रः। तत्कथंगोत्रविशेषेकौशिकेफकंस्मरं। इञेवान्यत्र। शालंकिरिति। अथवापि
लादिपाठएवज्ञापकमभावस्य। मडलरवक। मुञ्ज। इतिक। इतिश। उपक। लमक। शलंकुशलंकंच। सप्तलगजन्या
तिकः। अग्निशर्म्मन्। वृषगण। प्राण। नरासायक। दाशं। मित्र। दीप। पिङ्गर। पिजल। किंकर। किंकल। कातर। किंकल
कातर। कातल। काश्यप। काव्य। अज। अमुष्य। कृष्णरणौब्राह्मणवाशिष्ठयोः। अमित्र। लिगु। चित्र। कुमार। क्रोष्टुक्रोष्टुवाल

का०४ ह्। दुर्गा। स्तंभ। शिंशपा। अग्रात्तृण। शकट। समामिमत। रकबक। जत्। अन्वजन। त्वरयुगंधरोहंसकादंडिन। हस्तिन। पं
१४ चाल। वमसिन। सकत्यस्पिरक। आम्हणा वटक। वदर। अश्वल खरप। कामुक। ब्रम्हदत्त। उदुंबर। शोण। अलोह। दंडप। ९९।
हारितादिभ्योऽञः। हारितादिर्विदाद्यन्तर्गणः। हारितादिभ्योऽञंतेभ्यो पत्ये यकञ्प्रत्ययो भवति। इञोपवादः। हारितस्यापत्यं हा
रितायनः। कैदासायनः। ननु गोत्रइतिवर्त्तते। नच गोत्रादपरो गोत्रप्रत्ययो भवत्येको गोत्रइतिवचनात्। सत्यमेतन। इहतु
गोत्राधिकारस्तूत्तरार्थः॥ ॥यञिञोश्च॥ यञन्तादिञन्तात्प्रातिपदिकादपत्ये फक्प्रत्ययो भवति। गणर्यायणः। वात्स्यायनः। इ
ञंतात्। दाक्षायणः। प्लाक्षायणः। द्वीपादनुसमुद्रं यञ्। स्कगेतमादिभ्य इञित्यंतान भवति। गोत्रग्रहणेन यञिञोर्विशेष्य
ते। तदन्तानुयंमबायं प्रत्ययः गोत्राद्यूनीतिवचनात्॥१०१॥ शरद्वच्छुनकदर्भाद्भृगुवत्साग्रायणेषु॥ गोत्रइत्येव। शरद्वत् शुनक
दर्भ इत्येतेभ्यो गोत्रापत्ये फक्प्रत्ययो भवति यथासंख्यं भृगुवत्साग्रायणेष्वर्थेष्वपत्यविशेषेषु। शारद्वतायनो भवति भार्गवश्चेत्।
शारद्वतोऽन्यः। शौनकायनो भवति वात्स्यश्चेत्। शौनकोऽन्यः। दार्भायणो भवति आग्रायणश्चेत्। दार्भिरन्यः। शरद्वच्छुनकशब्दौ विदा
दी। ताभ्यामञोपवादः फक्॥१०२॥ द्रोणपर्वतजीवन्तादन्यतरस्याम्॥ गोत्रइत्येव। द्रोणादिभ्यः प्रातिपदिकेभ्यो गोत्रापत्येऽन्य
तरस्यां फक्प्रत्ययो भवति। इञोपवादः। द्रोणायनः द्रौणिः। पार्वतायनः। पार्वतिः। जैवन्तायनः जैवन्तिः। कथमनंतरो अश्वत्थामा द्रोणा
यन इत्युच्यते। नैवात्र महाभारते द्रोणायन उच्यते। किन्तर्हि नादिरेतदंगोत्रप्रत्ययविधानं। इदानींश्रुतिसामान्यादध्यारोपेण तथा
भिधानं भवति॥१०३॥ अनृष्यानन्तर्ये बिदादिभ्योऽञ्॥ गोत्रइत्येव। विदादिभ्यो गोत्रापत्ये अञ्प्रत्ययो भवति। बैदः। और्वः। ये पुनरत्रा
नृषिशब्दाः पुत्रादयस्तेभ्योऽनन्तरापत्य एव भवति। पौत्रः। दौहित्रः। अनृष्यानंतर्यइत्यस्यायमर्थः। अनृषिभ्योऽनन्तरे भवतीति १४
यद्ययमर्थऋष्यपत्यैरनन्तर्यप्रतिषेधानहतःस्यात्। तत्रेदमभिधास्यति। इदं तु सप्तमः कश्यपानां। अनन्तरापत्यमपि गर्गः

षीणामभिधानं भविष्यति। अवश्यं चैतदेवं विज्ञेयं। ऋष्यपत्येनैरंतर्यविषयप्रतिषेधे विज्ञायमाने कौशिको विश्वामित्र इति दुःस्यति
गोत्रइत्येव। वैदिः। ननु वऋष्यण्णा भवितव्यं बाह्वादिराकृतिगणस्तेनेञ् भवति विद उर्व कश्यप कुशिक भारद्वाज उपमन्यु
किलालप। किन्दर्भ विश्वानर ऋष्टिषेण ऋतभाग हर्यश्व प्रियक आपस्तंब कूचवार शरद्वत् शुनक धेनु गोपवन
गोपवन। शिग्रु। बिंदु। भोजन। अश्व। वितान। श्यामक। श्यापर्ण हरित। किदास। वस्क अर्कलूष। वध्योग। विष्णुवृद्ध। प्रतिबो
धा रथंतर। रथन्तर। गविष्ठिर। निषादमठर। मृदकु। पुनर्भू। पुत्र। दुहितृ। ननांदृ। परस्त्रीपरशुं च॥१०४॥ गर्गादिभ्यो यञ्। गोत्र
इत्येव गर्गादिभ्यो गोत्रापत्ये यञ्प्रत्ययो भवति। गार्ग्यः। वात्स्यः। मनुशब्दोऽत्र पठ्यते। तत्र कथं मानवी प्रजा। गोत्रइत्युच्यते अपत्य
सामान्ये भविष्यति। कथमनंतरा गर्गमायामदग्न्यः। व्यासः पराशर्य इत्यर्जुनः कार्तवीर्य इति गोत्ररूपाध्यारोपेण भविष्यति।
अनंतरापत्यविवक्षायां तु ऋष्यणेव भवितव्यं। जामदग्न्य पराशर इति गर्ग। वत्स। वाजास। संकृति। अज व्याघ्रपात् विदभृत्
प्राचीनयोग अगस्ति पुलस्ति रेभ अग्निवेश शंख शठ धूम अवट चमस धनंजय वृक्ष विश्वावसु। जनमान। लोहित शंसित।
बभ्रु। वल्गु। मण्डु। मक्ष। शंकु लिगु। गुलु। मनु तन्तु मनायी भूत कथक कष कन्थक ऋक्ष तंड वितण्डाकपि। कत। कुरुकत अनडुह
कण्वा शकल। गोकक्ष अगस्त्य। कुण्डिनी। यज्ञवल्क्य। उभय जात विरोहित वृषगण रहूगण शंडिल चणक मुद्गल मुसल प
राशर जतूकर्ण मन्त्रित संहित अश्मरथ शर्कराक्ष पूतिमाष स्थूरा अररका पिङ्गल कृष्ण गोलुंद उलूक तितिक्ष भिषज भंडित
भडित दल्भ चिकित देवहू इन्द्रहू। एकलू। पिप्पलु। बृहदग्नि सुलोहिन। उक्थ कुटीगु॥१०५॥ मधुबभ्र्वोर्ब्राह्मणकौ
शिकयोः। मधुशब्दाद्बभ्रुशब्दाच्च गोत्रापत्ये यञ्प्रत्ययो भवति यथासंख्यं ब्राह्मणे कौशिके चेत् वान्यः। बभ्रु यथासंख्यं ब्राह्मणे कौशिके वा
च्ये। माधव्यो भवति ब्राह्मणश्चेत्। माधव एवान्यः। बाभ्रव्यो भवति गर्गादिषु पठ्यते ततः सिद्धे यत्रिकौशिके नियमार्थं वचनं
गर्गादिषु पाठो यं तद्गणकार्यार्थः। सर्वत्र लोहितादिकं तंतेभ्य इति बाभ्रव्यायणी॥१०६॥ कपिबोधादांगिरसे। कपिबोधशब्दा

DR BHAU DAJI

का॰४ ण्यामांगिरसःपत्यविशेषेगोत्रेय अन्यथेभवति॥काप्यः बौध्यः आंगिरसइतिकिं काषिपः बौधिः कपिशब्दोगर्गादिषुपठ्यते
१९ तस्यनियमार्थंवचनं॥आंगिरसेयथास्यात् लोहितादिकार्यार्थंगणपाठः काप्यायनी॥१०७॥वतंडाच्च॥आंगिरसइत्येव वतंडशब्दादांगिरसेऽपत्यविशेषेगोत्रेयअन्यथेभवति। वातंड्यः आंगिरसइतिकिं। वातण्डः। किमर्थमिदंयावतागर्गादिष्वयंपठ्यते शिवादिष्वप्ययंपठ्यतेतत्रांगिरसेशिवाद्यणोपकदार्थंपुनर्वचनं। अनांगिरसेतूभयत्रपाठसामर्थ्यात्प्रत्ययद्वयमपिभवति। वातंड्यः। वातण्डः॥१०८॥लुक्स्त्रियां॥आंगिरसएव। वतंडशब्दादांगिरसस्यांस्त्रियांयञ्प्रत्ययस्यलुक्भवति। लुकिकृतेशार्ङ्गरवादिपाठान्ङीन्भवति। वतण्डीआंगिरसइत्येव। वातण्ड्यायनी। शिवाद्यणितुवातण्डी॥१०९॥अश्वादिभ्यःफञ्॥आंगिरसइतिनिवृत्तं॥अश्वादिभ्योगोत्रापत्येफञ्प्रत्ययोभवति। आश्वायनः आश्मायनः। येत्वत्रप्रत्ययान्ताःपठ्यन्तेतेभ्यःसामर्थ्यानिप्रत्ययाविज्ञायते। अश्व। अश्मन्। शंख। विद। पुट। रोहिण। खर्जूर। पिञ्जूर। खजूर। खञ्जन। भडिल। भंडिल। भडित। भण्डित। प्रहृत। आमोद। ग्रीवा। काश। तृण। गोलांक्ष। अर्क। स्वन। ध्वन। पाद। चक्र। कुल। पवित्र। पवित्। गोमिन्। श्याम। धूम। धूम्र। वाग्मिन्। विश्वानर। कुट। वेश। शपधन्य। आत्रेय। जडखड। ग्रीष्म। अर्ह। विशंप। विशाल। गिरिदयलन। मद। दीसक। वैल्व। धर्म्य। आनडुह्य। शप। आत्रेयपुंसिजात। अर्जुन। शूद्र। सुमनस्। दुर्मनस्। आंजस। आत्रेयभारद्वाजे। कुत्स। आतप। कितव। शिव। खदिर॥११०॥भर्गात्त्रैगर्त्ते॥भर्गशब्दादपत्यविशेषेत्रैगर्त्तेगोत्रेयुअन्ययोभवति। भार्गायणोभवतित्रैगर्त्तश्चेत्। भार्गिरन्यः॥१११॥शिवादिभ्योऽण्॥गोत्रइतिनिवृत्तं॥अतःप्रभृतिसामान्येनप्रत्ययाविज्ञायंते॥ शिवादिभ्यःशब्देभ्योऽपत्येऽण्प्रत्ययोभवतियथायथमिञादीनामपवादः। शैवः। प्रौष्ठः। तक्षन्शब्दोऽत्रपठ्यते कारिलक्षणमुदीच्यामिञंबाधितुं। एवप्रत्ययस्यबाधानेष्यते। ताक्षण्यः। ता–। गंगाशब्दःपठ्यते तिकादिफिञाशुभ्रादिढकाचसमावेशार्थं। तेनत्रैरूप्यंभवति। गांगः। गांगायनिः। गांगेयः। विपाशशब्दःपठ्यते कृष्णादिलक्षणेन–णासमावेशार्थं। वैपाशीयन्यः १८

वैपाशः। शिव। प्रोष्ठ। प्रोष्ठिक। चंड। भज्जभूरि। सत्व। मुनि। कुठार। अनभिम्लान। ककुत्स्थ। कहोड। कुहड। कवोधापिरल। वतंड। तृणकर्ण। क्षीरह्रद। परिषिक। जटिलक। गोफिलक। बधिरक। मञ्जारक। वृष्णिक। खंजन। गजिल। रेख। आलेखन। विश्रवण। रवण। वर्तनाक्ष। पिटक। पिटाक। तृक्षाक। नभाक। ऊर्णनाभ। जरत्कारु। उत्क्षेप। गो–तिक। आर्यश्वेत। सुपिष्ट। खर्जूरकर्ण। मयूरकर्ण। खडूर। तक्षन्। ऋष्टिषेण। गंगाविपाश। यस्कालुत्स्य। द्रुह्य। अयस्थूण। भलंदन। विरूपाक्ष। भूमि। इलासपत्नीद्योनद्याः। त्रिवेणीत्रिवणंच॥११॥ऋष्यन्धकवृष्णिकुरुभ्यश्च–नद्यामानुषीभ्यस्तन्नामिकाभ्यः॥ वृद्धिर्यस्याचामादिस्तद्वृद्धम्। अवृद्धा यदतिशब्दवर्गे। नदीमानुषीभ्य इत्यर्थधर्मास्तेनाभेदात्प्रकृतयोनिर्दिश्यन्ते। तन्नामिकाभ्यइतिसर्वनाम्नाप्रत्ययप्रकृतेःप्रत्यवमर्शः। अवृद्धानियानिनदीनाम्नानुषीणाञ्चनामधेयानितेभ्योपत्येण्यन्त्यवोभवति। ढकोपवादः। यमुनायाअपत्यंयामुनः। इरावत्याःऐरावतः। वैतस्तः। नार्मदः। मानुषीभ्यः खल्वपि। सिक्षितायाअपत्यंसैक्षितः। चिन्तितायाःचैन्तितः। अवृद्धाभ्यःकिं। चान्द्रभागेयः। वासवदत्तेयः। नदीमानुषीभ्यइतिकिं। सौपर्णेयः। वैनतेयः। तन्नामिकाभ्यइतिकिं। शोभनायाः शौभनेयः॥
१३॥ऋष्यन्धकवृष्णिकुरुभ्यश्च॥ऋषयःप्रसिद्धाःवसिष्ठादयः अंधकावृष्णयःकुरवइतिवंशाख्याः। ऋष्यादिवचनेभ्यःप्रातिपदिकेभ्योपत्येण्प्रत्ययोभवतीञोपवादः। अश्वादिभ्यस्तुपरत्वाद्गर्गादिभिर्यञ्भवितव्यं। ऋषीणांयस्तावत् वासिष्ठः वैश्वामित्रः अंधकानांयस्तावत् वासिष्ठः वैश्वामित्रः अंधकायः श्वाफल्कः राधसः वृष्णिभ्यः वासुदेवः आनिरुद्धः कुरुभ्यः नाकुलः साहदेवः कथंपुनर्नित्यानांशब्दानामंधकादिवंशसमाश्रयणं नन्वाख्यानंयुज्यते केचिदाहुः कथमपिकालकालीयन्यायेनकुर्वादिवंशास्वसंकरेणैवनकुलसहदेवादयःशब्दाःसुबहवःसंकलिताः नानुपादायपाणिनिनास्मृतिरुपनिबद्धाः। इतिअथवाअन्धकवृष्णिकुरुवंशाअपिनित्याएव तेषुयेशब्दाःप्रयुज्यन्तेनकुलसहदेवादयःसत्वेनतदिदंप्रत्ययविधानमित्यदोषः॥११४॥मातुरुत्संख्यासंभद्रपूर्वायाः॥मातृशब्दात्संख्यापूर्वा

का०४ संपूर्वाद्भद्रपूर्वाच्चापत्यण्प्रत्ययोभवति उकारश्चांतादेशः द्वयोर्मात्रोरपत्यं द्वैमातुरः षाण्मातुरः सांमातुरः भाद्रमातु
१६ रः। उकारादेशार्थं वचनं। प्रत्ययःपुनरुत्सर्गेणैव सिद्धः। स्त्रीलिंगनिर्देशोऽर्थापेक्षः। तेनधान्येसंमातुर्ग्रहणन्नभवति
संख्यासंभद्रपूर्वायाइतिकिं। सौमात्रः। शुभ्रादिपाठान्नैवेमात्रेयः॥११०॥कन्यायाः कनीनच॥कन्याशब्दादपत्येण्प्रत्य
योभवति ठकोपवादः तत्संन्नियोगेनकनीनशब्द आदेशोभवति। कन्याया अपत्यं कानीनः कर्णः। कानीनः कर्णः। कानी
नोव्यासः॥११६॥विकर्णशुंगछगलाद्वत्सभरद्वाजात्रिषु॥विकर्णशुंगछगलशब्देभ्यो यथासंख्यं वत्सभरद्वाजात्रिष्वपत्य
विशेषेष्वण्प्रत्ययोभवति। वैकर्णोभवति वात्स्यश्चेत्। वैकर्णिरन्यः। शौंगोभवति भारद्वाजश्चेत्। शौंगिरन्यः। छागलो
भवत्यात्रेयश्चेत्। छागलिरन्यः — इगाशब्दं स्त्रीलिंगमन्ये पठन्ति तद्वं प्रत्युदाहरंति। शौंगेय इति द्वयमपि चैतत्प्रमा
णमुभयथा सूत्रप्रणयनात्॥११७॥पीलाया वा॥तन्नामिकाऽणो बाधकं ढग्चेति ठक्प्राप्तः ण्प्रत्ययः पक्षे विधीयते
पीलाया अपत्ये वाण्प्रत्ययो भवति। पीलाया अपत्यं पैलः पैलेयः॥११८॥ठक्मण्डूकात्॥मण्डूकशब्दादपत्ये ठक्प्रत्ययो भवति॥
चकाराद्ढग्चवा। तेनत्रैरूप्यंभवति। ~~चकारसमुच्चयार्थ~~ मांडूकेयः मांडूकः माडूकिः॥११९॥स्त्रीभ्योढक्॥स्त्रीग्रहणेन नद्या
बादि प्रत्ययान्ताः शब्दा गृह्यंते। स्त्रीभ्यो अपत्ये ढक्प्रत्ययो भवति सौपर्णेयः वैनतेयः स्त्रीप्रत्ययविज्ञापनाद्वस्त्यर्थग्रह
णे इह न भवति इडविडापत्यं ऐडविडः दारदइति। वडवाया वृषे वाच्ये। वाडवेयो वृषस्त्रूतः अपत्ये प्राप्ते तत्तो वचनात्विव
धीयते तेनापत्ये ढक्प्रत्ययो भवति। तत्रामिवाणो ह्यवादः दत्ताया अपत्यं दात्तेयः गौपेयः ढक्चेति कियतनुः॥१२१
॥द्व्यचः॥स्त्रीग्रहणंनिवृत्तं। चकारो ह्यचइत्यस्यानुकर्षणार्थः। इकारान्तात्प्रातिपदिकादनितो द्व्यचोऽपत्ये ढक्प्रत्य
यो भवति। आत्रेयः नैधेयः। इत इति किं। दाक्षिः प्लाक्षिः। अनिञ इति किं। दाक्षायणः प्लाक्षायणः। द्व्यच इत्येव मारीचेर १६
पत्यं मारीचः॥१२२॥शुभ्रादिभ्यश्च॥शुभ्र इत्येवमादिभ्यः प्रातिपदिकेभ्यो अपत्ये ढक्प्रत्ययो भवति यथायोगमिञादीनाम
४४ वाडव इति भवति अणकौ अश्वाकोकिलात्स्मृतः कुंचायापत्यं कौंचः कोकिलः॥१२०॥ द्व्यचः॥ स्त्रीयइत्येव। द्व्यचः।
स्त्रीप्रत्ययांतादपत्ये ४

पवादः। शौभ्रेयः। वैष्टपुरेयः। चकारोनुक्तसमुच्चयार्थः। आकृतिगणतामस्य बोधयति। गांगेयः। पांडवेय इत्येवमादिसिद्धं भवति
शुभ्र। विष्टपुर। ब्रह्मकृत्। नेशहार। शलाकाः। शलाका। भु। लेखाभ्रु। विमातृ। विधवा। ककसा। रोहिणी। रुक्मिणी। दिशा। शा
ल्वक। अजवस्ति। शकधि। लक्षणश्यामयोर्वासिष्ठे गोधा। ककलासः। अणीवप्रवाहणभारतभारम कथहिवी रुक्मिणी
दिशा शाल्वक अजवस्ति शकधि लक्षणश्यामयोर्वासिष्ठे गोधा ककलासः अणीवप्रवाहणभारतभारम कथव्यु म
घष्टु मकष्टु सुकंडु मृकंडु कर्पूरः इतर अन्यतर आलीढ सुदत्त सुचक्षस सुमनस् कद्रुदः अकशाय कुमारि
का किशोरिका शुद्धपिंगला खडोन्मत्ता अनुदृष्टिन् जरतिन् बलिवर्दिन् विग्र व्यग्र धव जीव श्वन् अश्मन् अश्व
अज्जिन्॥१२३॥विकर्णकुषीतकात्काश्यपे॥कर्णशब्दात्कुषीतकशब्दाच्च काश्यपेऽपत्यविशेषे ढक्प्रत्ययो भवति वैकर्णे
यः कौषीतकेयः काश्यप इति किं वैकर्णिः कौषितकी॥१२४॥भ्रुवो वुक्च॥भ्रुशब्दादपत्ये ढक्प्रत्ययो भवति तत्संन्नियोग
ना वुगागमः॥भ्रौवेयः॥१२५॥कल्याण्यादीनामिनङ्॥कल्याणी इत्येवमादीनां शब्दानामपत्ये ढक्प्रत्ययो भवति तत्संनि
योगेन च इनङादेशः। स्त्रीप्रत्ययांतानामादेशार्थं ग्रहणं प्रत्ययस्य सिद्धत्वादन्येषामुभयार्थं। काल्याणिनेयः सौभागिनेयः
दौर्भागिनेयः। हृद्भगसिंध्वंते इत्युभयपदवृद्धिः कल्याणी सुभगा दुर्भगा बधकी अनुसृष्टि जरती बलीवर्दी ज्ये
ष्ठा। कनिष्ठा मध्यमा परस्त्री॥१२६॥कुलटाया वा॥कुलान्यटतीति कुलटा परगृहपत्रिपातनात्कुलटाया अपत्ये
ढक्प्रत्ययो भवति तत्संन्नियोगेन च इनङादेशो भवति आदेशार्थं वचनं। प्रत्ययः पूर्वेणैव सिद्धः कौलटिनेयः कौलटेयः
यातु कुलान्यटतीति शीलं भिनत्ति। ततः क्षुद्राभ्यो वेति पक्षे ढ्रक् भवितव्यं कौलटेरः॥१२७॥चटकाया ऐरक्॥चटका
या अपत्ये ऐरक्प्रत्ययो भवति। चाटकैरः। चटकाश्चेति वक्तव्यं। चटकस्यापत्यं चाटकैरः। स्त्रियामपत्ये लुग्वक्तव्यः।

का०४
१७ चटकायाअपत्यंस्त्रीचटका॥१२८॥गोधायाढ्रक्॥गोधायाअपत्येढ्रक्प्रत्ययोभवति।गौधेरः।शुभ्रादिष्वयंपठ्यते।तेनगौधेयमपिभवति॥१२९॥आरगुदीचां॥गोधायाअपत्येउदीचामाचार्याणांमतेनआरक्प्रत्ययोभवति।गौधारः।आचार्यग्रहणंपूजार्थंवचनसामर्थ्यादेवपूर्वेणसमावेशोभविष्यति।आरग्वचनमनर्थकंरकासिद्धत्वात्।ज्ञापकंत्वयमन्येभ्योपिभवतीति।जांटारः।पांटारः॥१३०॥क्षुद्राभ्योवाद्रगनुवर्तते॥नआरक्क्षुद्राश्चंगहीनाः।धर्महीनाश्च।अर्थधर्मेयातदभिधायिन्यःस्त्रीलिंगाःप्रकृतयोनिर्दिश्यन्ते।क्षुद्राभ्योवायस्तद्रक्प्रत्ययोभवति।टकोपवादः।काणेरः।काणेयः।दासेरः
दासेयः॥१३१॥पितृष्वसुश्छण्॥पितृष्वसृशब्दादपत्येछण्प्रत्ययोभवति।अणोपवादः।पैतृष्वस्रीयः॥१३२॥ढकिलोपः॥पितृष्वसुरपत्यप्रत्ययेढकिपरतोलोपोभवति।पितृष्वसेयः।कथंपुनरिहढक्प्रत्ययः।एतदेवज्ञापकंढकोभावस्य॥१३३॥मातृष्वसुश्च।पितृष्वसुरित्येतदपेक्षंतेपितृष्वसुर्यदुक्तंतन्मातृष्वसुरपिभवति।छण्प्रत्ययोढकिलोपश्च
मातृष्वस्रीयः।मातृष्वसेयः॥१३४॥चतुष्पाद्भ्योढञ्॥चतुष्पादभिधायिनीभ्यःप्रकृतिभ्योऽपत्येढञ्प्रत्ययोभवति।अणादीनामपवादः।कामण्डलेयः।शान्तिवाहेयः।जाम्ब॥१३५॥गृष्ट्यादिभ्यश्च॥गृष्ट्यादिभ्यःशब्देभ्योपत्येढञ्भवति अणादीनामपवादः।गार्ष्टेयः।हार्ष्टेयः।एषिशब्दोपश्चतुष्पाद्वचनस्ततःपूर्वेणैवसिद्धः।अचतुष्पादर्थंवचनं।गृष्टि।हृष्टि
अलि।वलि।पलि।वभ्रि।कुद्रिअर्द्धवस्तिमित्रयु॥१३६॥राजश्वशुराद्यत॥राजन्श्वशुरशब्दाभ्यामपत्येयत्प्रत्ययोभवति यथाक्रममणिञोपवादः।राजन्यः।श्वशुर्यः।राज्ञोपत्येजातिग्रहणं।राजभ्योभवतिक्षत्रियश्चेत॥
राजनोन्यः॥१३७॥क्षत्राद्घः॥क्षत्रशब्दादपत्येघःप्रत्ययोभवतिक्षत्रियः।अयमपिजातिशब्दएव।क्षात्रिरन्यः॥ १०
१३८॥कुलात्खः॥उत्तरसूत्रेपूर्वप्रतिषेधादिहतदंतःकेवलश्चगृह्यते।कुलशब्दान्तात्प्रातिपदिकात्केवलाच्चापत्ये

खप्रत्ययोभवति।आढ्यकुलीनः।श्रोत्रियकुलीनः।कुलीनः॥१३९॥अपूर्वपदादन्यतरस्यांयड्ढकञौ॥कुलादित्येव
अविद्यमानंपूर्वपदंयस्यतदपूर्वपदंसमाससंबंधिनःपूर्वपदस्याभावेनकुलशब्दोविशेष्यते।अपूर्वपदात्कुलशब्दादन्यतरस्यांयड्ढकञ्इत्येतौप्रत्ययौभवतः।ताभ्यांमुक्तेखोपिभवति।कुल्यः।कौलेयकः।कुलीनः।पदग्रहणंकिं।बहुचपूर्वादपियथा
स्यात्।बहुकुल्यः।बाहुकुलेयकः।बहुकुलीनः।महाकुलादञ्खञौ।महाकुलशब्दादञ्खञौप्रत्ययौभवतः।अन्यतरस्यांग्रहणानुवृत्तेःखश्च।माहाकुलः।माहाकुलः।माहाकुलीनः।माहाकुलीनः।दुष्कुलाड्ढक्।दुःकुलशब्दादपत्येढक्प्रत्ययोभवति।अन्यतरस्यामित्यनुवृत्तेःखश्च।दौष्कुलेयः।दुष्कुलीनः॥१४२॥स्वसुश्छः॥स्वसृशब्दादपत्येछःप्रत्ययोभवति।अणोपवादः।स्वसुरपत्यं।स्वस्रीयः॥१४३॥भ्रातुर्व्यच्च॥भ्रातृशब्दादपत्येव्यत्प्रत्ययोभवतिचकाराच्छश्च।अणोपवादः।
भ्रातृव्यः।भ्रात्रीयः।तकारःस्वरार्थः॥व्यन्सपत्ने॥सपत्नशब्दःशत्रुपर्यायः।शब्दान्तरमव्युत्पन्नमेव।सपत्नीशब्दादपरे उकारमिवार्थेनिपातयन्ति।सपत्नीइवसपत्नः।भ्रातृशब्दाद्व्यन्प्रत्ययोभवतिसमुदायेनचेदमित्रःसपत्नउच्यते।अपत्यार्थोत्रनास्त्येव।पाप्मनाभ्रातृव्येण।भ्रातृव्यःकंटकः॥१४४॥रेवत्यादिभ्यष्ठक्॥रेवत्यादिभ्यःप्रकृतिभ्योऽपत्येठक्प्रत्ययोभवति
यथायोगंढगादीनामपवादः।रैवतिकः।आश्वपालिकः।रेवती।अश्वपाली।मणिपाली।द्वारपाली।वृकवञ्चिन।वृकग्राहः।कर्णग्राहः।दण्डग्राहः।कुलटाक्षः॥१४६॥गोत्रस्त्रियाःकुत्सनेणच॥पौत्रप्रभृतिगोत्रंगृह्यते।गोत्रंयास्त्रीतदभिधायिनःशब्दादपत्येणप्रत्ययोभवति।चकाराट्ठक्।कुत्सनेगम्यमानेपितुरसंविज्ञानेमात्राव्यपदेशोपत्यस्यकुत्सा।गार्ग्याअपत्यंगार्गो।जाल्मः।गार्गिकः।ग्लुचुकायन्याअपत्यंग्लौचुकायनः।ग्लौचुकायनिकः।गोत्राद्यूनीतिप्राप्तप्रत्ययौभवतः।गोत्रमितिकिं।कारिकेयोजाल्मः।स्त्रियामितिकिं।औपगविर्जाल्मः।कुत्सनइतिकिं।गार्गेयोमाणवकः॥१४७

का०४ वृद्धाच्चसौवीरेषुबहुलं॥कुत्सनइत्येव। सौवीरेष्विति च प्रकृतिविशेषणं वृद्धात्सौवीरगोत्रादपत्ये बहुलं ठक्प्रत्ययो
१८ भवति। कुत्सने गम्यमाने भागवित्तेर्भागवित्तिकः। तार्णबिंदवस्य तार्णबिंदविकः। पक्षे यथाप्राप्तं फक्‌भागवित्तायनः
पक्षे। तार्णबिंदविः। अवशायः शब्दादिः आकशापेयः। तस्यापत्यं आकशापेयिकः। पक्षे। आकशापेयिः। भागपूर्वपदो
वित्तिर्द्वितीयस्तार्णबिंदवः। तृतीयस्याकशापेयो गोत्रात्तवग्रबहुलं कृतः। वृद्धग्रहणस्यानिवृत्त्यर्थं सौवीरेष्विति विं।
औपगविर्जाल्मः। कुत्सनइत्येव। भागवित्तायनो माणवकः। बहुलग्रहणमुपाधिवैचित्र्यार्थं। गोत्रस्त्रियाइत्यारभ्य च
त्वारो गोत्रास्तेषु प्रथमः। कुत्सन एव। अंत्यः सौवीरगोत्र एव। मध्यमोद्वयोरपि नदेतद्बहुलग्रहणाल्लभ्यते॥१४८॥ फेश्छ
च॥ कुत्सनइत्येव सौवीरेष्विति च। फेरिति फिञ्ग्रहणं तापिनः स्वधाधिकाराल्लुक्। कुत्सने गम्यमाने। यमुदस्यापत्यं तिका
दिभ्यः फिञ्। यामुंदायनिः। तस्यापत्यं यामुंदायनीयः। यामुंदायनिकः। कुत्सनइत्येव। यामुंदायनिः। फिञंतादौत्स
र्गिकस्याण आगतस्य ण्यक्षत्रियार्षञित इति लुक्। सौवीरेष्वित्येव। तैकायनिः। यमुंदश्च सुयामा च वार्ष्यायणी फि
ञः स्मृताः सौवीरेषु च कुत्सायां द्वौ योगौ शद्वविस्मरेत्॥१४९॥ फांटाहृतिमिमताभ्यां णफिञौ॥ सौवीरेष्वित्येव कुत्स
नइतिनिवृत्तं। फांटाहृतिमिमशब्दाभ्यां सौवीरविषयाभ्यामपत्ये णफिञौ प्रत्ययौ भवतः फकोपवादः। अस्मान्वस्या
पूर्वनिपातो लक्षणव्यभिचारचिन्हं तेन यथासंख्यमिह न भवतीति फ्रांटाहृतः। फांटाहृतायनिः। मैमतः। मैमतायनिः। सौ
वीरेष्वित्येव। फांटाहृतायनः। मैमतायनः। फांटाहृतेरियंत्रिभोऽश्वेति फक्। मिमतशब्दोऽपि नडादिषु पठ्यते॥१५०॥ कुर्वा
दिभ्यो ण्यः॥ सौवीरेषु बहुलमिति च निवृत्तं। कुरुइत्येवमादिभ्यः शब्देभ्योऽपत्ये ण्यप्रत्ययो भवति। कौरव्यः। गार्ग्याः १८
कुरुणादिभ्यो ण्य इति कुरुशब्दादपरोऽपि ण्यप्रत्ययो भविष्यति। स तु शास्त्रियात्तद्राजसंज्ञकस्तस्य बहुषु लुका भवितव्य

मयं तु श्रूयत एव। कौरव्याः। तिकादिषु पाठात्फिञपि भवति। कौरव्यायणिः। रथकारशब्दोऽत्र पठ्यते। स जातिवचनस्त्रै
वर्णिकेभ्यः किंचिन्न्यूनरथकारजातिः। कारिणस्तु रथकारशब्दादुत्तरसूत्रेणैव ण्यः सिद्धः। केशिनीशब्दः पठ्यते। तस्य
कैशिन्यः पुंवद्भावो न भवति स्त्रीप्रत्ययनिर्देशसामर्थ्यात्। वेनाच्छंदसीति पठ्यते। कथं भाषायां वैन्यो राजेति। छांदस एवा
यं प्रमादात्कविभिः प्रयुक्तः। वामरथशब्दः पठ्यते। तस्य कण्वादिवत्कार्यमिष्यते स्वरं वर्जयित्वा लुगादिकमतिदिश्य
ते। बहुषु वामरथाः। स्त्री वामरथी। वामरथ्यायणी। युवा वामरथ्यायनः। वामरथ्यस्य छात्रा वामरथाः। वामरथानि
संघांकलक्षणानि स्वरस्तु ण्यप्रत्ययस्यैव भवति। नातिदेशिकमाद्युदात्तत्वं। कुरु। गर्ग। नडुष। अजमारक।
विस्फोटक। रथकार। वावदूक। सम्राजः क्षत्रिये। कवि। मतिकवा। पितृमत्। इंद्रजालि। धेनु। जिदामोदपर्णापि। ग
णकारि। केशोरि। कापिजलादि। कुट। शलाका। मुरारक। अभ्र। दर्भा। केशिनी। वेनाच्छंदसि। शूर्पणख। श्याव
नाय। श्यावरथ्या। श्यावपुत्र। सत्यंकार। वडभीकार। बुद्धिकार। पथिकारिन्। इर्नापण्डी। वामरथस्य कण्वादिवत्स्व
रंवर्ज्जं॥१५१॥ सेनांतलक्षणकारिभ्यश्च॥ सेनांतात्प्रातिपदिकाल्लक्षणशब्दात्कारिवचनेभ्यश्चापत्ये ण्यः प्रत्य
यो भवति। कारिशब्दः कारूणां तंतुवायादीनां वाचकः। कारिषेण्यः। हारिषेण्यः। लाक्षण्यः। कारिणः तंतुवायः कौ
भकार्य्यः। नापित्यः॥१५२॥ उदीचामिञ्॥ ण्ये प्राप्ते इञ् परो विधीयते। सेनांतलक्षणकारिभ्योऽपत्ये इञ् प्रत्ययो
भवति। उदीचां मतेन कारिषेणिः। हारिषेणिः। लाक्षणिः। तांतुवायिः। कौंभकारिः। वचनसामर्थ्यादेव प्रत्ययसमा
वेशे लब्धे आचार्यग्रहणं वैचित्र्यार्थं। तक्षनशब्दः शिवादिः। तेनाणायमिञ् बाध्यते। न तु ण्यः। तक्ष्णापत्यं ताक्ष्णः
तिकादिभ्यः फिञ्॥ तिकइत्येवमादिभ्योऽपत्ये फिञ् प्रत्ययो भवति। कायनिः। कैतवायनिः। वृषशब्दोऽत्र पठ्यते। तस्य प्र

का॰४ स्यय सन्नियोगेन यकारान्तत्वमिष्यते वार्ष्यायणिः कौरव्यशब्दः पठ्यते स च क्षत्रियवचनः औरसशब्दे न क्षत्रियप्र
१९. त्ययेन न साहचर्यात् । यस्तु कुर्वादिभ्यो ण्यः ततः इञेव भवितव्यं ॥ तथा च ण्यः क्षत्रिया दित्युक्त इत्यंबादा इञं ॥ कौरव्यः
पिता कौरव्यः पुत्र इतितिक। कितव। संज्ञा। बाल। शिखा। उरस। शाद्य। गंधव। यमुंद। रूप्य ग्राम्य। शौरस कौरव्य
लांकर गोकक्ष। गौरिकि। गौलिकि। चोपयत। चैटकपत। शैकपत। शाकपत। क्षैनपत। ध्वाजयत चिंद्रमस। वृष। कृता
नीडाभीत। अमित्रकुरु। देवयथ। नैतिला जाजल। ग्राम्य। शूत। गंगा चेरण्यः वसुबंधु। अवंधक। वहका। शल्मका।
कृपामन। कृपामन। उदन्य। यज्ञ। कौसल्यकार्म्मार्य्याभ्यां च। कौसल्यकार्म्मार्य्य शब्दाभ्यामपत्ये फिञ् अन्त्ययो भवति
इञोपवादः। कौसल्यापतिः कार्म्मार्य्यायणिः परमप्रकृतेरेवायं प्रत्यय इष्यते। कौसल्यस्यापत्यं कार्म्मारस्याप
त्यमिति। प्रत्यय सन्नियोगेन तु प्रकृति रूपन्निपात्यते तथा च स्मृत्यंतरं । दगुकोसलकर्म्मारच्छागवृषाणां युट्चादि
ष्टस्यंति। दार्ष्ट्रगव्यायनिः कौसल्यायनिः कार्म्मार्यायणि। छाग्यायनिः वार्ष्यायणिः ॥१९५॥ अणो द्व्यचः ॥ अणं
ताद्व्यचः प्रातिपदिकादपत्ये फिञ् अन्त्ययो भवति। इञोपवादः। कार्त्रायणिः हार्त्रायणिः अण इति किं। दाक्षायणः।
द्व्यच इति किं। औपगविः। त्यदादीनां फिञ् वा फिञ् वक्तव्यः। त्यादायनिः। त्यादः। यादायनिः। यादः। तादायनिः। यादः।
तादायनिः। तादः। अणग्रहणः ॥१९६॥ उदीचां वृद्धादगोत्रात् ॥ वृद्धं यद्ध्व रूपमगोत्रं तस्मादपत्ये फिञ् अन्त्ययो भ
वति। उदीचामाचार्य्याणां मतेन। आम्रगुप्तायनिः ग्रामरक्षायणिः कारिशब्दाद्वृद्धाद्वृद्धाद गोत्रात्सरत्वाद्धनेनभ
वितव्यं। नापितायनिः उदीचामिति किं। आम्रगुप्तिः वृद्धादिति किं। याज्ञदत्तिः अगोत्रादिति किं। औपगविः ॥१९७॥ १९.
वाकिनादीनां कुक् च। वाकिन इत्येवमादिभ्यः शब्देभ्यो पत्ये फिञ् अन्त्ययो भवति तत्सन्नियोगेन च षाङ्कुगागमः यदिह व

वृद्धमगोत्रं शब्दरूपं तस्यागमार्थमेव ग्रहणमेव मन्येयामुभयार्थमू। वाकिनकायनिः इञाद्यपवादो योगः। उदीचामि
त्यधिकारात्पक्षे ते पि भवन्ति। वाकिनिः। गारेधिः। वाकिन। गारेध। कार्कपूद्य। काक। लंका। चर्म्मिवर्म्मिणोर्न्नलोपश्च
॥१९८॥ पुत्रांतादन्यतरस्यां ॥ उदीचां वृद्धादिति वर्त्तते। पुत्रांतमगोत्रमिति। पूर्वेणैव प्रत्ययः सिद्धस्तत्रानेन कुग
गमोन्यतरस्यां विधीयते पुत्रांतात्प्रातिपदिकाद्यः फिञ् अन्त्ययस्तस्मिन् परभूतेन्यतरस्यामकुगागमो भवति। पुत्रां
तस्य तेनैवरूप्यं सम्पद्यते। गार्गीपुत्रकायणिः गार्गीपुत्रायणिः गार्गीपुत्रिः वात्सीपुत्रकायणिः वात्सीपुत्रायणिः
वात्सीपुत्रिः ॥१९९॥ प्राचामवृद्धात्फिन् बहुलं ॥ अवृद्धाद्ध्व रूपादपत्ये फिन् प्रत्ययो भवति बहुलं प्राचां मतेन। ग्लुचु
कायनिः अहिचुम्बकायनिः प्राचामिति किं। अवृद्धादिति किम्। राजदंतिः उदीचां प्राचामन्यतरस्यां बहुलमिति
सर्व्व एते विकल्पार्थाः तेषामेकेनैव सिद्ध्यति तत्राचार्यग्रहणं पूजार्थमा बहुलग्रहणं वैचित्र्यार्थं। क्वचिन्न भवन्त्येव
दाक्षिः प्लाक्षिः ॥१६०॥ मनोर्ज्जातावञ्यतौ षुक् च। मनुशब्दाद् प्रयत इत्येतौ प्रत्ययौ भवतः तत्सन्नियोगेन षुगागमः सम
दायेन चेज्जातिर्गम्यते मानुषः मनुष्यः। जातिशब्दाविमौ। अपत्यार्थोत्र नास्त्येव तथा च मानुषा इति बहुषु न लुग्भव
ति। अपत्यविवक्षायां त्वणेव भवितव्यं। मानवी प्रजा। अपत्ये कुत्सितमूढे मनोरौत्सर्गिकः स्मृतः। नकारस्य च मूर्द्धन्य
स्तेन सिध्यति माणवः ॥१६१॥ अपत्यं पौत्रप्रभृति गोत्रं ॥ पौत्रप्रभृति यदपत्यं तद्गोत्रसंज्ञं भवति। संबंधिवचनत्वा
दपत्यशब्दस्य यस्य यदपत्यं तदपेक्षया पौत्रप्रभृतेर्गोत्रसंज्ञा विधीयते। गर्गस्यापत्यं पौत्रप्रभृति गार्ग्यः। वात्स्य।
अपत्यमिति व्यपदेशाय संज्ञिनः पौत्रप्रभृतीति किं। अनन्तरस्य मा भूत्। कौञ्जिः गार्गिः। गोत्रप्रदेशाः एको गोत्र इत्ये
वमादयः ॥१६२॥ जीवति तु वंश्ये युवा ॥ अभिजनप्रबंधो वंशः तत्र भवो वंश्यः पित्रादिस्तस्मिञ्जीवति सति पौत्रप्रभृत्य

पत्यंपुवसंज्ञोभवति। पौत्रप्रभृतीतिवचनेनसामानाधिकरण्येनापत्यंविशेषयति। किंतर्हिषष्ठ्याविपरिणम्यतेपौत्रप्रभृते
र्यदपत्यमिति। तेनचतुर्थादारभ्ययुवसंज्ञाविधीयते। गार्ग्यायणः। वात्स्यायनः। तुशब्दोवधारणार्थः पुंसेवनागोत्रमि
ति॥१६३॥भ्रातरिचज्यायसि। भ्रातरिज्यायसिजीवतिकनीयान्भ्रातायुवसंज्ञोभवति। पौत्रप्रभृतेरपत्यंगार्ग्यस्यद्वौपु
त्रौतयोःकनीयान्मृतेपित्रादौवंश्येभ्रातरिज्यायसिजीवतियुवसंज्ञोभवति। अवंश्यार्थोयमारंभः। पूर्वजाःपित्रादयो
वंश्याइत्युच्यंते। भ्रातातुनवंश्यःअकारणत्वात्। गार्ग्येजीवतिगार्ग्यायणोस्यकनीयान्भ्राता। वात्स्यायनः। दाक्षायणः।
प्लाक्षायणः॥१६४॥वान्यस्मिन्सपिंडेस्थविरतरेजीवति॥ सप्तमपुरुषावधयःसपिण्डाःस्मर्यंतेजननेमरणे। अतएवाष्ट
मनुनासपिंडतातुपुरुषसप्तमेविनिवर्त्तते। मुभयत्रदशाहानिकुलस्यान्नंनभुज्यतेदानंप्रतिग्रहोहोमःस्वाध्यायश्चनि
वर्त्ततइत्येवमादिकायांक्रियामनधिकारः। भ्रातुरन्यस्मिन्सपिंडेस्थविरतरेजीवतिपौत्रप्रभृतेरपत्यंजीवदेवयुवसंज्ञंवा
भवति। प्रकृतंजीवतिग्रहणंसपिंडस्यविशेषणमिदंतुसंज्ञिनः। तरनिर्देशउभयोरुत्कर्षार्थः। स्थानेनवयसाचउत्क
ष्टसपिण्डेचयथास्यात्। पितृव्येपितामहेभ्रातरिवयसाधिकेजीवति। गर्गस्यापत्यंगार्ग्यायणः। गार्ग्योवा। वात्स्या
वृद्धमिति यनः। वात्स्योवा। दाक्षायणः। दाक्षिर्वा। स्थविरइतिकिं। स्थानवयोन्यूनेगार्ग्यएवभवति। जीवतीतिकिं। मृतेमृतोवा
गार्ग्यएवभवति॥१६५॥वृद्धस्यचपूजायां॥अपत्यमंतर्हितंवृद्धमित्युच्यते। वृद्धस्ययु
वसंज्ञावाभवतिपूजायांगम्यमानायां। संज्ञासामर्थ्याद्गोत्रंयुवप्रत्ययेनपुरुच्यते। वृद्धस्येतिषष्ठीनिर्देशोविचित्रासू
त्रस्यकृतिरिति। तत्रभवान्गार्ग्यायणः। गार्ग्योवा। तत्रभवान्वात्स्यायनः। वात्स्योवा। तत्रभवान्दाक्षायणः। दाक्षिर्वा।
पूजायामितिकिं। गार्ग्यः। वात्स्यः॥६६॥यूनश्चकुत्सायां॥कुत्सायांगम्यमानायांयूनोवायुवसंज्ञाभवति। निवृत्तिप्र

धानोविकल्पोयुवसंज्ञायांप्रतिषिद्धायांपक्षेगोत्रसंज्ञैवभवति। प्रतिपक्षाभावात्। गार्ग्योजाल्मः। गार्ग्यायणोवा। वात्स्यो
जाल्मः। वात्स्यायनोवा। दाक्षिर्जाल्मः। दाक्षायणोवा। कुत्सायामितिकिं। गार्ग्यायणः॥१६७॥जनपदशब्दात्क्षत्रिया
दञ्॥जनपदशब्दोयःक्षत्रियवाचीतस्मादपत्येऽञ्प्रत्ययोभवति। पाञ्चालः। ऐक्ष्वाकः। वैदेहः। जनपदशब्दादितिकिं। द्रु
ह्योरपत्यंद्रौह्यवः। पौरवः। क्षत्रियादितिकिं। ब्राह्मणस्यपञ्चालस्यापत्यंपाञ्चालिः। वैदेहिः। क्षत्रियसमानशब्दाज्ज
नपदात्तस्यराजन्यपत्यवत्। पञ्चालानांराजापाञ्चालः। वैदेहः। मागधः। अवृद्धादपिप्राप्तस्यवुञोपवादः॥१६८
॥साल्वेयगांधारिभ्यांच॥साल्वेयगांधारिशब्दाभ्यामपत्येअञ्प्रत्ययोभवति। जनपदशब्दावेतौक्षत्रियाभिधायिनौताभ्यामनपवादवृद्धेदितिव्य
ङिप्राप्तेपुनर्वचनंविधीयते। साल्वेयः। गांधारः। तस्यराजनीत्येव। साल्वेयोराजा। गांधारोराजा॥१६९॥द्व्यञ्मगधकलिं
गसूरमसादण्॥जनपदशब्दात्क्षत्रियाभिधायिनोद्व्यचः। मगधकलिंगसूरमसइत्येतेभ्यश्चापत्येऽण्प्रत्ययोभवति
अञोपवादः। आंगः। वांगः। सौह्मः। पौंड्रः। मागधः। कालिंगः। सौरमसः। तस्यराजनीत्येव। आंगोराजा॥१७०॥वृद्धे
त्कोसलाजादाञ्ञ्यङ्॥जनपदशब्दात्क्षत्रियादित्येव। वृद्धादिकारांतात्प्रातिपदिकात्कोसलअजादशब्दाभ्यांचाप
त्येञ्यङ्प्रत्ययोभवति। अञोपवादः। वृद्धनावत्। आंबष्ठ्यः। सौवीर्यः। इकारांतात्। आवंत्यः। कौंत्यः। कोसलाजादयो
रवृद्धार्थंवचनं। कौसल्यः। आजाद्यः। तपरकरणंकिं। कुमारीनामजनपदसमानशब्दःक्षत्रियः। तस्यापत्यंकौमारः। पांडो
र्जनपदशब्दात्क्षत्रियाड्यण्वक्तव्यः। पाण्ड्यः। अन्यस्मात्पाण्डवएव। तस्यराजनीत्येव। आम्बष्ठ्योराजा। आवंत्यः। कौंत्यः।
कौसल्यः। आजाद्यः॥१७१॥कुरुनादिभ्योण्यः॥जनपदशब्दात्क्षत्रियादित्येवकुरुशब्दान्नादिभ्यश्चप्रातिपदिकेभ्योण्यः
प्रत्ययोभवति। अञोपवादः। कौरव्यः। नकारादिभ्यः। नैषध्यः। नैपथ्यः। तस्यराजनीत्येवकौरव्योराजा।१७२॥साल्वावय

का०४
२१ यप्रत्यग्रथकालकूटाश्मकादिञ्। जनपदशब्दात्क्षत्रियादित्येव सल्वानामक्षत्रियात्तन्नामिका तस्यापत्यं व्यवर्द्धतिकः
साल्वेयः। अणपीष्यन्ते। साल्वः। तस्य निवासः। साल्वो जनपदः। तदवयवा उदुम्बरादयस्तेभ्यः क्षत्रियवृत्तिभ्य इदं प्रत्यय
विधानं साल्वावयवेभ्यः प्रत्यग्रथकालकूटअश्मकशब्देभ्यश्चापत्ये इञ् प्रत्ययो भवति। अत्रोपवादः। औदुम्बरिः तैल
खलिः। माद्रकारिः। यौगन्धरिः। भौलिंगिः। शारदंडिः प्रात्यग्रथिः। कालकूटिः। आश्मकिः। तस्य राजनीत्येव। औदुंबरो
राजा। उदुंबरास्तिलखलामद्रकारयुगंधराभुलिंगाः शरदंडाश्च साल्वावयवसंज्ञिताः॥७३॥ तद्राजा॥ जनपद श
ब्दात्क्षत्रियादञित्येवमादयः प्रत्ययाः सर्वनाम्ना प्रत्यवमृश्यन्ते न तु प्रवेगोत्र इव संज्ञाः। कोऽनव्यवहितत्वात्तेः त्वादय
स्तद्राजसंज्ञा भवन्तीति वेदितव्यं। उदाहृतम्। तद्राजप्रदेशास्तद्राजस्य बहुषु तेनैवास्त्रियामित्येवमादयः॥७४॥ कम्बोजा
ल्लुक्। जनपदशब्दात् क्षत्रियादित्येनानाविहितस्यांसात्लुगुच्यते। कम्बोजात्प्रत्ययस्य लुग्भवति। कम्बोजः। क
म्बोजादिभ्यो लुग्वचनं चोलाद्यर्थं। कंबोजः। चोलः। केरलः। शकः। यवनः। तस्य राजनीत्येव कम्बोजो राजा॥७५॥
स्त्रियामवन्तिकुन्तिकुरुभ्यश्च॥ अवन्ति॥ कुंतिकुरुशब्देभ्य उत्पन्नस्य स्त्रियामभिधेयायां लुग्भवति। अवंतिकुन्तिभ्यां
ण्यङः कुरोर्ण्यस्य। अवन्ती। कुन्ती। कुरूः॥ स्त्रियामिति किं॥ आवन्त्यः। कौन्त्यः। कौरव्यः॥७६॥ अतश्च॥ स्त्रियामित्ये
व अकारप्रत्ययस्य तद्राजस्य स्त्रियामभिधेयायां लुग्भवति। तकारो विस्पष्टार्थः। शूरसेनी। मद्री। दरत्। अवं
त्यादिभ्यो लुग्वचनात्तदन्तविधिरत्र नास्तीति नेह न भवति। आंबष्ठ्या सौवीर्या॥७७॥ न प्राच्यभर्गादियौधेयादि
भ्यः॥ प्राच्येभ्यो भर्गादिभ्यो यौधेयादिभ्यश्चोत्पन्नस्य लुग्न भवति अतश्चेत्यनेन स्त्रियां लुक् प्राप्तः प्रतिषिध्यते प्रा ॥२१
च्येभ्यः क्षत्रियेभ्यस्तावत् पाञ्चाली वैदेही आंगी वांगी मागधी भर्गादिभ्यः भार्गी कारूषी कैकेयी यौधेया

दिभ्यः यौधेयी शौभ्रेयी शौक्रेयी॥ कस्य पुनरकारस्य यौधेयादिभ्यो लुक् प्राप्तः प्रतिषिध्यते॥ पार्श्वनिकस्यात्रः पार्श्वा
दियौधेयादिभ्यो ऽणञावित्येतस्य॥ कथं पुनस्तस्य भिन्नप्रकरणस्यानेन लुक् प्राप्नोति। एतदेव विज्ञापयति पार्श्वि
कस्यापि तद्राजस्यातश्चेत्यनेन लुग्भवतीति किमेतस्य ज्ञापने प्रयोजनम्। पार्श्वादिभ्यः स्त्रियां लुक् सिद्धो भवति प
र्शुः रक्षाः॥ असुरी। तथा चोक्तं। यौधेयादिप्रतिषेधो ज्ञापकं पार्श्वादेर्लुगिति। भर्गः करूष केकय कश्मीर
साल्व॥ सुस्थाल। उरस्‍ कौरव्या भर्गादिः यौधेयः शौभ्रेयः शौक्रेयः ज्यावानेय धार्तेय त्रिगर्त भरत उशी
नर। यौधेयादिः॥७८॥ धी॥१॥ इति काशिकायां वृत्तौ चतुर्थाध्यायस्य प्रथमः पादः समाप्तः॥ तेन रक्तं रागात्॥ शु
क्लस्य वर्णान्तरापादनमिह रञ्जेरर्थः। रज्यते नेनेति रागः। तेनेति तृतीया सामर्थ्याद्रागविशेषवाचिनः शब्दाद्रक्तमि
त्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति॥ कषायेण रक्तं वस्त्रं काषायं। माञ्जिष्ठं। कौसुंभं। रागादिति किं। देवदत्ते
न रक्तं वस्त्रं। कथं काषायौ गर्दभस्य कर्णौ। हारिद्रौ कुक्कुटस्य पादौ इति। उपमानाद्भविष्यति काषायाविव काषा
यौ हारिद्राविव हारिद्रौ इत्येवं या घ्रादजिति यावत् तृतीया समर्थविभक्तिरनुवर्तते॥७९॥ लाक्षारोचनाशका
लकर्दमाट्ठक्॥ लाक्षादिभ्यो रागवचनेभ्यस्तृतीयासमर्थेभ्यो रक्तमित्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। अणोऽप
वादः। लाक्षया रक्तं वस्त्रं। लाक्षिकं। रौचनिकं। शाकलिकं। कार्दमिकं। शकलकर्दमाभ्यामणपीष्यते। शाकलं। का
र्दमं। नील्या अन्वक्तव्यः। नील्या रक्तं नीलं वस्त्रं। पीतात्कन्वक्तव्यः। पीतेन रक्तं पीतकं। हरिद्रामहारजनाभ्याम
ञ्वक्तव्यः। हारिद्रं। माहारजनं॥८०॥ नक्षत्रेण युक्तः कालः॥ तृतीया समर्थविभक्तिरनुवर्तते। तेनेति तृतीया सम
र्थात्। नक्षत्रविशेषवाचिनः शब्दाद्युक्त इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। योऽसौ युक्तः कालश्चेत्स भ

का०४ वति। कथं पुनर्नक्षत्रेण पुष्यादिना कालो युज्यते। पुष्यादिसमीपस्थे चंद्रमसि वर्त्तमानाः पुष्यादिशब्दाः प्रत्ययमुत्पा
२२ दयन्ति। पुष्येण युक्तः कालः पुष्यसमीपस्थेन चंद्रमसा युक्त इत्यर्थः। पौषी रात्रिः। पौषमहः। माघी रात्रिः। माघमहः।
नक्षत्रेणेति किं। चंद्रमसा युक्ता रात्रिः। काल इति किं। पुष्येण युक्तश्चंद्रमाः॥८१॥ लुबविशेषे॥ पूर्वेण विहितस्य प्रत्यय
स्य लुब् भवति अविशेषे॥ न चेन्नक्षत्रयुक्तस्य रात्र्यादिविशेषोऽभिधीयते। यावान् कालो नक्षत्रेण युज्यते अहोरात्रस्या
विशेषे लुब् भवति। अद्य पुष्यः। अद्य कृत्तिकाः। अद्य कृत्तिकाः। विशेष इति किं। पौषी रात्रिः। पौषमहः॥८२॥ संज्ञायां श्रव
णाश्वत्थाभ्याम्॥ अविशेषे लुब् विहितः पूर्वेण। विशेषार्थोऽयमारंभः। श्रवणशब्दादश्वत्थशब्दाच्च उत्पन्नस्य प्रत्ययस्य
लुब् भवति संज्ञायां विषये। श्रवणा रात्रिः। अश्वत्थो मुहूर्त्तः। स्त्रीयुक्तवद्भावः कस्मान्न भवति। निपातनात्। विभाषा फाल्गु
न्यश्रवणाकार्त्तिकीचैत्रीभ्य इति। संज्ञायामिति किं। श्रावणी रात्रिः। आश्वत्थी रात्रिः॥८३॥ द्वंद्वाच्छः॥ नक्षत्रद्वंद्वात् तृतीयासमर्थाद्यु
क्ते काले छः प्रत्ययो भवति विशेषे चाविशेषे च। राधानुराधीया रात्रिः। तिष्यपुनर्वसवीयमहः। अविशेषे। आद्य रा
धानुराधीयं। आद्य तिष्यपुनर्वसवीयं। लुपं परत्वाद् बाधते॥८४॥ दृष्टं साम॥ तेनेति। तृतीयासमर्थाद् दृष्टमित्येत
स्मिन्नर्थे यथाविहितं प्रत्ययो भवति। यद् दृष्टं साम चेत् तद् भवति। क्रुंचेन दृष्टं साम क्रौंचं साम। वासिष्ठं। वै
श्वामित्रं॥८५॥ कलेर्ढक्॥ कलिशब्दात् तृतीयासमर्थाद् दृष्टं सामेत्येतस्मिन्नर्थे ढक् प्रत्ययो भवति। अणोऽपवादः। कलि
ना दृष्टं साम कालेयं। सर्वत्राग्निकलिभ्यां ढग्वक्तव्यः। अग्निना दृष्टमाग्नेयं। एवमग्नौ भवमग्नेरागतमग्नेः स्वमिति सर्व २२
त्र ढगेव भवति। आग्नेयं। तथा कालेयमपि प्रतिपत्तव्यं। दृष्टे सामनि जाते च अण् वा डिद् भवतीति वक्तव्यं। उशनसा दृष्टं साम औ
शनसं। औशनं। जाते चार्थे योऽन्येन बाधितः पुनरण् विधीयते स वा डिद् भवतीति वक्तव्यं। शतभिषजि जातः शातभिषः।
शार्ङ्गीव्यतोऽण् प्राप्तः कालतेजसा बाधितः। संधिवेलाद्यृतुनक्षत्रेभ्य इति पुनर्विधीयते स वा डिद् भवतीति वक्तव्यं। शातभि
षजि जातः शातभिषः। शातभिषजः। तीयादीकक् स्वार्थे वा वक्तव्यः। द्वैतीयीकं। तार्त्तीयीकं। द्वितीयकं। तृतीयकं। न वि
द्यायाः। द्वितीया विद्या। गोत्रादंकवदिष्यते दृष्टं सामेत्यस्मिन्नर्थे। औपगवेन दृष्टं साम औपगवकं। कापटवकं। गोत्रच
रणाद् वुञ् भवति। दृष्टे सामनि जाते च द्विरण् डिद् वा विधीयते। तीयादीकक् न विद्यायाः गोत्रादंकवदिष्यते॥८६॥ वामदेवा
ड्ड्यड्ड्यौ॥ वामदेवशब्दात् तृतीयासमर्थाद् दृष्टं सामेत्यस्मिन्नर्थे ड्यत् ड्य इत्येतौ प्रत्ययौ भवतः। अणोऽपवादः। वामदेवेन दृष्टं साम
वामदेव्यं साम। तिलकरणं स्वरार्थं। डित्करणं किमर्थं। ययतोश्चातदर्थ इति नञ उत्तरस्यान्तोदात्तत्वं विधास्यमानं नञो यद्यह
णे माभूत्। अननुबंधकग्रहणपरिभाषया एकानुबंधकग्रहणपरिभाषया चानयोर्निवृत्तिः क्रियते। अवामदेव्यं।
सिद्धे यस्येति लोपेन किमर्थं ययतौ डितौ। ग्रहणं मा तदर्थे भूद् वामदेव्यस्य नञ् स्वरे॥८७॥ परिवृतो रथः॥ तेनेति तृती
यासमर्थात् परिवृत इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। योऽसौ परिवृतो रथश्चेत् स भवति। वस्त्रेण परिवृतो रथः
वास्त्रो रथः। कांबलः। चार्मणः। रथ इति किं। वस्त्रेण परिवृतः कायः। समंताद् वेष्टितः परिवृत उच्यते। यस्य कश्चिदवयवो
वस्त्रादिभिरवेष्टितः तेन न भवति। छात्रैः परिवृतो रथः॥८८॥ पाण्डुकम्बलादिनिः॥ पाण्डुकंबलशब्दात् तृतीयासम
र्थात् परिवृतो रथ इत्येतस्मिन्नर्थे इनिः प्रत्ययो भवति। अणोऽपवादः। पाण्डुकंबली। पाण्डुकंबलिनौ। पाण्डुकम्बलिनः।
पाण्डुकम्बलस्य वाचकः मत्वर्थीयेन वा सिद्धं वचनमणो निवृत्त्यर्थं॥८९॥ द्वैपवैयाघ्रादञ्॥ द्वीपिव्याघ्रयोर्विकार
भूते चर्मणि द्वैपवैयाघ्रे ताभ्यां तृतीयासमर्थाभ्यां परिवृतो रथ इत्येतस्मिन्नर्थे अञ् प्रत्ययो भवति। अणोऽपवादः। स्वरे वि
शेषः। द्वैपेन परिवृतो रथः द्वैपः। वैयाघ्रः॥९०॥ कौमारापूर्ववचने॥ कौमार इत्येतदण्प्रत्ययान्तं निपात्यते अपूर्ववचने

का॰४ ने। पाणिग्रहणास्यापूर्व्ववचनं। उभयतः स्त्रिया अपूर्वत्वं निपातनमेतत्। अपूर्व्वपतिं कुमारीं पतिरुपपन्नः कौमारः पतिः। कु
२३ मारीशब्दाद्द्वितीयासमर्थादुपयन्तरि प्रत्ययः। अपूर्वपतिः कुमारी पतिमुपपन्ना कौमारी। भार्य्या प्रथमान्तादेव स्वार्थे प्रत्य
यः। अपूर्व्वत्वं द्योत्य। कौमारपूर्व्ववचनेकुमार्य्या अण्विधीयते। अपूर्व्वत्वं यदा तस्याः कुमार्य्या भवतीति वा। अनेन प्रत्या
ख्यातो योगः। कुमार्य्या भवः कौमारः पतिः। तस्य स्त्री कौमारी भार्य्येति सिद्धम्॥१९१॥ तत्रोद्धृतममत्रेभ्यः॥ तत्रेति सप्त
मीसमर्थादमत्रवाचिन उद्धृतमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। भुक्तोच्छिष्टमुद्धृतमुच्यते यस्यां धारणमि
ति प्रसिद्धेः। अमत्रं भाजनं पात्रमुच्यते। शरावेषूच्यते। शरावेषूद्धृत ओदनः। शाराव। मात्त्रिकः। कार्परः अमत्रे
भ्य इति किं। पाण्यौद्धृत ओदनः। तत्रेति सप्तमीसमर्था विभक्तिः शाग्दिडग्निलिपावदनुवर्त्तते॥१९२॥ स्थण्डिलाच्छ
यितरि व्रते॥ स्थण्डिलशब्दात्सप्तमीसमर्थाच्छयितर्य्यभिधेये यथाविहितं प्रत्ययो भवति। समुदायेन चेद्व्रतं गम्यते
व्रतमिति शास्त्रितो नियम उच्यते॥ स्थण्डिले शयितव्रतमस्य स्थाण्डिलो भिक्षुः स्थाण्डिलो ब्रह्मचारी। व्रत इति किं। स्थण्डिले
शेते ब्रह्मदत्तः॥१९३॥ संस्कृतं भक्षाः॥ तत्रेति सप्तमीसमर्थात्। संस्कृतमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति यत्सं
स्कृतं भक्षाश्चेत्ते भवन्ति खरविशदमभ्यवहार्य्यं भक्ष्यमित्युच्यते। सत उत्कर्षाधानं संस्कारः। भ्राष्ट्रे संस्कृता भक्षा भ्राष्ट्राः
अपूपाः कालशा भक्षा इति किं। पुष्पपुटे संस्कृता माला गुणः॥१९४॥ शूलोखाद्यत्॥ शूलशब्दादुखाशब्दाच्च सप्त
मीसमर्थात्संस्कृतं भक्षा इत्येतस्मिन्नर्थे यत्प्रत्ययो भवति। अणोऽपवादः शूले संस्कृतं शूल्यं मांसं। उख्यम्॥१९५॥ दध्न
ष्ठक्॥ दधिशब्दात्सप्तमीसमर्थात्संस्कृतं भक्षा इत्येतस्मिन्नर्थे ठक्प्रत्ययो भवति। दधनि संस्कृतं दाधिकं। ननु च सं २३
स्कृतार्थो प्राग्वहतेष्ठकं वक्ष्यति। तेनैव सिद्धं। न सिद्ध्यति दध्ना हितं संस्कृतं यस्य दधिकृतमेवोत्कर्षाधानं निहतु दधि

केवलसाधारणं द्रव्यान्तरेण लवणादिना संस्कारः क्रियते॥१९६॥ उदश्वितोऽन्यतरस्यां॥ उदश्विच्छब्दात्सप्तमीसमर्था
त्संस्कृतं भक्षा इत्येतस्मिन्नर्थेऽन्यतरस्यां ठक्प्रत्ययो भवति। पक्षे यथाप्राप्तमणेव भवति। औदश्वित्कं औदश्वित्कं॥१९७॥
॥ क्षीराड्ढञ्॥ क्षीरशब्दात्सप्तमीसमर्थात्संस्कृतं भक्षा इत्येतस्मिन्नर्थेऽन्यतरस्यां ढञ्प्रत्ययो भवति। अणोऽपवादः क्षीरे सं
स्कृता क्षैरेयी यवागूः॥१९८॥ सा॥ सास्मिन्पौर्णमासीति संज्ञायाम्॥ सेति प्रथमासमर्थादस्मिन्निति सप्तम्यर्थे यथाविहितं
प्रत्ययो भवति यत्तत्प्रथमासमर्थं पौर्णमासी चेद्भवति। इतिकरणस्ततश्चेद्विवक्षा संज्ञायामिति समुदायोपाधिः
प्रत्ययान्तेन चेत्संज्ञा गम्यत इति। मासार्द्धमाससंवत्सराणामेषा संज्ञा पौषी पौर्णमासी अस्मिन्पौषो मासः पौषो
र्द्धमासः पौषः संवत्सरः। इह न भवति। पौषी पौर्णमासी अस्मिन्दशरात्रे इति। भृतकमासे न न भवति। इतिक
रणस्य संज्ञाशब्दस्य च तुल्यमेव फलं प्रयोगानुसरणं। तत्र किमर्थं द्वयमुपादीयते। संज्ञाशब्देन तुल्यतामितिकरणस्य
ज्ञापयितुं। न ह्ययं लोके तथा प्रसिद्धः। संज्ञार्थत्वं संप्रतिज्ञाप्यते वा। यत्र तत्रोच्यते इतिकरणस्ततश्चेद्विवक्षेति तदु
पपन्नं भवति। अथ पौर्णमासीति कोऽयं शब्दः। पूर्णमासादण्। पौर्णमासी अथवा पूर्णो माः पूर्णमाः पूर्णमस इयं पौर्ण
मासी। माइति चंद्र उच्यते॥१९९॥ आग्रहायण्यश्वत्थाट्ठक्॥ सास्मिन्पौर्णमासीति सर्व्वमनुवर्त्तते। आग्रहायणीशब्दा
दश्वत्थशब्दाच्च प्रथमासमर्थात्पौर्णमास्युपाधिकादस्मिन्निति सप्तम्यर्थे ठक्प्रत्ययो भवति॥ अणोऽपवादः। आग्रहा
यणिको मासः। अर्द्धमासः। संवत्सरः। एवमाश्वत्थिकः॥२००॥ विभाषा फाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः॥ फाल्गुन्या
दयः पौर्णमासीशब्दास्तेभ्यो विभाषा ठक्प्रत्ययो भवति संज्ञायामित्येतस्मिन्विषये नित्यमणि प्राप्ते पक्षे ठग्विधीयते। फा
ल्गुनो मासः फाल्गुनिकः। श्रावणः। श्रावणिकः। कार्त्तिकः। कार्त्तिकिकः। चैत्रः। चैत्रिकः॥२०१॥ सास्य देवता॥ सेति प्रथ

मासमर्थाद्स्येतिषष्ठ्यर्थे यथाविहितंप्रत्ययोभवतियत्तप्रथमासमर्थंदेवताचेत्साभवति॥ यागसंप्रदानंदेवतादेय
स्यपुरोडाशादेःस्वामिनीतस्मिन्नभिधेयेप्रत्ययः। इंद्रोदेवताअस्येत्यैंद्रंहविः॥ आदित्यं॥ बार्हस्पत्यं॥ प्राजापत्यं॥ देवते
तिकिं॥ कन्यादेवदत्तस्य। कथंमैन्द्रोमन्त्रः॥ मंत्रस्तुत्यमपिदेवतत्वमुपचरंति। कथमाग्नेयोवैब्राह्मणः। उपमानाद्भविष्यति
महाराजप्रोष्ठपदाट्ठञितियावत्सास्यदेवतेत्यधिकारः। सेतिप्रकृतेपुनःसमर्थविभक्तिनिर्देशः संज्ञानिवृत्त्यर्थः॥२०२
कस्येत्॥ कशब्दाद्देवतायाःप्रजापतेर्वाचकस्तत पूर्वेणैवाणप्रत्ययःसिद्धः। इकारादेशार्थंवचनं। कस्यइकारादेशो
भवतिप्रत्ययसन्नियोगेन। कायंहविः। कायमेककपालंनिर्वपेत॥ २०३॥ शुक्राद्घन्॥ शुक्रशब्दात्सास्यदेवतेत
स्मिन्नर्थेघन्प्रत्ययोभवति। अणोपवादः। शुक्रियं। हविः। शुक्रियोध्यायः॥२०४॥ अपोनप्त्रपांनप्तृभ्यांघः॥ अपो
नप्तृअपांनप्तृइत्येताभ्यांघःप्रत्ययोभवति। सास्यदेवतेत्यस्मिन्विषये अणोपवादः॥ अपोनप्त्रियंहविः। अपांनप्त्रियम्
अपोनपादितिदेवतायानामधेयेएते। तयोस्तुप्रत्ययसन्नियोगेनरूपमिदंनिपात्यते॥२०५॥ छच॥ अपोनप्तृअपां
नप्तृइत्येताभ्यांछकारःप्रत्ययोभवति। सास्यदेवतेत्यस्मिन्विषये। अणोपवादः। अपोनप्त्रीयंहविः। अपांनप्त्रीयं॥
योगविभागःसंख्यातानुदेशपरिहारार्थः। छप्रकरणेपैङ्गाक्षीपुत्रादिभ्यउपसंख्यानं। पैङ्गाक्षीपुत्रीयं। तार्णबिंद
वीयं॥ शतरुद्राद्घश्च॥ शतरुद्रीयं॥ शतरुद्रियं॥ २०६॥ महेंद्राद्घाणौच॥ महेंद्रशब्दाद्घाणौप्रत्ययौभवतः
चकाराच्छश्चसास्यदेवतेत्यस्मिन्विषये। महेंद्रदेवताअस्य। महेंद्रियं। हविः। माहेंद्रम्। महेंद्रीयं॥२०७॥ सोमाट्ट्यण॥ त.
सोमशब्दाट्ट्यण्प्रत्ययोभवतिसास्यदेवतेत्यस्मिन्विषये॥ अणोपवादः॥ णकारोवृद्ध्यर्थः। टकारोङीबर्थः॥ सोमो २४
देवतास्यसौम्यंहविः॥ सौम्यंसूक्तं। सौमीऋक्॥२०८॥ वाय्वृतुपित्रुषसोयत्॥ वाय्वादिभ्यःशब्देभ्योयत्प्रत्ययोभवति

सास्यदेवतेत्यस्मिन्विषये। अणोपवादः। वायुर्देवतास्यवायव्यं। ऋतव्यं। पित्र्यं। उषस्यं॥ २०९॥ द्यावापृथिवीशुना
सीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छच॥ द्यावापृथिव्यादिभ्यश्छःप्रत्ययोभवतिचकाराद्यच्चसास्यदेव
तेत्यस्मिन्विषये। अणोपवादः ण्यस्यापवादः। द्यौश्चपृथिवीचद्यावापृथिव्यौ। देवते। अस्यद्यावापृथिवीयं
द्यावापृथिव्यं। शुनश्चसीरश्चतौदेवतेअस्येतिशुनासीरीयं। शुनासीर्यं। शुनोवायुः। सीरआदित्यः। मरुत्वान्देवता
स्यमरुत्वतीयं। मरुत्वत्यं। अग्नीषोमीयं। अग्नीषोम्यं। वास्तोष्पतीयं। वास्तोष्पत्यं। गृहमेधीयं। गृहमेध्यं॥२१०॥ अग्नेर्ढक्॥
अग्निशब्दात्ढक्प्रत्ययोभवति। सास्यदेवतेत्यस्मिन्विषये अणोपवादः। अग्निर्देवतास्य। आग्नेयोष्टकपालः। आ
ग्नेयीत्युच्यते येषुतद्धितार्थेषुसर्वत्राग्निकलिभ्यांढग्वक्तव्यः॥२११॥ कालेभ्योभववत्॥ कालविशेषवाचिभ्यःशब्देभ्योभ
ववत्प्रत्ययाभवन्तिसास्यदेवतेत्यस्मिन्विषयेकालाट्ठञितिप्रकरणेभवेप्रत्ययाविधास्यन्ते। सास्यदेवतेत्यस्मिन्न
र्थेतथैवेष्यंते। तदर्थमिदमुच्यते। वत्करणंसर्वसादृश्यपरिग्रहार्थं। मासिभवंमासिकं। आर्द्धमासिकं। वासंतं। प्रावृषे
ण्यं। तथामासोदेवतास्यमासिकं। आर्द्धमासिकं। सांवत्सरिकं। वासंतं। प्रावृषेण्यं॥२१२॥ महाराजप्रोष्ठपदाट्ठञ्॥ महा
राजशब्दात्प्रोष्ठपदशब्दाच्चठञ्प्रत्ययोभवति। सास्यदेवतेत्यस्मिन्विषये। महाराजोदेवतास्यमाहाराजिकं। प्रौष्ठपदि
कं। ठञ्प्रकरणेतदस्मिन्वर्ततइतिनवयज्ञादिभ्यउपसंख्यानं। नवयज्ञोस्मिन्वर्ततेनावयज्ञिकः। कालः। पाकयज्ञिकः। पू
र्णमासादण्। पूर्णमासोस्यांवर्ततेपौर्णमासीतिथिः॥ २१३॥ पितृव्यमातुलमातामहपितामहाः॥ पितृव्यादयोनिपात्यंतेसमर्थ
विभक्तिःप्रत्ययःप्रत्ययार्थःअनुबंधइतिसर्वंनिपातनाल्लभ्यं। पितृमातृभ्यांभ्रातरिव्यन्डुलचौ। पितृमातृभ्यामभिधेये
व्यन्डुलचौइत्येतौप्रत्ययौनिपात्येतेपितुर्भ्रातापितृव्यः। मातुर्भ्रातामातुलः। ताभ्यांपितरिडामहच्। मातरिषिच्च। ताभ्यां

मेवपितामहमातामहचप्रत्ययोभवति। पितुःपितामहःमातुःपितामहाः॥मातरिपितरिच॥ पितामहः। मातामहः। अंवष्ठंधेमातरि
समरीसवः। अंवष्ठस्यधमविसोठं। अविदूसं। अविमरीसंतिल्लानिष्फलात्पिजपंजोप्रत्ययौवक्तव्यौ। निष्फलस्तिलःपिंजः
तिलपेजः। पिजःछंदसिडिच। तिलिञ्जः॥२१४॥तस्यसमूहः॥तस्येतिषष्ठीसमर्थात्समूहइत्येतस्मिन्नर्थेयथाविहितं
प्रत्ययोभवति। किमिहोदाहरणं। चित्तवदाद्युदात्तमगोत्रंयस्यचनान्यत्प्रतिपदंग्रहणं। अचित्ताट्ठकंवक्ष्यति। अ
नुदात्तादेरञ्। गोत्राद्वुञ्। प्रतिपदंचकेदाराद्यञ्चेत्येवमादितत्परिहारेणात्रोदाहरणंद्रष्टव्यं। काकानांसमूहःकाकं
बाकंइतिअकच्चश्चेतियावत्समूहाधिकारःगुणादिभ्योग्रामच्वक्तव्यः। गुणग्रामः। गुणकरण। तत्वाउग्राद्य। इंद्रिय। आ
कृतिगणः॥२१५॥भिक्षादिभ्योऽण्॥भिक्षेत्येवमादिभ्यःशब्देभ्योऽण्प्रत्ययोभवतितस्यसमूहइत्येतस्मिन्विषयेअणग्रहणं
बाधकबाधनार्थं भिक्षाणांसमूहोभैक्षवं। गार्भिणंयुवतिशब्दोत्रपठ्यतेतस्यग्रहसामर्थ्योत्पुंवद्भावोनकर्तव्यःभस्याढेत
द्धतइतियुवतीनांसमूहोयौवनं। भिक्षागर्भिणी। क्षेत्राकरोषाअंगार। चर्मिन। धर्मिन। सहस्रायुवतिपदाति। पद्धति
अथर्वन। अर्वन्। दक्षिणा। वृत्तविषयश्चात्र। वृक्षादिभ्यःखंडोवक्तव्यः। वृक्षखंडः। तरुखंडः वृक्ष। तरु। पादप॥
२१६॥गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद्वुञ्॥गोत्रादिभ्योवुञ्प्रत्ययोभवतितस्यसमूहइत्येतस्मिन्वि
षये॥अपत्याधिकारादन्यत्रलौकिकंगोत्रंगृह्यते। अपत्यमात्रंनतुपौत्रप्रभृत्येव। औपगवानांसमूहःऔपगवकाापटवकं।
उक्षन्। औक्षकं। उष्ट्र। औष्ट्रकं। उरभ्र। औरभ्रकं। राजन। राजकं। राजन्य राजन्यकं। वत्सवात्सकं मनुष्य। मानुष्यकं। अजआ
जकं। प्रकृत्याके राजन्यमनुष्ययुवानइतियलोपोनभवति। आपत्यस्यचतद्धितेनातीति। वृद्धाच्चेतिवक्तव्यं। वृद्धा
नांसमूहोवार्द्धकं॥२१७॥केदाराद्यञ्च॥ केदारशब्दात्यञ्प्रत्ययोभवतिचकाराद्वुञ्। तस्यसमूहइत्येतस्मिन्विष

ये। अचित्तलक्षणस्यठकोपवादः। केदाराणांसमूहः। कैदार्यं। कैदारकं। गणिकायाश्चयञ्वक्तव्यः। गणिकानां
समूहोगाणिक्यं॥२१८॥ठञ्कवचिनश्च॥कवचिन्शब्दादुञ्प्रत्ययोभवतितस्यसमूहइत्येतस्मिन्विषयेकवचिनांस
मूहः। कावचिकं। चकारःकेदारानित्यस्यानुकर्षणार्थः। केदाराणांसमूहःकैदारिकं॥२१९॥ब्राह्मणमाणववाडवा
द्यत्॥ब्राह्मणादिभ्यःशब्देभ्योयत्प्रत्ययोभवतितस्यसमूहइत्येतस्मिन्विषयेतकारःस्वरार्थः। ब्राह्मणानांसमूहोब्रा
ह्मण्यं। माणव्यं। वाडव्यं। यत्प्रकरणेपृष्ठादुपसंख्यानं। पृष्ठानांसमूहःपृष्ठ्यःअन्हःखक्रतौ। अन्हांसमूहोअहीनः
क्रतुः क्रतावितिकिं। आह्नः। खंडिकादिषुदर्शनात्अभवति। पर्श्वाणश्चवक्तव्यः। पर्शूनांसमूहःपार्श्वपदसंज्ञक
त्वानुगुणोनभवति। वातादूलः। वातानांसमूहोवातूलः॥२२०॥ग्रामजनबंधुसहायेभ्यस्तल्॥ग्रामादिभ्यस्तल्प्र
त्ययोभवतितस्यसमूहइत्येतस्मिन्विषये। ग्रामाणांसमूहःग्रामता। जनता। बंधुता। सहायता। गजाच्चेतिवक्तव्यं। गजता
॥२१॥अनुदात्तादेरञ्॥अनुदात्तादेःशब्दादञ्प्रत्ययोभवति। तस्यसमूहइत्येतस्मिन्विषये। कपोतानांसमूहःकापोतं
मायूरं। तैत्तिरं॥२२॥खंडिकादिभ्यश्च॥खंडिकाइत्येवमादिभ्यःशब्देभ्योऽञ्प्रत्ययोभवतितस्यसमूहइत्येतस्मिन्विषये
आद्युदात्तार्थमचित्तार्थञ्चवचनं। खंडिकानांसमूहःखांडिकं। वाडवंक्षुद्रकमलवशब्दोत्रपठ्यते। क्षुद्रकाश्चमालवा
श्चेतिक्षत्रियद्वंद्वः। ततःपूर्वेणैवात्रसिद्धेवचनंगोत्रवुञ्बाधनार्थंननुचपरत्वादञावुञ्बाधिष्यते। नचगोत्रसमुदा
योगोत्रेनचतदंतविधिरस्त्यस्ति। एवंतर्हिएतज्ज्ञापयतिवुञ्पूर्वविप्रतिषेधःसामूहिकेषुतदंतविधिरस्तीतिप्रयोज
नं। औपगवकं। कापटवकमितिवुञ्भवति। वानहस्तिकं। गौधेनुकमितिचतदंतविधिरस्त्यस्ति। एवंतर्हिज्ञापयतिवुञ् एतत
पूर्वविप्रतिषेधःसामूहिकेषुतदंतविधिरस्तीतिप्रयोजनं। औपगवकं। कापटवकमितिवुञ्भवति। वानहस्तिगौधेनु

का॰४ कमितितदंतविधिः। क्षुद्रकमालवादित्येतावता योगविभागेन पूर्वविप्रतिषेधस्तदंतविधिश्च ज्ञापितः पुनरस्यैवनिय
२६ मार्थमुयंत। सेनासंज्ञायामिति। क्षुद्रकमालवात्सेनासंज्ञायामेवाभवति। क्षौद्रकमालवीसेना। क्षौद्रकमालवकमन्य
तअन्सिद्धिरनुदात्तादेः। कोर्थः क्षुद्रकमालवात् गोत्राद्दुञ्चतद्धांतंतदंतान्नच सर्वतः। ज्ञापकंस्यात् तदंतस्तथाच
पिशलेस्त्रिंधिः सेनायां नियमार्थंच। यथावाध्येतचाञ्चवुञ्। खंडिकावडवा। क्षुद्रकमालवात्सेनासंज्ञायांभिक्षुक
क। शुक्र। उलूकाश्वन्। अहन्युगवरत्राहलबंध॥२२३॥ चरणेभ्योधर्मवत्॥ चरणशब्दाः कठकलापादयः तेभ्यः
षष्ठीसमर्थेभ्यः समूहेधर्म्मवत्प्रत्ययान्भवन्ति। गोत्रचरणाद्वुञित्यारभ्य प्रत्ययावक्ष्यतेतत्रवेदमुच्यते चरणाद्धर्म्मा
म्नाययोरितितेन धर्म्मवत्पतिदेशः क्रियतेवतिः सर्वसादृश्यार्थः। कठानांधर्म्मः काठकं। कालापकंछांदोग्यमौक्थि
क्यं। आथर्वणं। तथासमूहेपि। काठकं। कालापकं। छांदोग्यं आथर्वणं॥२२४॥ अचित्तहस्तिधेनोष्ठक्॥ अचित्तार्थं
भ्योहस्तिधेनुशब्दाभ्यां चठक्प्रत्ययोभवतितस्यसमूहइत्येतस्मिन्विषये। अपूपानांसमूहः आपूपिकं शाष्कुलिकं हास्तिकं
धैनवं। धेनोरनञइतिवक्तव्यं। आधेनवं॥२२५॥ केशाश्वाभ्यांयञ्छावन्यतरस्याम्॥ केशअश्वइत्येताभ्यां यथासंख्यंयञ्छ
इत्येतौप्रत्ययौभवतः अन्यतरस्यांतस्यसमूहइत्येतस्मिन्विषये। केशानांसमूहः कैश्यं कैशिकं। अश्वानांसमूह आश्वं। अश्वी॥
२२६॥ पाशादिभ्यो यः॥ पाशादिभ्योयप्रत्ययोभवतितस्यसमूहइत्येतस्मिन्विषये पाशानांसमूहः पाश्या। तृण्या। पाश
तृण। धूम। वात। अंगार। पाटलका पिटक। शाकटहल। नट। वन॥२२७॥ खलगोरथात्॥ खलगोरथशब्देभ्योयः प्रत्ययो
भवतितस्यसमूहइत्येतस्मिन्विषये। खलानांसमूहः खल्या। गव्या। रथ्यापाठउत्तरार्थः॥ २२८॥ इनित्रकट्यचश्च॥ खल २६
गोरथशब्देभ्यो यथासंख्यंइनित्र॥ कट्यचइत्येते प्रत्ययाभवंतितस्यसमूहइत्येतस्मिन्विषये खलिनी। गोत्रा। रथकट्या। सक्त

DR. BHAU DAJI
डाक्टर भाऊदाजीइत्याख्यस्यमारकम्

सक्तचद्वय। अंशवराग। अभ्रन्। कूट। मलिन। तीर्थअगस्ति। विरत। विकर। नासिका॥ संकाशादि॥ १०॥ बल्लादिभ्योयः
प्रत्ययोभवति॥ बल्यं कुल्यंबुलबूल। कुल। तुल। उल। दुन। वनकुवल। नकुलवत॥ बल्लादिः॥ ११॥ पक्षादिभ्यः फक्प्रत्य
योभवति॥ पाक्षायणः। तौषायणः। पक्ष। तुष। अंडकिलका चित्राअति। स्वन्। पथित्। पंथव। कुंभ। सीरज। सकल। सम
ल। रैमन्। लोमन्। हंसक। सकंडक। अस्थिवल। पक्षादिः॥१२॥ कर्णादिभ्यः फिञ्प्रत्ययोभवति॥ कार्णायनिः वासिष्ठायनिः
कर्ण। वसिष्ठ। अर्कलूश। शल। द्रुपद। अनडुह्। पांचजन्य। स्फिग। कुलिश। जंभ। जीवंतीजित्व। अडीवंनु। कर्णादिः॥१३॥
सुतंगमादिभ्यइञ्प्रत्ययोभवति। सौतंगमिः। मौनिचित्तिः॥ सुतंगम॥ मुनिचित्त। विप्रचित्त। महापुत्र। श्वेन। अदिका। शुक्र। व्यग्र
बीजवापिन्। श्वन्। अर्जुन। अजिर॥ सुतंगमादिः॥१४॥ प्रगद्यादिभ्यो ञ्यः प्रत्ययोभवति॥ प्रागद्यं। मागद्यं। प्रगदिन्॥
मगदिक लिवखडि। चगदिन। चूडार। मार्ज्जार। कोविदार॥ प्रगद्यादिः॥१५॥ वराहादिभ्यः कक्प्रत्ययोभवति॥ वाराहकं
पालाशकं॥ वराह॥ पलाश। शिरीष। पिनद्ध। निबद्धस्थूनवलाह। स्थल। विदग्ध। विभग्न। बाहु। खदिर। शर्कर इति वराहा
दिः॥१६॥ कुमुदादिभ्यष्ठक्प्रत्ययोभवति॥ कौमुदिक गोमाथिकं सौमराविकं॥ कुमुद॥ सोमराव रथकार दशग्राम॥
अश्वत्थ। शाल्मलि। कुंडल। मुनिस्थूल। कूट। मुचुकर्ण कुमुदादिः॥१७॥ शिरीषशब्दः अरीहणादिषु कुमुदादिषु वरा
हादिषु च पठ्यते। औत्सर्गिकोपि न तद्बाध्यते। तस्यच वरणादिषु दर्शनाल्लुब्भवति॥ तथाचोक्तं शिरीषाणामदूरभवोग्रा
मः शिरीषास्तस्यवनं शिरीषवनमिति॥ ८०॥ जनपदेलुप्॥ देशेतन्नाम्नीतियश्चातुरर्थिकः प्रत्ययः ग्रामसमुदायेतस्य
— लुब्भवति। तस्यविशेषे जनपदेभिधेये। ग्रामसमुदायोजनपदः पंचालानांनिवासोजनपदः पंचालाः कुरवः मत्स्याः
अंगाः वंगाः मगधाः सुह्माः पुंड्राः॥ इदकस्याल्लुब्भवति॥ उदुंबराअस्मिन्देशेसंति। औदुंबरोजनपदः वैदिशोजनपदः

PAGE(S)MISSING

NOT AVAILBLE

27 – 30

इतिनाम्नीतिवर्त्तते। नचात्रलुबंतंतन्नामधेयंभवति॥८१॥वरणादिभ्यश्च॥ वरणइत्येवमादिभ्यउत्पन्नस्यचातुरर्थि
कस्यप्रत्ययस्यलुब्भवत्यजनपदार्थआरंभः। वर्णानामदूरभवंनगरंवरणाः॥शृंगी। शाल्मलयः। वकांगतुकूरमुश्चयार्थः
॥आकृतिगणतामस्यबोधयति॥कटुकबदर्याअदूरभवोग्रामःकटुकबदरी। शिरीषाः। कांची। वरण॥शृंगाःशाल्मलिः
गोदूजनपदः। मथुरा। उज्जयनी। गया। तक्षशिला। उरसा॥ आकृत्या॥८२ शर्करायावा॥ शर्कराशब्दादुत्पन्नस्यचातुरर्थि
कस्यप्रत्ययस्यवालुब्भवति॥ वाग्रहणंकिं॥ यावताशर्कराशब्दःकुमुदादिषुवराहादिषुचपठ्यते।तत्रपाठसामर्थ्यात्प्रत्
ययस्यवालुब्भवतिप्रणं तत्र पाठसामर्थ्यात्प्रत्ययस्यपक्षेश्रवणंभविष्यति। एवंतर्ह्येतत्ज्ञापयति।शर्कराशब्दादौत्सर्गि
कोपिभवति।तस्यायंविकल्पितोलुविति। शर्करा। शार्करंणपाठाच्चश्रवणं। उत्तरसूत्रविहितोवर्द्धोप्रत्ययो। तदेवं
षड्रूपाणिभवन्ति। शर्करा।शार्करं।शार्करकं। शार्शरिकम्। शार्करिका।शार्करीयमिति॥८३॥ ठक्छौ च॥ शर्कराशब्दा
द्ठक्छइत्येतौप्रत्ययोभवतः॥ चातुरर्थिकौ। यथासंभवमर्थसंबंधः।शार्करिकं। शर्करीयं॥८४॥नद्यांमतुप्॥ नद्या
मभिधेयायांमतुप्प्रत्ययोभवतिचातुरर्थिकः। तन्नाम्नोदेशस्यविशेषणंनदीउदुंबाद्यसंलग्नानद्यामुदुंबरावती। नदा।
मशकावती। वरणावती पुष्करावती। इक्षुमतीदुमती। इहकस्मान्नभवति। भागीरथी। भैमरथी। मनुवंतस्यतन्नामधे
यत्वात्॥८५॥ मध्वादिभ्यश्च॥ मधुइत्येवमादिभ्यःशब्देभ्योमतुप्प्रत्ययोभवतिचातुरर्थिकः। अनद्यर्थआरंभः। मधुमान
विशमान॥मधु॥विश। स्थाश। मुष्टि। इक्ष। वेणु। कर्कंधु। शमी। करीर। हिम। किशराशर्पग। मरुव। दीर्घधाट। शर। ३१
इष्टका। तक्षशिलाशक्ति। आसंदी। आसुति। शलाका। आमिधा। वखडावेटा॥मध्वादिः॥८६॥कुमुदनडवेतसेभ्योड्मतु
प्॥ कुमुद।नद।वेतस। इत्येतेभ्योःशब्देभ्योड्मतुप्प्रत्ययोभवति॥चातुरर्थिकः।कुमुद्वान्।नड्वान्। वेतस्वान्। महिषाच्चेति

वक्तव्यं। महिष्मान्नामदेशः॥८७॥नडशादाड्ड्वलच्॥ नडशादशब्दाभ्यांड्वलच्प्रत्ययोभवति। चातुरर्थिकोयथासंभवम
र्थसंबंधः। नड्वलं। शाड्वलं॥८८॥ शिखायावलच्॥शिखायावलच्प्रत्ययोभवति।चातुरर्थिकः। यथासंभवमर्थसं
बंधः। शिखावलंनामनगरं॥मण्प्रकरणेपिशिखायावलचंवक्ष्यति॥ तदेदूगर्थेचवनी॥८९॥ उत्करादिभ्यश्छः॥ उत्करइ
त्येवमादिभ्यश्छप्रत्ययोभवति।चातुरर्थिकः।यथासंभवमर्थसंबंधः। उत्करीयं। संकलीयंशफरीयं। उत्कर। संकल।पिप्पल
पिप्पली। मूल। अश्मन्। अर्कपर्णः। सुपर्ण। खलाजिन।इडा। अग्नितिक। कितव। आतप। अनेक। अनेक।पलाश। त्रि
चण। पिचुलक। अश्वत्थ। काश। क्षुद्र। भस्त्रा। विशाल। अपरोहित। गर्तशाला। अन्य जन्या। अजिन। मर्मच। वर्मन्
उत्क्रोश। शांत। खदिर। सर्पणाय। श्यावनायनैव। चका। नितांत। वृक्षइंद्रवृक्ष। अर्जुनवृक्ष। उत्करादिः॥९०॥नडादीनां
कुक्॥ नडइत्येवमादीनांकुगागमोभवतिछश्चप्रत्ययः। चातुरर्थिकः। यथासंभवमर्थसंबंधः। नडकीयं। प्लक्षकीयंनड
प्लक्ष। बिल्व। वेणु। वेत्र। वेतस। तृण। मक्ष। काष्ठकिपोत। कुंचाह्रस्वत्वंचकुंचकीयं तक्षकीयं। तक्षन्नलोपश्च॥९१॥शे
षे॥ शेषइत्यधिकारोयानितऊर्द्धमनुक्रमिष्यामः शेषेर्थेतेवेदितव्याः। उपयुक्तादन्यःशेषः।अपत्यादिश्चातुरर्थपर्यंते
भ्यायोन्यःसःशेषःतस्येदंविशेषाह्यपत्यसमूहादयस्तेषुघादयोमाभूवन्नितिशेषाधिकारःक्रियते॥किंच। सर्वेषुजातादि
षुघादयोयथास्युःअनंतरेणैवार्थातिदेशेनसंबंधेनकृतार्थतामाविज्ञायीतिमाकल्मार्थेशेषवचनं। वक्ष्यति॥ राष्ट्रावा
रपाराद्घखौ॥राष्ट्रियः।अवारपारीणः। शेषइतिलक्षणंचाधिकारश्चवक्ष्यमाणलक्षितेवाक्षषरूपं।श्रावणःशब्दः।रासनो
रसः।स्पार्शनस्पर्शः। दृषदिपिष्टाःदार्षदाःसक्तवः।उलूखलेक्षुण्णाः। औलूखलोयावकः।चतुर्भिरुह्यतेचातुरं।शकटंवर्तु
ईश्याईश्यातेचातुर्दशंरक्षइति॥९२॥राष्ट्रावारपाराद्घखौ॥ राष्ट्रआवारपारइत्येताभ्यांयथासंख्यंघखइत्येतौप्रत्य

योभवतः। राष्ट्रियः। अवारपारीणः। विगृहीतादपीष्यते। अवारीणः। पारीणः। विपरीताच्च॥पारावारीणः। प्रकृतिविशेषो
पादानमात्रेणतावत्प्रत्यया विधीयंते। तेषांतु जातादयोर्थाः समर्थविभक्तयश्चपुरस्ताद्वक्ष्यंते॥९३॥ ग्रामाद्यखञौ॥
ग्रामशब्दाद्यखञित्येतौप्रत्ययौभवतः। ग्राम्यः। ग्रैम्यः। ग्रामीणः॥९४॥कत्र्यादिभ्योढकञ्॥ कत्रिइत्येवमादिभ्योढकञ्प्र
त्ययोभवति। कात्रेयकाः। औम्भेयकाः। कत्रि। उम्भि। पुष्कर। पुष्कल। मोदन। कुंभी। कुंडिन। नगरी। माहिष्मती। चर्मण्वती। ग्रा
माम। उख्या। कुल्मायायलोपश्च॥कत्र्यादिः॥९५॥ कुलकुक्षिग्रीवाभ्यः श्वास्यलंकारेषु॥ कुलकुक्षिग्रीवाभ्योयथासंख्यं
श्वशस्त्र्यसि। अलंकार। इत्येतेषुजातादिष्वर्थेषुढकञ्प्रत्ययोभवति। कौलेयकोभवतिश्वाचेत्। कौलोन्यः। कौक्षेयकोभ
वतिअसिश्चेत्। कौक्षोन्यः। ग्रैवेयकोभवत्यलंकारश्चेत्। ग्रैवोनरः॥९६॥ नद्यादिभ्योढक्॥ नदीइत्येवमादिभ्योढक्प्र
त्ययोभवति। नादेयं। माहेयं। पूर्वनगरीशब्दोत्रपठ्यते। पौर्वनगरेयं। क्वचित्पूर्वनगरीतिपठंति। विछित्वप्रत्ययंकुर्वं
ति। पौरेयंवानेयं गैरेयमिति। तदुभयमपिदर्शनंप्रमाणं। नदी। मही। वाराणसी। आवंती। कौशांबी। नवकौशांबी।
काशफरी। खादिरी। पूर्वनगरी। पाव। माव। साल्व। दाल्व। वासवका। वडवाया वृषेवाच्ये॥९७॥ दक्षिणापश्चात्पुरसस्त्य
क्॥ दक्षिणापश्चात्पुरसइत्येतेभ्यस्त्यक्प्रत्ययोभवति। शैषिकः। दाक्षिणात्यः। पाश्चात्यः। पौरस्त्यः॥९८॥ कापिश्याःष्फ
क्॥ कापिशिशब्दात्ष्फक्प्रत्ययोभवति। शैषिकः। षकारोङीबर्थः। कापिशायनंमधु। कापिशायनीद्राक्षा। बाल्ह्युर्दि
भ्यश्चेतिवक्तव्यं। बाल्हायनी। और्दायनी। पार्दायनी॥९९॥ रंकोरमनुष्येण्च॥ रंकुशब्दादण्प्रत्ययोभवति चकारात्ष्फक्
शैषिकः। अमनुष्य अभिधेये। रांकवोगौः। रांकवायणोगौः। अमनुष्यइतिकिं। रांकवोकमनुष्यः। ननुचांकुश
ब्दः कच्छादिषुपठ्यते। तत्रमनुष्यतत्स्थयोर्वुञितिमनुष्येपरत्वाद्वुञेवभवितव्यं। कच्छादिषुचपाठादमनुष्येणपि

सिद्धः। किमिहमनुष्यप्रतिषेधेन। अरापग्रहणेनच॥तदुच्यते॥नैवायंमनुष्यप्रतिषेधः। किंतर्हिनञिवयुक्तन्यायेनमनुष्यसदृ
शेपिप्रसिद्धः ~~किमिहमनुष्यप्रतिषेधेन~~ प्राणिनिप्रतिपत्तिःक्रियते। रांकवःकंबलइतिष्फकन्नभवति। विशेषविहितेना
ष्फकाणावाधामाभूदित्यणग्रहणमपिक्रियते॥१००॥ द्युप्रागपागुदक्प्रतीचोयत्॥ दिव। प्राच। अपाच। उदच्। प्रत्यच्
इत्येतेभ्योयत्प्रत्ययोभवतिशैषिकः। दिव्यं। प्राच्यं। उदीच्यं प्रतीच्यं। अव्ययात्तुकालवाचिनः परत्वात्ट्युट्युलौभवतः। प्रा
क्तनं॥१०१॥कंथायाष्ठक्॥ कंथाशब्दात्ठक्प्रत्ययोभवतिशैषिकः। कांथिकः॥१०२॥ वर्णौवुक्॥ कंथायाइत्येव। वर्णौया
कंथायास्तस्यावुक्प्रत्ययोभवति। ठकोपवादः। वर्णौनामनदः तस्यसमीपोदेशोवर्णौ स्तद्विषयार्थवाचिनःकंथाशब्दा
दयंप्रत्ययोभवतितथाहिजनंहिवस्त्रकांथकं॥१०३॥अव्ययात्त्यप्॥ अव्ययात्त्यप्प्रत्ययोभवति। शैषिकः। अमेहक्वत
सित्रेभ्यस्त्यप्विधिर्योव्ययात्स्मृतः। अमात्यः। इहत्यः। क्वत्यः। ततस्त्यः। तत्रत्यः। परिगणनंकिं। औपरिष्टः। पारस्तः। वृद्ध
त्रुछोभवति। आरातीयः। त्यब्नेर्ध्रुवेनियतंनित्यंध्रुवंनियतंनित्यंध्रुवं। नित्यंवांते। निर्गतोवर्णाश्रमेभ्योनिष्ट्यःचांडाला
दिः। आविसश्छंदसि। आविसशब्दाछंदसित्यप्रत्ययोभवति। आविष्ट्यावर्द्धते। अरण्याणोवक्तव्यः। आरण्याःसुमनसः
इत्यादेत्यः। पथिकः। उत्तरादाहञ्। उत्तराहः॥४॥ऐषमोह्यःश्वसोऽन्यतरस्यां॥ ऐषमसत्यसश्वसइत्येतेभ्योन्यतरस्यां
त्यप्प्रत्ययोभवति। शैषिकः। ऐषमस्त्यं। ऐषमस्त्यं सहस्त्यं। त्यस्तनमंश्वस्तस्तु इतिसिद्धेमियतृतीयाभवति। शौवस्तिकं॥५॥ती
ररूप्योत्तरपदादञ्ञौ॥ तीरोत्तरपदाद्रूप्योत्तरपदाच्च। प्रातिपदिकादञ्ञइत्येतौप्रत्ययौभवतः। शैषिकौ। अणोपवा
दौ। कांकतीरं। पाल्वलतीरं। रूप्योत्तरपदात्। वार्करूप्यंशैवरूप्यंतीररूप्यांतादितिनोक्तं। बहच्प्रत्ययपूर्वान्माभूत्। बा
हुरूप्यं। अणेव। स्वरेविशेषइति॥६॥ दिक्पूर्वपदादसंज्ञायांञः॥ असंज्ञायामितिप्रकृतिविशेषणं॥ दिक्पूर्वपदात्प्राति

पदिकादसंज्ञाविषयात्रञः प्रत्ययो भवति। शैषिकाणोपवादः। पौर्वशालः दाक्षिणशालः। आपरशालः। असंज्ञायामिति किं। पूर्वेषुकामशमः। अपरेषुकामशमः। दिवसख्येयसंज्ञायामिति समासः। प्राचां ग्रामनगराणामित्युत्तरपदवृद्धिः। पदग्रहणं स्वरूपविधिनिरासार्थं॥ ७॥ मद्रेभ्योऽञ्॥ दिक्पूर्वपदादित्येव। दिक्पूर्वपदान्मद्रशब्दादञ्प्रत्ययो भवति। पौर्वमद्रः आपरमद्रः। दिशोऽमद्राणामिति पर्युदासादादिवृद्धिरेव॥ ८॥ उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात्॥ दिग्ग्रहणं निवृत्तं। उदीच्यग्रामवाचिनः प्रातिपदिकाद्बह्वचोऽन्तोदात्तादञ्प्रत्ययो भवति। शैषिकः। शैवपुरं माण्डवपुरं। उदीच्यग्रामादिति किं। माथुरं। बह्वच इति किं। ध्वजी। ध्वाजं। अन्तोदात्तादिति किं। शाकरीधानं। शाकरीधानशब्दो लित्स्वरेणाद्युदात्तः॥ ९॥ प्रस्थोत्तरपदपलद्यादिकोपधादण्॥ प्रस्थोत्तरपदात्पलद्यादिभ्यः ककारोपधाच्च प्रातिपदिकादण्प्रत्ययो भवति। शैषिकः। उदीच्यग्रामलक्षणस्याञोऽपवादः। माहिप्रस्थः माहिप्रस्थः। महकिप्रस्थः। माहकिप्रस्थः। पलद्यादिभ्यः। पालदः। पारिषदः। ककारोपधात्। नैलीनकः। वैमातकः। पलद्यादिषु ये वाहीकग्रामास्तेभ्यष्ठञ्ञिठयोरपवादः। यथा गोमतीशब्दः पठ्यते ततो रोपधेतोः प्राचामिति वुञोऽपवादः। वाहीकशब्दः पुंकोपधोऽपि पुनः पठ्यते। परं छं बाधितुं अणग्रहणं बाधकबाधनार्थं। पलदी परिषद। यकृल्लोम पक्षरोमकः। कालकूट। पटच्चर। कणवादिभ्यो गोत्रे॥ इह प्रत्ययार्थो न च प्रकृतिविशेषणं। किं तर्हि वसंबध्यते। कण्वादिभ्यो गोत्रे यः प्रत्ययो विहितस्तदन्तेभ्योऽणपवादः प्रत्ययो भवति। शैषिकश्छस्यापवादः। कछस्यापवादः। काण्वाश्छात्राः। गौकक्षाः। गोत्र इति किं। काण्वो देवतास्य काण्वः। वाहीक। कलकीट मल्लकीट। मलभिदां कमलकीकर। बाहुकीट। नैटकीपरिरथाः। शूरसेनर्तस्यैदं। काण्वीयं कण्वादिर्गर्गाद्यन्तर्गणः ३२
॥ ११॥ दञश्च॥ गोत्र इत्येव। गोत्रे यइञ्विहितस्तदन्तात्प्रातिपदिकादण्प्रत्ययो भवति। शैषिकः छस्यापवादः। दाक्षाः

प्लाक्षाः। भाद्रकाः। गोत्र इत्येव। सौतंगमेरिदं सौतंगमीयं॥ १२॥ न द्व्यचः प्राच्यभरतेषु॥ द्व्यचः प्रातिपदिकान्प्राच्यभरतगोत्रादिञन्तादण्प्रत्ययो भवति। पूर्वेण प्राप्तः प्रतिषिध्यते। बाल्हीयाः। पौष्ठीयाः। काशीयाः। द्व्यच इति किं। पान्नागाराः। प्राच्यभरतेष्विति किं। दाक्षाः। काशीया इति। कथमुदाहृतं। यावता काश्यादिभ्यो भवितव्यं। नैतदस्ति। देशवाचिनः काशिशब्दस्य तत्र ग्रहणं। चेदिशब्देन साहचर्यात्। गोत्रात्तु वृद्धाच्छ एव भवति। ज्ञापकादन्यत्र प्राच्यग्रहणेन भरतग्रहणं न भवतीति स्वशब्देन भरतानामुपादानं कृतं॥ १३॥ वृद्धाच्छः॥ गोत्र इति नानुवर्त्तते। सामान्येन विधानं। वृद्धात्प्रातिपदिकाच्छः प्रत्ययो भवति। शैषिकः। गार्गीयः। शालीयः। मालीयः। अणोऽपवादः। अयं यतो रूप्योत्तरपदोदीच्यग्रामकोपधाविधिं च परत्वाद्बाधते॥ १४॥ भवतष्ठक्छसौ॥ वृद्धादित्येव भवतः शब्दात् वृद्धाद्ठक्छसित्येतौ प्रत्ययो भवतः। शैषिकौ। छस्यापवादो सकारः पदसंज्ञार्थः। भवतस्त्यदादित्वाद्वृद्धसंज्ञा। भावत्कः भवदीयः। अवृद्धाश्च भवतः शतुरणेव भवति भावतः॥ १५॥ काश्यादिभ्यष्ठञ्ञिठौ॥ काश इत्येवमादिभ्यष्ठञ्ञिठ इत्येतौ प्रत्ययौ भवतः शैषिकौ। इकार उच्चारणार्थः। ञकारणकारो यत्र विपर्यस्तदेशो नुबन्धः। स्त्रीप्रत्यये विशेषः। काशिकी। काशिका। चैदिका। वृद्धादित्यनुवर्त्तते। ये त्ववृद्धाः पठ्यन्ते वचनप्रामाण्यात्तेभ्यः प्रत्ययविधिः। देवदत्तशब्दः पठ्यते। तस्य ङ्याञ्चां देश इति वृद्धसंज्ञा। दैवदत्तिकः। वाहीकग्रामशब्दः नास्ति वृद्धसंज्ञा। दैवदत्तः कथं भाष्ये उदाहृतं। वा नामधेयस्य वृद्धसंज्ञादि। देवदत्तीयाः दैवदत्ता इति। यावता वृद्धसंज्ञापक्षे काश्यादित्वाद्ठञ्ञिठाभ्यां भवितव्यं। तत्रैवं वर्णयन्ति वा नामधेयस्येति व्यवस्थितविभाषेयं। सा क्वचिन्नैव भवति ठञ्ञिठयो नभवतीति। काशि चेदि संज्ञा। संवाह। अच्युत मोदमान। शकुलाद। हस्तिकर्षू कुनामन्। हिरण्य। गोवासन। भौरिकि। भौलिंगि। अरिंदम। सर्वमित्र। देवदत्त। सादाशमित्र। करणदाशग्राम। सौधावतान। युवराज। उपराज। सिंधुमित्र। देवराज

का०४ आपदादिपूर्वपदात्कालांतात्। आपत्कालिकी। आपत्कालिका। और्द्ध्वकालिकी और्द्ध्वका। तात्कालिकी। तात्कालिका॥
३५ १६॥ वाहीकग्रामेभ्यश्च॥ वृद्धादित्येव। वाहीकग्रामवाचिभ्यो वृद्धेभ्यः ठञ्ञिठौ प्रत्ययौ भवतः। शैषिकौ छस्यापवादौ।
शाकलिकी। शाकलिका। मांथविकी। मांथविका॥ १७॥ विभाषोशीनरेषु॥ इदमनुवर्त्तते। वाहीकग्रामेभ्य इति। उशीनरेषु
ये वाहीकग्रामेभ्य इति च। उशीनरेषु ये वाहीकग्रामास्तद्वाचिभ्यो वृद्धेभ्यः प्रातिपदिकेभ्यो विभाषा ठञ्ञिठौ प्रत्ययौ भवतः।
आह्वजालिकी। आह्वजालिका। आह्वजालीयाः। सौदर्शनिकी। सौदर्शनिका। सौदर्शनीयाः॥ १८॥ ओर्देशे ठञ्॥ वृ
द्धादिति नानुवर्त्तते। उत्तरसूत्रे पुनर्वृद्धग्रहणात्। उवर्णान्ताद्देशवाचिनः प्रातिपदिकात् ठञ् प्रत्ययो भवति। शैषिकः। नैषा
दकर्षुकः। शाबरजंबुकः॥ देश इति किं॥ पैटोश्चात्राः पाट्याः। अञ्जेठयोः प्रकरणे ठञः केवलस्यानुवृत्तिर्न लभ्यते इति ठञ्ग्र
हणं कृतं॥ वृद्धात्प्राचां॥ ओर्देश इत्येव। उवर्णान्ताद्वृद्धात्प्राग्देशवाचिनः प्रातिपदिकाद् वुञ् प्रत्ययो भवति शैषिकः। आढकजं
बुकः। नापितवास्तुकः। पूर्वेणैव ठञि सिद्धे नियमार्थं वृद्धादेव प्राचां अवृद्धान्न भवति। मल्लवास्तु माल्लवास्तवः॥ २१॥
धन्वयोपधाद्वुञ्॥ वृद्धादिति वर्त्तते देश इति च। धन्ववाचिनो यकारोपधाच्च देशाभिधायिनो वृद्धात् प्रातिपदि
कात् वुञ् प्रत्ययो भवति शैषिकः। धन्वशब्दो मरुदेशवचनः। पारधन्वकः॥ योपधात्॥ सांकाश्यकः। कांपिल्यकः॥ २२॥
प्रस्थपुरवहान्ताच्च॥ वृद्धादित्येव देश इति च। अन्तशब्दः प्रत्येकमभिसंबध्यते। प्रस्थ। पुरवह इत्येवमन्ताद्देशवाचिनः
प्रातिपदिकाद्वृद्धाद् वुञ् प्रत्ययो भवति शैषिकः। छस्यापवादः। मालाप्रस्थकः। नांदीपुरकः। कांतिपुरकः। पैलुवहकः। फाल्गु
नीवहकः। पुरांतो योपधस्तत उत्तरसूत्रेणैव सिद्धम् प्रागर्थमिह ग्रहणं॥ ३००॥ रोपधेतोः प्राचां॥ रोपधादीकारान्ताच्च प्रा ३४
ग्देशवाचिनो वृद्धाद् वुञ् प्रत्ययो भवति शैषिकः। छस्यापवादः। पाटलिपुत्रकाः। ऐकचक्रकाः। ईतः खल्वपि। काकंदकः। माकं

दी। माकंदकः। प्राचामिति किं। दात्तामित्रीयः। तपरणं विस्पष्टार्थं॥ ३०१॥ जनपदतदवध्योश्च॥ वृद्धादित्येव देश इति च॥
तद्विशेषणं जनपदतदवध्योः। वृद्धाज्जनपदवाचिनस्तदवधिवाचिनश्च प्रातिपदिकाद् वुञ् प्रत्ययो भवति शैषिकः। छस्याप
वादः। आभिसारकः। जनपदावधेः खल्वपि। औपुष्टकः। तदवधिरपि जनपद एव गृह्यते। न ग्रामः। किमर्थं तर्हि ग्रह
णं। बाधकबाधनार्थं। गर्त्तोत्तरपदात् छं बाधकबाधनार्थं। छं बाधित्वा वुञेव जनपदावधेर्भवति त्रैगर्त्तकः॥ ३०२॥ अवृ
द्धादपि बहुवचनविषयात्॥ जनपदतदवध्योरित्येव। अवृद्धाद्वृद्धाच्च जनपदतदवधिवाचिनश्च बहुवचनविषयात्प्रा
तिपदिकाद् वुञ् प्रत्ययो भवति शैषिकः। अणश्छयोरपवादः॥ अवृद्धाज्जनपदात्तावत्। अंगाः। कलिंगाः। वंगाः। आंगकः। वांग
कः। कालिंगकः॥ अवृद्धाज्जनपदावधेः॥ अजमीढाः। अजक्रन्दाः। आजमीढकः। आजक्रन्दकः॥ वृद्धाज्जनपदात्॥ दार्वाः
जाम्बाः। दार्वाः। दार्वकः। जांबकः। जांबकः॥ वृद्धाज्जनपदावधेः॥ कालंजराः। वैकुलिशाः। कालंजरकः। वैकुलिशकः।
विषयग्रहणमनन्यत्रभावार्थं जनपदैकशेषबहुत्वे माभूत्। वर्त्तन्यः। वार्त्तनः॥ अपिग्रहणं किं। यावतावृद्धात् पूर्वेणैव
सिद्धं। तत्र कौंडिन्यन्यायेन बाधामाविज्ञायीति समुच्चीयते॥ ३०३॥ कच्छाग्निवक्त्रगर्त्तोत्तरपदाच्च॥ देश इत्येव उत्तरप
दशब्दः प्रत्येकमभिसंबध्यते कच्छाद्युत्तरपदाद्देशवाचिनः प्रातिपदिकाच्च वृद्धाद्वुञ् प्रत्ययो भवति शैषिकः॥ छाणोरप
वादः॥ भारुकच्छकः। पैप्पलीपकच्छकः। कांडाग्नकः। वैभुजाग्नकः। तैंदुवक्त्रकः। सैंधुवक्त्रकः। बाहुगर्त्तकः। चाक्रगर्त्तकः
॥ ३०४॥ धूमादिभ्यश्च॥ धूमादिभ्यो देशवाचिभ्यः प्रातिपदिकेभ्यो वुञ् प्रत्ययो भवति शैषिकः। अणादेरपवादः। धौमकः
षाडुंडकः। पाथेयशब्दः पथ्यते तस्य योपधत्वादेव वुञि सिद्धे सामर्थ्याद देशार्थं ग्रहणं। तथा विदेहानर्त्तशब्दयोर्जनपद
लक्षणे वुञि सिद्धे अदेशार्थः पाठः। विदेहानां क्षत्रियाणां स्वं वैदेहकं। आनर्त्तकं। समुद्रशब्दः पथ्यते तस्य नाविमनुष्येषु वु

न्निष्यंतोसामुद्रिकानौ सामुद्रकोमनुष्यः अन्यत्रनभवति। सामुद्रंजलमिति। धूम। षडंड। शशादन। आर्ज्जुनायन। दांडाय
न। स्थली। मातकस्थली। घोषस्थली। माषस्थली। गजस्थली। राजगृह। सत्रासह। भक्षास्थली। समुद्रकूल। गर्त्तकूल। आंजी
कूल। व्याहा। आहावा। संहीयवर्चाः। वर्चात्ती। विदेह। आनर्त्त। माठर। पाथेय। घोषमित्र्य। मित्रवर्द्ध। स्कंधाशा। धार्त्तराज्ञा
अवयात। तीर्थ। कूलात्। सौवीरेषु। समुद्रान्नावि मनुष्ये च। समुद्र। कुक्षि। अन्तरीयाद्वीप। अरुण। उज्जयिनी। दक्षिणपथ। सांक
त॥ ३०५॥ नगरात्कुत्सनप्रावीण्ययोः॥ नगरशब्दाद्वुञ्प्रत्ययोभवतिशैषिकः। कुत्सने प्रावीण्ये च गम्यमाने। प्रत्ययार्थविशे
षणं चैतत्। कुत्सिते प्रवीणे च जातादौ प्रत्ययार्थ इति कुत्सितं निंदनं। प्रावीण्यं नैपुण्यं। केनायं मुषितः पंथा गात्रक्षेपश्चाखि
धूसरः। इह नगरे मनुष्येण संभाव्यत एतन्नागरकेण। चौरा हि नागरका भवंति। केनेदं लिखितं चित्रमनोनेत्रविका
सि यत्। इह नगरे मनुष्येण संभाव्यत एतन्नागरकेण। प्रवीणा हि नागरका भवंति। कुत्सनप्रावीण्ययोरिति किं। नागरा
ब्राम्हणाः। कन्यादिषु तु संज्ञाशब्देन साहचर्यात् संज्ञानगरं पठ्यते तस्मिन्नागरेयकमिति प्रत्युदाहार्यं॥ ३०६॥ अरण्या
न्मनुष्ये॥ अरण्यशब्दाद्वुञ्प्रत्ययोभवतिशैषिकः। मनुष्येभिधेये। औपसंख्यानिकस्य नस्यापवादः। आरण्यको मनुष्यः।
पथ्यध्यायन्यायविहारमनुष्यहस्तिष्विति वक्तव्यं। आरण्यकः पंथाः। आरण्यकोध्यायः। आरण्यको न्यायः। आरण्यको विहा
रः। आरण्यको मनुष्यः। आरण्यको हस्ती॥ वा गोमयेषु॥ आरण्याः। आरण्यका गोमयाः। एतेष्विति किं। आरण्याः पशवः॥
३०७॥ विभाषा कुरुयुगंधराभ्यां॥ कुरुयुगंधर इत्येताभ्यां विभाषा वुञ्प्रत्ययोभवतिशैषिकः। कौरवकः। कौरवः। यौगंधरकः।
यौगंधरः। जनपदशब्दाद्वृद्धाद्यौ नित्ये वुञि प्राप्ते विकल्प उच्यते। कुरुशब्दः कच्छादिषु पठ्यते तत्र वचनादण्पि भ ३५
विष्यति। परिशेष्यायुगंधरार्था विभाषा मनुष्यतत्स्थयोस्तु कुरुशब्दान्नित्य एव वुञ्प्रत्ययोभवति कौरवको मनुष्यः। कौरव

कमस्य हसितमिति॥ ३०८॥ मद्रवृज्योः कन्॥ मद्रवृजिशब्दाभ्यां कन्प्रत्ययोभवतिशैषिकः। जनपदवुञोपवादः। मद्रे
षु जातः मद्रकः। वृजिकः॥ कोपधादण्॥ देश इत्येव। ककारोपधात्प्रातिपदिकादण्प्रत्ययोभवतिशैषिकः। जनपदवुञो
पवादः। अन्यत्र जनपदं मुक्त्वा पूर्वेणैव कोपधादणा सिद्धं ऋषिकेषु जातः। आर्षिकः। माहिषिकः। अण्ग्रहणमुवर्णांता
दपि यथास्यात्। इक्ष्वाकुषु जातः। ऐक्ष्वाकः॥ ३०९॥ कच्छादिभ्यश्च॥ देश इत्येव कच्छ इत्येवमादिभ्यो देशवाचिभ्यः प्राति
पदिकेभ्योऽण्प्रत्ययोभवतिशैषिकः। वुञादेरपवादः। काच्छः। सैंधवः। वार्णवः। कच्छशब्दो न बहुवचनविषयस्तस्य मनु
ष्यतत्स्थयोर्वुञर्थं पाठः। विजापकशब्दः पठ्यते। तस्य कोपधत्वादेवाणि सिद्धे ग्रहणमुत्तरार्थं। कच्छ। सिंधु। वर्णु। गांधा
र। मधुमत्। कंबोज। कश्मीर। साल्व। कुरु। अणु। खंडद्वीप। अनूप। अजवाह। विजापक। कुलूत। रंकु। कच्छादिः॥ ३१०॥ मनुष्यत
त्स्थयोर्वुञ्॥ कच्छादिभ्य इति च। मनुष्ये मनुष्यस्थे च जातादौ प्रत्ययार्थे कच्छादिभ्यो वुञ्प्रत्ययो भवति। अणोपवादः। का
च्छको मनुष्यः। काच्छकमस्य हसितं जल्पितं। काच्छिका चूडा। सैंधवको मनुष्यः। सैंधवकमस्य हसितं जल्पितं। सैंधविका चू
डा। मनुष्यतत्स्थयोरिति किं। काच्छो गौः। सैंधवो वार्णवः॥ ३१२॥ अपदातौ साल्वात्॥ साल्वशब्दः कच्छादिषु पठ्यते तेन तः
पूर्वेणैव मनुष्यतत्स्थयोर्वुञि सिद्धे नियमार्थं वचनं। अपदातावेव मनुष्ये मनुष्यस्थे च साल्वशब्दाद्वुञ्प्रत्ययो भवति साल्व
कः मनुष्यः। साल्वकमस्य हसितं जल्पितं। अपदाताविति किं। साल्वः पदातिर्व्रजति॥ ३१३॥ गोयवाग्वोश्च॥ गवि यवाग्वां च
जातादौ प्रत्ययार्थे साल्वशब्दाद्वुञ्प्रत्ययो भवति शैषिकः। कच्छाद्यणोपवादः। साल्वको गौः। साल्विका यवागूः। साल्वमन्यत्
॥ ३१४॥ गर्त्तोत्तरपदाच्छः॥ देश इत्येव। गर्त्तोत्तरपदाद्देशवाचिनः प्रातिपदिकाच्छः प्रत्ययो भवति शैषिकः। अणोपवा
दः वाहीकग्रामलक्षणं तु प्रत्ययं परत्वाद्बाधते। वृकगर्त्तीयम्। श्रृगालगर्त्तीयम्। श्वाविद्गर्त्तीयम्। उत्तरपदग्रहणं बहुव्

का०४ व्यूर्वनिरासार्थं॥३१५॥गहादिभ्यश्च॥ गहइत्येवमादिभ्यः प्रातिपदिकेभ्यश्छः प्रत्ययोभवतिशैषिकः। अणोपवादः। ग
३९. हीयः अन्तस्थीयः। देशाधिकारेपि संभवापेक्षंविशेषणंन सर्वेषामध्यमध्यमस्याणवरणइतिपठ्यतेतस्यायमर्थः। मध्यश
ब्दः प्रत्ययसंन्नियोगेनमध्यममापद्यते। मध्यमीयाः। चरणेनुप्रत्ययार्थेणाभवतिमाध्यमाइति। तदेतद्विशेषणएवमर्थंन
पृथिवीमध्यस्यमध्यमाभावः चरणसंबंधनिवासलक्षणेणापितिव॥मुखपार्श्वतसोर्लोपश्च॥मुखतीयं। पार्श्वतीयं
कुग्जनस्यपरकीयं। देवस्यचेतिवक्तव्यं। देवकीयं॥वेणुकादिभ्यश्छणवक्तव्यः॥आकृतिगणोयं। वैणुकीयं। वैत्री
यम्। औत्तरपदकीयं। प्रास्थकीयम्॥गह। अंतस्थमम। विषम। मध्यमध्यमंचाण्वरणे। उत्तम। अङ्ग। वंग मगध। पू
र्वपक्ष। अपरपक्ष। अधम। शाख। मध्यमशाखं। समानशाखएवग्राम। एकवृक्ष। एकपलाश। इष्वग्रांडग्नी। अ
स्पंद्री। पस्थ। स्वाडायनिकांवरणिशैशिरि। शौगि। आसुरि। आहिंसि। आमित्रि। व्याडि। वैदाय। भौति। आद्यश्वि। आ
नृशंसि। सौवि। पारवि। अग्निशर्म्मनदेवशर्म्मन्। श्रौति। आरटकि। वाल्मीकि। क्षेमवृद्धिन। उत्तर। अन्तर। जनपदग्रेः कु
क्षादेवस्य च। वेणुकादिभ्यःछणगहादि॥३१६॥प्राचांकटादेः॥देशइत्येव। तद्विशेषणंप्राग्ग्रहणंप्राग्देशवाचिनःकटा
देः प्रातिपदिकात्छः प्रत्ययोभवतिशैषिकः। अणोपवादः कटनगरीयं। कटस्वोषीयं। कटपल्वलीय॥३१७॥राज्ञः
कचाअसंभवाद्देशाधिकारेनविशेषणंराज्ञःककारश्चान्तादेशोभवतिछश्चप्रत्ययः। राजकीयं। आदेशमात्रमिहविधे
यंप्रत्ययस्तुवृद्धाच्छइत्येवसिद्धः॥३१८॥वृद्धादकेकांतखोपधात्॥देशइत्येववृद्धाद्देशवाचिनः अकइकइत्येवमंता
त्वकारोपधाच्चप्रातिपदिकात्छः प्रत्ययोभवतिशैषिकः। कोपधलक्षणस्यअणोप्रत्ययस्योपधेतोःप्राचामितिव ३९.
आकांतात्तावत॥आरीहणकीयं। द्रौघनकीयं॥इकारांतात॥आश्वपथिकीयंशाल्मलिकीयं। खोपधात। कौटिशि

खीयं। आयोमुखीयं। अकेकांतग्रहणेकोपधग्रहणंसोमकाद्यर्थं। सौमकीयंऐंद्रवेणुकीयं॥३१९॥कंथापलदनगरग्रा
मह्रदोत्तरपदात्॥देशइत्येववृद्धादितिच। कन्याद्युत्तरपदात्॥दाक्षिकंथीयं। माहकिकंथीयं। दाक्षिपलदीयंमाहकिपल
दीयपलदाक्षिनगरीयंमाहिकिनगरीयं। दाक्षिग्रामीयं। माहकिग्रामीयं। दाक्षिह्रदीयं। माहकिह्रदीयं॥३२०॥पर्वताच्च॥
पर्वतशब्दाच्छः प्रत्ययोभवतिशैषिकः अणोपवादः पर्वतीयोराजापर्वतीयः पुरुष॥३२१॥विभाषामनुष्ये॥पर्वतशब्दा
त्छः प्रत्ययोभवतिवाऽमनुष्येवाच्ये। पूर्वेणनित्येप्राप्तेविकल्पउच्यते पर्वतीयानिफलानिपार्वतानिफलानि। पर्वतीय
मुदकंपार्वतमुदकं अमनुष्यइतिकिं। पर्वतीयोमनुष्यः॥३२॥कृकणपर्णाद्भारद्वाजे॥देशइत्येवभारद्वाजशब्दोपिदे
शवचनएवनगोत्रशब्दः प्रकृतिविशेषणंचैतत्नप्रत्ययार्थः। कृकणपर्णशब्दाभ्यांभारद्वाजदेशवाचिभ्यांछःप्रत्य
योभवतिशैषिकः। कृकणीयं। पर्णियं। भारद्वाजइतिकिं। कार्कणं। पार्णं॥२३॥इतिकाशिकायांवृत्तौचतुर्थाध्यायस्य
द्वितीयः पादःसमाप्तिमगमत्॥युष्मदस्मदोरन्यतरस्यांखञ्च॥देशाधिकारोनिवृत्तः युष्मदस्मदोःखञ्प्रत्ययोभवति
शैषिकः। चकाराच्छश्च। अन्यतरस्यांग्रहणाद्यथाप्राप्तश्च। तदेतेत्रयःप्रत्ययाभवन्ति। तत्रैवैपघ्रायुष्मासंख्यन्नावति
त्यदादित्वाद्वृद्धसंज्ञकयोर्युष्मदस्मदोच्छेप्राप्ते। प्रत्येकंप्रत्येकंप्रत्ययत्रयंविधीयते। यौष्माकीणः आस्माकीनः युष्मदी
यः। अस्मदीयः। यौष्माकः। आस्माकः॥३२४॥तस्मिन्नणिचयुष्माकास्माकौ॥तस्मिन्निति साक्षाद्विहितः खञ्निर्दिश्यतेन
चकारानुकृष्टश्छः। तस्मिन्खञिअणिचयुष्मदस्मदोर्यथासंख्यंयुष्माकअस्माकइत्येतावादेशौभवतः निमित्तयोरा
देशौप्रतियथासंख्यंकस्मान्नभवति। योगविभागःकरिष्यते। तस्मिन्खञियुष्मदस्मदोर्युष्माकास्माकौभवतः ततःअणि
चेति। यौष्माकीणः आस्माकीनः यौष्माकः आस्माकः। तस्मिन्नणिचेतिकिं। युष्मदीयः। अस्मदीयः॥३२५॥तवक

का०४ ममकावेकवचने॥ एकवचनपरयोर्युष्मदस्मदोस्तवकममकइत्येतावादेशौ भवतः। यथासंख्यं तस्मिन्नणि च परतः
३० निमित्तयोस्तु यथासंख्यं पूर्ववदेव न भवति। ननु च न लुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधादेकवचनपरता युष्मदस्मदो
न संभवति। वचनात्प्रत्ययलक्षणं संभविष्यति। अथवा नैवेदं प्रत्ययलक्षणं किं तर्ह्यर्थलक्षणं पृथक्वचने युष्मदस्म
दी एकस्यार्थवाचके ते न तवकममकावादेशौ प्रतिपद्येते इति सूत्रार्थः। तावकिनः मामकीनः तावकः मामकः तस्मिन्न
णीत्येव। त्वदीयो मदीयः॥ ३२८॥ अर्द्धाद्यत्॥ अर्द्धशब्दात् यत्प्रत्ययो भवति शैषिकः। अणोऽपवादः॥ अर्द्धं सपूर्वपदा
ट्ठञ्वक्तव्यः॥ वालेयार्द्धिकं गौतमार्द्धिकं॥ परावराधमोत्तमपूर्वाच्च॥ पर अवर अधम उत्तम इत्येवं पूर्वादर्द्धाद्यत्प्रत्य
यो भवति शैषिकः। परार्द्ध्यं। अवरार्द्ध्यं अधमार्द्ध्यं उत्तमार्द्ध्यं॥ पूर्वग्रहणं किं। परावराधमोत्तमेभ्य इत्येवोच्यते अर्द्धादि
ति वर्त्तते तस्य तत्पूर्वतादिज्ञास्यते। परावरशब्दौ अदिक्शब्दावपि स्तः परमुत्तममवरं सकलमिति तत्र कृतार्थत्वात् दिक्शब्द
पक्षे परेण ठञ् स्यात्। अस्मात्पूर्वग्रहणात् यत्प्रत्ययो भवति। परार्द्ध्यमवरार्द्ध्यमिति॥ ३२९॥ दिक्पूर्वपदाट्ठञ्च॥ दिक्पू
र्वपदादर्द्धान्तात्प्रातिपदिकात् ठञ्प्रत्ययो भवति चकाराद्यच्च शैषिकः। अणोऽपवादः। पूर्वार्द्ध्यं पौर्वार्द्धिकं। दाक्षिणा
र्द्ध्यं। दक्षिणार्द्धिकं पदग्रहणं स्वरूपविधिनिवारणार्थं॥ ३२९॥ ग्रामजनपदैकदेशादञ्ठञौ॥ दिक्पूर्वपदादित्येव
ग्रामैकदेशवाचिनो जनपदैकदेशवाचिनश्च प्रातिपदिकाद्दिक्पूर्वपदादर्द्धान्तादञ्ठञौ प्रत्ययौ भवतः शैषिकौ यतो
ऽपवादौ। इमे खल्वस्माकं ग्रामस्य जनपदस्य पौर्वार्द्धाः पौर्वार्द्धिकाः। दाक्षिणार्द्धाः दाक्षिणार्द्धिकाः॥ ३३०॥ मध्यान्मः
॥ मध्यशब्दान्मप्रत्ययो भवति शैषिकः। अणोऽपवादः। मध्यमः। आदेश्चेति वक्तव्यं आदिमः। अवोऽधसोर्लोपश्च। अ ३०
वमम्। अधमम्॥ ३३१॥ असाम्प्रतिके॥ अकारः प्रत्ययो भवति मध्यशब्दादसाम्प्रतिके जातादौ प्रत्ययार्थे मस्यापवादः

साम्प्रतिकं न्याय्यं युक्तमुच्यते। नातिदीर्घं नातिह्रस्वं मध्यं काष्ठम्। नात्युत्कर्षो नात्यपकर्षो मध्यमो वैयाकरणः मध्यस्त्री
॥३३२॥ द्वीपादनुसमुद्रं यञ्॥ समुद्रसमीपे यो द्वीपस्तस्मात् यञ्प्रत्ययो भवति शैषिकः कच्छादिपाठात् अणो मनुष्य
वुञश्चापवादः॥ द्वैप्यं द्वैप्या भवन्तो नु चरन्ति चक्रं। अनुसमुद्रमिति किं द्वैपकं द्वैपमन्यत्॥ ३३३॥ कालाट्ठञ्॥ काल
विशेषवाचिनः प्रातिपदिकात् ठञ्प्रत्ययो भवति शैषिकः अणोऽपवादः। वृद्धात्तु छं परत्वाद्बाधते। मासिकः आर्द्धमासिकः
सांवत्सरिकः। यथाकथंचिद्गुणवृत्त्यापि काले वर्त्तमानात् प्रत्यय इष्यते। कादम्बपुष्पिकं व्रैहिपलालिकम्। तत्र जात इति
प्रागतः कालाधिकारः॥३४॥ श्राद्धे शरदः॥ शरच्छब्दात् ठञ्प्रत्ययो भवति श्राद्धेऽभिधेये शैषिकः। ऋत्वणोऽपवादः। श्राद्ध
इति च कर्म गृह्यते न श्रद्धावान् पुरुषोऽनभिधानात्। शारदिकं श्राद्धं। शारदमन्यत्॥ ३३४॥ विभाषा रोगातपयोः॥ श
रद इत्येव रोगे आतपे चाभिधेये शरच्छब्दात् ठञ्प्रत्ययो वा भवति शैषिकः। ऋत्वणोऽपवादः। शारदिको रोगः शारदिकः
आतपः शारदो रोगः आतपो वा। रोगातपयोरिति किं शारदं दधि॥३५॥ निशाप्रदोषाभ्यां च॥ निशाप्रदोषशब्दाभ्यां विभा
षा ठञ्प्रत्ययो भवति शैषिकः। कालाट्ठञिति नित्ये ठञि प्राप्ते विकल्प उच्यते। नैशं नैशिकं प्रादोषं प्रादोषिकम्॥ ३३६॥ श्वस
स्तुट् च॥ विभाषेत्येव श्वःशब्दाद्विभाषा ठञ्प्रत्ययो भवति तस्य च तुडागमो भवति त्यप्प्रत्ययो विहितः ऐषमोह्यःश्वसोऽन्य
तरस्यामिति॥ एताभ्यां मुक्ते घ घलावपि भवतः। शौवस्तिकः श्वस्त्यः श्वस्तनः॥ ३३७॥ सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्
॥ कालादित्येव। सन्धिवेलादिभ्य ऋतुभ्यो नक्षत्रेभ्यश्च कालवृत्तिभ्योऽण्प्रत्ययो भवति शैषिकः॥ ठञोऽपवादः॥ अ
ण्ग्रहणं वृद्धाच्छस्य बाधनार्थं॥ सन्धिवेलादिभ्यस्तावत्॥ सान्धिवेलं सान्ध्यं ऋतुभ्यः ग्रैष्मं शैशिरं। नक्षत्रेभ्यः तैषं पौ
षं। संधिवेला संध्या। अमावास्या। त्रयोदशी। चतुर्दशी पंचदशी। पौर्णमासी प्रतिपत्। संवत्सरात्फलपर्वणोः। सांवत्स

रम्फलंपर्वंवा॥३८॥प्रावृषएण्यः॥प्रावृषशब्दाद्एण्यः प्रत्ययोभवतिशैषिकः ऋत्वणोपवादः॥प्रावृषेण्योबलाहकः
॥३३९॥वर्षाभ्यष्ठक्॥ वर्षाशब्दाट्ठक्प्रत्ययोभवतिशैषिकः॥ऋत्वणोपवादः॥ वार्षिकमनुलेपनं॥३४०॥छंदसिठ
त्॥वर्षशब्दात्छन्दसिविषयेठञ्प्रत्ययोभवतियोभवतिशैषिकः ठकोपवादः नभश्चनभस्यश्चवार्षिकावृतू ४१
वसंताच्चछंदसित्येव॥वसंतशब्दात्छंदसिविषयेठञ्प्रत्ययोभवतिशैषिकः॥ऋत्वणोपवादः॥मधुश्चमाधवश्चवा
संतिकावृतू॥३४२॥हेमंताच्च॥छंदसीत्येवहेमंतशब्दात्छंदसीविषयेठञ्प्रत्ययोभवतिशैषिकः॥ऋत्वणोपवा
दः॥ सहश्चसहस्यश्चैतेसंतिकावृतमोगविभागउत्तरार्थं॥३४३॥सर्वत्राणचतलोपश्च॥हेमन्तशब्दादण्प्रत्ययो
नवास्यतकारलोपः हेमंतंवासः। हैमनमुपलेपनंसर्वत्रग्रहणंछंदोधिकारनिवृत्त्यर्थंछंदसिभाषायांवसर्वत्रै
तद्भवति॥ननुचछंदसीतिनानुवर्त्तिष्यते।सैवाननुवर्त्तिष्यते।सैवाननुवृत्तिःशब्देनाख्यायतेप्रतियत्नाधिकंनपूर्व
सूत्रेपिसंबंधार्थं। हैमंतिकमितिभाषायामपिठञंस्मरंति॥अथाणचेतिचकारःकिमर्थः॥अण्यथाप्राप्तंवलत्वणि
तिकःपुनरनयोर्विशेषः।ऋत्वणिहितकारलोपोनास्तिहैमंतीपंक्तिरिति।तदेवंत्रीणिरूपाणिभवंति।हैमंतिकंहैमं
तंहैमनमिति॥३४४॥सायंचिरंप्राह्णेप्रगेव्ययेभ्यःट्युट्युलौतुट्च॥कालादित्येव॥सायंचिरंप्राह्णेप्रगेइत्येतेभ्योव्य
येभ्यश्चकालवाचिभ्यःट्युट्युलौप्रत्ययौभवतः। तयोश्चादिष्टयोस्तुडागमोभवति।सायंतनंचिरंतनं।प्राह्णेतनं।
प्रागेतनं।अव्ययेभ्यः।दोषातनं।दिवातनं।सायमितिमकारांतंपदमव्ययंतत्तोव्ययत्वादेवसिद्धःप्रत्ययःयस्तु ३८
स्यंतेरस्येकर्मणिघञिसायशब्दस्तस्येदंमकारांतत्वंप्रत्ययसन्नियोगेननिपात्यते।दिवसावसानेसायः॥चिरशब्द
स्यापिमकारान्तत्वन्निपात्यते। प्राह्णेप्रगेइत्येकारान्तत्वंचिरपरुत्परारिभ्यःत्नोवक्तव्यः। चिरत्नं। परुत्नम्। परारित्नं

प्रमस्यछंदसिगत्नोपश्चप्रत्नं॥अग्रपश्चाड्डिमच्॥अग्रिमंपश्चिमंअन्ताच्चेतिवक्तव्यं। अन्तिमं। पुरानोवक्तव्यः।पुराणं
नं॥३४५॥विभाषापूर्वाह्णापराह्णाभ्याम्॥ पूर्वाह्णअपराह्णशब्दाभ्यांविभाषाट्युट्युलौप्रत्ययौभवतः।तुट्चतयोराग
मः कालाट्ठञितिठञिप्राप्तेवचनंपक्षेसोपिभवतिपूर्वाह्णेतनं। अपराह्णेतनं। पौर्वाह्णिकंआपराह्णिकं॥घकाल
तनेषुकालनाम्नइतिसप्तम्याअलुक्॥ यदातुनसप्तमीसमर्थविभक्तिःपूर्वाह्णःसोस्येतितदापूर्वाह्णतनंइतिभवि
तव्यं॥३४६॥तत्रजातः॥अणादयोघादयश्चप्रत्ययाःप्रकृतास्तेषामतःप्रभृत्यर्थाःसमर्थविभक्तयश्चनिर्दिश्यंते।
तत्रेतिसप्तमीसमर्थाज्जातइत्येतस्मिन्नर्थेयथाविहितंप्रत्ययोभवतिस्रुघ्नेजातःस्रौघ्नः।माथुरः।औत्सः।औदपानः
राष्ट्रियःअवारपारीणःशाकलिकः। ग्राम्यःग्रामीणःकात्रेयकः।औम्भेयकः॥३४७॥प्रावृषष्ठप्॥प्रावृट्शब्दात्स
प्तमीसमर्थाज्जातइत्येतस्मिन्नर्थेठप्प्रत्ययोभवतिएण्यस्यापवादःपकारस्वरार्थः प्रावृषिजातःप्रावृषिकः॥३४८॥संज्ञा
यांशरदोवुञ्॥ शरच्छब्दात्सप्तमीसमर्थाज्जातइत्येतस्मिन्नर्थेवुञ्प्रत्ययोभवति ऋत्वणोपवादःसमुदायेनचेत्सं
ज्ञागम्यते। शारदकाःदर्भाःशारदकामुद्गाः॥दर्भविशेषस्यकस्यचिन्मुद्गविशेषस्यचेयंसंज्ञासंज्ञायामितिकिं।शारदंसस्यं
संज्ञाधिकारंकेचित्तत्रक्रीतकुशलादितियावदनुवर्त्तयंति॥३४९॥पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद्वुन्॥
पूर्वाह्णादिभ्यःशब्देभ्योवुन्प्रत्ययोभवतितत्रजातइत्येतस्मिन्विषयेसंज्ञायांगम्यमानायांपूर्वाह्णकःअपराह्णकः।विभा
षापूर्वाह्णापराह्णाभ्यामित्यस्यापवादःआर्द्रकः।मूलकः।नक्षत्राणोपवादः। प्रदोषकः। निशाप्रदोषाभ्यांचेत्यस्यापवा
दः। अवस्करकः। औत्सर्गिकस्याणोपवादः। असंज्ञायांतुयथाप्राप्तंवुञादयएवभवंति।३५०॥पथःपन्थच॥पथि
शब्दाद्वुन्प्रत्ययोभवतितत्रजातइत्येतस्मिन्विषयेअणोपवादः॥प्रत्ययसंनियोगेनचपथःपंथइत्ययमादेशोभव

का०४
३९.

तिपथिजातःपंथकः॥३९॥अमावास्याया वा॥अमावास्याशब्दात्वुन्प्रत्ययोभवतिवातस्यजातइत्येतस्मिन्विषयेसंधिवे
वेलादिषुपाठादणोपवादः।अमावास्यकः।आमावास्यः॥एकदेशविकृतस्यानन्यत्वादमावस्याशब्दादपिभवति।अमा
वस्यकः।आमावस्यः॥३९३॥अ च॥अमावास्याशब्दादकारप्रत्ययोभवतितत्रजातइत्येतस्मिन्विषयेपूर्वेणवुनणो
प्राप्तयोरयंतृतीयःप्रत्ययोविधीयते।आमावस्यः।अमावस्यकः।आमावास्यः।अमावास्यकः।आमावास्यः॥३९४॥
सिंधुपकराभ्यांकन्॥सिंधुशब्दादपकरशब्दाच्चकन्प्रत्ययोभवतितत्रजातइत्येतस्मिन्विषये।सिंधुशब्दःकच्छादि
ततोणिमनुष्यवुञिवप्राप्तविधानं।अपकरशब्दादथ्योत्सर्गिकेऽणिसिन्धुकः।अपकरकः॥३९५॥अणञौच॥सिंधप
करशब्दाभ्यांयथासंख्यमणञौप्रत्ययौभवतः।तत्रजातइत्येतस्मिन्विषयेपूर्वेणकनिप्राप्तेवचनं।सैंधवः।आपकरः॥
३९६॥श्रविष्ठाफाल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल्लुक्॥श्रविष्ठादिभ्यःशब्देभ्योनक्षत्रेभ्य
आगतस्यजातार्थेलुग्भवति।तस्मिन्स्त्रीप्रत्ययस्यापिलुक्तद्धितलुकीतिभवति।श्रविष्ठासुजातः।श्रविष्ठः।फाल्गुनःअ
नुराधःस्वातिःतिष्यःपुनर्वसुःहस्तःविशाखःअषाढःबहुलः।लुक्प्रकरणेचित्रारेवतीरोहिणीभ्यःस्त्रियामुपसंख्यानं।
चित्रायाञ्जाताचित्रा।रेवती।रोहिणी।स्त्रीप्रत्ययस्यलुकिकृतेगौरादित्वान्ङीष्।फल्गुन्यषाढाभ्यांटानौवक्तव्यौ।फल्गुनी
अषाढा।श्रविष्ठाषाढाभ्यांछणपिवक्तव्यः।श्राविष्ठीयः।आषाढीयः॥३९७॥स्थानांतगोशालखरशालाच्च॥स्थानांतात्प्रा
तिपदिकात्गोशालखरशालाशब्दाभ्यांचजातार्थप्रत्ययस्यलुग्भवतिगोस्थानेजातोगोस्थानः।अश्वस्थानः।गोशालः।
खरशालः॥३९८॥वत्सशालाभिजिदश्वयुक्छतभिषजोवा॥वत्सशालादिभ्यःपरस्यजातार्थप्रत्ययस्यलुग्वाभवति
वत्सशालेजातः।वत्सशालः।वात्सशालः।अभिजित्।आभिजितः।अश्वयुक्।आश्वयुजः।शतभिषक्।शातभिषजः। ३९

[illegible]

बहुलग्रहणस्यायंप्रपंचः॥३९९॥नक्षत्रेभ्योबहुलम्॥नक्षत्रेभ्योत्तरस्यजातार्थप्रत्ययस्यबहुलंलुग्भवति।रोहिणः।मृ
गशिराः।मार्गशीर्षः॥३९९॥कृतलब्धक्रीतकुशलाः॥तत्रेत्येवसप्तमीसमर्थात्कृतादिष्वर्थेषुयथाविहितंप्रत्ययोभवति
स्रुघ्नेकृतोलब्धोवाक्रीतोवाकुशलोवास्रौघ्नः।माथुरः।राष्ट्रियः।ननुचयःस्रुघ्नेकृतंजातमपितत्तत्रभवति।यच्चक्री
तंलब्धमपितत्रैवभवतिकिमर्थंभेदेनोपादानंक्रियते।शब्दार्थस्याभिन्नत्वात्।वस्तुमात्रेणक्रीतंलब्धंभवतिशब्दार्थस्तु
भिद्यतएव॥३६०॥प्रायभवः॥तत्रेत्येवसप्तमीसमर्थात्प्रातिपदिकात्प्रायभवइत्येतस्मिन्विषयेयथाविहितंप्रत्ययो
भवति।प्रायशब्दःसाकल्यस्यकिंचिन्न्यूनतामाह।स्रुघ्नेप्रायेणबाहुल्येनभवति।स्रौघ्नः।माथुरः।राष्ट्रियः।प्रायग्रहण
मनर्थकंतत्रभवेनकृतत्वात्।अनित्यभवःप्रायभवइतिचेत्।मुक्तसंशयेनतुल्यं॥३६१॥उपजानूपकर्णोपनीवेष्ठक्॥
उपजान्वादिभ्यःशब्देभ्यःसप्तमीसमर्थेभ्यःप्रायभवइत्येतस्मिन्विषयेठक्प्रत्ययोभवति॥अणोपवादः।स्रुघ्नभवःस्रौघ्न
माथुरः।राष्ट्रियः।पुनस्तत्रग्रहणंतदस्येतिनिवृत्त्यर्थं॥३६२॥दिगादिभ्योयत्॥दिशइत्येवमादिभ्यःप्रातिपदिकेभ्यो
यत्प्रत्ययोभवतितत्रभवइत्येतस्मिन्विषये॥अणस्थस्यापवादः॥दिशिभवं।दिश्यंवर्ग्यं।मुखजघनशब्दयोःशरीराव
यवार्थःपाठःसेनामुख्यंसेनाजघनमिति।दिशवर्गपूगगणपक्ष।धान्य।मित्र।मेधाअंतरपथिन।रहस्।अलीकाउ
खासाक्षिन्।आदि।अन्त।मुख।जघन।मेघ।यूथ।उदकात्संज्ञायां।न्याय।वंश।अनुवंशविशकालअप्आकाश।
दिगादि॥३६३॥शरीरावयवाच्च॥शरीरंप्राणिकायःशरीरावयववाचिनःप्रातिपदिकात्यत्प्रत्ययोभवतितत्रभव
इत्येतस्मिन्विषयेअणोपवादः।दंतेषुभवइत्येतस्मिन्विषये।दंताभवंदंत्यं।कोक्षेयंकालशेयं।वास्तेयं।आस्त्यं।आहे
रमजरंविषं।अस्तिशब्दःप्रातिपदिकनतिङंतः॥३६४॥ग्रीवाभ्योण्च॥ग्रीवाशब्दादण्प्रत्ययोभवतिचकाराद्यत्तत्रभव
वदंत्य।कर्ण्यं।ओष्ठ्यं।३६अइतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ्।इत्यादिभ्यःप्रातिपदिकेभ्योढञ्प्रत्ययोभवतितत्रा

[illegible]

का० ४
४०
इत्येतस्मिन्विषये शरीरावयवाद्यतोऽपवादः॥ ग्रीवासु भवं ग्रैवेयं ग्रैवं। ग्रीवाशब्दोऽधमनीवचनस्तासां बहुत्वाद्बहुवचनं कृतं॥ ३७१॥
॥गंभीराञ्ञ्यः॥ गंभीरशब्दात् ञ्यः प्रत्ययो भवति तत्र भवति तत्र भवइत्येतस्मिन्विषये। अणोऽपवादः। गंभीरे भवं गांभीर्यं। बाह्
र्देवपंचजनेभ्यश्चेति वक्तव्यं। बाह्यं दैव्यं। पांचजन्यं॥ ३८०॥ अव्ययीभावाच्च॥ अव्ययीभावसंज्ञकात्प्रातिपदिकाच्च ञ्यः प्रत्
ययो भवति तत्र भवइत्येतस्मिन्विषये अणोऽपवादः। न च सर्वस्मादव्ययीभावाद्भवति किं तर्हि परिमुखादेः। परिमुखादीनां च
गणपाठस्यैतदेव प्रयोजनं। तेषां विशेषणमव्ययीभावग्रहणं परिमुखं भवं पारिमुख्यं। पारिहनव्यं। परिमुखादिरन्यत्र भवति
औपकूलं औपमूलं परिमुख। परिहनु पर्योष्ठ पर्युलूखल। परिसीर। अनुसीर। उपसीर उपस्थल। उपकलाप। अनुपथ
अनुखड्ग। अनुतिल। अनुशीत। अनुमाष। अनुयूप। अनुवंश॥ ३८१॥ अंतःपूर्वपदाट्ठञ्॥ अव्ययीभावादित्येव। अन्तःश
ब्दो विभक्त्यर्थे समस्यते तत्पूर्वपदादव्ययीभावाट्ठञ् प्रत्ययो भवति तत्र भवइत्येतस्मिन्विषये ञ्योऽपवादः। आन्तर्वेश्मिकं। आ
न्तर्गेहिकं। समानशब्दाट्ठञ् वक्तव्यः समाने भवं सामानिकं तदादेश्च। सामानग्रामिकं। सामानदेशिकं॥ अध्यात्मादिभ्यश्च॥
अध्यात्मिकं आधिदैविकं। आधिभौतिकं॥ अध्यात्मादिराकृतिगणः॥ ऊर्ध्वदमाच्चठञ् वक्तव्यः। और्ध्वदमिकः। ऊर्ध्वशब्देन
समानार्थ ऊर्ध्वदमशब्दः॥ ऊर्ध्वदेहाच्च और्ध्वदैहिकं॥ लोकोत्तरपदाच्च ऐहलौकिकं। पारलौकिकं। मुखपार्श्वशब्दाभ्यां त
सेनाभ्यामीयः प्रत्ययो वक्तव्यः। मुखतीयं। पार्श्वतीयं। जनपरयोः कुक् च जनकीयं। मध्यशब्दादीयः मध्यीयः। मण्मीयौ च प्र
त्ययौ वक्तव्यौ। माध्यमं माध्यमीयं मध्ये भवं दिनचास्मात्। मध्ये भवं माध्यंदिनं स्थाम्नो लुग्वक्तव्यः। अश्वत्थाम। अजिनां ४०
ताच्च। वृकाजिनः। सिंहाजिनः। समानस्य तदादेश्च अध्यात्मादिषु चेष्यते। ऊर्ध्वंदमाच्च देहाच्च लोकोत्तरपदस्य च। मुखपा
र्श्वतसोरीयः कुग्जनस्य परस्य च। ईयः कार्योऽथ मध्यस्य मण्मीयौ प्रत्ययौ तथा मध्यमध्यंदिनं चास्मात्स्थाम्नो लुगजिनात्त

था॥ ३८२॥ ग्रामात्पर्यनुपूर्वात्॥ अव्ययीभावादित्येव ग्रामशब्दादव्ययीभावात्परिअनुइत्येवं पूर्वाट्ठञ् प्रत्ययो भवति तत्र
भवइत्येतस्मिन्विषये अणोऽपवादः। पारिग्रामिकः। आनुग्रामिकः॥ ३८३॥ जिह्वामूलांगुलेश्छः॥ जिह्वामूलशब्दादंगुलि
शब्दाच्च छः प्रत्ययो भवति तत्र भवइत्येतस्मिन्विषये यतोऽपवादः। जिह्वामूलीयं अंगुलीयं॥ ३८४॥ वर्गान्ताच्च॥ वर्गशब्दान्ता
च्च प्रातिपदिकात् छः प्रत्ययो भवति तत्र भवइत्येतस्मिन्विषये। अणोऽपवादः। कवर्गीयं चवर्गीयं॥ ३८५॥ अशब्दे यत्खावन्य
तरस्याम्॥ वर्गान्तादित्येव। अशब्दे प्रत्ययार्थे वर्गान्तात्प्रातिपदिकादन्यतरस्यां यत्खौ प्रत्ययौ भवतः तत्र भव
इत्येतस्मिन्विषये छे प्राप्ते वचनं पक्षे सोऽपि भवति। वासुदेववर्ग्यः। वासुदेववर्गीणः। वासुदेववर्गीयः। युधिष्ठिरवर्ग्यः। यु
धिष्ठिरवर्गीणः। युधिष्ठिरवर्गीयः। अशब्द इति किं। कवर्गीयो वर्णः॥ ३८६॥ कर्णललाटात्कनलंकारे॥ कर्णललाटशब्दा
भ्यां कन्प्रत्ययो भवति तत्र भवइत्येतस्मिन्विषये अलंकारेऽभिधेये यतोऽपवादः। कर्णिका ललाटिका अलंकार इति किं।
कर्ण्यं ललाट्यं॥ ३८७॥ तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः॥ व्याख्यायते येनेति व्याख्यानं व्याख्यातव्यस्य
नाम व्याख्यातव्यनाम तस्येति षष्ठीसमर्थात्। व्याख्यातव्यनाम्नः प्रातिपदिकात् व्याख्यानेऽभिधेये यथाविहितं प्रत्ययो भ
वति तत्र भवे च। वाक्यार्थसमीपे चकारः श्रूयमाणः पूर्ववाक्यार्थमेव समुच्चिनोति तत्र भवइति। सुपां व्याख्यानः सौपो ग्रं
थः। तैङः कार्तः कृत्सु भवं सौपं तैङं कार्तं व्याख्यातव्यनाम्न इति किं। पाटलिपुत्रस्य व्याख्यानी सुकोशला पाटलिपुत्रं सु
कोशलया व्याख्यायते एवं संनिवेशं पाटलिपुत्रमिति। ननु पाटलिपुत्रं व्याख्यातव्यनाम भवति व्याख्यातव्यग्रहणं पदविकारा
पवाद विधानार्थः। कृतनिर्देशो हि तो॥ ३८८॥ बह्वचोऽन्तोदात्ताट्ठञ्॥ बह्वचो व्याख्यातव्यनाम्नः प्रातिपदिकादन्तोदात्ता
ट्ठञ् व्याख्यानयोः प्रत्ययो भवति॥ अणोऽपवादः॥ षात्वणत्विकं। नातानतिकं। समासस्वरेणान्तोदात्ताः प्रकृतयः बह

का०४ चइतिकिंअचष्टकंवक्ष्यतिएकाचप्रत्ययदाह्नियंतेसोपंनेडं। कार्त्ते। अन्तोदात्तादितिकिंसंहितायाःसांहितशब्दाद्दिगन्तिस्व
४१ रेणाद्युदात्तः॥३८९॥क्रतुयज्ञेभ्यश्च॥क्रतुभ्योयज्ञेभ्यश्चव्याख्यातव्यनामभ्यःप्रातिपदिकेभ्योभवव्याख्यानयोरर्थयोः
ठञ्प्रत्ययोभवतिअणोपवादः॥क्रतुभ्यस्तावत्॥अग्निष्टोमस्यव्याख्यानस्तत्रभवः। अग्निष्टोमिकः। वाजपेयिकः। यज्ञे
भ्यःपाकयज्ञिकः। नावयज्ञिकः। अनंतोदात्तार्थआरंभः। क्रतुभ्यइत्येवसिद्धेयज्ञग्रहणं। असोमयागेभ्योपियथास्यात्पां
चौदनिकः। दाशौदनिकः। बहुवचनंस्वरूपविधिनिरासार्थं॥३९०॥अध्यायेष्वेवर्षेः॥ऋषिशब्दाःप्रवरनामधेयानि
तेभ्यऋषिशब्देभ्योभवव्याख्यानयोरर्थयोःठञ्प्रत्ययोभवत्यणोपवादः। अध्यायेष्वेवप्रत्ययार्थविशेषणपृव्याख्या
तनाम्नइत्यनुवर्ततेतत्रसाहचर्य्यादृषिशब्देभ्योग्रंथउच्यते। वसिष्ठस्यव्याख्यानस्तत्रभवोवावासिष्ठिकोऽध्यायः। वैश्वा
मित्रिकोअध्यायेष्वितिकिंवासिष्ठीऋक्॥३९१॥पौरोडाशपुरोडाशात्ष्ठन्॥पुरोडाशशब्दाच्चभवव्याख्यानयोरर्थयोःष्ठन्प्र
त्ययोभवति। पुरोडाशाःपिष्टपिण्डास्तेषांसंस्कारकोमंत्र। पौरोडाशः। तस्यव्याख्यानस्तत्रभवोवापौरोडाशिकः
पुरोडाशिकीषकारोङीषर्थः॥३९२॥छंदसोयदणौ॥छंदःशब्दाद्भवव्याख्यानयोरर्थयोर्यदणौप्रत्ययौभवतःअचइ
तिठञिप्राप्तेवचनं। छंदस्यः। छांदसः॥३९३॥द्व्यजृद्ब्राह्मणर्क्प्रथमाध्वरपुरश्चरणनामाख्याताट्ठक्॥द्व्यजादिभ्यःप्रा
तिपदिकेभ्योव्याख्यातव्यनामभ्योभवव्याख्यानयोरर्थयोष्ठक्प्रत्ययोभवति। अणोपवादः। द्व्यचस्तावत्। ऐष्टिकः।पाश
कः। ऋकारान्तात्। चातुर्होतृकः।पांचहोतृकः। ब्राह्मणः। ब्राह्मणिकः॥ऋक्॥आर्चिकः।प्रथम। प्राथमिकः। अध्वर
आध्वरिकः। पुरश्चरण। पौरश्चरणिकः। नामाख्यातग्रहणंसंघातविगृहीतार्थंनामिकः। आख्यातिकः॥३९४॥अण् ४१
ऋगयनादिभ्यः॥ऋगयनादिभ्यःप्रातिपदिकेभ्योभवव्याख्यानयोरर्थयोरण्प्रत्ययोभवतिठञादेरपवादः। आर्गायनः।पादव्या

ख्यानः। अण्ग्रहणंबाधकबाधनार्थं। वास्तुविद्यःऋगयन। पदव्याख्यानछंदोनाम। छंदोभाषा। छंदोभाषा। छंदोवि
चिति। छंदोविचिछंदोविचितीछंदोविजिती। न्यायन्यासपुनरुक्तनिरुक्तव्याकरणनिगम। वास्तुविद्या। अंगविद्या
क्षत्रविद्या। उत्पाद। उत्पाद। उद्याव। संवत्सर। मुहूर्त। निमित्त। उपनिषत्। शिक्षाऋगयनादि॥३९५॥ततआगतः॥
ततइतिपंचमीसमर्थादागतइत्येतस्मिन्नर्थेयथाविहितंप्रत्ययोभवति।स्रुघ्नादागतःस्रौघ्नःमाथुरः। राष्ट्रियः। ततइति
पादानंविवक्षितंयत्तदिहगृह्यतेनानंतरीयकं।स्रुघ्नादागच्छत्वृक्षमूलादागच्छतीति॥३९६॥ठगायस्थानेभ्यः॥आयइ
तिस्वामिग्राह्योभागउच्यतेसयस्मिन्नुत्पद्यतेतदायस्थानं। आयस्थानवाचिभ्यःप्रातिपदिकेभ्यष्ठक्प्रत्ययोभवतिततआग
तइत्येतस्मिन्विषयेऽणोपवादः। छंतुपरत्वाद्बाधते। शुल्कशालाया आगतः। शौल्कशालिकः। आकरिकः। आपणिकं।
बहुवचनंसरूपनिरासार्थं॥३९७॥शुंडिकादिभ्योण्॥शुंडिकइत्येवमादिभ्यःप्रातिपदिकेभ्योण्प्रत्ययोभवतितत आ
गतइत्येतस्मिन्विषयेआयस्थानठकोपवादः। शुंडिकादागतःशौंडिकः। कार्कणःअण्ग्रहणंबाधकबाधनार्थं। अनो
पवादः। औदपानः। शुंडिककृकणस्थंडिलउदपानउपलतीर्थ। भूमितृणपर्णवशुंडिकादिः॥३९८॥विद्यायोनिसंबंधे
भ्योवुञ्॥विद्यायोनिकृतःसंबंधोयेषांतेविद्यायोनिसंबंधाः। तद्वाचिभ्यःशब्देभ्योवुञ्प्रत्ययोभवति। ततआगतइत्येतस्मि
न्विषयेऽणोपवादः।छंतुपरत्वाद्बाधते। विद्यासंबंधेभ्यस्तावत्। उपाध्यायादागतऔपाध्यायकं।शैष्यकं। आचार्यकं।यो
निसंबंधेभ्यःमातामहकः।पैतामहकः।मातुलकः॥३९९॥ऋतष्ठञ्॥विद्यायोनिसंबंधेभ्यइत्येवऋकारान्तेभ्यःवि
विद्यायोनिसंबंधवाचिभ्यःप्रातिपदिकेभ्यष्ठञ्प्रत्ययोभवतिततआगतइत्येतस्मिन्विषयेवुञोपवादः। विद्यासंबंधवा
चिभ्यस्तावत्। होतुरागतंहौतृकंपौतृकं। योनिसंबंधवाचिभ्यः। भ्रातृकंस्वासृकमातृकंतपरकरणंसुखार्थंविद्यायोनाम

का॰४ मन्यत्रसावित्र ॥ ४०० ॥ पितुर्यच्च ॥ पितृशब्दात्यत्प्रत्ययो भवति चकाराट्ठञ्च तत आगत इत्येतस्मिन्विषये पितुरागतं पि
४२ त्र्यं । पैतृकं ॥ ४०१ ॥ गोत्रादंकवत् ॥ अपत्याधिकारादन्यत्र लौकिकं गोत्रमपत्यमात्रं गृह्यते गोत्रप्रत्ययान्तात्प्रातिपदि
कादंकवत्प्रत्ययविधिर्भवति तत आगत इत्येतस्मिन्विषये । अंकग्रहणेन तस्येदमर्थसामान्यं लक्ष्यते । तस्माद्गोत्रादि
ष्यते नाणेव संघाकलक्षणघञ्ज्विनामाणिति औपगवानामंकः औपगवकः । कापटवकः । नाडायनकः । चारायणकः ।
एवमौपगवेभ्य आगतमौपगवकं कापटवकं नाडायनकं । चारायणकं ॥ ४०२ ॥ हेतुमनुष्येभ्योन्यतरस्यां रूप्यः ॥ हेतु
भ्यो मनुष्येभ्यश्चान्यतरस्यां रूप्यः प्रत्ययो भवति तत आगत इत्येतस्मिन्विषये मनुष्यग्रहणमहेत्वर्थं हेतुः कारणं हेतु
भ्यस्तावत् । समादागतं समरूप्यं समीयं विषमरूप्यं विषमीयं ॥ गहादित्वाच्छः ॥ मनुष्येभ्यः । देवदत्तरूप्यं यज्ञदत्तरू
प्यं दैवदत्तं याज्ञदत्तं बहुवचनं स्वरूपविधिनिरासार्थं ॥ ४०३ ॥ मयट् च ॥ हेतुभ्यो मनुष्येभ्यश्च मयट् प्रत्ययो भवति तत आग
त इत्येतस्मिन्विषये । सममयं । विषममयं मनुष्येभ्यः । देवदत्तमयं यज्ञदत्तमयं टकारो ङीबर्थः । सममयी ॥ योगविभागो यथा
संख्यनिरासार्थः ॥ ४०४ ॥ प्रभवति ॥ तत इत्येव पंचमीसमर्थात् ङ्याप्प्रातिपदिकात्प्रभवतीत्येतस्मिन्विषये यथावि
हितं प्रत्ययो भवति । प्रभवति प्रकाशते प्रथमत उपलभ्यत इत्यर्थः । हिमवतः प्रभवति हैमवती गंगा । दारदी सिंधुः ॥ ४०५
॥ विदूराञ्ञ्यः ॥ विदूरशब्दात्ञ्यः प्रत्ययो भवति ततः प्रभवतीत्येतस्मिन्विषये अणोऽपवादः । विदूरात्प्रभवति वैदूर्यो मणिः ॥
ननु च वालवायाद्देसौ प्रभवति न विदूरात् । तत्र तु संस्क्रियते । एवं तर्हि वालवायं विदूरं च प्रकृत्यन्तरमेव वा नैवं तत्र निचेद्धूया
ज्जित्वरीवदूर्याचरेत् ॥ ४०६ ॥ तद्गच्छति पथिदूतयोः ॥ तदिति द्वितीयासमर्थाद्गच्छतीत्येतस्मिन्विषये यथाविहितं प्रत्ययो ४२
भवति । योसौ गच्छति पथा चेत्स भवति दूतो वा । स्रुघ्नं गच्छति स्रौघ्नः पंथाः । स्रौघ्नो दूतः । तथा माथुरः । राष्ट्रियः । स्यवा

स्रुग्घ्नस्य पन्था गच्छतीत्युच्यते । अथवा स्रुघ्नप्राप्तिः पथो गमनं पथि दूतयोरिति किं । स्रुघ्नं गच्छति सार्थः ॥ ४०७ ॥ अभि
निष्क्रामति द्वारं ॥ तदित्येव द्वितीयासमर्थादभिनिष्क्रामतीत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति यत्तदभिनिष्क्रामति द्वारं चे
द्भवति मुखं यन्निष्क्रामति । स्रुघ्नमभिनिष्क्रामति कान्यकुब्जद्वारं । स्रौघ्नं । माथुरं राष्ट्रियं द्वारमभिनिष्क्रामण्या क्रियाया कर
णं प्रसिद्धं तदिह स्वातंत्र्येण विवक्ष्यते यथा साध्वसिश्छिनत्तीति द्वारमिति किं । स्रुघ्नमभिनिष्क्रामति पुरुषः ॥ ४०८ ॥ अधि
कृत्य कृते ग्रंथे ॥ तदित्येव आधिकृत्येतदपेक्ष्य द्वितीया अधिकृत्य प्रस्तुत्य आगृह्येत्यर्थः तदिति द्वितीयासमर्थादधिकृत्य
कृतं इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति यत्तत्कृतं ग्रंथश्चेत्स भवति सुभद्रामधिकृत्य कृतो ग्रंथः सौभद्रः । गौरिमि
त्रः । यायातः ग्रंथ इति किं । सुभद्रामधिकृत्य कृतः प्रासादः । लुबाख्यायिकार्थस्य प्रत्ययस्य बहुलं । वासवदत्तामधिकृत्य
कृताख्यायिका वासवदत्ता । सुमनोत्तरा । उर्वशी । न च भवति भैमरथी ॥ ४०९ ॥ शिशुक्रंदयमसभद्वंद्वेन्द्रजननादिभ्य
श्छः ॥ तदित्येव मधिकृत्य कृतं ग्रंथ इति च । शिशुक्रंदादिभ्यो द्वितीयासमर्थेभ्यश्छः । प्रत्ययो भवति अधिकृत्य कृते ग्रंथ
अणोऽपवादः शिशूनां क्रंदनं शिशुक्रंदः । तमधिकृत्य कृतो ग्रंथ शिशुक्रंदीयः । यमस्य सभा यमसभं यमसभीयः ॥ द्वन्द्वात्
॥ अग्निकाश्यपीयः । श्येनकपोतीयः शब्दार्थसंबंधीयं प्रकरणं । वाक्यपदीयं ॥ इंद्रजननादिभ्यः ॥ इंद्रजननीयं । प्रद्युम्ना
गमनीयं इंद्रजननादिराकृतिगणः । प्रयोगतोऽनुसर्तव्यः प्रातिपदिकपुनपाठेन । द्वेद्वंद्वं वाक्यादिभ्य प्रतिषेधः । देवासुरं
राक्षोसुरं गौणमुख्यं इंद्रजननादिराकृतिगणत्वात्शिशुक्रन्दादयोपि तत्र द्रष्टव्यं । प्रपंचार्थमेषां ग्रहणं एवं सति द्वंद्वात्
दिप्रतिषेधोपि न वक्तव्यः । तत्रस्थ प्रत्ययस्यादर्शनात ॥ ४१० ॥ सोस्य निवासः ॥ स इति प्रथमासमर्थादस्येति षष्ठ्यर्थे यथा
विहितं प्रत्ययो भवति यत्प्रथमासमर्थं निवासश्चेत्स भवति निवसंत्यस्मिन्निवासो देशः उच्यते । स्रुघ्नो निवासोस्य स्रौघ्नो माथु

थुरः। राष्ट्रियः॥ ४११॥ अभिजनश्च॥ सोऽस्येत्येव। सइति प्रथमासमर्थादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति यत्तत्प्रथमा
समर्थमभिजनश्चेत्स भवति। अभिजनः पूर्वबांधवः। तत्संबंधाद्देशोप्यभिजन इत्युच्यते यस्मिन्पूर्वबांधवैरुषितं। तस्मा
दिह देशवाचिनः प्रत्ययो न बंधुभ्यः निवासप्रत्यासत्तेः स्रुघ्नोऽभिजनोऽस्य स्रौघ्नः। माथुरः राष्ट्रियः निवासाभिजनयोः को विशे
षः। यत्र संप्रत्यत्युष्यते स निवासः। यत्र पूर्वैरुषितं सोऽभिजनः। योगविभाग उत्तरार्थः॥ ४१२॥ आयुधजीविभ्यश्छः पर्वते
॥ सोऽस्याभिजन इति वर्त्तते। आयुधजीविभ्य इति तादर्थ्ये चतुर्थी पर्वत इति प्रकृतिविशेषणं पर्वतवाचिनः प्रथमासमर्था
दभिजनादस्येति षष्ठ्यर्थे छप्रत्ययो भवति। आयुधजीविभ्यश्चायुधजीव्यर्थं मयुधजीविनोऽभिधातुं प्रत्ययो भवतीत्यर्थः
हृद्गोलः पर्वतोऽभिजन एषामायुधजीविनां हृद्गोलीयाः। अंधकवर्त्तीयाः रोहितगिरीयाः॥ आयुधजीविभ्य इति किं॥ ऋक्षो
द पर्वतोऽभिजन एषां ब्राह्मणानां आर्क्षोदा ब्राह्मणाः॥ पर्वत इति किं॥ सांकाश्यका आयुधजीविनः॥ ४१३॥ शंडिकादिभ्यो ञ्यः॥
शण्डिक इत्येवमादिभ्यः प्रातिपदिकेभ्यो ञ्यप्रत्ययो भवति सोऽस्याभिजन इत्येतस्मिन्विषये॥ अणोऽपवादः॥ शाण्डिक्यः। सार्व
सेन्यः। शण्डिक सर्वसेन। सर्वकेश। शक। शंव। बोध। शंडिकादिः॥ ४१४॥ सिंधुतक्षशिलादिभ्योऽणञौ॥ आदिशब्दः प्रत्येकं
मभिसंबध्यते। सिंध्वादिभ्यः प्रातिपदिकेभ्यस्तक्षशिलादिभ्यश्च यथासंख्यमणञौ प्रत्ययौ भवतः सोऽस्याभिजन इत्येतस्मि
न्विषये सैंधवः। वार्णवः। सिंधुवर्णु। गंधार मधुमत कंबोज। कुलत। कश्मीर। साल्व। किष्किंधा गब्दिका उरस। द्रिरसदर
त। येनु कच्छादिषु पठ्यन्ते सिंधुवर्णु प्रभृतयस्तेभ्यस्त एवाणि सिद्धे मनुष्यवुञो बाधनार्थं वचनं॥ तक्षशिलादिभ्यः खल्व
पि॥ ताक्षशिलः॥ वात्सोद्धरणः। तक्षशिला। वत्सोद्धरणा। कौमदुर। कांडवारण। ग्रामणी। सरालक। कंस। किन्नर। संकु
चित सिंहकोष्ठ कर्णकोष्ठ बर्बर। अवसान॥ ४१५॥ तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः॥ तूद्यादिभ्यश्च

तुर्भ्यः शब्देभ्यो यथासंख्यं चत्वारः एव ढक् छण् ढञ् यक् इत्येते प्रत्यया भवंति॥ सोऽस्याभिजन इत्येतस्मिन्विषये॥ अणोऽपवादः
॥ तौदेयः। शालातुरीयः। वार्मतेयः। कौचवार्यः॥ ४१६॥ भक्तिः॥ सामर्थ्यविभक्तिः प्रत्ययार्थश्चानुवर्त्तते॥ अभिजन इ
ति निवृत्तं॥ स इति प्रथमासमर्थादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति। यत्तत्प्रथमासमर्थं भक्तिश्चेत्तद्भवति। भज्य
ते सेव्यत इति भक्तिः। स्रुघ्नो भक्तिरस्य स्रौघ्नः। माथुरः। राष्ट्रियः॥ ४१७॥ अचित्ताददेशकालाट्ठक्॥ देशकालव्यतिरिक्ताद
चित्तवाचिनः प्रातिपदिकाट्ठक्प्रत्ययो भवति। सोऽस्य भक्तिरित्येतस्मिन्विषये॥ अणोऽपवादः॥ वृद्धाच्छं परत्वाद्बाधते
अपूपा भक्तिरस्य आपूपिकः। शाष्कुलिकः। पायसिकः॥ अचित्तादिति किं। दैवदत्तः। अदेशादिति किम्। स्रौघ्नः। अकाला
दिति किम्। ग्रैष्मः॥ ४१८॥ महाराजाट्ठञ्॥ महाराजशब्दात्ठञ्प्रत्ययो भवति सोऽस्य भक्तिरित्येतस्मिन्विषये॥ अणोऽपवा
दः॥ महाराजो भक्तिरस्य माहाराजिकः। प्रत्ययांतरणं स्वरार्थं॥ ४१९॥ वासुदेवार्जुनाभ्यां वुन्॥ वासुदेवार्जुनाभ्यां वुन्प्र
त्ययो भवति सोऽस्य भक्तिरित्येतस्मिन्विषये। छाणोरपवादः। वासुदेवो भक्तिरस्य वासुदेवकः। अर्जुनकः। ननु च वासु
देवशब्दाद्गोत्रक्षत्रियाख्येभ्य इति वुञस्त्येव। न चात्र वुन्वुञोर्विशेषो विद्यते किमर्थं वासुदेवग्रहणं। संज्ञैषा देवताविशे
षस्य न क्षत्रियाख्या। अथ वा चरमजाद्धेतंमिति चाभ्युनशब्दस्य पूर्वनिपातमकुर्वन्ज्ञापयत्यान्यर्हितं पूर्वं निपततीति॥
४२०॥ गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ्॥ गोत्राख्येभ्यः क्षत्रियाख्येभ्यश्च प्रातिपदिकेभ्यो बहुलं वुञ्प्रत्ययो भवति सोऽस्य भक्ति
रित्येतस्मिन्विषये॥ अणोऽपवादः॥ वृद्धाच्छं परत्वाद्बाधते। ग्लुचुकायनिर्भक्तिरस्य ग्लौचुकायनकः। औपगवकः। कापटवकः
॥ क्षत्रियाख्येभ्यः॥ नाकुलकः। साहदेवकः। साम्बकः। आख्याग्रहणं प्रसिद्धक्षत्रियशब्दपरिग्रहार्थं यथा कथंचित्क्ष
त्रियवृत्तिर्माभूत्। बहुलग्रहणात्क्वचिद् प्रवृत्तिरेव। पाणिनो भक्तिरस्य पाणिनीयः। पौरवीयः॥ ४२१॥ जनपदिनां

का०४ जनपदवत्सर्वं जनपदेन समानशब्दानां बहुवचने। जनपदिनो यं बहुवचने जनपदेन समानशब्दास्तेषां जनपदव
४४ त्सर्वं भवति प्रत्ययः प्रकृतिश्चास्य भक्तिरित्येतस्मिन्विषये जनपदतदवध्योश्चेत्यत्र प्रकरणे ये प्रत्यया विहिता
स्ते जनपदिभ्योप्यस्मिन्नर्थे तिदिश्यंते जनपदिनो जनपदस्वामिनः क्षत्रियाः। अंगाः जनपदो भक्तिरस्य आंगकः सौलक्ष
पौंड्रकः। तद्वदंगाः क्षत्रिया भक्तिरस्य आंगकः वांगकः सौह्मकः पौंड्रकः। जनपदिनामिति किम्। पांचाला ब्राह्मणा भक्ति
रस्य पांचालः। सर्वग्रहणं प्रकृत्यतिदेशार्थं। सवदेव यो प्रयोजयति। वृद्धिनिमित्तेषु वुञादिषु विशेषो नास्तीति मद्रवृ
ज्योः कनि विशेषः। मद्रस्यापत्यं। द्व्यञ्मगधकलिंगसूरमसादण्। माद्रः। वृजिशब्दादपि वृद्धेत्कोसलाजादाञ्ञ्यङ्। वा
र्ज्यः। सा ऽस्य भक्तिरिति प्रकृतिनिर्ह्रासकृते मद्रकः। वृजिकः। जनपदेन समानशब्दानामिति किं। अनुषंडो जनपदः पौ
रवो राजास्य भक्तिरस्य। पौरवीयः॥ बहुवचनग्रहणं समानशब्दताविषयलक्षणार्थं अन्यथा हि यत्रैव समानशब्दता
तत्रैव समानशब्दतातत्रैवातिदेशः स्यात एकवचनयोर्न स्यात्। वांगो वांगौ वा भक्तिरस्येति बहुवचने नु बहुवचन समान
शब्दानामेकवचनद्विवचनयोः सत्यपि शब्दभेदे तिदेशो भवति। वांगः वांगौ वा भक्तिरस्य वांगकः॥ ४२२॥ तेन प्रोक्तं
॥ तेनेति तृतीयासमर्थात्प्रोक्तमित्यस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। प्रकर्षेण ... प्रोक्तमित्युच्यते। न तु कृतं। कृतं ग्रं
थ इत्यनेन कृतत्वात्। अनेन कृता माथुरेण प्रोक्ता माथुरी वृत्तिः। पाणिनीयं। आपिशलं। काशकृत्स्नं॥ ४२३॥ तित्तिरि
वरतंतुखंडिकोखाच्छण्॥ तित्तिर्यादिभ्यः शब्देभ्यश्छण्प्रत्ययो भवति। तेन प्रोक्तमित्येतस्मिन्विषये॥ अणोपवादः॥
तित्तिरिणा प्रोक्तमधीयंते। तैत्तिरीयाः। वारतंतवीयाः। खांडिकीयाः। औखीयाः। छंदसि वायमिष्यते। तित्तिरिणा ४४
न ... श्लोक इत्यत्र न भवति। शौनकादिभ्यश्छंदसीत्यश्यस्यानुवृत्तेश्छंदोधिकारविहितानां च तद्विषयमिष्यते॥ २४॥

काश्यपकौशिकाभ्यामृषिभ्यां णिनिः॥ काश्यपकौशिकशब्दाभ्यामृषिवाचिभ्यां णिनिः प्रत्ययो भवति तेन प्रोक्तमित्येतस्मि
न्विषये॥ छस्यापवादः॥ एकारउत्तरवृद्ध्यर्थः। कल्प्यमन्यो यो प्रोक्त इति स्पर्यनेतस्यापि च न द्विषयनाभवत्येव। शौनका
दिभ्यश्छंदसीत्यत्रास्यानुवृत्तेश्छंदोधिकारविहितानां तद्विषयतेष्यते काश्यपेन प्रोक्तं कल्पमधीयते काश्यपिनः।
कौशिकिनः॥ ऋषिभ्यामिति किं। इदानींतनेन गोत्रकाश्यपेन प्रोक्तं काश्यपीयं॥ २५॥ कलापिवैशंपायनांतेवासिभ्य
श्च॥ कलापिनेंतेवासिनां वैशंपायनांतेवासिनां च ये वाचकाः शब्दास्तेभ्यो णिनिः प्रत्ययो भवति तेन प्रोक्तमित्येतस्मिन्वि
षये॥ अणोपवादः॥ छंतु परत्वाद्बाधते। तत्र कलाप्यंतेवासिनश्चत्वारः हरिद्रुः छगली। तुंबुरुः। उलप इति। वैशंपायनां
तेवासिनो नव। आलंबिः कलिंग। कमलोऽचाभ। आरुणि। तांड्यः श्यामायनः कठः कलापी इति प्रत्यक्षकारिणा गृ
ह्यंते। न तु व्यवहिताः शिष्यशिष्याः कुतः कलापिखाडायनग्रहणात तथाहि वैशंपायनांतेवासी कलापी तदंतेवासि
नो वैशंपायनांतेवासिन एव भवंति किं कलापिग्रहणेन। तथा वैशंपायनांतेवासी कलापीनदंतेवासिनो वैशंपायनांते
वासिन एव भवंति किं कलापिग्रहणेन। तथा वैशंपायनांतेवासी कठस्तदंतेवासी खाडायनस्तस्य किं शौनकादिषु पाठे
न। तदेतत्प्रत्यक्षकारिग्रहणस्य लिंगं कलाप्यंतेवासिभ्यस्तावत्। हारिद्रुणा प्रोक्तमधीयते हारिद्रविणः। तौंबुरविणः औ
लपिनः। छगलिनो ढिनुकं वक्ष्यति। वैशंपायनांतेवासिभ्यः आलंबिनः पालंगिनः कामलिनः आर्चाभिनः आरुणिनः
तांडिनः। कठाद्लुकं वक्ष्यति। कलापिनश्चाणं। हरिद्रुरेषां प्रथमस्ततश्छगलितुंबरू। उलपेन चतुर्थेन कालापकमिहो
च्यते। आलंबरकस्य शिष्यः आलंबि विश्रुतः आलंबि पालिंग कमलर्चाभ। आरुणि तांड्य श्यामायनः कठः कलापी इति...

का॰४
४५

ते॥२६॥पुराणप्रोक्तेषु ब्राह्मणकल्पेषु॥प्रत्ययार्थविशेषणमेतत्तृतीयासमर्थात् प्रोक्ते णिनिः प्रत्ययो भवति। यत्प्रोक्तं
पुराणप्रोक्ताश्चेद् ब्राह्मणकल्पास्ते भवंति। पुराणेन चिरंतनेन मुनिना प्रोक्ताः पुराणप्रोक्ताः॥ब्राह्मणेषु तावत्॥भाल्लविनः
शाट्यायनिनः। ऐतरेयिणः॥कल्पेषु। पैंगी कल्पः। आरुणपराजी॥पुराणप्रोक्तेष्विति किं॥याज्ञवल्क्यानि ब्राह्मणानि।
आश्मरथः कल्पः याज्ञवल्क्यादयो ह्यचिरकालकाः इत्याख्यानेषु वार्ता। तथा व्यवहरति सूत्रकारः। तद्विषयता क
स्मान्न भवति। प्रतिपदं ब्राह्मणेषु यः प्रत्ययस्तस्य तद्विषयता विधीयते णिनेः। अयं तु याज्ञवल्क्यशब्दस्य कण्वादिषु पाठात्
अण्। न चायं योगश्छंदोधिकारमनुवर्तयति तेन कल्पेष्वपि न भवति पुराणइति निपातनात् तुडभावः। नवा त्वं तनोति
वितन एतन मित्यपि भवति॥२७॥शौनकादिभ्यश्छंदसि॥शौनक इत्येवमादिभ्यो णिनिः प्रत्ययो भवति तेन प्रोक्तमित्येत
स्मिन्विषये छाणोरपवादः। शौनकेन प्रोक्तमधीयते शौनकिनः प्रोक्तमधीयते शौनकिनः। वाजसनेयिनः। छंदसीति किं।
शौनकीया शिक्षा। कठशाठ इत्यत्र पठ्यते। तत्संघातार्थं केवलाद्धि लुकं वक्ष्यति। कठशाठाभ्यां प्रोक्तमधीयते काठशा
ठिनः। शौनक। वाजसनेय। सांगरव। शार्ङ्गरव। सांख्य। साप्येय। खांडायन। स्कंध। देवदत्तशठ। रज्जुकंठ। रज्जुभार। क
शाय। तलवकार। पुरुषासक। अश्वपेय। शौनकादिः॥२८॥कठचरकाल्लुक्॥कठचरकशब्दाभ्यां परस्य लुग्भवति क
ठशब्दाद्वैशंपायनांतेवासित्वाण्णिनेः चरकशब्दादप्यणः। कठेन प्रोक्तमधीयते ये ते कठाः। चरकाः। छंदसीत्येव काठाः
चारकाः श्लोकाः॥२९॥कलापिनोण्॥कलापिशब्दादण्प्रत्ययो भवति तेन प्रोक्तमित्येतस्मिन्विषये वैशंपायनांतेवा
सित्वाण्णिनेरपवादः कलापिना प्रोक्तमधीयते कालापाः इनण्यनपत्ये इति प्रकृतिभावे प्राप्ते नांतस्य टिलोपे सब्रह्म
चारिपीठसर्पिकलापिकुथुमितैतलिजाजलिलांगलिलांगलिशिखंडिसूकरसद्मसुपर्वणामुपसंख्यानमिति टिलो

पः। अथाग्रहणं किं। यथाप्राप्तमित्येव सिद्धौ अधिकविधानार्थं तेन माथुरीवृत्तिः। सौलभानि ब्राह्मणानीत्यादि सिद्धं॥३०॥
छगलिनो ढिनुक्॥छगलिन्शब्दात् ढिनुक् प्रत्ययो भवति तेन प्रोक्तमित्येतस्मिन्विषये कलाप्यंतेवासित्वाण्णिनेरपवादः
छगलिना प्रोक्तमधीयते छागलेयिनः॥३१॥पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः॥णिनिरिहानुवर्तते न ढिनुक् पा
राशर्यशिलालिभ्यां णिनिः प्रत्ययो भवति तेन प्रोक्तमित्येतस्मिन्विषये भिक्षुनटसूत्रयोरिति यथासंख्यं प्रत्ययार्थविशेष
णं। सूत्रशब्दः प्रत्येकमभिसंबध्यते तद्विषयता पोनेष्यते तदर्थं छंदोग्रहणमनुवर्त्यं। गुणाकल्पनया च भिक्षुनटसू
त्रयोश्छंदस्त्वं। पाराशर्येण प्रोक्तमधीयते पाराशरिणो भिक्षवः। शैलालिनो नटाः॥भिक्षुनटसूत्रयोरिति किं। पाराशरं॥
शैलालं॥४॥कर्मन्दकृशाश्वादिनिः॥भिक्षुनटसूत्रयोरित्येव कर्मन्दकृशाश्वशब्दाभ्यामिनिः प्रत्ययो भवति॥अणोपवा
दः॥तेन प्रोक्तमित्येतस्मिन्विषये यथासंख्यं भिक्षुनटसूत्रयोः यथासंख्यं भिक्षुनटसूत्रयोरभिधेययोः स्थापितद्विषयतार्थं
छंदोग्रहणमनुवर्त्यं। कर्मन्देन प्रोक्तमधीयते कर्मन्दिनो भिक्षवः। कृशाश्विनो नटाः भिक्षुनटसूत्रयोरित्येव। कार्मंदं। का
र्शाश्वं॥३३॥तेनैकदिक्॥तेनेति तृतीयासमर्थादेकदिगित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। एकदिक् तुल्यदिक् समा
नदिगित्यर्थः। सुदाम्ना एकदिक् सौदामनी विद्युत्। हैमवती त्रैककुदी। ऐलुबाली। तेनेति प्रकृते पुनः समर्थविभक्तिग्रहणं
छंदोधिकारनिवृत्त्यर्थं पूर्वत्र हि छंदोधिकारात् तद्विषयता साध्यते॥३४॥तसिश्च॥तसिश्च प्रत्ययो भवति तेनैकदिगित्येत
स्मिन्विषये पूर्वेण घादिषु अणादिषु च प्राप्तेषु अयमपरः प्रत्ययो विधीयते। स्वरादिपाठादव्ययत्वम्। सुदामतः हिमवतः पीलु
मूलतः॥३५॥उरसो यच्च॥उरःशब्दाद्यत्प्रत्ययो भवति चकारात्तसिश्च तेनैकदिगित्येतस्मिन्विषये॥अणोपवादः॥उर
सा एकदिक् उरस्यः। उरस्तः॥३६॥उपज्ञाते॥तेनेत्येव तृतीयासमर्थादुपज्ञातइत्येतस्मिन्विषये यथाविहितं प्रत्ययो भवति

का०४ विनोपदेशेन ज्ञातमुपज्ञातं स्वयमभिसंबुद्धमित्यर्थः। पाणिनोपज्ञातं पाणिनीयमकालकं व्याकरणं। काशकृत्स्नगुरुला
४६ घवम्। आपिशलपुष्करणं। कृते ग्रंथे। तेनेत्यस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। यत्कृतं ग्रंथश्चेत्स भवति। वररुचिना
कृता वाररुचाः श्लोकाः। हैतुपादो ग्रंथः। भैकुराटो ग्रंथः। जालूकः॥ ग्रंथ इति किं। तक्षकृतः प्रासादः। इत्यादिते कृतेन विद्य
मानमेव ज्ञातमित्ययमर्थो विशेषः॥३९॥ तृतीया समर्थात्कृतइत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति समुदायेन चेत्सं
ज्ञा ज्ञायते। मक्षिकाभिः कृतं माक्षिकं कार्मुकं पौत्तिकं। मधुनः संज्ञा एता॥३९॥ कुलालादिभ्यो वुञ्॥ तेन कृतं संज्ञाया
मिति च वर्तते। कुलालादिभ्यो वुञ् प्रत्ययो भवति तेन कृतमित्येतस्मिन्नर्थे संज्ञायां गम्यमानायां। कौलालकं। वारुडकं।
कुलाल। वरुड। चंडाल। निषाद। कर्मार। सेना। सिरिध्र। सेंद्रिय। देवराज। परिषत्। वधू। रुरु। ध्रुव। रुद्र। अनडुह्। ब्रह्म
न्। कुम्भकार। श्वपाक। कुलालादि॥४०॥ क्षुद्राभ्रमरवटरपादपादञ्॥ तेन संज्ञायामिति सर्वमनुवर्त्तते॥ क्षुद्रादिभ्यो ऽञ्
प्रत्ययो भवति तेन कृत इत्येतस्मिन्विषये संज्ञायां गम्यमानायां॥ अणोपवादः॥ स्वरविशेषः। क्षुद्रादिभिः कृतं क्षौद्रं भ्राम
रं। वाटरं। पादप॥४१॥ तस्येदम्॥ तस्येदम्। तस्येति षष्ठीसमर्थादिदमित्येतस्मिन्विषये यथाविहितं प्रत्ययो भवति इत्य
णादयः पंचमहोत्सर्गाः घादयश्च प्रत्यया विधीयंते। प्रकृतिप्रत्ययार्थयोः षष्ठ्यर्थमात्रं तत्संबंधिमात्रं च विवक्षितं यद
परं लिंगसंख्याप्रत्यक्षपरोक्षादिकं तत्सर्वमविवक्षितं। उपगोरिदमौपगवं। कापटवं। राष्ट्रियं। अवारपारीणं। अनंतरा
दिष्वनभिधानान्न भवति। देवदत्तस्यानंतरमिति बहिस्तरंगिका। •संबोधुः स्वंसो वहितो सिद्धएवात्राण इत्यर्थमुपसंख्या ४६
नं॥ अग्नीधः शरणे रण भञ्च॥ आग्नीध्रं। समिधामाधने षेण्यण। सामिधेन्यो मंत्रः सामिधेनी ऋक्॥४२॥ रथाद्यत्॥
रथशब्दाद्यत्प्रत्ययो भवति। तस्येदमित्येतस्मिन्विषये। अणोपवादः। रथस्येदं रथ्यं। चक्रं। युगं वा। रथांगमेवेष्य

तेनोन्यत्रानभिधानात्। रथसीताहलेभ्यो यद्विधाविति तदंतविधिरूपसंख्यायते परमरथ्यं॥४३॥ पत्त्रपूर्वादञ्॥ पतं
ति तेनेति पत्रं पश्वादिकं वाहनमुच्यते। तत्पूर्वाद्रथशब्दादञ् प्रत्ययो भवति तस्येदमित्येतस्मिन्विषये पूर्वस्य यतोपवा
दः। अश्वरथं चक्रं। औष्ट्ररथं गार्दभरथं॥४४॥ पत्त्राध्वर्युपरिषदश्च॥ पत्त्रं वाहनं तद्वाचिनः प्रातिपदिकादध्वर्युपरिष
शब्दाभ्यां चाञ् प्रत्ययो भवति तस्येदमित्येतस्मिन्विषये ऽणोपवादः॥ पत्त्राद्वाह्ये॥ अश्वस्येदं वहनीयमाश्वं॥ औष्ट्रं गार्दभ
म्। आध्वर्यवं पारिषदं॥४५॥ हलसीराट्ठक्॥ हलसीरशब्दाभ्यां ठक् प्रत्ययो भवति। तस्येदमित्येतस्मिन्विषये ऽणोपवा
दः। हलस्येदं हालिकं। सैरिकं॥४६॥ द्वंद्वाद्वुन्वैरमैथुनिकयोः॥ द्वंद्वसंज्ञकात्प्रातिपदिकाद्वुन् प्रत्ययो भवति तस्येदमित्येतस्मिन्विष
ये। वैरमैथुनिकयोः प्रत्ययार्थविशेषणयोरणोपवादः। छं तु परत्वाद्बाधते। वैरे तावत्। बाभ्रव्यशालंकायनिका। काका
लूकिका। मैथुनिकायां अत्रिभरद्वाजिका। कुत्सकुशिकिका। विवहनं मैथुनिका वैरस्य नपुंसकत्वे ऽपि अभिधानस्वाभाव्यतः स्त्री
लिंगाः। वैरं देवासुरादिभ्यः प्रतिषेधो वक्तव्यः। दैवासुरं वैरं॥४७॥ गोत्रचरणाद्वुञ्॥ गोत्रवाचिभ्यश्चरणवाचिभ्य
श्च प्रातिपदिकेभ्यो वुञ् प्रत्ययो भवति तस्येदमित्येतस्मिन्विषये ऽणोपवादः। छं तु परत्वाद्बाधते। गोत्रात्तावत्। ग्लौचुका
यनकं। औपगवकं। चरणाद्धर्माम्नाययोरिष्यते। काठकं। कालापकं। पैप्पलादकं॥४८॥ संघांकलक्षणेष्वञ्यञिञामण्
॥ संघादिषु प्रत्ययार्थविशेषणेषु अञंतात् यञंतात् इञंताच्च प्रातिपदिकादण् प्रत्ययो भवति तस्येदमित्येतस्मिन्वि
षये। पूर्वस्य वुञोपवादः। घोषग्रहणमप्यत्र कर्त्तव्यं। तेन वैषम्याद्यथासंख्यं न भवति। अञंतात् वैदः संघः। वैदोंकः। वै
दं लक्षणं। वैदो घोषः॥ यञंतात्। गार्गः संघः। गार्गोंकः। गार्गं लक्षणं। गार्गो घोषः॥ इञंतात्॥ दाक्षः संघः। दाक्षोंकः।
दाक्षं लक्षणं। दाक्षो घोषः। अंकलक्षणयोः को विशेषः। लक्षणं लक्ष्याद्भिन्नं स्वस्यैव चिन्हभूतं स्वं यथा विद्या विदादीनां अंकस्तु

का०४
४७

गवादिभ्योपि गवादीनांस्वेनाभवति। णित्करणंङीबर्थंपुंवद्भावप्रतिषेधार्थंच। वैदाविद्या अस्यवैदी। वाद्या अस्यवैदी विद्
४९॥ शाकलाद्वा॥शाकलशब्दात्संघादिषुप्रत्ययार्थविशेषणेषु वाण्प्रत्ययोभवति तस्येदमित्येतस्मिन्विषये वुञोपवादः शाक
लेनप्रोक्तमधीयतेशाकलाः। तेषांसंघः शाकलकः शाकलकोवः शाकलोकः। शाकलंलक्षणं। शाकलकलक्षणं। शाक
लोघोषः। शाकलकोघोषः॥५०॥ छंदोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः॥ मंत्रादयोनिवृत्ताः सामान्येनविधानंछंदोग
दिभ्यः शब्देभ्योञ्यः प्रत्ययोभवतितस्येदमित्येतस्मिन्विषयेवुञणोपवादः। चरणाद्धर्माम्नाययोरित्यस्यहवर्यात्नटश
ब्दादपिधर्माम्नाययोरेवभवति। छंदोगानांधर्मोवा आम्नायोवा छांदोग्यं। औक्थिक्यं। याज्ञिक्यं। बाह्वृच्यं। नाट्यं। अ
न्यत्र छांदोगकुलमित्यादि॥५१॥ नदंडमाणवांतेवासिषु॥ दंडप्रधानामाणवादंडमाणवाः। अंतेवासिनः। शिष्यास्तद्र
भिधेयेषु वुञ्प्रत्ययोनभवति। गोत्रग्रहणमिहानुवर्त्तते। तेनवुञः प्रतिषेधोविज्ञायते। गौकक्षाः। दंडमाणवाअंतेवा
सिनोवा। दाक्षाः। प्लाक्षाः। माहकाः॥५२॥ रैवतिकादिभ्यश्छः प्रत्ययोभवति। तस्येदमित्येतस्मिन्विषये। गोत्रप्रत्ययनात
तेनतः पूर्वेणवुञ्प्राप्तिस्तद्विधानार्थंवचनं। रैवतिकीयः। स्वापिशीयः। रैवतिकः स्वापिशि। क्षैमवृद्धि। गौनग्रीवः। औदम
धि। औदवाहि। वैजवापि॥५३॥ कौपिंजलहास्तिपदादण॥ कौपिंजलहास्तिपदशब्दाभ्यामण्प्रत्ययोभवतितस्येदमित्य
स्मिन्विषये। गोत्रवुञोपवादः॥ गोत्राधिकारात्। कौपिंजलः हास्तिपदः॥५४॥ आथर्वणिकस्येकलोपश्च॥ अणित्येव। आथर्व
णिकशब्दादण्प्रत्ययोभवतितत्सन्नियोगेनचइकलोपः। तस्येदमित्येतस्मिन्विषयेचरणवुञोपवादः। आथर्वणिकस्या ४७
यमाथर्वणोधर्मः। आम्नायोवा। चरणाद्धर्माम्नाययोः॥५५॥ तस्यविकारः॥ तस्येतिषष्ठीसमर्थाद्विकारइत्येतस्मिन्वि
षयेयथाविहितंप्रत्ययोभवति। प्रकृतेरवस्थांतरंविकारः॥ किमिहोदाहरणं॥ अप्राण्याद्ययुदात्तमवद्धंयस्यवनान्य

न्यत्र प्रतिपदंग्रहणं। अश्मनोविकारः। आश्मनः। आश्मनोविकारउपसंख्यानंतिटिलोपःपाक्षिकः। आश्मनः। मार्त्तिकः। तिस्र
रेणाद्युदात्ताएते॥ तस्यप्रकरणेतस्येतिपुनर्वचनंशैषिकनिवृत्त्यर्थं। विकारावयवयोर्घादयोनभवंति। हालः। सैरः॥५६॥
अवयवेचप्राण्योषधिवृक्षेभ्यः॥ प्राण्योषधिवृक्षवाचिभ्यः शब्देभ्यः षष्ठीसमर्थेभ्योऽवयवयथाविहितंप्रत्ययोभवतिचका
राद्विकारेच। तत्रप्राणिभ्योवक्ष्यति। अन्येभ्यस्तुविकारमात्रेकथंद्वयमप्यधिक्रियते। तस्यविकारः। अवयवेचप्राण्यो
षधिवृक्षेभ्यइतिविकारावयवयोर्युगपदधिकारोपवादविधानार्थः। कृतनिर्देशौहितौ॥५७॥ बिल्वादिभ्योण्॥ बिल्वइत्ये
वमादिभ्योऽण्प्रत्ययोभवतिविकारावयवयोरर्थयोर्यथायोगंअञ्मयटोरपवादः। बिल्वस्यअवयवःविकारोवाबैल्वः।
गवेधुकाशब्दोत्रपठ्यते। ततःकोपधादेवसिद्धेमयड्बाधनार्थंग्रहणं। बिल्वव्रीहिकाडमुद्गमसूर। गोधूम। इक्षु। वेणु। ग
वेधुकाकर्पासी। पाटली। कर्कन्धु। कुटीर। बिल्वादिः॥ कोपधाच्च॥ ककारोपधात्प्रातिपदिकादण्प्रत्ययोभवतियथायोगं
विकारावयवयोरर्थयोः। अञोपवादः। तर्क्षु। तार्क्षवं। त्रिडीकामांडूकं। दार्दुरूकं। माधूकं॥५९॥ त्रपुजतुनोःषुक्॥ त्रपुजतु
शब्दाभ्यामण्प्रत्ययोभवतिविकारेतत्सन्नियोगेनतयोःषुगागमोभवति। ओरञोपवादः। त्रपुणोविकारः त्रापुषं। जातुषं॥
अप्राण्यादित्वात्अवयवे॥६०॥ ओरञ्॥ उवर्णांतात्प्रातिपदिकादञ्प्रत्ययोभवतिविकारावयवयोरर्थयोरणोपवादः। अनुदा
त्तादेरन्यदिहोदाहरणं। देवदारवं। भाद्रदारवं॥६१॥ अनुदात्तादेश्च॥ अनुदात्तादेःप्रातिपदिकादञ्प्रत्ययोभवतिविकारा
वयवयोरर्थयोरणोपवादः। दधित्थंदाधित्थं। कपित्थं कापित्थं। माहित्थं माहित्थं॥६२॥ पलाशादिभ्योवा॥ पलाशा
दिभ्यः प्रातिपदिकेभ्योवा अञ्प्रत्ययोभवतिविकारावयवयोरर्थयोः। उभयत्रविभाषेयं। पालाशं पलाशं। अन्यादिरशिंशपाभ्य
दनानामनुदात्तादित्वात्प्राप्तिरन्येषामप्राप्ता। पलाशखदिर। शिंशपा। स्यंदनपूतासयवास। करीरशिरीष। यवासकन॥पला

शादिः॥६३॥ शाम्याष्ठञ् ॥ शमीशब्दा — ञ प्रत्ययो भवति विकारावयवयोरर्थयोः। अञो ऽपवादः। शामीलं भस्म। शामीली स्रुक्
॥६४॥ मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः॥ प्रकृतिमात्राद् मयट् प्रत्ययो भवति भक्ष्याच्छादनवर्जितयोर्विकारावयवयोर्भाषायाम्। विल्वः। खादिरम्
यः स्यात्। अभक्ष्याच्छादनयोरिति किं। मौद्गः सूपः। कार्पासमाच्छादनं। एतयोरित्येनेन किं यावता विकारावयवयोरेव प्रत्ययः। वक्ष्यति
शेषप्रत्ययाः प्राणिरजतादिभ्यो नित्यं वृद्धादयः तद्विषयेऽपि यथा स्यात्। कपोतमयं। कापोतं। लोहमयं। लौहमिति॥४६९॥ नित्यं
वृद्धशरादिभ्यः॥ भाषायामभक्ष्याच्छादनयोरित्येव। वृद्धेभ्य आतिपादिकेभ्यः। शरादिभ्यश्च भक्ष्याच्छादनयोर्विकारावयवयो
र्भाषायां विषये मयट् प्रत्ययो भवति नित्यं। वृद्धेभ्यस्तावत्। आम्रमयं। शाल्मयं। शाकमयं। शरादिभ्यः। शरमयं। दर्भमयं।
मृन्मयं। नित्यग्रहणं किं। यावता सामर्थ्यादेव नित्यं भविष्यति। एकाचो नित्यं मयट मिच्छंति तदनेन क्रियते। त्वड्मयं। वाड्
मयं। वाङ्मयमिति। शरादर्भमृत्। कुटी। तृण। सोम बल्वज॥६६॥ गोश्च पुरीषे॥ गोशब्दात्पुरीषे ऽर्थे इति किं। गव्यं पयः। पुरीष
न विकारो न चावयवस्तस्येदं विषये विधानं। विकारावयवयोस्तु गोपयसोर्यत् वक्ष्यति॥६७॥ पिष्टाच्च॥ पिष्टशब्दान्नित्यं मयट् प्र
तस्य त्ययो भवति विकारे इत्येतस्मिन्विषये ऽणोऽपवादः। पिष्टमयं भस्म॥६८॥ संज्ञायां कन्॥ पिष्टशब्दात्कन् प्रत्ययो भवति विका
रे संज्ञायां विषये मयटोऽपवादः। पिष्टकः॥६९॥ व्रीहेः पुरोडाशे॥ व्रीहिशब्दान्मयट् प्रत्ययो भवति पुरोडाशे विकारे विल्वाद्यणोऽप
वादः। व्रीहिमयः पुरोडाशः। व्रैहमन्यत्॥७०॥ असंज्ञायां तिलयवाभ्यां॥ तिलयवशब्दाभ्यामसंज्ञाविषये मयट् प्रत्ययो भव
ति विकारावयवयोरर्थयोर्भाषायां यदुक्तं छंदस्याप्तविधीयते। यस्य पर्णमयी जुहूर्भवति। दर्भमयं वासो भवति। शरमयं
बर्हिर्भवति॥७१॥ नोत्वद्वर्ध्रबिल्वात्॥ उत्वतः प्रातिपदिकाद्वर्ध्रबिल्वशब्दाभ्यां च मयट् प्रत्ययो न भवति छंदसि उपासः प्र ४८
तिषिध्यते। मौंजं शिक्यं। गार्मुतश्चरुः। वार्ध्री बालप्रग्रथिता भवति। बैल्वो ब्रह्मवर्चसकामेन कार्यः। तपरकरणं तत्कालार्थ

धूममयान्यभ्राणि। मतुपनिर्देशस्तदंतविधिनिरासार्थः। इंद्रवस्यात्। वैणवी यष्टिरिति॥७४॥ तालादिभ्योऽण्॥ तालादिभ्यः
प्रातिपदिकेभ्योऽण् प्रत्ययो भवति विकारावयवयोरर्थयोः मयडादीनामपवादः। तालं धनुः। बार्हिणं। ऐंद्रालिशं। तालाद्धनुषि
बार्हिण। इंद्रालिश। इंद्रादृश। इंद्रायुधावय। श्यामक। पीयुक्षा तालादिः॥७५॥ जातरूपेभ्यः परिमाणे॥ जातरूपं। सुवर्णं
बहुवचननिर्देशात्तद्वाचिनः सर्वे गृह्यंते। जातरूपवाचिभ्यः प्रातिपदिकेभ्योऽण् प्रत्ययो भवति परिमाणे विकारे॥ मयडादीनामपवा
दः॥ हाटको कार्षापणं। जातरूपं। जातपनीयं। परिमाण इति किं। यष्टिरियं हाटकमयी॥७६॥ प्राणिरजतादिभ्योऽञ्॥ प्राणिवाचि
भ्यः प्रातिपदिकेभ्यो रजतादिभ्यश्च अञ् प्रत्ययो भवति विकारावयवयोरर्थयोः। अणादीनामपवादः। अनुदात्तादेरञ्
विहित एव। परिशिष्टमिदोदाहरणं॥ प्राणिभ्यस्तावत्॥ कापोतं। मायूरं। तैत्तिरं। रजतादिभ्यः राजतं। सैसं। लौहं। रजतादिषु येऽनु
दात्तादयः पठ्यंते तेभ्योऽभिसिद्धयुतर्वनं मयड्बाधनार्थं। रजत। सीस। लोह। उदुम्बर। नीप। दारु। रोहितक। विभीतक। पीतदारु
त्र्यध्दारुह। त्रिकंटक। कंटकार॥७७॥ ञितश्च तत्प्रत्ययात्॥ अञित्येव। नदिति विकारावयवयोरर्थयोः प्रत्यवमर्शः। ञितो
विकारावयवप्रत्ययस्तदंतात्प्रातिपदिकादञ् प्रत्ययो भवति विकारावयवयोरेव। मयटोऽपवादः। औरञ् शम्याष्ठञ् प्राणिरजता
दिभ्योऽञ् उष्ट्राद्वुञ् एण्या ढञ्। कंसीयपरशव्ययोर्यञञौ इत्येते प्रत्ययाः गृह्यंते। दैवदारवस्य विकारोऽवयवो वा दैवदा
रवम्। दाधित्थस्य दाधित्थं। पालाशं। शामीलस्य शामीलं। कापोतं। औष्ट्रकस्य औष्ट्रकं। ऐणेयस्य ऐणेयं। कांस्यकांस्य
पारशवस्य पारशवं॥ ञित इति किं। बैल्वमयं। तत्प्रत्ययादिति किं। वैदमयं॥ क्रीतवत्परिमाणात्॥ प्राग्वतेष्ठञित्यत आरभ्य
क्रीतार्थे ये प्रत्ययाः परिमाणाद्विहितास्ते विहितादिश्यंते। परिमाणात्क्रीतवत्प्रत्यया भवंति तस्य विकार इत्येतस्मिन्विषये ऽणा
दीनामपवादः सम्भ्यपि परिमाणग्रहणेन गृह्यंते च। तस्य विकारः शत्यः शतिकः। साहस्रः। द्वैनिष्कः। द्वैनैष्किकः॥७८॥

कौ०४ उष्ट्राद्वुञ्॥ उष्ट्रशब्दाद्वुञ्प्रत्ययो भवति विकारे इति दिश्यते। परिमाणात्संख्याः प्रत्यया भवंति तस्य विकारे इत्येतस्मिन्विषये। णादी
४२ नामपवादः। संख्यापि परिमाणग्रहणेन गृह्यते चतस्य विकारः शत्यशतिकः। साहस्रः। चनिःसर्वसादृश्यार्थः। अध्यर्द्धपूर्वाद्वि
गोल्गसंज्ञायामित्येवमादिकमप्यतिदिश्यते। द्विसहस्र। द्विसाहस्र। द्विनिष्क। द्विनैष्किकः॥ ७९॥ उष्ट्राद्वुञ्॥ उष्ट्रशब्दा
द्वुञ्प्रत्ययो भवति विकारावयवयोरर्थयोः प्राण्यञोऽपवादः। उष्ट्रस्य विकारोऽवयवो वा औष्ट्रकः॥ ८०॥ उमोर्णयोर्वा॥ उमा
शब्दादूर्णाशब्दाच्च वा वुञ्प्रत्ययो भवति विकारावयवयोरर्थयोः। औमम। औमक। आर्णं। और्णकं॥ ८१॥ एण्या ढञ्॥ एणी
शब्दाशब्दात् ढञ्प्रत्ययो भवति विकारावयवयोरर्थयोः प्राण्यञोऽपवादः। ऐणेयं मांसं। पुंसस्त्वञेव भवति। ऐण्यस्य मांसमैणं
कौशाद्धुञ्वक्तव्यः॥ कौशेयं वासः॥ ८१॥ गोपयसोर्यत्॥ गोपयःशब्दाभ्यां यत्प्रत्ययो भवति विकारावयवयोरर्थयोः। गव्यम्
पयस्यं॥ सर्वत्र गोरजादिप्रसंगे गोपदस्यैव मयट्‌ द्विपयेतु विधीयते॥ ८२॥ धौ॥ २४॥ द्रोश्च॥ द्रुशब्दाद्यत्प्रत्ययो भवति विकारा
वयवयोरर्थयोः। ओरञोऽपवादः। द्रव्यं॥ ८३॥ माने वयः॥ द्रुशब्दान्माने विकारविशेषे वयः प्रत्ययो भवति यतोऽपवादः। द्रुवय
॥ ८४॥ फले लुक्॥ विकारावयवयोरुत्पन्नस्य फले तद्विशेषे विवक्षिते लुग्भवति। आमलक्याः फलमामलकं। कुवलं। वदर।
फलितस्य वृक्षस्य फलमवयवो भवति विकारश्च पल्लवितस्यैव पल्ल॥ ८५॥ प्लक्षादिभ्योऽण्॥ फल इत्येव प्लक्षादिभ्यः प्रातिपदि
केभ्यः फले विकारावयवत्वेन विवक्षिते अण्प्रत्ययो भवति। अञोऽपवादः। विधानसामर्थ्यात्तस्य न लुग्भवति। प्लाक्षं। नैयग्रोधं।
प्लक्ष। न्यग्रोध। अश्वत्थ। इंगुदी। शिग्रु। कर्कंधु। वृहती॥ ८६॥ जंब्वा वा॥ फल इत्येव। जम्वूशब्दात्फलेभिधेये वा अण्प्रत्ययो
भवति। अञोऽपवादः। अणो विधानसामर्थ्याल्लुक् न भवति। अञस्तु भवत्येव। जाम्बवानि फलानि। जम्बूनि वा॥ ८७॥ लुप् च॥ ४३
वेत्येव॥ जंब्वाः फले अभिधेये प्रत्ययस्य वा लुब्भवति। युक्तवद्भावविशेषः। जंब्वाः फलं। जंबूः फलम्। जंबुफलं। जांबवमिति वा

लुप्प्रकरणे फलपाकशुषामुपसंख्यानं। व्रीहयः। यवाः। माषाः। मुद्गाः। तिलाः। पुष्पमूलेषु बहुलं। मल्लिकायाः पुष्पं मल्लिका
नवमल्लिका। नवमल्लिकाजातिः। विदार्या मूलं विदारी। अंशुमती। वृहती। न च भवति पाटलानि पुष्पाणि शाल्वानि मूलानि
बहुलवचनात्क्वचिदन्यदपि भवति। कदंबं पुष्पं। अशोकं। करवीरं। वैल्वानि फलानीति॥ ८७॥ हरीतक्यादिभ्यश्च॥ हरीत
की इत्येवमादिभ्यः शब्देभ्यः फले प्रत्ययस्य लुब्भवति। लुकि प्राप्ते लुपो विधानं युक्तवद्भावस्त्रीप्रत्ययश्च वर्णे च विशेषः हरी
तक्याः फलं हरीतकी कोशातकी। नखरजनी। अत्र च व्यक्तिवद्भावं तेष्यं तेवचनं त्वभिधेयदेव भवति। हरीतक्याः फलानि
हरीतक्यः। हरीतकी। कोशातकी। नखरजनी। शष्कंडी। दंडी। श्वेतपाकी। काला। द्राक्षा। गर्गरीका। कंटका। सेफालिका। येषां
चकलपाकनिमित्तः शोषः। पुष्पमूलेषु बहुलं॥ ८८॥ कंसीयपरशव्ययोर्यञञौ लुक् च॥ प्राग्क्रीताच्छेन कंसीयः। उगवादिभ्यो
यत। एवशेष्यः। कंसीयपरशव्यशब्दाभ्यां यथासंख्यं यञञौ प्रत्ययौ भवतः तस्य विका। इत्येतस्मिन्विषये तत्संनियोगे
न च कंसीयपरशव्ययोर्लुग्भवति। कंसीयस्य विकारः कांस्यः। परशव्यस्य विकारः पारशवः। प्रातिपदिकाधिकाराद्धातुप्र
त्ययस्य न लुग्भवति। परशव्यशब्दादनुदात्तादित्वादेवाञि सिद्धे लुगर्थं वचनं। ननु यस्येति लोपे कृते हलस्तद्धित
स्येति यलोपो भविष्यति नैनदस्ति ईतीति तत्र वर्त्तते॥ ८९॥ धीशासमूहा॥ इति काशिकायां वृत्तौ चतुर्थाध्यायस्य तृती
यः पादः समाप्तः॥ प्राग्वहतेष्ठक्॥ तद्वहति रथयुगप्रासंगमिति वक्ष्यति। प्रागेतस्माद्वहतिसंशब्दानापनर्थाननुक्रमिष्यामः
ठक्प्रत्ययस्तेष्वधिकृतो वेदितव्यः। वक्ष्यति तेन दीव्यति खनति जयति जितमिति। अक्षैर्दीव्यति आक्षिकः। ठक्प्रकरणे
तदाहेति माशब्दादिभ्य उपसंख्यानं। माशब्द इत्याह माशब्दिकः। नैत्यशब्दिकः। कार्यशब्दिकः। वाक्यादेः तत्प्रत्ययः विधानं
आहेति प्रभूतादिभ्यः। प्रभूतमाह प्राभूतिकः। पार्याप्तिकः। क्रियाविशेषणात्प्रत्ययः। पृच्छतौ सुस्नातादिभ्यः। सुस्नातं॥

पृछतिगोस्नानिकः। सौरवराचिकः। सौरवणयिनिकःकः। गच्छतिनौपरदारादिभ्यः। परदारान्गच्छतिपारदारिकः। गौरुतल्पिकः
॥१०॥तेनदीव्यतिखनतिजयतिजितम्॥तेनेतितृतीयासमर्थात्दीव्यतिखनतिजयतिजितमित्येतेष्वर्थेषुठक्प्रत्ययोभवति
अक्षैर्दीव्यतिआक्षिकः। शालाकिकः। अभ्राखनतिआभ्रिकः। कौद्दालिकः। अक्षैर्जयतिआक्षिकः। अक्षैर्जितमाक्षिकं। शाला
किकं। सर्वचकरणतृतीयासमर्थविभक्तिः। देवदत्तेनजितमितिप्रत्ययोनाभवतिअनभिधानात्। अंगुल्याखनतीतिव। प्र
त्ययार्थेसंख्यनतीतिव। प्रत्ययार्थेसंख्याकालयोरविवक्षाकालभूतादिः। एकत्वादिसंख्याअंदीव्यतांदीविष्यतिआक्षिकःका
रकंतुविवक्षितमेव। क्रियाप्रधानत्वीपत्याख्यातस्यछिद्नतःस्वभावात्साधनप्रधानः॥११॥संस्कृतम्॥तेनेतितृतीयासमर्था
त्संस्कृतमित्येतस्मिन्नर्थेठक्प्रत्ययोभवति। सतउत्कर्षाधानंसंस्कारः। दध्नासंस्कृतंदाधिकं। श्रार्ङ्गवेरिकं। मारिचिकं। योग
विभागउत्तरार्थः॥१२॥कुलत्थकोपधादण्॥कुलत्थशब्दात्ककारोपधाच्छब्दाच्चप्रतिपदिकादण्प्रत्ययोभवतिसंस्कृतमित्ये
तस्मिन्विषयेठकोपवादः। कुलत्थैःसंस्कृतंकौलत्थं। ककारोपधात्। तैत्तिडीकं। दार्द्दभकं॥१३॥तरति॥तेनेतितृतीयासम
र्थात्तरतीत्येतस्मिन्नर्थेठक्प्रत्ययोभवतितरतिप्लवतेइत्यर्थः॥कांडप्लवेनतरतिकांडप्लविकः। औडुपिकः॥१४॥गोपुच्छाट्ठञ्॥
गोपुच्छशब्दात्ठञ्प्रत्ययोभवतितरतीत्येतस्मिन्नर्थेठकोपवादःस्वरविशेषः। गौपुच्छिकः॥नौद्व्यचष्ठन्॥नौशब्दात्द्व्यचश्च
प्रातिपदिकात्ठन्प्रत्ययोभवतितरतीत्येतस्मिन्नर्थेठकोपवादः। नावातरतिनाविकः। द्व्यचःखल्वपि। घटिकः। ब्राहुविकः। बा
हुकः। षकारःसंहितिकोनानुबंधःबाहुकास्त्री। आकर्षात्पर्पादेःभस्त्रादिभ्यःकुसीदसूत्राच्च। आवसथात्किशरादेःषितः ५०
षडेतेठगधिकारे। विधिवाक्यापेक्षंषषद्भ्रत्ययास्तुसप्त॥१५॥चरति॥तेनेतितृतीयासमर्थाच्चरतीत्येतस्मिन्नर्थेठक्प्रत्य
योभवतिचरतिर्भक्षणगतौचवर्त्तते। दध्नाचरतिदाधिकः। हास्तिकः। शाकटिकः॥१६॥आकर्षात्ष्ठल्॥आकर्षशब्दात्ष्ठ

ल्प्रत्ययोभवतिचरतीत्येतस्मिन्नर्थेठकोपवादः। लकारःस्वरार्थः। षकारोङीषर्थः। आकर्षेणचरतिआकर्षिकः। आ
कर्षिकी। आकर्षइतिसुवर्णपरीक्षार्थोनिकषोपलउच्यते॥१७॥पर्पादिभ्यःष्ठन्॥पर्पइत्येवमादिभ्यःष्ठन्प्रत्ययोभवति
चरतीत्येतस्मिन्नर्थेठकोपवादः। नकारःस्वरार्थः। षकारोङीषर्थः। पर्पिकः। पर्पिकी। अश्विकः। अश्विकी। पर्प। अश्व। अश्वत्थ।
रथ। जाल। न्यास। व्याल। पादःपच्च। पदिकः॥१८॥श्वगणाट्ठञ्च॥श्वगणशब्दाट्ठञ्प्रत्ययोभवतिचकारात्ष्ठन्चरतीत्येत
स्मिन्नर्थेठकोपवादः। श्वगणेनचरतिश्वागणिकः। श्वागणिकी। ठन्। श्वगणिकः। श्वगणिकी। श्वादेरिञीत्यत्रवक्ष्यतिइ
कारादिग्रहणंकर्त्तव्यं। श्वागणिकाद्यर्थमिति। ततठञिद्वारादिकार्यंनभवति॥१९॥वेतनादिभ्योजीवति॥तेनेतितृतीयासम
र्थेभ्योवेतनादिभ्यःशब्देभ्योजीवतीत्येतस्मिन्नर्थेठक्प्रत्ययोभवतिवैतनिकः। कर्मकरः। धनुर्दण्डग्रहणमत्रसंघातविगृ
हीतार्थं। धानुर्दंडिकः। धानुष्कः। दांडिकः। वेतन। वाह। अर्द्धवाह। धनुर्दंड। जाल। वेस। उपवेनन। वाह। अर्द्धवाह। धनुर्दंड। जा
ल। वेस। उपवेस। प्रेषणपर। सूत्र। शय्या। शक्ति। उपवेष। तडपवेष। स्रक्। पाद। उपस्थान॥५००॥वस्नक्रयविक्रयाट्ठन्॥व
स्नक्रयविक्रयशब्दाभ्यांतृतीयासमर्थाभ्यांठन्प्रत्ययोभवतिजीवतीत्येतस्मिन्विषये। ठकोपवादः। वस्नेनजीवतिवस्निकः। क्रय
विक्रयग्रहणंसंघातविगृहीतार्थं। क्रयविक्रयिकः। क्रयिकः। विक्रयिकः। आयुधाच्छच। आयुधशब्दाच्छप्रत्ययोभवतिच
कारात्ठंश्चजीवतीत्येतस्मिन्नर्थे। आयुधेनजीवतिआयुधीयः। आयुधिकः॥हरत्युत्संगादिभ्यः॥तेनेत्येव। उत्संगादिभ्यस्तृतीयास
मर्थेभ्योहरतीत्येतस्मिन्नर्थेठक्प्रत्ययोभवति। हरतिदेशांतरप्रापणेवर्त्तते। उत्संगेनहरतिऔत्संगिकः। उत्संग। उडुप। उत्स
त। पिटक॥२॥भस्त्रादिभ्यःष्ठन्॥भस्त्रेत्येवमादिभ्यःस्तृतीयासमर्थेभ्योहरतीत्येतस्मिन्नर्थेष्ठन्प्रत्ययोभवति। भस्त्रयाहरतिभ
स्त्रिकी। भरटिकः। भरटिकी। भस्त्रा। भरट। भरण। शीर्षभार। शीर्षेभार। अंसभार। अंसेभार॥३॥विभाषाविवधवीवधात्

का०४
५१
हरतीत्येव। विवधवीवधशब्दाभ्यां तृतीयासमर्थाभ्यां विभाषाष्ठन्प्रत्ययो भवति। तेन मुक्ते प्रकृते ष्ठन् भवति। विवधेन
हरति विवधिकः। विवधिकी। वावधिकः। वीवधिकी। ठक्खल्वपि वैवधिकः। वैवधिकी। विवधवीवधशब्दौ समानार्थौ प
थिपर्यायौ हारिवर्वचने ॥४॥ अण् कुटिलिकायाः ॥ हरतीत्येव। कुटिलिकाशब्दात् तृतीयासमर्थादण् प्रत्ययो भवति हरतीत्येतस्मि
न्नर्थे। कुटिलिकया हरति मृगो व्याधं। कौटिलिको मृगः। कुटिलिकया हरत्यंगारान् कौटिलिकः। कर्मारः। कुटिलिका वक्रगतिः
कर्मारगणामायुधवर्षणी लोहमयी यष्टिरुच्यते ॥५॥ निर्वृत्तेक्षद्यूतादिभ्यः ॥ तेनाक्षद्यूतिकं वैरं। जानुप्रहृतिकं। अक्षद्यूत
जानुप्रहृतं। जंघाप्रहृत पादास्वेदन। कंटकमर्दन गतागत। यातोपयात। अनुगतः ॥६॥ त्रेर्मम्नित्यं ॥ निर्वृत्त इत्येव। ड्वितः क्त्रि
रित्ययं त्रिशब्दो गृह्यते। अंतान्नित्यं मम्प्रत्ययो भवति तेन निर्वृत्त इत्येतस्मिन्नर्थे। डुपचष्पाके। पक्त्रिमं। डुवप् बीजसंतान
कृत्र। कृत्रिमं। नित्यग्रहणं स्वातंत्र्यनिवृत्त्यर्थं तेन त्र्यंतं नित्यं मम्प्रत्ययांतमेव भवति। विग्रहवाक्यं तेन ग्रहणं नास्तीति। भाव
प्रत्ययांतादिमप्वक्तव्यः पाकेन निर्वृत्तं पाकिमं। त्यागिमम्। सेकिमम्। कुट्टिमम् ॥ वा॰ ॥ ३६ ॥ अपमित्ययाचिताभ्यां
कक्कनौ निर्वृत्त इत्येव ॥ अपमित्ययाचितशब्दाभ्यां यथासंख्यं कक्कनइत्येतौ भवतः। निर्वृत्त इत्येतस्मिन्नर्थे। तस्मिन्नर्थे
आपमित्यकं। याचितकं ॥ ८ ॥ संसृष्टे ॥ तेनेत्येव तृतीयासमर्थात् संसृष्ट इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। संसृष्टमेकी
भूतमभिन्नमित्यर्थः। दध्ना संसृष्टं दाधिकं। मारिचिकं शार्ङ्गवेरिकं। पैप्पलिकं ॥ ९ ॥ चूर्णादिनिः ॥ चूर्णशब्दादिनिः प्रत्ययो
भवति संसृष्टे ठकोपवादः। चूर्णैः संसृष्टाः चूर्णिनोऽपूपाः। चूर्णिनो धानाः ॥ १० ॥ लवणाल्लुक् ॥ संसृष्ट इत्येतेनोत्पन्नस्य
ठको लवणशब्दाल्लुग् भवति लवणः सूपः लवणं शाकं। लवणं शाकं। लवणा यवागूः। द्रव्यवाची लवणशब्दो लुकं प्रयोजय ५१
ति न गुणवाची ॥ ११ ॥ मुद्गादण् ॥ मुद्गशब्दादण् प्रत्ययो भवति ठकोपवादः मौद्ग ओदनः मौद्गी यवागूः ॥ १२ ॥ व्यंजनैरुपसि

क्ते ॥ तेनेत्येव। व्यंजनवाचिभ्यः प्रातिपदिकेभ्यस्तृतीयासमर्थेभ्य उपसिक्त इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। दध्ना उपसिक्तं
दाधिकं। सौपिकं। खाद्गुरिकं। व्यंजनैरिति किं दंकेनोपसिक्त ओदनः ॥ १३ ॥ ओजःसहोंभसा वर्त्तते ॥ ओजस् सहस् अंभस्
इत्येतेभ्यस्तृतीयासमर्थेभ्यो वर्त्तत इत्यर्थे ठक् प्रत्ययो भवति। ओजसा वर्त्तते औजसिकः। साहसिकश्चौरः। आंभसि
को मत्स्यः ॥ १४ ॥ तत्प्रत्यनुपूर्वमीपलोमकूलं ॥ तदिति द्वितीया द्वितीयासमर्थविभक्तिः प्रति अनु इत्येवं पूर्वेभ्य ईप लोमक
लशब्देभ्यो द्वितीयासमर्थेभ्यो वर्त्तत इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। ननु वर्त्तिरकर्मकः। तस्य कथं कर्मणा संबंधः।
क्रियाविशेषणमकर्मकाणामपि कर्म भवति। प्रतीपं वर्त्तते प्रातीपिकः। आन्वीपिकः। प्रातिलोमिकः। आनुलोमिकः। प्रा
तिकूलिकः। आनुकूलिकः ॥ १५ ॥ परिमुखं च ॥ परिमुखशब्दाद् द्वितीयासमर्थाद्वर्त्तत इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति
परिमुखं वर्त्तते पारिमुखिकः। चकारोनुक्तसमुच्चयार्थः। पारिपार्श्विकः ॥ १६ ॥ प्रयच्छति गर्ह्यम् ॥ तदिति द्वितीयासमर्था
त्प्रयच्छतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। यद्द्वितीयासमर्थं गर्ह्यं चेत्तद्भवति। द्विगुणार्थं द्विगुणं तादर्थ्यात्ताच्छब्द्यं द्विगुणं
प्रयच्छति। द्वैगुणिकः। त्रैगुणिकः। वृद्धेर्वृधुषिभावो वक्तव्यः वृद्ध्यर्थं द्रव्यं वृद्धिः तादर्थ्यात्ताच्छब्द्यं वृद्धिं प्रयच्छति वार्धुषि
कः। प्रकृत्यंतरं वा वृद्धिपर्यायः वृधुषिशब्दो वार्धुषिकः। गर्ह्यमिति किम्। द्विगुणं वृद्धिं प्रयच्छत्यधमर्णः ॥ १७ ॥ कुसीददशैकादशात्ष्ठ
न्ष्ठचौ ॥ प्रयच्छति गर्ह्यमित्येव। कुसीदं वृद्धिस्तदर्थं द्रव्यं कुसीदं। एकादशार्थं। दशदशैकादशशब्देनोच्यते। कुसीददशैका
श्री दशशब्देनोच्यते। कुसीददशैकादशशब्दाभ्यां यथासंख्यं ष्ठन्ष्ठचित्येतौ प्रत्ययौ भवतः। प्रयच्छति गर्ह्यमित्येतस्मिन्विषये ठ
कोपवादः। कुसीदं प्रयच्छति कुसीदिकः। कुसीदिकी। दशैकादशिकः। दशैकादशिकी ॥ १८ ॥ उंछति ॥ तदिति यासमर्था
दुंछतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। बदराण्युंछति बादरिकः। श्यामाकिकः। भूमौ पतितस्यैकैकस्य कणस्यादानं

का०४
९२
मुंडः। कणानुंछतिकाणिकः॥१९॥रक्षति॥तदितिद्वितीयासमर्थाद्रक्षतीत्येतस्मिन्नर्थेठक्प्रत्ययोभवति स्वरूपस्यपर्या
याणांतद्विशेषाणांचग्रहणं समाजंरक्षति सामाजिकः सांनिवेशिकः॥२०॥शब्ददर्दुरंकरोति॥तदितियासमर्थाभ्यांशब्ददर्दु
रशब्दाभ्यांकरोतीत्येतस्मिन्नर्थेठक्प्रत्ययोभवति शब्दंकरोति शाब्दिकोवैयाकरणः। दार्दुरिकः कुंभकारः॥२१॥पक्षि
मत्स्यमृगान्हंति॥तदित्येव। पक्ष्यादिभ्योद्वितीयासमर्थेभ्योहंतीत्येतस्मिन्नर्थेठक्प्रत्ययोभवति स्वरूपस्यपर्यायाणांत
द्विशेषाणांचग्रहणमिष्यते। पक्षिणोहंति पाक्षिकः शाकुनिकः मायूरिकः तैत्तिरिकः मत्स्यान् मात्स्यिकः मैनिकः शा
फरिकः शाकुलिकः मृगा मार्गिकः हारिणिकः सौकरिकः सारंगिकः॥२२॥परिपंथंचतिष्ठति॥परिपंथशब्दात्तदिति
द्वितीयासमर्थात्तिष्ठतीत्येतस्मिन्नर्थेठक्प्रत्ययोभवति। परिपंथंतिष्ठति पारिपंथिकश्चौरः। चकारोभिन्नक्रमः प्रत्ययार्थंसमु
च्चिनोति परिपंथंहंति पारिपंथिकः। समर्थविभक्तिप्रकरणेपुनर्द्वितीयाग्रहणं लौकिकवाक्यप्रदर्शनार्थं परिपंथशब्द
पर्यायः परिपंथशब्दोस्तीतिज्ञापयति सविषयांतरेपिप्रयोक्तव्यः॥२३॥माथोत्तरपदपदव्यनुपदंधावति॥माथशब्दो
त्तरपदात्प्रातिपदिकात्पदवीअनुपदइत्येताभ्यांचधावतीत्येतस्मिन्नर्थेठक्प्रत्ययोभवति। दंडमाथंधावति दांडमाथिकः
दंडकारमार्गः। पादविकः आनुपदिकः माथशब्दः पथिपर्यायः॥२४॥आक्रंदाट्ठञ्च॥आक्रंदत्यस्मिन्नित्याक्रंदोदेशः
अथवा आक्रंदनमित्याक्रंदः आर्तायनमुच्यते। विशेषाभावाद्द्वयोरपिग्रहणं। आक्रंदशब्दात्तदितिद्वितीयासमर्थाद्धावतीत्ये
तस्मिन्नर्थेठञ्प्रत्ययोभवति। चकारात्ठक्च स्वरेविशेषः। आक्रंदंधावति आक्रंदिकः॥२५॥पदोत्तरपदंगृह्णाति॥पदशब्दो
त्तरपदंयस्यतस्मात्पदोत्तरपदिकः पदान्तादित्युक्तं। बहुपूर्वान्माभूदिति॥२६॥प्रतिकंठार्थललामंच॥प्रतिकंठार्थ ९२
ललामशब्देभ्यस्तदितिद्वितीयासमर्थेभ्योगृह्णातीत्येतस्मिन्नर्थेठक्प्रत्ययोभवति। प्रतिकंठंगृह्णाति प्रातिकंठिकः।

आर्थिकः लालामिकः॥२७॥धी॥२७॥धर्मंचरति॥धर्मशब्दात्तदितिद्वितीयासमर्थाच्चरतीत्येतस्मिन्नर्थेठक्प्रत्ययोभ
वति। चरतिरासेवायामनुष्ठानमात्रे। धर्मंचरति धार्मिकः। अधर्माच्चेतिवक्तव्यं। आधर्मिकः॥२८॥प्रतिपथमेति
च॥प्रतिपथशब्दाद्द्वितीयासमर्थादेतीत्यस्मिन्नर्थेठञ्प्रत्ययोभवति चकारात्ठक्च। प्रतिपथमेति प्रतिपथिकः प्रातिपथि
कः स्वरेविशेषः॥२९॥समवायान्समवैति॥समवायवाचिभ्यःशब्देभ्यस्तदितिद्वितीयासमर्थेभ्यः समवैतीत्येतस्मिन्नर्थे
ठक्प्रत्ययोभवति। समवायःसमूहइत्युच्यते नसंप्रधारणं। समवायानितिबहुवचनं स्वरूपविधिनिरासार्थं। समवैति
आगत्यतदेकदेशीभवतीत्यर्थः। समवायान्समवैति सामवायिकः सामाजिकः सामूहिकः सांनिवेशिकः॥३०॥परि
षदोण्यः॥परिषच्छब्दाण्यः प्रत्ययोभवति समवायान्समवैतीत्येतस्मिन्विषये ठकोपवादः। परिषदंसमवैति पारिषद्यः॥३१॥
सेनायावा॥सेनाशब्दात्ण्यःप्रत्ययोभवति समवायान्समवैतीत्येतस्मिन्नर्थे ठकोपवादः। पक्षेसोपिभवति। सेनांसम
वैति सैन्यः सैनिकः॥३२॥संज्ञायांललाटकुक्कुट्यौपश्यति॥ललाटकुक्कुटीशब्दाभ्यांतदितिद्वितीयासमर्थाभ्यांपश्यतीत्ये
तस्मिन्नर्थेठक्प्रत्ययोभवति संज्ञायांविषये। संज्ञाग्रहणमभिधेयनियमार्थं। नतुरूढ्यर्थं। ललाटंपश्यति लालाटिकः
सेवकः। कौक्कुटिको भिक्षुः। सर्वावयवेभ्यो ललाटंदूरस्थं पतितदर्शनात् ललाटदर्शनेनसेवकः स्वामिनंप्रत्यनुपश्लेषः कोयं
मनुपस्थायिकत्वं लक्ष्यते। लालाटिकः सेवकः स्वामिनः कार्येष्वनुपस्थितइत्यर्थः। कुक्कुटीशब्देनापिकुक्कुटीपातोलक्ष्यते
देशस्याल्पतया हिभिक्षुरविक्षिप्तदृष्टिः पादविक्षेपदेशेचक्षुःसंयम्यगच्छति सउच्यते कौक्कुटिकइति तदभिधेयनियमः
संज्ञाग्रहणेनक्रियते। कुक्कुटादीभिवचेष्टा॥ ३३ ॥तस्यधर्म्यं॥तस्येतिषष्ठीसमर्थात्धर्म्यमित्येतस्मिन्नर्थेठक्प्रत्यया
भवति। धर्म्यंन्याय्यं। आचारयुक्तमित्यर्थः। शुल्कशालायाधर्म्यं शौल्कशालिकं। आकरिकं। आपणिकं गौल्मिकं॥३४॥

का॰४ अण्महिष्यादिभ्यः॥ महिषीत्येवमादिभ्योऽण् प्रत्ययो भवति। तस्य धर्म्यमित्येतस्मिन्विषये ठकोऽपवादः। महिष्या धर्म्यं माहि
५२ षं। याजावत्यं। महिषी। प्रजावती। प्रलेपिका। विलेपिका। अनुलेपिका। पुरोहित। मणिपाली। अनुचारक। होतृ। यजमान
॥३५॥ ऋतोऽञ्॥ ऋकारान्तात्प्रातिपदिकादञ् प्रत्ययो भवति तस्य धर्म्यमित्येतस्मिन्विषये ठकोऽपवादः। पोतुर्धर्म्यं पौत्रं। औ
द्गात्रं। नराच्चेति वक्तव्यं। नरस्य धर्म्या नारी। विशसितुरिड्लोपश्च। विशसितुर्धर्म्यं वैशस्त्रं। विभाजयितुर्णिलोपश्च। विभा
जयितुर्धर्म्यं वैभाजित्रम्॥३६॥ अवक्रयः॥ तस्येत्येव षष्ठीसमर्थादवक्रय इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। अवक्रीणीत
एनेनेति अवक्रयः पिंडक उच्यते। शुल्कशालाया अवक्रयः शौल्कशालिकः। आकरिकः। आपणिकः। गौल्मिकः। नन्ववक्र
योऽपि धर्म्यमेव। नैतदस्ति लोकपीडया धर्मातिक्रमेणाप्यवक्रयो भवति॥३७॥ तदस्य पण्यम्॥ तदिति प्रथमासमर्थादस्येति
षष्ठ्यर्थे ठक् प्रत्ययो भवति। यत्तत्प्रथमासमर्थं पण्यं चेत्तद्भवति। अपूपाः पण्यमस्य आपूपिकः। शाष्कुलिकः। मौदकिकः। पण्य
मिति विशेषणं तद्धितवृत्तावंतर्भूतमितः पण्यशब्दो न प्रयुज्यते॥३८॥ लवणाट्ठञ्॥ लवणशब्दाट्ठञ् प्रत्ययो भवति तदस्य प
ण्यमित्येतस्मिन्विषये ठकोऽपवादः। स्वरे विशेषः। लवणं पण्यमस्य लावणिकः॥३९॥ किसरादिभ्यः ष्ठन्॥ किसर इत्येवमादि
भ्यः ष्ठन् प्रत्ययो भवति तदस्य पण्यमित्येतस्मिन्विषये ठकोऽपवादः। किसरादयो गंधविशेषवचनाः। किसरा पण्यमस्य किसरि
कः। किसरिकी। नरदिकः। नरदिकी। किसर। नरद। स्थलद। सुमंगल। तगर। गुग्गुलु। उशीर। हरिद्रा। हरिद्रुपर्णी॥४०॥ श
लालुनोऽन्यतरस्याम्॥ शलालुशब्दादन्यतरस्यां ष्ठन् प्रत्ययो भवति तदस्य पण्यमित्येतस्मिन्विषये ठकोऽपवादः। पक्षे सोऽपि भ
वति। शलालुशब्दो गंधविशेषवचनः। शलालु पण्यमस्य शलालुकः। शालालुकः। शलालुकी। शालालुकी॥४१॥ शिल्प ५३
म्॥ तदिति प्रथमासमर्थविभक्तिरस्येति च प्रत्ययार्थोऽनुवर्त्तते तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठक् प्रत्ययो भवति। यत्त

त्प्रथमासमर्थं शिल्पं चेद्भवति। शिल्पं कौशलम्। मृदंगवादनं शिल्पमस्य मार्दंगिकः। पाणविकः। वैणविकः। मृदंगवादनं वर्त
मानं मृदंगशब्दः प्रत्ययमुत्पादयति। शिल्पं तद्धितवृत्तावंतर्भवति॥४२॥ मड्डुकझर्झरादणन्यतरस्याम्॥ मड्डुकझर्झरशब्दाभ्या
मन्यतरस्यामण् प्रत्ययो भवति तदस्य शिल्पमित्येतस्मिन्विषये ठकोऽपवादः। यथाप्राप्तं सोऽपि भवति मड्डुकवादनं शिल्पमस्य माड्डु
कः। झार्झरः। माड्डुकिकः। झार्झरिकः॥४३॥ प्रहरणम्॥ तदस्येत्येव। तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठक् प्रत्ययो भवति य
त्तत्प्रथमासमर्थं प्रहरणं चेद्भवति। असिः प्रहरणमस्य आसिकः। प्रासिकः। चाक्रिकः। धानुष्कः॥४४॥ परश्वधाट्ठञ्च॥ परश्व
धशब्दाट्ठञ् प्रत्ययो भवति तदस्य प्रहरणमित्येतस्मिन्विषये चकाराट्ठक् च। स्वरे विशेषः। परश्वधः प्रहरणमस्य पारश्वधिकः
॥४५॥ शक्तियष्ट्योरीकक्॥ शक्तियष्टिशब्दाभ्यामीकक् प्रत्ययो भवति तदस्य प्रहरणमित्येतस्मिन्नर्थे ठकोऽपवादः। शक्तिः प्र
हरणमस्य शाक्तीकः। याष्टीकः। शाक्तीकी। याष्टीकी॥४६॥ अस्तिनास्तिदिष्टं मतिः॥ तदस्येत्येव। तदिति प्रथमासमर्थेभ्यो
ऽस्तिनास्तिदिष्टशब्देभ्योऽस्येति षष्ठ्यर्थे ठक् प्रत्ययो भवति। यत्तत्प्रथमासमर्थं मतिश्चेत्सा भवति। अस्ति मतिरस्य आस्तिकः।
नास्तिकः। न च मतिसत्तामात्रे प्रत्यय इष्यते। किं तर्हि परलोकोऽस्तीति यस्य मतिरस्त्यास्तिकः। तद्विपरीतो नास्तिकः। प्रमा
णानुपातिनी यस्य मतिः स दैष्टिकः। तदेतदभिधानशक्तिस्वभावाल्लभ्यते। अस्तिनास्तिनिपातो वचनसामर्थ्याद्वा आ
ख्यातात् वाक्याद्वा प्रत्ययः॥४ ७॥ शीलम्॥ तदस्येत्येव। तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठक् प्रत्ययो भवति य
त्तत्प्रथमासमर्थं शीलं चेद्भवति। शीलं स्वभावः। अपूपभक्षणं शीलमस्य आपूपिकः। शाष्कुलिकः। मौदकिकः। भक्षणक्रि
यातद्विशेषणं च शीलं तद्धितवृत्तावंतर्भवति॥४८॥ छत्रादिभ्यो णः॥ छत्र इत्येवमादिभ्यो णः प्रत्ययो भवति तदस्य शीलमित्ये
तस्मिन्विषये ठकोऽपवादः। छत्रं शीलमस्य छात्रः। छादनादावरणं छत्रं। गुरुकार्येष्ववहितस्तच्छिद्रावरणप्रवृत्तः छत्रशी

का०४
०४

शीलः शिष्यच्छात्रः। स्थाशब्दोऽत्र पठ्यते स उपसर्गपूर्वोऽत्र गृह्यते। आस्था। संस्था। अवस्थिति। छत्रादि। शिक्षा। शिक्षापुरादु
शस्था। चुरा। उपस्थानं। कृषिकर्मन्। विश्वधा। तपस्तत्त्व। अनृत। शीलिका॥ ४९॥ धर्माध्ययने वृत्तम्॥ तदस्येत्येव तदि
ति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठक् प्रत्ययो भवति यत्तत्प्रथमासमर्थं कर्म चेद्वृत्तमध्ययने विषयीभवति। एकमन्यदध्ययने
कर्मवृत्तमस्य एकान्यिकः। द्वैयन्यिकः। त्रैयन्यिकः। एकमन्यदिति विगृह्य तद्धितार्थ इति समासः। ततष्ठक् प्रत्ययः अध्य
यने कर्मवृत्तमित्येतस्मिन् सर्वं तद्धितवृत्तावन्तर्भवति। यस्याध्ययने नियुक्तस्य परीक्षाकाले पठतः स्खलितमपपाठरूप
मेकं जातं स उच्यते एकान्यिक इति। एवं द्वैन्यिकः त्रैयन्यिक इति॥ ५०॥ बह्वच्पूर्वपदाट्ठच्॥ बह्वच् पूर्वपदं यस्य तस्माद्बह्वच्पूर्व
पदात् प्रातिपदिकाट्ठच् प्रत्ययो भवति तस्य कर्माध्ययने वृत्तमित्यस्मिन्नर्थे ठकोऽपवादः द्वादशान्यानि कर्माण्यध्ययने वृत्ता
न्यस्य द्वादशान्यिकः। त्रयोदशान्यिकः। चतुर्दशान्यिक इति। चतुर्दशापपाठा अस्य जाता इत्यर्थः। उदात्तकर्तव्ये यानुदात्तं क
रोति स उच्यते। अन्यत्वं करोतीति॥ ५१॥ हितं भक्षाः॥ तदस्येत्येव तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठक् प्रत्ययो भवति य
त्तत्प्रथमासमर्थं हितं चेद्भवति यत्तत्प्रथमासमर्थं हितं चेद्भवति तत्र भक्षाः। ननु च हितयोगे चतुर्थी भवति तत्कथं षष्ठ्यर्थे प्र
त्ययो विधीयते। एवं तर्हि सामर्थ्याद्विभक्तिपरिणामो भविष्यति। अपूपभक्षणं हितमस्मै आपूपिकः। शाष्कुलिकः। मोदकिकः।
हितार्थः क्रिया च तद्धितवृत्तावन्तर्भवति॥ ५२॥ तदस्मै दीयते नियुक्तम्॥ तदिति प्रथमासमर्थादस्मै इति चतुर्थ्यर्थे ठक् प्रत्य
यो भवति। यत्तत्प्रथमासमर्थं तच्चेद्दीयते नियुक्तं नियोगेनाव्यभिचारेण दीयत इत्यर्थः। अव्यभिचारो नियोगः। अग्रभोजनम
स्मै नियुक्तं दीयते आग्रभोजनिकः। आपूपिकः। शाष्कुलिकः। केचित्तु नियुक्तं नित्यमाहुः। अपूपा नित्यमस्मै दीयन्ते आपूपिकः। ९४
श्राणामांसौदनाट्टिठन्॥ श्राणामांसौदनशब्दाभ्यां टिठन् प्रत्ययो भवति तदस्मै दीयते नियुक्तमित्येतस्मिन्नर्थे ठकोऽपवादः।

सं

Dr. BHAU DAJI MEMORIAL

इकार उच्चारणार्थः। टकारो ङीबर्थः। श्राणा नियुक्तमस्मै दीयते श्राणिकः। श्राणिकी। मांसौदनिकः। मांसौदनिकी। ननु च ठ
मेव कस्मान्नोच्यते न ह्यत्र ठञष्ठनो वा विशेषोऽस्ति। मांसौदनग्रहणं संघातविगृहीतार्थं केचिदिच्छन्ति। तत्र वृद्धभावो विशे
षः। औदनिकः। औदनिकी॥ ५४॥ भक्तादणन्यतरस्याम्॥ भक्तशब्दादण् प्रत्ययो भवति अन्यतरस्यां तदस्मै दीयते नियु
क्तमित्येतस्मिन् विषये ठकोऽपवादः। पक्षे सोऽपि भवति भक्तमस्मै दीयते नियुक्तं भाक्तः। भाक्तिकः॥ ५५॥ तत्र नियुक्तः॥ तत्रेति स
प्तमीसमर्थान्नियुक्त इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति नियुक्तोऽधिकृतो व्यापारित इत्यर्थः। शुल्कशालायां नियुक्तः शौ
ल्कशालिकः। आकरिकः। आपणिकः। गौल्मिकः। दौवारिकः॥ ५६॥ अगारान्ताट्ठन्॥ अगारशब्दान्तात् प्रातिपदिकाट्ठ
न् प्रत्ययो भवति तत्र नियुक्त इत्येतस्मिन् विषये ठकोऽपवादः। देवागारे नियुक्तो देवागारिकः। कोष्ठागारिकः॥ ५७॥ अध्या
यिन्यदेशकालात्॥ तत्रेत्येव सप्तमीसमर्थाद्देशवाचिनः प्रातिपदिकात् कालवाचिनश्च अध्यायिन्यभिधेये ठक् प्रत्ययो भ
वति। अध्ययनस्य यौ देशकालौ शास्त्रेण प्रतिषिद्धौ तावदेशकालशब्देनोच्येते। तत्र इदं प्रत्ययविधानं श्मशानेऽधीते श्माश
निकः। चातुष्पथिकः। अकालात् चतुर्दश्यामधीते चातुर्दशिकः। आमावास्यिकः। अदेशकालादिति किं। श्रुघ्नेऽधीते पूर्वाह्णे
धीते॥ ५८॥ कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति॥ तत्रेत्येव। कठिनशब्दान्तात् सप्तमीसमर्थात् प्रस्तारसंस्थानशब्दाभ्यां
च ठक् प्रत्ययो भवति व्यवहरतीत्येतस्मिन्नर्थे व्यवहारः क्रियातत्त्वं। यथा लौकिकव्यवहार इति। वंशकठिने व्यवहरति वांशक
ठिनिकः। वार्ध्रकठिनिकः। प्रास्तारिकः। सांस्थानिकः॥ ५९॥ निकटे वसति॥ निकटशब्दात् सप्तमीसमर्थाद्वसतीत्येतस्मिन्नर्थे ठ
क् प्रत्ययो भवति यश्शास्त्रतः वानिकट वास स्नातः यो विधिः। आरण्यकेन भिक्षुणा ग्रामात् क्रोशे वस्तव्यमिति शास्त्रे। निकटे वस
ति नैकटिको भिक्षुः॥ ६०॥ आवसथात्ष्ठल्॥ तत्रेत्येव आवसथशब्दात् सप्तमीसमर्थाद्वसतीत्येतस्मिन्नर्थे ष्ठल् प्रत्ययो

भवति। लकारः स्वरार्थः। षकारो ङीषर्थः। आवसथं वसति आवसथिकः। आवसथिकी। ठकः पूर्णोऽवधिरतः परमन्यः प्रत्य
यो विधीयते॥ ६१॥ प्राग्घिताद्यत्॥ तस्मै हितमिति वक्ष्यति प्रागेतस्माद्धितसंशब्दनाद्यानितऊर्द्ध्वमनुक्रमिष्यामो यत्प्रत्ययस्त
दधिकृतो वेदितव्यः। वक्ष्यति। तद्वहति। तद्वहति रथयुगप्रासंगं रथं वहति रथ्यः। युग्यः॥ ६२॥ तद्वहति रथयुगप्रासंगं॥ त
दिति द्वितीयासमर्थेभ्यो रथयुगप्रासंगेभ्यो वहतीत्येतस्मिन्नर्थे यत्प्रत्ययो भवति। रथं वहति रथ्यः। युग्यः। प्रासंग्यः। रथसीता
हलेभ्यो यद्विधाविति तदंतविध्युपसंख्यानात् परमरथ्य इत्यपि भवति॥ ६३॥ धुरो यड्ढकौ। तद्वहतीत्येव। धुर इत्येतस्मात्
द्वितीयासमर्थाद्वहतीत्येतस्मिन्नर्थे यत् ढक् इत्येतौ प्रत्ययौ भवतः। धुरं वहति धुर्यः। धौरेयः॥ ६४॥ खः सर्वधुरात्। तद्वहती
त्येव। सर्वधुरशब्दात् द्वितीयासमर्थाद्वहतीत्येतस्मिन्नर्थे खः प्रत्ययो भवति। सर्वधुरं वहति सर्वधुरीणः। स्त्रीलिंगन्यायेस
र्वधुरादिति प्रातिपदिकमात्रापेक्षो निर्देशः। ख इति योगविभागः कर्त्तव्य इष्टसंग्रहार्थः। उत्तरधुरीणः। दक्षिणः। दक्षिणधुरी
णः॥ ६५॥ एकधुराल्लुक् चेत्येव॥ एकधुरशब्दात् द्वितीयासमर्थाद्वहतीत्येतस्मिन्नर्थे खः प्रत्ययो भवति तस्य लुग्भवति। व
चनसामर्थ्यात्पक्षे लुग्विधीयते। एकधुरां वहति एकधुरः॥ ६६॥ शकटादण्। तद्वहतीत्येव शकटशब्दात् द्वितीयासमर्था
द्वहतीत्येतस्मिन्नर्थे अण्प्रत्ययो भवति। शाकटं वहति। शाकटो गौः॥ ६७॥ हलसीराट्ठक्। जन्याः॥ न द्वहतीत्येव। जनीशब्दा
द्वितीयासमर्थाद्वहतीत्येतस्मिन्नर्थे यत्प्रत्ययो भवति समुदायेन चेत्संज्ञा गम्यते जनीं वहंति जन्या। जामातुर्वयस्याः सा हि विहा
रादिषु या मातृसमीपं प्रापयति॥ ६९॥ विध्यत्यधनुषा॥ तदिति द्वितीयासमर्थात् विध्यतीत्येतस्मिन्नर्थे यत्प्रत्ययो भवति
न चेद्धनुः करणं भवति। पादौ विध्यंति पद्याः शर्कराः। ऊरव्याः। कंटकाः। अधनुषेति किं। पादौ विध्यति धनुषा। ननु चा ९९
सामर्थ्यादनभिधानाच्च प्रत्ययो न भवति। न हि धनुषा पाद्य इत्युक्ते विवक्षितोऽर्थः प्रतीयते। एवं तर्हि धनुःप्रतिषेधेन व्यधन

क्रियाविशेष्यते यस्यां धनुःकरणं न संभाव्यते तेनेह न भवति। चौरं विध्यति। शत्रुं विध्यति देवदत्त इति॥ ७०॥ धनगणं लब्धा॥
तदित्येव। धनगणशब्दाभ्यां द्वितीयासमर्थाभ्यां लब्धा इत्येतस्मिन्नर्थे यत्प्रत्ययो भवति। धन्यः। गण्यः। लब्धेति तृन्नंतं
न द्वितीयासमर्थाविभक्तिर्युज्यते॥ ७१॥ अन्नाण्णः॥ अन्नशब्दात् तदिति द्वितीयासमर्थाल्लब्धेत्येतस्मिन्नर्थे णप्रत्ययो भवति
अन्नं लब्धा आन्नः॥ ७२॥ वशंगतः॥ वशशब्दात् द्वितीयासमर्थाद्गत इत्येतस्मिन्नर्थे यत्प्रत्ययो भवति। वशंगतः वश्यः। का
मप्राप्तो विधेय इत्यर्थः॥ ७३॥ पदमस्मिन्दृश्यम्। निर्देशादेव प्रथमासमर्थविभक्तिः। पदशब्दात् प्रथमासमर्थाद् दृश्यमिति उपा
धिकादस्मिन्निति सप्तम्यर्थे यत्प्रत्ययो भवति। पदं दृश्यमस्मिन् पद्यः कर्दमः। पद्याः पांसवः। नावमर्थे क्तः। शक्यते यस्मि
न्पदं द्रष्टुं प्रतिमुद्रोत्पादनयोग्यः। कर्दमः। कर्दमस्यावस्थोच्यते नातिद्रवो नातिशुष्कः॥ ७४॥ मूलमस्याबर्हि॥ मूलश
ब्दात् प्रथमासमर्थादाबर्हीत्येवमुपाधिकादस्येति षष्ठ्यर्थे यत्प्रत्ययो भवति। मूलमेषामाबर्हि मूल्या माषाः। मूल्या मुद्गाः।
आबर्हि उद्धमनं। येषां मूलमाबर्ह्यते उत्पाट्यते ते मूल्याः मुद्गनिष्पन्नाः। मूलोत्पाटनेन विना गृहीतुं न शक्यंत इत्यर्थः॥ ७५॥
संज्ञायां धेनुष्या॥ धेनुष्येति निपात्यते संज्ञायां विषये। संज्ञाग्रहणमभिधेयनियमार्थं। धेनोः पुगागमः यश्च प्रत्ययः
अन्तोदात्तोऽपि त्वयमिष्यते। या धेनुरुत्तमर्णाय ऋणप्रदानाद्दोहनार्थं दीयते सा धेनुष्या। पीतदुग्धेति यस्याः प्रसिद्धिः
धेनुष्यां भवते ददामि॥ ७६॥ गृहपतिना संयुक्ते ञ्यः॥ निर्देशादेव तृतीयासमर्थविभक्तिः। गृहपतिशब्दात् तृतीयासमर्थात्सं
युक्त इत्येतस्मिन्नर्थे ञ्यः प्रत्ययो भवति। गृहपतिना संयुक्तः गार्हपत्योऽग्निः। अन्यत्रापि गृहपतिना संयोगोऽस्तीति तत्र संज्ञा
धिकारादतिप्रसंगनिवृत्तिः॥ ७७॥ नौवयोधर्मविषमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसंमितेषु॥ ना
वादिभ्यो यथा यः शब्देभ्यस्तार्यादिष्वर्थेषु यथासंख्यं यत्प्रत्ययो भवति। प्रत्ययार्थद्वारेण तृतीया समर्थविभक्तिः

भ्यंते। मावानार्येनाम्यमुदकं। नाव्या नदी। शब्दार्थकृत्यः। वयसा तुल्यो वयस्यः। संज्ञाधिकारादभिधेयनियमार्थः। तेन वयस्यात्
न्यस्मिंश्चोन भवति। धर्म्यं। ननु च धर्म्याद नुपेत इति वक्ष्यमाणेनैव सिद्धं। नैतदस्ति। धर्मो यद नुवर्त्तनं तद्धर्माद नुपेतमित्युच्य
ते फलं तु धर्मादति रसवत्कारणापेक्षयैव च नातिविरोधित्वाद्धर्मस्य विषेण वद्धाविष्यः। विषेण वध्यः। धर्महर्तेत्यर्थः। मूल्येनानाम्यं मूल्यं
आनाम्यमभिभवनीयं। पटादीनामुत्पत्तिकारणं मूल्यं तेन तदभिभूयते शेषोधिक्रियते। मूल्यं हि सगुणमूल्यं करोति। पारदुरधा
दितियति प्राप्तेआनाम्यमिति निपातनात्। मूल्येन समामूल्यामल्लभः पलः उपादानेन समानफल इत्यर्थः। सीतया संगतं सी
त्यं क्षेत्रं। समितं संगतमित्यर्थः। रथसीताहलेभ्यो यद्विधावितितदंताधिविध्यंते। परमसीत्यं। त्रिसीत्यं। तुलया सम्मितं तुल्यं
सम्मितं समानं सदृशमित्यर्थः। यथा तुलया परिच्छिनत्ति परिमयं तदेवं तदपि॥७८॥धर्मपथ्यर्थन्यायादनपेते॥ निर्देशादेव पंचमी
समर्थविभक्तिः। धर्मादिभ्यः पंचमी समर्थेभ्यो नपेत इत्येतस्मिन्नर्थे यत्प्रत्ययो भवति। धर्मादनपेतं धर्म्यं पथ्यं न्याय्यं। सं
ज्ञाधिकारादभिधेयनियमः॥७९॥ छंदसो निर्मिते॥ प्रत्ययार्थसामर्थ्यलभ्या समर्थविभक्तिः। छंदःशब्दात्तृतीया समर्था
न्निर्मित इत्येतस्मिन्नर्थे यत्प्रत्ययो भवति निर्मित उत्पादितः छंदसा निर्मितः छंदस्यः छंदसा कृत इत्यर्थः। इच्छापर्यायश्छं
दःशब्द इह गृह्यते॥८०॥ उरसोण्च॥ उरःशब्दात्तृतीयासमर्थान्निर्मितस्मिन्नर्थेण्प्रत्ययो भवति। चकाराद्यच्च। उरसा नि
र्मितः। औरसः पुत्रः उरस्यः पुत्रः संज्ञाधिकारादभिधेयनियमः॥८१॥ हृदयस्य प्रियः॥ निर्देशादेव समर्थविभक्तिः हृदय
शब्दात्षष्ठीसमर्थात्प्रिय इत्येतस्मिन्नर्थे यत्प्रत्ययो भवति हृदयस्य प्रियो हृद्यो देशः हृद्यं वनं। संज्ञाधिकारादभिधेयनियमः
इह न भवति हृदयस्य प्रियः पुत्र इति॥८२॥ बंधने चर्षौ॥ हृदयस्येत्येव बंधन इति प्रत्ययार्थः। तद्विशेषणमृषिग्रहणं हृदयेन
येन तद्बंधनं हृदयशब्दात्षष्ठीसमर्थाद्बंधने ऋषावभिधेये यत्प्रत्ययो भवति ऋषिर्वेदो गृह्यते। हृदयस्य बंधनः ऋषिः हृ

पारहृदयं येन बध्यते वशीक्रियते सर्वांश्चिकित्सते सवशीकरणमंत्रो हृद्य इत्युच्यते॥८३॥ मतजनहलात्करणजल्पकर्षेषु॥ म
तादिभ्यस्त्रिभ्यः शब्देभ्यस्त्रिष्वेव करणादिष्वर्थेषु यथासंख्यं यत्प्रत्ययो भवति प्रत्ययार्थसामर्थ्याल्लभ्या षष्ठी समर्थविभक्तिः
मतं ज्ञानं तस्य करणं मत्यं। भावः साधनं। जनस्य जल्पः जन्यः। हलस्य कर्षः हल्यः द्विहल्यः त्रिहल्यः। कर्षणं कर्षः भावः
साधनं वा॥८४॥ तत्र साधुः॥ तत्रेति सप्तमी समर्थात्साधुरित्येतस्मिन्नर्थे यत्प्रत्ययो भवति। सामसु साधुः सामन्यः वेमन्यः कर्म
ण्यः शरण्यः साधुरिह प्रवीणो योग्यो वा गृह्यते। नोपकारकः। तत्र हि परत्वात्तस्मै हितमित्यनेन विधिना भवितव्यं॥८५॥
प्रतिजनादिभ्यः खञ्॥ प्रतिजनादिभ्यः शब्देभ्यः खञ्प्रत्ययो भवति तत्र साधुरित्येतस्मिन्नर्थे यतोपवादः। प्रतिजनं साधुः
प्रातिजनीनः। जने जने साधुरित्यर्थः। ऐदंयुगीनः। प्रतिजन। इदंयुग। संयुग। समयुग। परयुग। परकुल। परस्यकुल। अमु
ष्यकुल। सर्वजन। विश्वजन। पंचजन। महाजन। यत्र हितार्थ एव साध्वर्थः। तत्र चानारब्धी ऋकीतीयाबाध्यंते यतो पवादः
भक्ताण्णः साधुः भाभक्तः। भक्तशब्दाण्णः प्रत्ययो भवति तत्र साधुरित्येतस्मिन्नर्थे विषयकः शालिकः भाक्ताः तंदुलाः॥८७॥
परिषदो ण्यः॥ परिषद्शब्दाण्ण्यः प्रत्ययो भवति तत्र साधुरित्येतस्मिन्विषये यतोपवादः। परिषदि साधुः पारिषद्यः। ण्यप्र
त्ययोऽयं यत्नेतदर्थयोगविभागः क्रियते परिषदो णश्चेति। परिषदि साधुः पारिषदः॥८८॥ कथादिभ्यष्ठक्॥ कथादिभ्यः
शब्देभ्यष्ठक्प्रत्ययो भवति तत्र साधुरित्येतस्मिन्विषये यतोपवादः। कथायां साधुः काथिकः। वैकथिकः। कथा। विकथा। कुष्ठवि
त। जनवाद। जनेवाद। वृत्ति। सद्गृह। गुण। गण। आयुर्वेद॥८९॥ गुडादिभ्यष्ठञ्॥ गुडादिभ्यः शब्देभ्यष्ठञ्प्रत्ययो भवति
तत्र साधुरित्येतस्मिन्विषये यतोपवादः। गुडे साधुः गौडिकः इक्षुः। कौल्माषिकः मुद्गः। साक्तुकः यवः। गुड। कुल्माष। सक्तु।
अप्रय। मांसौदन। इक्षु। वेणु। संग्राम। संघात। प्रवास। उपवास॥ ९०॥ पथ्यतिथिवसतिस्वपतेर्ढञ्॥ पथ्यादिभ्यः शब्देभ्यो ढ

का॰४ अत्ययो भवति तत्र साधुरित्येतस्मिन्विषये यतोऽपवादः। पथि साधुः पाथेयं। आतिथेयं। वासतेयं। स्वापतेयं॥९१॥ सभाया
५७ यः॥ सभाशब्दाद्यः प्रत्ययो भवति तत्र साधुरित्येतस्मिन्विषये। यतोऽपवादः। स्वरे विशेषः। सभायां साधुः सभ्यः॥९२॥ ढश्छ
न्दसि॥ सभाशब्दाड्ढः प्रत्ययो भवति तत्र साधुरित्येतस्मिन्विषये छंदसि यस्यापवादः। सभेयोऽस्य युवा यजमानस्य वीरो जायतां
॥९३॥ समानतीर्थे वासी॥ साधुरिति निवृत्तं वासीति प्रत्ययार्थः समानतीर्थशब्दात्तत्रेति सप्तमीसमर्थाद्वासीत्येतस्मिन्नर्थे
यत्प्रत्ययो भवति समानतीर्थे वासीति सतीर्थ्यः। समानोपाध्याय इत्यर्थः॥९४॥ समानोदरे शयित ओ चोदात्तः॥ समानोदर
शब्दात्सप्तमीसमर्थाच्छयित इत्येतस्मिन्नर्थे यत्प्रत्ययो भवति। ओकारश्चोदात्तः। शयितः स्थित इत्यर्थः। समानोदरे शयि
तः समानोदर्यो भ्राता॥९५॥ सोदराद्यः॥ सोदरशब्दात्सप्तमीसमर्थाच्छयित इत्येतस्मिन्नर्थे यः प्रत्ययो भवति विभाषोद
र इति सूत्रेण यकारादौ प्रत्यये विवक्षिते प्रागेव समानस्य सभावः। समानोदरे शयितः सोदर्यो भ्राता। ओ चोदात्त इति
नानुवर्त्तते। यकारः स्वरः॥९६॥ भवे छंदसि॥ तत्रेत्येव। सप्तमीसमर्थाद्भव इत्येतस्मिन्नर्थे छंदसि विषये यत्प्रत्ययो भवति। अण
दीनां घादीनां चापवादः। सति दर्शने तेऽपि भवंति। सर्वविधीनां छंदसि व्यभिचारात्। मेध्याय च नमो विद्युत्याय च नमः॥
आ पादपरिसमाप्तेश्छंदोऽधिकारो भवापिकारश्च समुद्राभ्राद्घ इति यावत्॥९६॥ पाथोनदीभ्यां ड्यण्॥ पाथःशब्दान्नदीशब्दा
च्च ड्यण् प्रत्ययो भवति तत्र भव इत्येतस्मिन्नर्थे यतोऽपवादः। पाथसि भवः पाथ्यो वृषा। नाद्यामिरासं प्रयस्वति। पाथ्याः तरि
ष्टं॥९७॥ वेशंतहिमवद्भ्यामण्॥ वेशंतशब्दाद्धिमवच्छब्दाच्चाण् प्रत्ययो भवति तत्र भव इत्येतस्मिन्विषये यतोऽपवादः
वैशंताभ्यः स्वाहा। हैमवतीभ्यः स्वाहा। स्रोतसो विभाषा ड्यड्ड्यौ। स्रोतःशब्दाद्विभाषा ड्यत् ड्य इत्येतौ प्रत्ययौ भवतः भ ५७
व इत्येतस्मिन्विषये यतोऽपवादः। स्रोतसि भवः स्रोत्यः। स्रोतस्यः। ड्यत्ड्ययोः स्वरे विशेषः। सगर्भसयूथसनुताद्यन्॥

सगर्भसयूथसनुतशब्देभ्यो यत्प्रत्ययो भवति तत्र भव इत्येतस्मिन्विषये। यतोऽपवादः। स्वरे विशेषः। अनु भ्राता सगर्भ्यः। अनु स
खा सयूथ्यः। यो नः सनुत्यः। सर्वत्र समानस्य छंदसीति सभावः॥९८॥ तुग्राद्घन्॥ तुग्रशब्दाद्घन् प्रत्ययो भवति तत्र भव इत्ये
तस्मिन्विषये यतोऽपवादः। त्वमग्ने वृषभस्तुग्रियाणां। अत्राकाश यज्ञ वरिष्ठे तुग्रशब्दः॥९९॥ अग्राद्यत्॥ अग्रशब्दाद्यत्
प्रत्ययो भवति तत्र भव इत्येतस्मिन्विषये। अग्रे भवमग्र्यं। किमर्थमिदं यावता सामान्येन यद्विहित एव। घच्छौ वक्ष्यति
ताभ्यां बाधा मा भूदिति पुनर्विधीयते॥६००॥ घच्छौ च॥ अग्रशब्दात् घच्छौ प्रत्ययौ भवतः तत्र भव इत्येतस्मिन्विषये। अग्रि
यं। अग्रीयं। अग्र्यं। चकारस्तु प्राग्वदित्यस्यानुकर्षणार्थः। अग्नियं स्वरे विशेषः॥१॥ समुद्राभ्राद्घः॥ समुद्रशब्दादभ्रश
ब्दाच्च घः प्रत्ययो भवति तत्र भव इत्येतस्मिन्नर्थे यतोऽपवादः। समुद्रियाणां नदीनां। अभ्रियस्येव घोषः। अभ्रशब्दस्य पू
र्वनिपातस्तल्लक्षणस्य व्यभिचारित्वात्॥२॥ बर्हिषि दत्तं॥ भव इति निवृत्तं। बर्हिःशब्दात्सप्तमीसमर्थाद्दत्तमित्येतस्मिन्नर्थे
यत्प्रत्ययो भवति। बर्हिष्येषु निधिषु प्रियेषु॥३॥ दूतस्य भागकर्मणी॥ निर्देशादेव समर्थविभक्तिर्दूतशब्दात् षष्ठीसम
र्थाद्भागे कर्मणि वाभिधेये यत्प्रत्ययो भवति। भागोंऽशः। कर्म क्रिया। यत्ते अग्ने दूत्यं दूतभागः दूतकर्म वा॥४॥ यो ॥२१॥ रक्षो
यातूनां हननी॥ निर्देशादेव समर्थविभक्तिः रक्षःशब्दाद्यातुशब्दाच्च षष्ठीसमर्थाद्धननीत्येतस्मिन्नर्थे यत्प्रत्ययो भवति। हन्यते
नयेति हननी। या ते अग्ने रक्षस्या हननी। यातव्या यातोहननी। बहुवचनं तु तिवैशिष्ट्यज्ञापनार्थं। बहूनां रक्षसां हनने
न रक्षते॥५॥ रेवतीजगतीहविष्याभ्यः प्रशस्ये॥ रेवत्यादिभ्यः षष्ठीसमर्थेभ्यः प्रशस्ते च यत्प्रत्ययो भवति। प्रशंसनं प्र
शस्यं भावे क्यप् प्रत्ययः यद्यो रेवतीः रेवती रेवत्यं यद्यो जगत्याः जगत्यं। यद्यो हविष्याः हविष्यां हविषं हिता हविष्याणां
संप्रशंसनं हविष्यं यस्यति लोपः कृते हलो यमां यमि लोपः॥६॥ असुरस्य स्वं॥ असुरशब्दात्षष्ठीसमर्थात्स्वमित्येत

का॰४ स्मिन्नर्थे यत्प्रत्ययो भवति। अणोपवादः। अस्कर्य्यैवाण्तत्यात्रं। यत्र कर्त्तं कुलालेऽकृतं॥७॥मायायामण्॥ असरशब्दा
५८ त्षष्ठीसमर्थान्मायायां स्वविशेषेऽण प्रत्ययो भवति। पूर्वस्य यतोपवादः। आसरी माया स्वधयासुनासि॥८॥तद्वानासा
मुपधानो मंत्र इतीष्टकासु लुक् मतोः॥ तद्वानिति निर्देशो समर्थविभक्तिः। भवन्तु ताः प्रातिपदिकात् प्रथमासमर्थादासामितिषष्ठ्य
र्थे यत्प्रत्ययो भवति। यत्प्रथमासमर्थमुपधानो मंत्रश्चेत्स भवति। यत्तदासामिति निर्दिष्टमिष्टकाश्चेत्ता भवंति। लुक्मतो
रिति प्रकृतिनिर्ह्रासः। इतिकरणस्ततश्चेद्विवक्षा। तद्वानित्यवयवेन समुदायो व्यपदिश्यते। वर्चः शब्दो यस्मिन्मंत्रेऽ
स्ति स वर्चस्वान्। उपधीयते येन स उपधानः चयनवचनइत्यर्थः। वर्चस्वानुपधानमंत्र आसामिष्टकानामिति विगृह्य य
ति विहिते मतोर्लुकि च कृते वर्चस्या उपदधाति। तेजस्या उपदधाति। पयस्याः रेतस्याः। तद्वानिति किं। मंत्रसमुदायादेवन्मा
भूत। उपधान इति किं। वर्चस्वानुपधानमंत्रः आसामित्यत्र माभूत। मंत्र इति किं। अंगुलिमानुपधानो हस्त आसामित्यत्र माभू
त्। इष्टकास्विति किं वर्चस्वानुपधानो मंत्र एषां कपालानां इत्यत्र माभूत्। इतिकरणो नियमार्थः। अनेकपदसंभवेपि क
न्चिदेव पदेन तद्वान्मंत्रो गृह्यते न सर्वेण॥९॥अश्विमानण॥ अश्विशब्दो यस्मिन्मंत्रेऽस्ति सोश्विमान्। अश्विमत्शब्दादण्
प्रत्ययो भवति पूर्वस्य यतोपवादः। अश्विमानुपधानो मंत्र आसामिष्टकानामिति विगृह्य अण्विधीयते तत्र मतुपो लुकि कृते इ
त्रण्यत पत्य इति प्रकृतिभावः। आश्विनीरुपधाति॥१०॥वयस्यासु मूर्ध्नो मतुप्॥ वयस्यानुपधानो मंत्रो यासां ता वयस्याः तास्व
भिधेयासु मूर्द्ध्नो मतुप्प्रत्ययो भवति पूर्वस्य यतोपवादः। यस्मिन्मंत्रे वयः शब्दो मूर्द्धन्शब्दश्च विद्यते स वयस्वानपि भवति
मूर्द्धन्वानपि यथा मूर्द्धा वयः प्रजापतिश्छंद इति। तत्र वयस्वच्छब्दादिव मूर्द्धन्वच्छब्दादपि यति प्राप्ते मतुप् विधीयते। मूर्द्ध ५८
न्वतीरुपदधाति वयस्या एव मूर्द्धन्वत्यः वयस्यास्विति किं। यत्र मूर्द्धशब्द एव केवलो न वयःशब्दस्तत्र माभूत्। मूर्द्धन्वत

इति वक्तव्ये मूर्द्ध इत्यकृतं मतुपो लुक्भाविनं चित्ते कृत्वा॥११॥मत्वर्थे मासतन्व्योः॥ यस्मिन्नर्थे मतुब्विहितस्तस्मिन्छंदसि विष
ये यत्प्रत्ययो भवति। मत्वर्थीयानामपवादः। नभांसि विद्यंते यस्मिन्मासि नभस्यो मासः। सहस्यः। तपस्यः। मधव्यः। नभः
शब्दोऽभ्रेषु वर्त्तते। तन्वां खल्वपि। ओजोस्यां विद्यते। ओजस्या तनूः रक्षस्या मासतन्व्योरिति किं। मधुमता पात्रेण चरति।
मासतन्वोरनंतरार्थे वा मधुरस्मिन्नस्तिमधु अस्मिन्ननंतरमितिवा मधव्यो मासः। लुगकारेकाररेफाश्च वक्तव्याः लुक्ताव
त नभश्चान्पुंसकलिंगाच्छांदसत्वात्। अकारः इषामासः। ऊर्जो मासः। इकारः शुचिमासः। रेफः। शुक्रो मासः॥१२॥मध
रोञ्च॥ मधुशब्दान्मत्वर्थे ञप्रत्ययो भवति वकारादेश्च उपसंख्यानाल्लुक्। माधवः। मधव्यः। मधुः। तन्वां खल्वपि। माधवा
मधव्या। मधुः। तनूः॥१३॥ओजसोहनि यत्खौ॥ मत्वर्थे इत्येव ओजः शब्दान्मत्वर्थे यत्खौ प्रत्ययो भवति मासतन्व्योः प्रत
यार्थविशेषयोः॥ प्रथमासमर्थादस्त्युपाधिकात्षष्ठ्यर्थे सप्तम्यर्थे च यत्प्रत्ययो भवति॥१०॥ अहन्यभिधेये॥ ओजस्यम
हः। ओजसीनमहः॥६१४॥वेशोयशआदेर्भगाद्यल्खौ मत्वर्थ इत्येव॥ वेशोयशसी आदी यस्य प्रातिपदिकस्य तस्माद्वेशोय
शआदेर्भगान्तात्प्रातिपदिकान्मत्वर्थे यल् प्रत्ययो भवति लकारः स्वरार्थः वेशो भगो विद्यते यस्य स वेशोभग्यः यशोभ
ग्यः वेश इति बलमुच्यते। श्रीकामप्रयत्नमाहात्म्यवीर्ययशस्सु भगशब्दः वेशश्चासौ भगश्च श्रीप्रभृतिर्वेशोभगः सोस्य
स्तीति वेशोभग्यः यशोभग्यः वेशोयशआदेर्भगांतात्प्रातिपदिकान्मत्वर्थे खः प्रत्ययो भवति। योगविभागो यथासंख्यनिसार्थश्च
चकाराद्यत्। वेशोभग्यः वेशोभगीनः। यशो विद्यते स्य यशोभग्यः यशोभगीनः॥१६॥पूर्वैः कृतमिनयौ च॥ मत्वर्थ इति नि
वृत्तं निर्देशादेव समर्थविभक्तिः। पूर्वशब्दात्तृतीयासमर्थात्कृतमित्येतस्मिन्नर्थे इनयइत्येतौ प्रत्ययौ भवतः। चकारात्ख
श्चापथिभिः पूर्विणः पूर्व्यः पूर्वीणा इति। पूर्वैरिति बहुवचनांतेन पूर्वपुरुषा उच्यंते। तत्कृताः पंथानः प्रशस्ता इति पथांत्र

का०४ शंसा ॥१७॥ अद्भिः संस्कृतम् ॥ निर्देशादेव समर्थविभक्तिः अप्शब्दात्तृतीयासमर्थात्संस्कृतमित्येतस्मिन्नर्थे यत् प्रत्ययो
५९ भवति। यस्येदमप्यं हविः। अद्भिः संस्कृतमित ॥१८॥ सहस्रेण सम्मितौ घः ॥ निर्देशादेव समर्थविभक्तिः सहस्रशब्दात्तृतीया
समर्थात्सम्मित इत्येतस्मिन्नर्थे घः प्रत्ययो भवति सम्मितस्तुल्यः सदृशः। अयमग्निः सहस्रियः। सहस्रतुल्य इत्यर्थः के
चित्तु सम्मिनाविति पठंति। तत्रापि सम्मित एव लक्षयितव्यः। तत्र छंदसि प्रयोगदर्शनात् ॥१९॥ मतौ च ॥ मत्वर्थे च सहस्र
शब्दाद्घः प्रत्ययो भवति। सहस्रमस्य विद्यते सहस्रियः। तपः सहस्राभ्यां विनीनौ अणं चेत्यस्यापवादः ॥२०॥ सोममर्हति
यः ॥ निर्देशादेव समर्थविभक्तिः सोमशब्दाद्द्वितीयासमर्थादर्हतीत्येतस्मिन्नर्थे यः प्रत्ययो भवति। सोममर्हति सोम्यः ब्राह्मणः
यज्ञार्ह इत्यर्थः। यति प्रकृते यग्रहणं स्वरे विशेषः ॥२१ मये च। सोमग्रहणं यश्चानुवर्त्तते। मयडिति मयडर्थो लक्ष्यते सोम
शब्दान्मयडर्थे यः प्रत्ययो भवति। आगतविकारावयवप्रकृता मयडर्थाः। हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः मयट् च। मयड्वैत
योर्भाषायामभक्ष्याच्छादनयोः तत्प्रकृतवचने मयडिति। तत्र यथायोगं समर्थविभक्तिः सौम्यम्मधुपिबन्ति सोममयमित्यर्थः
॥ मधोः ॥ यः शब्दोऽनिवृत्तः मधुशब्दान्मयडर्थे यत्प्रत्ययो भवति। मधव्यान्नस्तोकं मधुमयानित्यर्थः ॥२३॥ वसोः समूहे च
॥ वसुशब्दात्समूहे वाच्ये यत्प्रत्ययो भवति चकारान्मयडर्थे च। यथायोगं समर्थविभक्तिः वसव्यः समूहः मयडर्थो वा अक्षरसमू
हे छंदसः स्वार्थ उपसंख्यानं। ओंश्रावयेति चतुरक्षरं अस्तु श्रौषडिति चतुरक्षरं। जेजेति द्व्यक्षरं। योजजामहे इति पं
चाक्षरं व्यक्षरो वषट्कारः। एवं वै सप्तदशाक्षरश्छंदस्यः। प्रजापतिर्यज्ञमंत्रे विहितः। सप्तदशाक्षराण्येव छंदस्य इत्यर्थः
छंदः शब्दद्क्षरसमूहे वर्तमानात्स्वार्थे यत्प्रत्ययः। वसुशब्दादपि यद्वक्तव्यः। हस्तौ गृह्णीतस्य वासुर्वीर्वसव्यैर्वसुभिरित्यर्थः ५३
अग्नेरीशे वसव्यावसोरित्यर्थः। नक्षत्राद्घः। नक्षत्रशब्दाद्घः प्रत्ययो भवति स्वार्थे समूह इति नानुवर्त्तते। नक्षत्रियेभ्यः स्वाहा

सर्वदेवात्तातिल् ॥ सर्वदेवशब्दाभ्यां तातिल् प्रत्ययो भवति छंदसि विषये स्वार्थिकः। सर्वतातिः। देवतातिः। शिवशमरिष्टस्य करे
करोतीति करः प्रत्ययार्थः। तत्सामर्थ्याल्लब्धा षष्ठी समर्थविभक्तिः। शिवादिभ्यः शब्देभ्यः षष्ठीसमर्थेभ्यः करः इत्येतस्मिन्नर्थे ता
तिल् प्रत्ययो भवति शिवं करोतीति शिवतातिः शंतातिः। अरिष्टतातिः। भावे च। भावे चार्थे छंदसि विषये शिवादिभ्यस्तातिल् प्र
त्ययो भवति। शिवस्य भावः। शिवतातिः। शंतातिः। अरिष्टतातिः। यतः पूर्णावधिरतः परमन्यः प्रत्ययो विधीयते ॥ इति काशि
कायां वृत्तौ चतुर्थोऽध्यायः समाप्तः॥ ॥शुभमस्तु॥ ७॥ ॥ ७॥ ॥ ७॥ ॥ ७॥

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

का०४
६०

Dr BHAU DAJI MEMORIAL